# संस्कृतव्याकरणम्

कक्षा ८



नेपालसर्वकारः
शिक्षाविज्ञानप्रविधिमन्त्रालयः
पाठ्यक्रमविकासकेन्द्रम्
सानोठिमी-भक्तपुरम्

# संस्कृतव्याकरणम्

कक्षा
८

नेपालसर्वकारः
शिक्षाविज्ञानप्रविधिमन्त्रालयः
पाठ्यक्रमविकासकेन्द्रम्
सानोठिमी–भक्तपुरम्

प्रकाशकः

**नेपालसर्वकारः**

**शिक्षाविज्ञानप्रविधिमन्त्रालयः**

**पाठ्यक्रमविकासकेन्द्रम्**

**सानोठिमी–भक्तपुरम्**

प्रस्तुतपाठ्यपुस्तकसम्बन्धिनः सर्वेऽधिकाराः पाठ्यक्रमविकासकेन्द्रस्य स्वामित्वेऽन्तर्निहितास्सन्ति । लिखितां स्वीकृतिं विनाऽस्य पुस्तकस्य पूर्णभागस्य एकांशस्य वा यथावत् प्रकाशनम्, परिवर्त्य प्रकाशनं तथा केनाऽपि वैद्युतेन साधनेन अन्येन प्रविधिना वा यन्त्रप्रयोगेण प्रतिलिपिनिस्सारणञ्च सर्वथा निषिद्धं वर्तते ।

सर्वेऽधिकाराः प्रकाशकाधीनाः

प्रथमसंस्करणम् - २०८०

# अस्मदीयं कथनम्

विद्यालयस्तरीयशिक्षामुद्देश्यप्रधानां व्यावहारिकीं सामयिकीं वृत्तिदायिनीं च विधातुं समये समये पाठ्यक्रम-पाठ्यपुस्तकविकास-परिमार्जनानुकूलनकार्याणि निरन्तरं सञ्चाल्यमानानि सन्ति । विद्यार्थिषु राष्ट्रराष्ट्रियते प्रति सम्मानभावनामुद्भाव्य नैतिकानुशासन-स्वावलम्बनादि-सामाजिक-चारित्रिक-गुणानामाधारभूत-भाषिकशिल्पस्य विकासपूर्वकं सहयोगात्मकस्य दायित्वपूर्णस्य चाऽऽचरणस्य विकासोऽप्यत्वे आवश्यको दृश्यते । अस्या एवावश्यकतायाः परिपूर्तये शिक्षासम्बद्धैर्महानुभावैः सम्मिलितानां गोष्ठीनामन्तःक्रियायाश्च निष्कर्षेण निर्मितं २०७८ तमस्य वैक्रमाब्दस्य पाठ्यक्रममनुसृत्य पुस्तकमिदं निर्मितं वर्तते । शिक्षा विद्यार्थिषु वर्तमानस्य ज्ञानपक्षस्यान्वेषणं विधाय शिक्षणशिल्पेन जीवनस्य सम्बन्धं स्थापयति । शिक्षया विद्यार्थिषु स्वाधिकारस्य, स्वतन्त्रतायाः, समानतायाश्च प्रवर्धनाय, स्वस्थजीवनस्याभ्यासाय, तार्किकविश्लेषणेन निर्णयाय, वैज्ञानिकविश्लेषणेन व्यक्ति-समाज-राष्ट्राणां सबलविकासाय चाग्रेसरणशीलं सामर्थ्यं विकसनीयम् । एवं व्यक्तेः नैतिकाचरणप्रदर्शनाय, सामाजिकसद्भावप्रवर्धनाय, पर्यावरणस्य समुचितप्रयोगशिक्षणाय, दृढशान्तौ प्रतिबद्धतायै च शिक्षायाः आवश्यकता समाजे अवलोक्यते । तेन समाजसापेक्षतया ज्ञान-शिल्प-सूचना-सञ्चार-प्रविधीनां प्रयोगसमर्थाः, स्वावलम्बिनः, व्यावसायिकशिल्पाभ्यासनिरताः, राष्ट्रं राष्ट्रियतां राष्ट्रियादर्शं च प्रति सम्मानविधायकाः, समाज-स्वीकार्याः, सदाचरणशीलाः, स्वसंस्कृति-संस्कारपालनपराः, परसंस्कृत्यादिषु सहिष्णवश्च नागरिकाः शिक्षया निर्मातव्याः । एवं कल्पनाशीलानां रचनाशिल्पिनाम्, नैरन्तरिकपरिश्रमेणोद्यमशीलानाम्, विचारे उदात्तानाम्, व्यवहारे आदर्शमयानाम्, सामयिकसमस्यानां व्यवस्थापने साफल्याधायकानाम्, स्वावलम्बिनाम्, देशभक्तानाम्, परिवर्तनोद्यतानाम्, चिन्तनशीलानाम्, समावेशिसमाजनिर्माणे योगदानं करिष्यमाणानां च नागरिकाणां निर्माणं शिक्षया विधातव्यमिति समाजस्यापेक्षा दृश्यते । इमानेव पक्षान् विचार्य 'राष्ट्रिय-पाठ्यक्रम-प्रारूप, २०७६' इत्यनुसारेण निर्मितस्य संस्कृतव्याकरणविषयकपाठ्यक्रमस्याधारेण अष्टम्याः कक्षायाः पाठ्यपुस्तकमिदं विकसितं वर्तते ।

इदं पुस्तकं उपेन्द्रः दाहाल, निश्चलः अधिकारी, भीमप्रसादः खतिवडा, पुरुषोत्तमः घिमिरे-प्रभृतीनां महानुभावानां कार्यदलेन परिमार्जितं सम्पादितञ्चास्ति । अस्य पाठ्यपुस्तकस्य

विकासे पाठ्यक्रमसिद्धान्तसंरचनयोः नवीनतमधारणामनुसृत्य परम्परागतानां शिल्पानामनुसरणं कृतमस्ति । अस्मिन् कार्ये अस्य केन्द्रस्य महानिर्देशकः वैकुण्ठप्रसादः अर्याल, प्रा.डा. माधवशरणः उपाध्याय, प्रा.डा. आनन्दप्रसादः घिमिरे, प्रा.डा. ऋषिरामः पौडेल, शिवराजः लामिछाने, टुकराजः अधिकारी-प्रभृतीनां महानुभावानां विशेषसहयोगो विद्यते । अस्य रूपसज्जा भक्तबहादुरः कार्की इत्याख्येन महानुभावेन कृतमस्ति ।

पाठ्यपुस्तकं शिक्षणप्रक्रियाया महत्त्वपूर्णसाधनं भवतीति नाविदितं शेमुषीमताम् । सानुभवाः शिक्षकाः, जिज्ञासवश्छात्राः, सविधिकर्मकराश्च पाठ्यक्रमलक्ष्यीकृतान् विषयान् नैकविधस्रोतसां साधनानाञ्चोपभोगेन अध्यापयितुमध्येतुं कर्म कर्तुं च प्रभवन्ति । अनेकैः कारणैः सर्वेष्वेव विद्यालयेषु सरलतया पाठ्योपकरणानामुपलब्धेरभावाद् अध्ययनकार्यं केवलं पाठ्यपुस्तकाश्रितं भवतीति तथ्यमात्मसात्कृत्य प्रस्तुतमिदं पाठ्यपुस्तकं यथासम्भवं स्तरयुतं विधातुं प्रयासो विहितः, तथापि पाठ्यपुस्तकेऽस्मिन् यत्र यत्र त्रुटयोऽल्पताश्च विदुषां दृष्टिपथमागच्छेयुस्तत्र तत्र परिष्कारे परिवर्धने च दृग्गोचरीभूतानां त्रुटीनां परिमार्जनादिकार्यजाताय परामर्शप्रदानविधौ शिक्षकच्छात्राभिभावकपाठकविशेषज्ञानां महती प्रभावकारिणी भूमिका भवति । अत उक्तविषयेषु रचनात्मकपरामर्शदानेनोपकर्तुं पाठ्यक्रमविकासकेन्द्रमिदं तांस्तान् सर्वानेव महानुभावान् सप्रश्रयमभ्यर्थयते ।

नेपालसर्वकारः

**शिक्षाविज्ञानप्रविधिमन्त्रालयः**

**पाठ्यक्रमविकासकेन्द्रम्**

# विषयसूची


| पाठसङ्ख्या | पाठः | पृष्ठसङ्ख्या |
|---|---|---|
| प्रथमः | अथ ण्यन्तप्रक्रिया | १ |
| द्वितीयः | अथ सन्नन्तप्रक्रिया | ९ |
| तृतीयः | अथ यङन्तप्रक्रिया | १६ |
| चतुर्थः | अथ नामधातवः | २५ |
| पञ्चमः | अथात्मनेपदप्रक्रिया | ३३ |
| षष्ठः | अथ परस्मैपदप्रक्रिया | ४१ |
| सप्तमः | अथ भावकर्मप्रक्रिया | ४६ |
| अष्टमः | अथ लकारार्थप्रक्रिया | ५९ |
| नवमः | अथ कृदन्तप्रकरणे कृत्यप्रक्रिया | ६७ |
| दशमः | अथ पूर्वकृदन्तम्<br>(ण्वुल्-तृजादिडान्तप्रत्ययानां निरूपणम्) | ७७ |
| एकादशः | पूर्वकृदन्ते क्तक्तवत्वादिप्रत्ययाः | ९२ |
| द्वादशः | अथोत्तरकृदन्तप्रकरणम् | १०८ |
| त्रयोदशः | अथ विभक्त्यर्थप्रकरणम् (कारकप्रकरणम्) | १३० |
| चतुर्दशः | अथ समासप्रकरणम् | १४४ |
| पञ्चदशः | अथाव्ययीभावसमासः | १४९ |
| षोडशः | अथ तत्पुरुषसमासः | १५९ |

| पाठसङ्ख्या | पाठः | पृष्ठसङ्ख्या |
|---|---|---|
| सप्तदशः | अथ बहुव्रीहिसमासः | १८१ |
| अष्टादशः | अथ द्वन्द्वसमासः | १९३ |
| एकोनविंशः | तद्धितप्रकरणम् <br> अथापत्याधिकारप्रकरणम् | २०२ |
| विंशः | अथ रक्ताद्यर्थकप्रकरणम् <br> (रक्ताद्यर्थकाः, चातुरर्थिकाश्च) | २१८ |
| एकविंशः | अथ तद्धितेषु <br> (शैषिकाः, विकारार्थकाश्च) | २३१ |
| द्वाविंशः | तद्धितेषु <br> ठगधिकाराः यदधिकाराः छ्यतोधिकाराः ठञधिकाराः <br> त्वतलोधिकाराः भवनाद्यर्थकाः | २४७ |
| त्रयोविंशः | अथ तद्धितेषु <br> मत्वर्थीयाः प्राग्दिशीयाः प्रागिवीयाः स्वार्थिकाश्च | २७० |
| चतुर्विंशः | अथ स्त्रीप्रत्ययप्रकरणम् | २९३ |

# अथ ण्यन्तप्रक्रिया

## पाठपरिचयः

तिङन्तेष्वन्यतमं ण्यन्तप्रकरणम् । अत्र भ्वादिगणात् चुरादिगणपार्यन्तिकानां धातूनामेव ण्यन्ते रूपसिद्धिप्रक्रिया प्रतिपाद्यते न तु नूतनाः धातवो निरूप्यन्ते । अत एवास्य प्रकरणस्य नाम ण्यन्तप्रकरणम् । सामान्यधातूनां प्रेरणार्थे धातुभ्यो णिच्प्रत्ययो भवति । सामान्यधातवः, ण्यन्तधातवश्च भिन्नाः "सनाद्यन्ता धातवः" इति सूत्रेण पुनः धातुसंज्ञाया विधानात् । अत्र प्रकरणे कतिचिद्ण्यन्तधातूनामेव प्रतिनिधिरूपेण दिङ्निरूपणं कृतं वर्तते ।

## प्रकृतपाठस्थकतिपयमहत्त्वाधायिनो विषयाः

- कर्ता = क्रियायाः सम्पादने स्वातन्त्र्येण प्रधानतया विवक्षितं वस्तु ।
- प्रयोजककर्ता = कर्तुः प्रेरकः ण्यन्तधातुवाच्यकर्ता ।
- ण्यन्तधातवः सदा सकर्मका एव भवन्ति ।
- णिच्विधानानन्तरं सर्वे धातव अनेकाच्का भवन्ति अत एव सर्वे ण्यन्तधातवः सेड्धातवो भवन्ति ।
- सर्वे ण्यन्तधातवः "णिचश्च" इति सूत्रेण उभयपदिनो भवन्ति । ण्यन्तधातूनां परस्मैपदात्मनेपदयोः
  सर्वेषु लकारेषु सर्वेषु वचनेषु च रूपाणि चलन्ति ।
- अत्र पाठे प्रतिनिधिरूपेण भू सत्तायाम्, ष्ठा गतिनिवृत्तौ, घट चेष्टायाम्, ज्ञप ज्ञाने चेति धातवः विवेचिताः सन्तीत्यतः विद्यार्थिभिः अत्र विशेषेण ध्यानं देयम् ।

कर्तृसंज्ञाविधायकं सूत्रम्-

**स्वतन्त्रः कर्ता १ । ४ । ५४**

**क्रियायां स्वातन्त्र्येण विवक्षितोऽर्थः कर्ता स्यात् ।**

(कारके, स्वतन्त्रः, कर्ता)

***सरलार्थः-*** *स्वतन्त्रः प्रधानभूतः । क्रियायाः सिद्धौ प्रधानतया यः स्वतन्त्रतया विवक्ष्यते तत् कारकं कर्तृसंज्ञं भवति ।*

कर्तृसंज्ञाविधायकं हेतुसंज्ञाविधायकञ्च सूत्रम्-

**तत्प्रयोजको हेतुश्च १। ४। ५५**

**कर्तुः प्रयोजको हेतुसंज्ञः कर्तृसंज्ञश्च स्यात्।**

(तत्प्रयोजकः, कर्ता, हेतुः, च)

***सरलार्थः-*** *कर्तुः प्रयोजकः = कर्तुः प्रवर्तयिता, हेतुसंज्ञकः कर्तृसंज्ञकश्च भवति।*

*यथा- 'खादन्तं देवदत्तं यज्ञदत्तः प्रेरयति' अत्र यज्ञदत्तः खादनक्रियाया हेतुः कर्ता च भवतीत्यर्थः। अत्र देवदत्तरूपकर्ता प्रयोज्यः, यज्ञदत्तरूपप्रेरणाकर्ता तु प्रयोजकः। 'देवदत्तः भवति' अस्मिन् वाक्ये देवदत्तः प्रयोज्यकर्ता भवति। 'भवन्तं देवदत्तं यज्ञदत्तः प्रेरयति अर्थात् यज्ञदत्तः देवदत्तं भावयति' अत्र यज्ञदत्तः प्रयोजककर्ता भवति।*

णिच्प्रत्ययविधायकं विधिसूत्रम्-

**हेतुमति च ३। १। २६**

**प्रयोजकव्यापारे प्रेरणादौ वाच्ये धातोर्णिच् स्यात्। भवन्तं प्रेरयति भावयति**

(धातोः, हेतुमति च, णिच्, प्रत्ययः, परश्च)

***सरलार्थः-*** *प्रयोजकस्य कर्तुः प्रेरणादिके व्यापारे वाच्ये सर्वेभ्यो धातुभ्यो णिच्-प्रत्ययो भवति। 'भवन्तं प्रेरयति' अस्मिन् वाक्ये द्वौ कर्तारौ स्तः- भुवः कर्ता, प्रेरणाकर्ता च। अतः 'भवन्तं (देवदत्तम्) (यज्ञदत्तः) प्रेरयति' इत्यर्थे भू-धातोर्णिचि- भावयतीति रूपं निष्पद्यते। यथा - भवन्तं देवदत्तं यज्ञदत्तः प्रेरयतीत्यर्थे "स्वतन्त्रः कर्ता" इति सूत्रेण 'देवदत्त' इत्यस्य कर्तृसंज्ञायाम्, कर्तृप्रयोजकस्य यज्ञदत्तस्य "तत्प्रयोजको हेतुश्च" इति हेतुसंज्ञायां कर्तृसंज्ञायाञ्च जातायां, "हेतुमति च" इत्यनेन प्रयोजककर्तुः यज्ञदत्तस्य प्रेरणाव्यापारबोधकाद् भू-धातोः णिच्यनुबन्धलोपे, 'भू + इ' इति जाते, "अचो ञ्णिति" इति वृद्धौ, आवादेशे, 'भावि' इत्यस्य "सनाद्यन्ता धातवः" इति धातुसंज्ञायां, लटि, तिपि, शपि, गुणेऽयादेशे च कृते, 'भावयति' इति सिद्ध्यति।*

*क्रियाफले कर्तृगामिनि विवक्षिते सति "णिचश्च" इत्यात्मनेपदे ते, टेरेत्वे, शपि, गुणेऽयादेशे - भावयते इति च भवति। यज्ञदत्तो देवदत्तं भावयति, भावयते वा।*

*एवमेव -*

*खादन्तं प्रेरयति → खादयति, खादयते।*

*गच्छन्तं प्रेरयति → गमयति, गमयते।*

*पठन्तं प्रेरयति → पाठयति, पाठयते।*

*पचन्तं प्रेरयति → पाचयति, पाचयते ।*

*कुर्वन्तं प्रेरयति → कारयति, कारयते । इत्यादयः ।*

*लिटि - 'भवन्तं देवदत्तं यज्ञदत्तः प्रेरयाञ्चकार' इत्यर्थे भावयाञ्चकार, भावयाञ्चक्रे, भावयाम्बभूव, भावयामास, इत्यादीनि रूपाणि भवन्ति ।*

*लुटि - 'भवन्तं देवदत्तं यज्ञदत्तः प्रेरयिता' इत्यर्थे - भावयिता, भावयिता ।*

*लृटि - 'भवन्तं देवदत्तं यज्ञदत्तः प्रेरयिष्यति' इत्यर्थे - भावयिष्यति, भावयिष्यते ।*

*लोटि - 'भवन्तं देवदत्तं यज्ञदत्तः प्रेरयतु' इत्यर्थे - भावयतु, भावयताम् ।*

*लङि - 'भवन्तं देवदत्तं यज्ञदत्तः प्रैरयत्' इत्यर्थे - अभावयत्, अभावयत ।*

*विधिलिङि - 'भवन्तं देवदत्तं यज्ञदत्तः प्रेरयेत्' इत्यर्थे - भावयेत्, भावयेत ।*

*आशीर्लिङि - 'भवन्तं देवदत्तं यज्ञदत्तः प्रेर्यात्' इत्यर्थे - भाव्यात्, भावयिषीष्ट ।*

**लुङि तु विशेषः -**

उकारस्य इकारादेशविधायकं विधिसूत्रम्

**ओः पुयण्ज्यपरे ७ । ४ । ८०**

**सनि परे यदङ्गं तदवयवाभ्यासोकारस्य इत्स्यात् पवर्गयण्जकारेष्ववर्णपरेषु परतः । अबीभवत् । ष्ठा गतिनिवृत्तौ ।१।**

(अङ्गस्य, अभ्यासस्य, ओः, इत्, पुयण्जि, अपरे)

***सरलार्थः-*** *अवर्णपरकेषु पवर्गयण्जकारेषु परेषु सन्परकस्याङ्गस्यावयवस्य अभ्यासोकारस्य स्थाने इकारादेशो भवति ।*

*'भवन्तं देवदत्तं यज्ञदत्तः प्रैरिरत्' इत्यर्थे भू-धातोः णिचि, 'भू + इ' इत्यवस्थायाम्, "अचो ञ्णिति" इति वृद्धौ प्राप्तायां, 'णिच्यच आदेशो न द्वित्वे कर्तव्ये' इति परिभाषया द्वित्वनिषेधे, 'भू + इ' इत्यस्य धातुसंज्ञायां, तस्माल्लुङि, अडागमे, 'अभू इ ल्' इति जाते, लस्य तिपि, च्लौ, च्लेरङि, 'अभू इ अ ति' इत्यवस्थायाम् "इतश्चे"ति तेरिलोपे, "चङि" इति द्वित्वे, ह्रस्वे, जश्त्वे, 'अबुभू इ अत्' इति जाते, "सन्वल्लघुनि चङ्परेऽनग्लोपे" इति सन्वद्भावे, "ओः पुयण्ज्यपरे" इति अभ्यासस्य ओरित्वे, 'अबि भव् इ अत्' इति जाते, "दीर्घो लघोः" इत्यभ्यासस्येकारस्य दीर्घे 'अबी भव् इ अत्' इत्यवस्थायां "णेरनिटि" इति णिलोपे, वर्णयोगे 'अबीभवत्' इति सिद्धम् । एवमेव आत्मनेपदे - अबीभवत ।*

***लृङि -*** *'भवन्तं देवदत्तं यज्ञदत्तः प्रैरयिष्यत्' इत्यर्थे - अभावयिष्यत्, अभावयिष्यत ।*

*गतिनिवृत्त्यर्थकः ष्ठा-धातुः षोपदेशः । "धात्वादेः षः सः" इति सत्वे, (निमित्तापाये नैमित्तिकस्याप्यपायः) स्था-धातुः -अनिडकर्मकः) ।*

पुगागमविधायकं विधिसूत्रम्-

**अर्तिह्रीब्लीरीक्नूयीक्ष्माय्यातां पुङ् णौ ७ । ३ । ३६**

**स्थापयति ।**

(अर्तिह्रीब्लीरीक्नूयीक्ष्माय्याताम्, अङ्गस्य, पुक्, णौ)

***सरलार्थः-*** *ऋ-ह्री-ब्ली-री-क्नूयी-क्ष्मायीधातूनाम् आकारान्तानां धातूनाञ्च णिपरे पुगागमो भवति ।*

*'तिष्ठन्तं देवदत्तं यज्ञदत्तः प्रेरयति' इत्यर्थे स्था-धातोर्णिचि 'स्था + इ' इत्यवस्थायाम् अनेन सूत्रेण पुगागमेऽनुबन्धलोपे - स्थापि । 'स्थापि' इत्यस्य धातुसंज्ञायां, तस्माल्लटि, तिपि, शपि, गुणेऽयादेशे - 'स्थापयति' इति । आत्मनेपदे तु स्थापयते । एवमेव - स्थापयाञ्चकार, स्थापयिता, स्थापयिष्यति, स्थापयतु, अस्थापयत्, स्थापयेत्, स्थाप्यादादयोऽपि पूर्ववदेव । लुङि तु - स्थापि-धातोर्लुङि, अडागमे, तिबादिकार्ये 'अस्थाप् इ अत्' इत्यवस्थायाम् -*

ह्रस्वेकारादेशविधायकं विधिसूत्रम्-

**तिष्ठतेरित् ७ । ४ । ५**

**उपधाया इदादेशः स्याच्चङ्परे णौ ।**

**अतिष्ठिपत् । घट चेष्टायाम् ।२।**

(तिष्ठतेः, अङ्गस्य, उपधायाः, इत्, चङि, णौ)

***सरलार्थः-*** *स्था-धातोरुपधायाः स्थाने ह्रस्व-इकारादेशो भवति, चङ्परे णौ परे सति ।*

*अनेन उपधाया इदादेशे 'अस्थिप् इ अत्' इति जाते, द्वित्वे, "शर्पूर्वाः खयः" इत्यभ्यासस्य सकारस्य लोपे 'अथि स्थिप् इ अत्' इति जाते, "अभ्यासे चर्च" इत्यभ्यासस्य थकारस्य चर्त्वेन तकारादेशे, "णेरनिटि" इति णिलोपे, षत्वे, ष्टुत्वे च कृते 'अतिष्ठिपत्' इति । आत्मनेपदे - अतिष्ठिपत । लृङि - अस्थापयिष्यत्, अस्थापयिष्यत ।*

***घट****-धातुश्चेष्टाकरणेऽर्थे वर्तते । (आत्मनेपदी, सेडकर्मकः)*

ह्रस्वादेशविधायकं विधिसूत्रम्-

**मितां ह्रस्वः ६ । ४ । ९२**

**घटादीनां ज्ञपादीनां चोपधाया ह्रस्वः स्याण्णौ । घटयति ।**

**ज्ञप ज्ञाने ज्ञापने च ।३। ज्ञपयति । अजिज्ञपत् ।**

(मिताम्, अङ्गस्य, उपधायाः, णौ, ह्रस्व)

***सरलार्थः-*** *णिपरे सति घटादिधातूनां ज्ञपादिधातूनां च उपधायाः स्थाने ह्रस्वादेशो भवति ।*

*घटमानं प्रेरयतीत्यर्थे घट्-धातोर्णिचि, उपधावृद्धौ 'घाटि' इति जाते, "मितां ह्रस्वः" इति उपधाया ह्रस्वे 'घटि' धातुः । घटिधातोर्लटि, तिपि, शपि, गुणादिकार्ये 'घटयति' इति रूपम् । आत्मनेपदे - घटयते । लुङि - अजीघटत्, अजीघटत ।*

***ज्ञप-***धातुः *ज्ञानेऽर्थे ज्ञापनेऽर्थे चास्ति । (सेट्, अर्थवशात् सकर्मकाकर्मकौ)*

*ज्ञप्-धातोश्चुरादित्वात् स्वार्थे णिचि, 'ज्ञप् + इ' इत्यवस्थायां, 'ज्ञपन्तं प्रेरयति' इत्यर्थे प्रेरणार्थे णिचि, 'ज्ञप् इ इ' इति जाते, "णेरनिटि" इति पूर्वस्य णेर्लोपे 'ज्ञप् इ' इति जाते, उपधावृद्धौ 'ज्ञाप् इ', "मितां ह्रस्वः' इत्युपधाया आकारस्य ह्रस्वे 'ज्ञपि' धातुः, तस्माल्लटि, तिपि, शबादिकार्ये - ज्ञपयति । एवमेव - ज्ञपयते । लुङि - अजिज्ञपत्, अजिज्ञपत । अत्र अभ्यासस्य गुरुत्वात् "दीर्घो लघोः" इति सूत्रस्य प्रवृत्तिर्न भवति ।*

## प्रयोगसिद्धिप्रकारः

### भावयति / भावयते

भवन्तं प्रेरयतीत्यर्थे भू-धातोः णिच्यनुबन्धलोपे, 'भू + इ' इति जाते, "अचो ञ्णिति" इति सूत्रेण वृद्धौ, 'भौ + इ' इति जाते, आवादेशे, 'भावि' इति जाते, 'भावि' इत्यस्य "सनाद्यन्ता धातवः" इति सूत्रेण धातुसंज्ञायां, तस्माल्लटि, तिपि, शपि, गुणेऽयादेशे च कृते, 'भावयति' इति रूपं सिद्धम् । क्रियाफले कर्तृगामिनि विवक्षिते सति भाविधातोर्लटि, लस्य स्थाने "णिचश्च" इत्यात्मनेपदे तादेशे, टेरेत्वे, शपि, गुणेऽयादेशे 'भावयते' इति रूपञ्च सिद्ध्यति ।

### अबीभवत्

'भवन्तं देवदत्तं यज्ञदत्तः प्रैरिरत्' इत्यर्थे भू-धातोः "हेतुमति च" इति सूत्रेण णिचि, 'भू + इ' इत्यवस्थायाम्, "अचो ञ्णिति" इति वृद्धौ प्राप्तायां, 'णिच्यच आदेशो न द्वित्वे कर्तव्ये' इति परिभाषया न द्वित्वे, 'भू + इ' इत्यस्य धातुसंज्ञायां, तस्माल्लुङि, अडागमे, 'अभू इ ल्' इति जाते, लस्य तिपि, च्लौ, च्लेरङि, 'अभू इ अ ति' इत्यवस्थायाम् "इतश्चे"ति तेरिलोपे, 'अभू इ अत्' इति जाते, "चङि" इति द्वित्वे, ह्रस्वे, जश्त्वे, 'अबुभू इ अत्' इति जाते, "सन्वल्लघुनि चङ्परेऽनग्लोपे" इति सन्वद्भावे, "ओः पुयण्ज्यपरे" इति अभ्यासस्य ओरित्वे, 'अबि भव् इ

अत्' इति जाते, "दीर्घो लघोः" इत्यभ्यासस्येकारस्य दीर्घे 'अबी भव् इ अत्' इत्यवस्थायां "णेरनिटि" इति णिलोपे, वर्णयोगे 'अबीभवत्' इति रूपं सिद्धम् । (आत्मनेपदे - अबीभवत ।)

## ज्ञपयति

ज्ञप्-धातोश्चुरादित्वात् "सत्यापपाश........" इत्यादिना सूत्रेण स्वार्थे णिचि, 'ज्ञप् + इ' इत्यवस्थायां, 'ज्ञपन्तं प्रेरयति' इत्यर्थे "हेतुमति च" इति सूत्रेण प्रेरणार्थे णिचि 'ज्ञप् इ इ' इति जाते, "णेरनिटि" इति सूत्रेण पूर्वस्य णेर्लोपे 'ज्ञप् इ' इति जाते, उपधावृद्धौ 'ज्ञाप् इ' इति जाते, "मितां ह्रस्वः' इत्युपधाया आकारस्य ह्रस्वे 'ज्ञपि' इति जाते, धातुसंज्ञायां, तस्माल्लटि, तिपि, शपि, गुणेऽयादेशे 'ज्ञपयति' इति रूपं सिद्धम् । (आत्मनेपदे - ज्ञपयते)

### अभ्यासार्थाः प्रश्नाः

**१. अधस्तनसूत्राणि तेषामर्थञ्च लिखत**

(क) स्वतन्त्रः कर्ता  (ख) हेतुमति च  (ग) तत्प्रयोजको हेतुश्च
(घ) ओः पुयण्ज्यपरे  (ङ) तिष्ठतेरित्  (च) मितां ह्रस्वः

**२. प्रश्नानामुत्तराणि देयानि**

(क) कर्तुः प्रयोजकस्य केन सूत्रेण कर्तृसंज्ञा भवति ?

(ख) "स्वतन्त्रः कर्ता" इति सूत्रं कस्य कर्तृसंज्ञां करोति ?

(ग) प्रेरणार्थे केन सूत्रेण णिच्प्रत्ययो विधीयते ?

(घ) घटधातुः कस्मिन्नर्थेऽस्ति ?

(ङ) 'तिष्ठन्तं प्रैरयत्' इत्यर्थे स्था-धातोः किं रूपं भवति ?

(च) 'अर्तिह्री० ' इति सूत्रं पूरयत ।

(छ) 'अजिज्ञपत्' इत्यत्र "दीर्घो लघोः" इति सूत्रं कथं न प्रवृत्तम् ?

**३. अधोलिखितानि पदानि प्रयुज्य वाक्यानि रचयत**

पाठयति, दापयति, गमयति, कारयते, खादयति, भावयतु, भावयाञ्चक्रे, पाठयिष्यति, अखादयत्, गमयन्तु, भावयामि, पाठयिष्यामि, कारयाणि ।

**४. अधोलिखितानि वाक्यानि शुद्धानि कृत्वाऽभ्यासपुस्तिकायां सारयत**

(क) आचार्यश्छात्रान् पाठयन्ति ।

(ख) निर्देशकस्त्वां नायकं भावयन्तु ।

(ग) गुरवस्छात्रं पण्डितं भावयति ।

(घ) आचार्यः विद्यार्थिनं शास्त्रं जानाति ।

(ङ) माता विप्रम् अन्नं भुङ्क्ते ।

**५. प्रत्ययान् संयुज्य निष्पन्नरूपाणि लिखत**

कृ + णिच् + लट्(वस्), गम् + णिच् + लिट्(तिप्), भू + णिच् + लुट्(तिप्), पठ् + णिच् + लोट्(त), भू + णिच् + लङ्(झ), कृ + णिच् + लङ्(सिप्), गम् + णिच् + लट्(मिप्), खाद् + णिच् + लिट्(त), ज्ञप् + णिच् + लुङ् +(तिप्), अनु + भू + णिच् + लङ्(तिप्), दृश् + णिच् + लट्(त), स्था + णिच् + लोट्(मस्) ।

**६. अधस्तनप्रयोगाणां सिद्धिप्रक्रियां दर्शयत**

भावयते, अबीभवत, अतिष्ठिपत्, अजिज्ञपत्, घटयति, अजीघटत्, स्थापयति ।

**७. समुचितपदं चित्वा रिक्तस्थानं पूरयत**

(क) 'स्थापि' इत्यस्य धातुसंज्ञा ........................ इति सूत्रेण भवति । (सनाद्यन्ता धातवः, भूवादयो धातवः)

(ख) गुरुश्छात्रं विद्वांसं .................. । (भवति, भावयति)

(ग) प्रेषणादिके व्यापारे वाच्ये .................. धातुभ्यो णिच्प्रत्ययो भवति । (सकर्मकेभ्यो, अकर्मकेभ्यो, सर्वेभ्यो)

(घ) णिजन्तधातवः .................. भवन्ति । (परस्मैपदिनो, आत्मनेपदिनो, उभयपदिनो)

(ङ) क्रियायां स्वातन्त्र्येण विवक्षितस्यार्थस्य ..................... इति सूत्रेण कर्तृसंज्ञा भवति । (स्वतन्त्रः कर्ता, तत्प्रयोजको हेतुश्च)

**८. णिजन्तस्य दाधातोर्लटि रूपाणि पूरयत**

| | | |
|---|---|---|
| दापयति | ................ | ................ |
| ................ | दापयथः | ................ |
| ................ | ................ | दापयामः |

**९. णिजन्तानाम् अर्च्-इष्-कृ-नम्-ज्ञा-खाद्-क्री-धातूनां लटि रूपाणि लिखत ।**

**अनुप्रयोगः**

१. **अधो लिखितानि वाक्यानि पठत**

(क) अहम् अनुजं चलचित्रं **दर्शयामि ।**

(ख) भ्राता भगिनीं कथां **पाठयति ।**

(ग) गुरुश्छात्रं शास्त्रम् **अध्यापयति ।**

(घ) पिता पुत्रम् आपणं **प्रापयति ।**

(ङ) माता शिशुं दुग्धं **पाययति ।**

(च) कौरवाः पाण्डवान् वनं **गमयन्ति ।**

(छ) आचार्यः ब्रह्मचारिणं गृहं **प्रवेशयति ।**

(ज) गायकः राजानं गानं **श्रावयति ।**

२. **णिच्प्रत्ययान्तानि पदानि प्रयुज्य एकमनुच्छेदं विलिख्य कक्षायां श्रावयत ।**

३. **उदाहरणमनुसृत्य अधस्तनानि वाक्यानि प्रेरणार्थे परिवर्तयत**

यथा - छात्रः पाठं पठति । → गुरुश्छात्रं पाठं पाठयति ।

(क) बालको दुग्धं पिबति ।

(ख) त्वं फलं खादसि ।

(ग) स नायको भवति ।

(घ) अनुजः कार्यं करोति ।

(ङ) पिता पुत्रान् कथयति ।

# अथ सन्नन्तप्रक्रिया

## पाठपरिचयः

तिङन्तेष्वन्यतमं सन्नन्तप्रकरणम् । भ्वादिगणात् चुरादिगणपार्यन्तिकेभ्यो धातुभ्यः इच्छायामर्थे सनि कृते द्वित्वादिषु च कार्येषु सन्नन्तधातवः सिद्धयन्ति । सन्प्रन्ययान्तधातूनां निरूपणाद् अस्य प्रकरणस्य नाम सन्नन्तप्रकरणम् । अत्र प्रकरणे कतिचिदेव सन्नन्तधातूनां प्रतिनिधिरूपेण रूपसिद्धिप्रक्रियायाः दिङ्निरूपणं कृतं वर्तते ।

## प्रकृतपाठस्थकतिपयमहत्त्वाधायिनो विषयाः

- इच्छायामर्थे सर्वेभ्यो धातुभ्यः सन्प्रत्ययो भवति ।
- सन्नन्तशब्दानां “सनाद्यन्ता धातवः” इति सूत्रेण धातुसंज्ञा विधीयते ।
- सन्नन्तधातुभ्यः मूलधातोरिव परस्मैपदात्मनेपदे भवतः । मूलधातुः परस्मैपदी चेत् सन्नतात् परस्मैपदम्, आत्मनेपदी चेत् सन्नन्तादप्यात्मनेपदम्, उभयपदी चेत् सन्नतादुभयपदे च भवन्ति ।
- अत्र प्रकरणे लघुसिद्धान्तकौमुद्यां सन्नन्तधातूनां निदर्शनरूपेण पठ्-अद्-कृ-भूधातूनामेव निरूपणं विहितमिति विद्यार्थिभिः विषयेऽस्मिन् विशेषतो ध्यानं देयम् ।

सन्प्रत्ययविधायकं विधिसूत्रम्-

**धातोः कर्मणः समानकर्तृकादिच्छायां वा ३ । १ । ७**

**इषिकर्मण इषिणैककर्तृकाद्धातोः सन्प्रत्ययो वा स्यादिच्छायाम् । पठ व्यक्तायां वाचि ।१।**

(धातोः, कर्मणः, समानकर्तृकाद्, इच्छायाम्, सन्, वा)

***सरलार्थः–*** *इच्छासमानकर्तृकत्वे सति इच्छाकर्मीभूतो यो व्यापारः तद्वाचकाद्धातोः विकल्पेन सन्-प्रत्ययो भवति, इच्छार्थे बोधिते सतीत्यर्थः ।*

***पठ–****धातोरन्त्याकार इत् । (सेट्, परस्मैपदी, सकर्मकः)*

*‘पठितुमिच्छति’ इत्यत्र पठ्-धातुः इष्-धातोः कर्मीभूतव्यापारबोधकः । पठ्-धातोः इष्-धातोश्च एकैव कर्ता । अत एव ‘पठितुमिच्छति’ इत्यर्थे पठ्-धातोरनेन सूत्रेण सन्यनुबन्धलोपे ‘पठ् स’ इति जाते, ‘स’ इत्यस्यार्धधातुकसंज्ञायामिडागमे ‘पठ् इ स’ इत्यवस्थायाम् -*

द्वित्वादेशविधायकं विधिसूत्रम्-

**सन्यङोः ६ । १ । ९**

**सन्नन्तस्य यङन्तस्य च धातोरनभ्यासस्य प्रथमस्यैकाचो द्वे स्तोऽजादेस्तु द्वितीयस्य । सन्यतः । पठितुमिच्छति पिपठिषति । कर्मणः किम् ? गमनेनेच्छति । समानकर्तृकात् किम् ? शिष्याः पठन्त्वितीच्छति गुरुः । वा ग्रहणाद्वाक्यमपि । "लुङ्सनोर्घस्लृ" ।**

(सन्यङोः, धातोः, अनभ्यासस्य, प्रथमस्य, एकाचः, द्वे, अजादेः, द्वितीयस्य)

***सरलार्थः-*** *अनेन प्रथमस्यैकाचः 'पठ्' इत्यस्य द्वित्वे, 'पठ् पठ् इस' इति जाते, अभ्यासकार्ये 'पपठ् इस' इत्यवस्थायाम्,* ***सन्यतः*** *७ । ४ । ७९ इति अभ्यासस्याकारस्य इत्वे, 'पिपठ् इस' इति जाते, सकारस्य षत्वे 'पिपठिष' इति जाते, सन्नन्तत्वाद्धातुसंज्ञायां 'पिपठिष' इति धातोर्लटि, 'पूर्ववत्सनः १ । ३ । ६३' इति सूत्रेण सनः पूर्वस्य पठ्-धातोः परस्मैपदत्वात् सन्नन्तात् पठ्-धातोरपि परस्मैपदे, लस्य स्थाने तिपि, शपि, पररूपे, 'पिपठिषति' इति सिद्ध्यति ।*

*सन्नन्तधातवोऽनेकाचो भवन्ति, अत एव "एकाच उपदेशेऽनुदात्तात्" इति न प्रवर्तते । सर्वे सन्नन्तधातवः सेटः ज्ञेयाः ।*

*सर्वेषां सन्नन्तधातूनामनेकाच्त्वाल्लिटि "कास्यनेकाच आम् वक्तव्यः" इत्यनेन आम् । 'पिपठिष + आम्' इत्यत्र "अतो लोपः" इति 'पिपठिष' इत्यस्याकारस्य लोपे 'पिपठिषाम्' इति, तस्मात् कृ-भू-अस्धातूनामनुप्रयोगः (कृञ्चानुप्रयुज्यते लिटि ३ । १ । ४०) । तेषामनुप्रयोगे क्रमेण पिपठिषाञ्चकार, पिपठिषाम्बभूव, पिपठिषामासेति रूपाणि भवन्ति । (अत्र स्थानिवद्भावेन लघूपधगुणनिषेधः, एवं लुट्यपि)* ***लुटि*** *– पिपठिषिता,* ***लृटि*** *– पिपठिषिष्यति,* ***लोटि*** *– पिपठिषतु,* ***लङि*** *– अपिपठिषत्,* ***विधिलिङि*** *– पिपठिषेत्,* ***आशीर्लिङि*** *– पिपठिष्यात्,* ***लुङि*** *– अपिपठिषीत्,* ***लृङि*** *– अपिपठिषिष्यत् ।*

***कर्मणः किम्*** *? इष्-धातोः कर्मीभूतव्यापारबोधकधातोरिति कथनस्यावश्यकता का इति प्रश्नः ?* ***'गमनेन इच्छति'*** *इति विग्रहे गम्-धातुः इष्-धातोः कर्मीभूतव्यापारबोधको नास्ति परन्तु करणीभूतव्यापारबोधकोऽस्ति । अत एवात्र सन्-प्रत्ययो न भवति । इष्-धातोः कर्मीभूतव्यापारबोधकधातोरेव सन्-प्रत्ययो भवतीत्यर्थः ।*

***समानकर्तृकात् किम्*** *? इति जिज्ञासायां* ***'शिष्याः पठन्तु इति इच्छति गुरुः'*** *इत्युदाहरणम् । अत्र पठ्-धातोः कर्ता शिष्यः, इष्-धातोः कर्ता गुरुः । अतः समानकर्तृकत्वाभावादत्र न सन्-प्रत्यय इत्यर्थः ।*

*"धातोः कर्मण०" इति सूत्रे 'वा' इति पदग्रहणात् पक्षे 'पठितुमिच्छति' इति वाक्यस्यापि प्रयोगो बोध्यः । यथा - स पिपठिषति, पठितुमिच्छति वा ।*

*अद्-धातोः सनि परे “लुङ्सनोर्घस्लृ २। ४। ३७” इति सूत्रेण ‘घस्लृ’ आदेशो भवति। ‘घस्लृ’ इत्यस्य लृकार इत्। ‘अत्तुमिच्छति’ इत्यर्थे अद्-धातोः सन्यनुबन्धलोपे, अदः घस्लृ-आदेशेऽनुबन्धलोपे ‘घस् + स’ इति जाते, प्राप्तस्येडागमस्य “एकाच उपदेशेऽनुदात्तात्” इति निषेधे, द्वित्वे ‘घस् घस् स’, हलादिशेषे ‘घ घस् स’, चुत्वे ‘झ घस् स’, जश्त्वे ‘ज घस् स’, ‘सन्यतः’ इतीत्वे ‘जिघस् स’ इत्यवस्थायाम् -*

सस्य तकारादेशविधायकं विधिसूत्रम्-

**सः स्यार्धधातुके ७। ४। ४९**

**सस्य तः स्यात्तादावार्धधातुके। अत्तुमिच्छति जिघत्सति। एकाच इति नेट्।**

(सः, अङ्गस्य, तः, आर्धधातुके, सि)

***सरलार्थः-*** *सकारादौ आर्धधातुकसंज्ञके प्रत्यये परे सति सकारस्य स्थाने तकारादेशो भवति।*

*अनेन ‘जिघस्’ इत्यस्य सकारस्य स्थाने तकारादेशे ‘जिघत्स’ इति, तस्य धातुसंज्ञायां, तस्माल्लटि, तिपि, शपि, पररूपे ‘जिघत्सति’ इति रूपम्।*

*सन्नन्तस्य अद्-धातोरन्येषु लकारेषु रूपाणि -*

***लिटि*** *- जिघत्साञ्चकार, जिघत्साम्बभूव, जिघत्सामास।* ***लुटि*** *- जिघत्सिता।* ***लृटि*** *- जिघत्सिष्यति।* ***लोटि*** *- जिघत्सतु।* ***लङि*** *- अजिघत्सत्।* ***विधिलिङि*** *- जिघत्सेत्।* ***आशीर्लिङि*** *- जिघत्स्यात्।* ***लुङि*** *- अजिघत्सीत्।* ***लृङि*** *- अजिघत्सिष्यत्।*

दीर्घादेशविधायकं विधिसूत्रम्-

**अज्झनगमां सनि ६। ४। १६**

**अजन्तानां हन्तेरजादेशगमेश्च दीर्घो झलादौ सनि।**

(अच्-हनगमाम्, अङ्गस्य, उपधायाः, दीर्घः, सनि, झलि)

***सरलार्थः-*** *झलादौ सनिपरे अजन्तानां धातूनां, हन्-धातोः, अचः स्थाने आदिश्यमानस्य गम्-धातोश्च स्थाने दीर्घो भवति।*

सनः किद्वद्विधायकमतिदेशसूत्रम्-

**इको झल् १। २। ९**

**इगन्ताज्झलादिः सन् कित् स्यात्। “ॠत इद्धातोः”। कर्तुमिच्छति चिकीर्षति।**

(इकः **धातोः**,झल्, सन्, कित्,)

*__सरलार्थः__– इगन्ताद् धातोः परो झलादिः सन् किद्वद् भवति ।*

*इति सनः कित्वाद् गुणनिषेधः, ततः "ऋृत इद्धातोः ७।१।१००" इति ऋकारस्येत्, रपरत्वञ्च ।*

*'कर्तुमिच्छति' इत्यर्थे कृ-धातोः सनि, 'कृ स' इति जाते, प्राप्तस्य इडागमस्य एकाच इति निषेधे, द्वित्वे 'कृ कृ स', "उरत्" इति सूत्रेण अभ्यासस्य ऋकारस्य स्थाने अत्वे रपरत्वे 'कर् कृ स' इति जाते, हलादिशेषे, चुत्वे 'चकृ स' "सन्यतः" इतीत्वे 'चिकृ स' इत्यवस्थायाम्, "अज्झनगमां सनि" इति सूत्रेण अजन्तधातुत्वाद् ऋकारस्य दीर्घे, 'चिकॄ स' इति जाते, "इको झल्" इति सूत्रेण सनः किद्वद्भावेन गुणनिषेधे, "ऋृत इद्धातोः" इति ॠकारस्य इत्वे रपरत्वे 'चिकिर् स' इति जाते, "हलि च" इत्युपधाया दीर्घे, सकारस्य षत्वे 'चिकीर्ष' इति, धातुसंज्ञायां, तस्माल्लटि, तिबादिकार्ये 'चिकीर्षति' इति साधुः । एवमेव __लिटि__ – चिकीर्षाञ्चकार, __लुटि__ – चिकीर्षिता, __लृटि__ – चिकीर्षिष्यति, __लोटि__ – चिकीर्षतु, __लङि__ – अचिकीर्षत्, __विधिलिङि__ – चिकीर्षेत्, __आशीर्लिङि__ – चिकीर्ष्यात्, __लुङि__ – अचिकीर्षीत्, __लृङि__ – अचिकीर्षिष्यत्, इति ।*

इण्निषेधविधायकं सूत्रम्

**सनि ग्रहगुहोश्च ७ । २ । १२**

**ग्रहेर्गुहेरुगन्ताच्च सन इण् न स्यात् । बुभूषति ।**

(ग्रहगुहोः, उकः,च, धातोः सनि,इट् न)

*__सरलार्थः__– ग्रह्-धातोः, गुह्-धातोः, उगन्तधातुभ्यश्च परस्य सन इडागमो न भवति ।*

*'भवितुमिच्छति' इत्यर्थे भू-धातोः सनि 'भू स' इति जाते, प्राप्तस्य इडागमस्य अनेन सूत्रेण निषेधे, "इको झल्" इति किद्वद्भावेन "क्ङिति चे"ति गुणनिषेधे, द्वित्वे, अभ्यासादिकार्ये, 'बुभूष' इति जाते, तस्य धातुसंज्ञायां, तस्माल्लटि, तिपि, शबादिकार्ये 'बुभूषति' इति सिद्ध्यति । एवमेव __लिटि__ – बुभूषाञ्चकार, बुभूषाम्बभूव, बुभूषामास, __लुटि__ – बुभूषिता, __लृटि__ – बुभूषिष्यति, __लोटि__ – बुभूषतु, __लङि__ – अबुभूषत्, __विधिलिङि__ – बुभूषेत्, __आशीर्लिङि__ – बुभूष्यात्, __लुङि__ – अबुभूषीत्, __लृङि__ – अबुभूषिष्यत्, इत्यादयोऽपि बोध्याः ।*

## प्रयोगसिद्धिप्रकारः

### पिपठिषति

'पठितुमिच्छति' इत्यर्थे पठ्-धातोः "धातोः कर्मणः समानकर्तृकादिच्छायां वा" इति सूत्रेण सन्-प्रत्ययेऽनुबन्धलोपे 'पठ् स' इति जाते, 'स' इत्यस्यार्धधातुकसंज्ञायामिडागमे 'पठ् इ स' इति जाते "सन्यङोः" इत्यनेन प्रथमस्यैकाचः 'पठ्' इत्यस्य द्वित्वे, 'पठ् पठ् इस' इति जाते, अभ्यासकार्ये 'पपठ् इस' इत्यवस्थायां, "सन्यतः" इति सूत्रेणाभ्यासस्याकारस्य इत्वे, 'पिपठ्

इस' इति जाते, सकारस्य षत्वे 'पिपठिष' इति जाते, सन्नन्तत्वात् "सनाद्यन्ता धातवः" इति सूत्रेण धातुसंज्ञायां 'पिपठिष' इति धातोर्लटि, "पूर्ववत्सनः" इति सूत्रेण सनः पूर्वस्य पठ्-धातोः परस्मैपदत्वात् सन्नन्तात् पठ्-धातोरपि परस्मैपदे, लस्य स्थाने तिपि, शपि, 'पिपठिष अति' इति जाते, "अतो गुणे" इति पररूपे, 'पिपठिषति' इति रूपं सिद्धम् ।

## जिघत्सति

'अत्तुमिच्छति' इत्यर्थे अद्-धातोः "धातोः कर्मणः समानकर्तृकादिच्छायां वा" इति सूत्रेण सन्प्रत्ययेऽनुबन्धलोपे, 'अद्+स' इति जाते, "लुङ्सनोर्घस्लृ" इति सूत्रेण अदः घस्लृ-आदेशेऽनुबन्धलोपे 'घस् + स' इति जाते, प्राप्तस्येडागमस्य "एकाच उपदेशेऽनुदात्तात्" इति निषेधे, द्वित्वे 'घस् घस् स' इति जाते, हलादिशेषे 'घ घस् स', चुत्वे 'झ घस् स', जश्त्वे 'ज घस् स', 'सन्यतः' इतीत्वे 'जिघस् स' इत्यवस्थायां "सः स्यार्धधातुके" इति सूत्रेण 'जिघस्' इत्यस्य सकारस्य स्थाने तकारादेशे 'जिघत्स' इति जाते, तस्य धातुसंज्ञायां, तस्माल्लटि, तिपि, शपि, पररूपे 'जिघत्सति' इति रूपं सिद्धम् ।

## चिकीर्षति

'कर्तुमिच्छति' इत्यर्थे कृ-धातोः "धातोः कर्मणः समानकर्तृकादिच्छायां वा" इति सूत्रेण सनि, 'कृ स' इति जाते, प्राप्तस्य इडागमस्य एकाच इति निषेधे, द्वित्वे 'कृ कृ स' इति जाते, "उरत्" इति सूत्रेण अभ्यासस्य ऋकारस्य स्थाने अरादेशे 'कर् कृ स' इति जाते, हलादिशेषे, चुत्वे 'चकृ स' इति जाते, "सन्यतः" इतीत्वे 'चिकृ स' इत्यवस्थायाम्, "अज्झनगमां सनि" इति सूत्रेण अजन्तधातुत्वाद् ऋकारस्य दीर्घे, 'चिकॄ स' इति जाते, "इको झल्" इति सूत्रेण सनः कित्वाद् गुणनिषेधे, "ॠत इद्धातोः" इति सूत्रेण ॠकारस्य इरादेशे 'चिकिर् स' इति जाते, "हलि च" इत्युपधाया दीर्घे, सकारस्य षत्वे 'चिकीर्ष' इति जाते, धातुसंज्ञायां, तस्माल्लटि, तिबादिकार्ये 'चिकीर्षति' इति रूपं सिद्धम् ।

### अभ्यासार्थाः प्रश्नाः

१. **अधस्तनसूत्राणि तेषामर्थञ्च लिखत**

(क) धातोः कर्मणः समानकर्तृकादिच्छायां वा
(ख) सन्यङोः
(ग) सः स्यार्धधातुके
(घ) अज्झनगमां सनि
(ङ) इको झल्
(च) सनि ग्रहगुहोश्च

२. **प्रश्नानामुत्तराणि देयानि**

(क) कस्मिन्नर्थे सन्प्रत्ययो भवति ?

(ख) सन्यङोरिति सूत्रेण कस्य द्वित्वम् ?

(ग) सन्प्रत्ययविधायकं सूत्रं किम् ?

(घ) सन्नन्तानां धातुसंज्ञा केन सूत्रेण भवति ?

(ङ) 'गन्तुमिच्छति' इत्यर्थे गम्-धातोः किं रूपं भवति ?

(च) "इको झल्" इति सूत्रेण कस्य किद्वद्भावो भवति ?

(छ) "अज्झनगमां सनि" इति सूत्रं किं करोति ?

(ज) कृधातोः सनि लटि कानि रूपाणि भवन्ति ?

(झ) भूधातोः सनि लङि जायमानानि रूपाणि लिखत ।

३. **अधोलिखितानि पदानि प्रयुज्य वाक्यानि रचयत**

पिपठिषन्ति, अबुभूषत्, चिकीर्षति, जिगमिषति, जिघत्सतु, बुभूषिष्यति, चिकीर्षामि ।

४. **समीचीनेषु कथनेषु** (√) **चिह्नमसमीचीनेषु च** (×) **चिह्नं दर्शयत**

(क) इच्छायामर्थे धातोः सन्प्रत्ययो भवति ।

(ख) इच्छायामर्थे धातोः सन्प्रत्ययो नित्यमेव भवति ।

(ग) गन्तुमिच्छतीत्यर्थे 'जिगमिषति' इति रूपं भवति ।

(घ) सन्नन्तस्य यङन्तस्य च हलादेर्धातोरनभ्यासस्य प्रथमस्यैकाचो द्वित्वं भवति ।

(ङ) "सन्यङोः" इति सूत्रं सन्नन्तस्य यङन्तस्य च धातोरभ्यासस्य द्वित्वं करोति ।

(च) 'बुभूषति' इत्यत्र "सनि ग्रहगुहोश्च" इति सूत्रेण इडागमो निषिद्धः ।

(छ) अद्-धातोः सनि लुङि तिपि 'अजिघत्सीत्' इति रूपं भवति ।

५. **प्रत्ययान् संयुज्य निष्पन्नरूपाणि लिखत**

कृ + सन् + लट्(वस्), अद् + सन्+ लिट्(तिप्), भू + सन् + लट्(तिप्), पठ् + सन् + लोट्(त), भू + सन् + लङ्(झ), कृ + सन् + लङ्(सिप्), गम् + सन् + लट्(मिप्), पठ् + सन् + लिट्(त), अद् + सन् + लुङ्(तिप्), कृ + सन् + लङ्(तिप्), गम् + सन् + लट्(त), हन् + सन् + लोट्(मस्) ।

६. **अधस्तनप्रयोगाणां सिद्धिप्रक्रियां दर्शयत**

बुभूषति, पिपठिषन्ति, चिकीर्षतु, अपिपठिषत्, जिघत्सतु ।

७. **अधोलिखितेषु पदेषु ण्यन्तपदानि सन्नन्तपदानि च पृथक्कृत्य दर्शयत**

अबुभूषीत्, पाठयतु, कारयति, चिकीर्षिता, अजीघटत्, भावयिष्यति, बुभूषाञ्चकार ।

**अनुप्रयोगः**

१. **अधोलिखितानि वाक्यानि पठत**

(क) मनुष्यः सुखिनं बुभूषति ।

(ख) बालिनं हत्वा सुग्रीवो राजा बुभूषाञ्चकार ।

(ग) सर्वे छात्राः पिपठिषन्तु ।

(घ) सज्जनो सदैव सत्कार्यं चिकीर्षति ।

(ङ) त्वं किं जिघत्ससि ?

२. **सन्-प्रत्ययान्तानि पदानि प्रयुज्य पञ्चवाक्येषु स्वेच्छां प्रकटीकुरुत ।**

३. **उदाहरणमनुसृत्य अधस्तनानि वाक्यानि परिवर्तयत**

यथा - छात्रः पाठं पठितुमिच्छति । → छात्रः पाठं पिपठिषति ।

(क) अहं कार्यं कर्तुम् इच्छामि ।

(ख) स अत्तुमैच्छत् ।

(ग) स नायको भवितुमेष्यति ।

(घ) ते भ्रमणार्थं गन्तुमिच्छन्तु ।

(ङ) त्वं किं पठितुमिच्छसि ?

४. **सन्नन्तानां भू-गम्-कृ-पठ्-अद्-धातूनां लङि रूपाणि लिखत ।**

इति सन्नन्तप्रक्रिया

## तृतीयः पाठः

# अथ यङन्तप्रक्रिया

**पाठपरिचयः**

तिङन्तेष्वन्यतमा यङन्तप्रक्रिया । सर्वेभ्यो धातुभ्यः पौनः पुन्ये भृशार्थे च द्योत्ये यङ्प्रत्ययो भवति । यङि कृते द्वित्वादिषु च कार्येषु यङन्तधातवः सिद्धचन्ति । यङ्प्रत्ययान्तधातूनां निरूपणाद् अस्य प्रकरणस्य नाम यङन्तप्रक्रिया वर्तते । अत्र प्रकरणे कतिचिद्यङन्तधातूनामेव प्रतिनिधिरूपेण रूपसिद्धिप्रक्रियायाः दिङ्निरूपणं कृतं वर्तते ।

यङः एकस्मिन् पक्षे लुग् भवति । यङो लुक्पक्षे धातूनां रूपाणि अन्यविधानि अत एव लघुसिद्धान्तकौमद्यां यङ्लुक्प्रक्रियानाम्ना पृथक् प्रकरणं प्रदत्तमस्ति ।

यङ्लुग्धातूनां वेदे एव प्रयोगः इति केचनाः, लोकेऽपि प्रयोगः इति अपरे ।

यङ्लुगन्तधातूनामदादौ पाठः । अत एव अदादिगणस्थानि कार्याणि अत्र प्रकरणेऽपि भवन्ति इति बोध्यम् ।

यङ्लुगन्तप्रकरणे एकस्यैव भूधातोः प्रक्रिया निरूपिता वर्तते ।

**प्रकृतपाठस्थकतिपयमहत्त्वाधायिनो विषयाः**

- पौनःपुन्ये भृशार्थे च द्योत्ये सर्वेभ्यो धातुभ्यः यङ्प्रत्ययो भवति ।
- यङन्तशब्दानां “सनाद्यन्ताः धातवः” इति सूत्रेण धातुसंज्ञा विधीयते ।
- यङन्तधातूनां ङिदन्तत्वात् “अनुदात्त ङितः आत्मनेपदम्” इति सूत्रेण सदा आत्मनेपदं भवति ।
- गत्यर्थकेभ्यो धातुभ्यः क्रियासमभिहारे द्योत्ये एव यङ्प्रत्ययो न तु क्रियासमभिहारे ।
- अत्र प्रकरणे लघुसिद्धान्तकौमुद्यां निदर्शनरूपेण भू, व्रज्, वृत्, नृत्, ग्रह् चेति यङन्तधातूनां निरूपणाद् विद्यार्थिभिः विषयेऽस्मिन् विशेषतो ध्यानं देयम् ।

यङ्प्रत्ययविधायकं विधिसूत्रम्-

**धातोरेकाचो हलादेः क्रियासमभिहारे यङ् ३ । १ । २२**

**पौनः पुन्ये भृशार्थे च द्योत्ये धातोरेकाचो हलादेर्यङ् स्यात् ।**

(एकाचः, हलादेः, धातोः, परः, यङ्, प्रत्ययः, क्रियासमभिहारे)

***सरलार्थः-*** *एक अच् यत्रास्ति तथाभूताद् हलादेर्धातोः यङ्प्रत्ययो भवति पौनःपुन्ये भृशार्थे च द्योत्ये । सूत्रे 'धातोरेकाचो हलादे'रिति निर्देशाद् अनेकाचोऽजादेश्च धातोः यङ्प्रत्ययो न भवति । यङो ङकार इत् ।*

गुणादेशविधायकं विधिसूत्रम्-

**गुणो यङ्लुकोः ७ । ४ । ८२**

**अभ्यासस्य गुणो यङि यङ्लुकि च परतः । ङिदन्तत्वादात्मनेपदम् । पुनः पुनरतिशयेन वा भवति बोभूयते । बोभूयाञ्चक्रे । अबोभूयिष्ट ।**

(अङ्गस्य, अभ्यासस्य, गुणः, यङ्लुकोः)

***सरलार्थः-*** *यङि यङ्लुकि च परत अभ्यासस्य इकः स्थाने गुणो भवति । अत्र 'इकः' इति षष्ठ्यन्तपदमुपतिष्ठते (इको गुणवृद्धी १ । १ । ३) । यङो ङित्वाद् यङन्तधातोः "अनुदात्तङित आत्मनेपदम्" इति सूत्रेण आत्मनेपदसंज्ञकाः प्रत्यया एव भवन्ति ।*

*'पुनः पुनः अतिशयेन वा भवति' इत्यर्थे एकाचो हलादेश्च भू-धातोर्यङ्यनुबन्धलोपे 'भू य' इति जाते, "सन्यङो"रिति धातोर्द्वित्वे, अभ्यासकार्ये, 'बुभू य' इति जाते, "गुणो यङ्लुकोः" इति सूत्रेण अभ्यासस्योकारस्य गुणे 'बोभूय' इति जाते, तस्य धातुसंज्ञायां, ततो लटि, लस्य स्थाने आत्मनेपदे तादेशे 'बोभूय त' इति जाते, शपि, "अतो गुणे" इति पररूपे, टेरेत्वे च, 'बोभूयते' इति सिद्धम् । एवं रीत्या बोभूयेते, बोभूयन्ते, बोभूयसे, इत्यादीनि रूपाण्यपि सिद्ध्यन्ति ।*

***लिटि*** *यङन्ताद् बोभूय-धातोः "कास्यनेकाच०" इति आमि, 'बोभूय आम्', "अतो लोपः" इति अल्लोपे 'बोभूयाम्' इति जाते, तस्मात् कृ-भू-अस्-धातूनामनुप्रयोगः । "आम्प्रत्ययवत्कृञोऽनुप्रयोगस्य १ । ३ । ६३" इति सूत्रेण अनुप्रयुक्तात् कृ-धातोरात्मनेपदम्, भू-धातोः अस्-धातोश्च परस्मैपदम् । अत एव लिटि - बोभूयाञ्चक्रे, बोभूयाम्बभूव, बोभूयामास, इत्यादीनि रूपाणि भवन्ति । लुटि, लृटि, अन्येष्वप्यार्धधातुकेषु प्रत्ययेषु परेषु "अतो लोपः" इत्यल्लोपो बोध्यः ।* ***लुटि*** *– बोभूयिता,* ***लृटि*** *– बोभूयिष्यते,* ***लोटि*** *– बोभूयताम्,* ***लङि*** *– अबोभूयत,* ***विधिलिङि*** *– बोभूयेत,* ***आशीर्लिङि*** *– बोभूयिषीष्ट,* ***लुङि*** *– अबोभूयिष्ट,* ***लृङि*** *– अबोभूयिष्यत ।*

यङ्प्रत्ययविधायकं नियमसूत्रम्-

**नित्यं कौटिल्ये गतौ ३ । १ । २३**

**गत्यर्थात्कौटिल्य एव यङ् स्यान्न तु क्रियासमभिहारे ।**

(कौटिल्ये, गतौ, धातोः, परः, यङ्, प्रत्ययः)

***सरलार्थः***- *गत्यर्थकेभ्यः धातुभ्यः कौटिल्ये द्योत्ये सत्येव यङ्प्रत्ययो भवति न तु क्रियासमभिहारे गम्ये ।*

*'कुटिलं व्रजती'ति विग्रहे गत्यर्थकाद् व्रज्-धातोः प्रकृतसूत्रेण यङ्यनुबन्धलोपे, 'व्रज् य' इति जाते, "सन्यङो"रिति द्वित्वे, हलादिशेषे, 'व व्रज् य' इत्यवस्थायाम् -*

अभ्यासस्य दीर्घादेशविधायकं विधिसूत्रम्-

**दीर्घोऽकितः ७ । ४ । ८३**

**अकितोऽभ्यासस्य दीर्घो यङ्यङ्लुकोः । कुटिलं व्रजति वाव्रज्यते ।**

(अकितः, अङ्गस्य, अभ्यासस्य, दीर्घः, यङ्लुकोः)

***सरलार्थः***- *यङि यङ्लुकि च परे अकितोऽभ्यासस्य दीर्घो भवति ।*

*इत्यभ्यासस्य दीर्घे 'वाव्रज्य' इति जाते, तस्य धातुसंज्ञायां, ततो लटि, ते, टेरेत्वे, शपि, पररूपे च कृते, 'वाव्रज्यते' इति रूपं सिद्धयति । लिटि तु -*

यकारस्य लोपादेशविधायकं विधिसूत्रम्-

**यस्य हलः ६ । ४ । ४९**

**यस्येति सङ्घातग्रहणम् । हलः परस्य यशब्दस्य लोप आर्धधातुके । "आदेः परस्य" । "अतो लोपः" । वाव्रजाञ्चक्रे । वाव्रजिता ।**
(हलः, यस्य, लोपः, आर्धधातुके)

***सरलार्थः***- *आर्धधातुके प्रत्यये परे हलः उत्तरस्य यशब्दस्य लोपो भवति ।*

*अनेन सूत्रेण "आदेः परस्य" इति सूत्रसहकारेण यकारस्य लोपो भवति, ततः "अतो लोपः" इत्यल्लोपश्च ।*

*'कुटिलं वव्राज' इति विग्रहे यङन्ताद् वाव्रज्य-धातोर्लिटि, "कास्यनेकाचो०" इत्यामि, 'वाव्रज्य आम् ल्' इति जाते, "आदेः परस्य" इति सहकारेण "यस्य हलः" इति यकारलोपे, "अतो लोपः" इत्यकारलोपे, "आमः" इति लिटो लुकि, 'वाव्रजाम्' इति जाते, तस्मात् पूर्ववत् कृभ्वसामनुप्रयोगे - वाव्रजाञ्चक्रे, वाव्रजाम्बभूव, वाव्रजामासेत्यादीनि रूपाणि सिद्धयन्ति । लुटि - वाव्रज्य-धातोर्लुटि, ते, तासिप्रत्यये, इडागमे, डादेशे, टिलोपे, 'वाव्रज्य इता' इत्यवस्थायां "यस्य हलः" इति यलोपे, "अतो लोपः" इति अलोपे, 'वाव्रजिता' इति । एवमेव* ***लृटि*** *- वाव्रजिष्यते । अन्येषु लकारेषु रूपाणि -* ***लोटि*** *- वाव्रज्यताम्,* ***लङि*** *- अवाव्रज्यत,* ***विधिलिङि*** *- वाव्रज्येत,* ***आशीर्लिङि*** *- वाव्रजिषीष्ट,* ***लुङि*** *- अवाव्रजिष्ट,* ***लृङि*** *- अवाव्रजिष्यत ।*

रीक्-आगमविधायकं विधिसूत्रम्-

**रीगृदुपधस्य च ७ । ४ । ९०**

**ऋदुपधस्य धातोरभ्यासस्य रीगागमो यङ्यङ्लुकोः । वरीवृत्यते । वरीवृताञ्चक्रे । वरीवर्तिता ।**

(ऋदुपधस्य, धातोः, अभ्यासस्य, रीक्, यङ्लुकोः)

***सरलार्थः-*** *यङि यङ्लुकि च परे ह्रस्व-ऋकारोपधस्य धातोः अवयवस्याभ्यासस्य रीक्-आगमो भवति । रीकः कित् ।*

*'पुनः पुनः अतिशयेन वा वर्तते' इत्यर्थे वृत्-धातोः "धातोरेकाचो०" इत्यदिना सूत्रेण यङि, द्वित्वे, अभ्यासकार्ये, 'व वृत् य' इत्यवस्थायां, "रीगृदुपधस्य च" इति रीगागमेऽनुबन्धलोपे, रीगागमस्य कित्वादभ्यासस्यान्ते कृते, 'वरीवृत्य' इति जाते, तस्य धातुसंज्ञायां, ततो लटि, तादिकार्ये, 'वरीवृत्यते' इति । लिटि पूर्ववत् वरीवृत्याञ्चक्रे, वरीवृत्याम्बभूव, वरीवृतामास इति । लुटि - वरीवृत्यधातोर्लुटि, ते, तासिप्रत्यये, इडागमे, डादेशे, टिलोपे, पूर्ववद् यकारस्य अकारस्य च लोपे, 'वरीवृतिता' इति । अत्र "अचः परस्मिन् पूर्वविधौ" इत्यल्लोपस्य स्थानिवद्भावत्वान्न लघूपधगुणः ।*

*लृडादिलकारेषु रूपाणि -* ***लृटि*** *- वरीवृतिष्यते,* ***लोटि*** *- वरीवृत्यताम्,* ***लङि*** *- अवरीवृत्यत,* ***विधिलिङि*** *- वरीवृत्येत,* ***आशीर्लिङि*** *- वरीवृतिषीष्ट,* ***लुङि*** *- अवरीवृतिष्ट,* ***लृङि*** *- अवरीवृतिष्यत ।*

णत्वनिषेधविधायकं सूत्रम्-

**क्षुभ्नादिषु च ८ । ४ । ३९**

**णत्वं न । नरीनृत्यते । जरीगृह्यते ।**

(क्षुभ्नादिषु, च, रषाभ्याम्, नः, णः, नः)

***सरलार्थः-*** *क्षुभ्नादिगणपठितेषु शब्देषु नकारस्य स्थाने णकारादेशो न भवति । (यङन्तो नृत्-धातुः क्षुभ्नादिगणे पठितोऽस्ति ।)*

*'पुनः पुनः अतिशयेन वा नृत्यति' इत्यर्थे नृत्-धातोः वरीवृत्यतेवत् प्रक्रियायां 'नरीनृत्यते' इति जाते, परस्य नकारस्य "अट्कुप्वाङ्नुम्व्यवायेऽपि" इति सूत्रेण प्राप्तस्य णत्वस्य अनेन सूत्रेण निषेधे, 'नरीनृत्यते' इति सिद्ध्यति । लिट्यपि पूर्ववत् नरीनृत्याञ्चक्रे, नरीनृत्याम्बभूव, नरीनृतामास इति । लुडादिलकारेष्वपि यङन्तवृद्धातुवद्रूपाणि भवन्ति । (****लुटि*** *- नरीनृतिता,* ***लृटि*** *- नरीनृतिष्यते,* ***लोटि*** *- नरीनृत्यताम्,* ***लङि*** *- अनरीनृत्यत,* ***विधिलिङि*** *- नरीनृत्येत,* ***आशीर्लिङि*** *- नरीनृ*

*तिषीष्ट,* ***लुङि*** *- अनरीनृतिष्ट,* ***लृङि*** *- अनरीनृतिष्यत ।)*

*'पुनः पुनः अतिशयेन वा गृह्णाति' इत्यर्थे ग्रह्-धातोर्यङि, 'ग्रह्+य' इत्यवस्थायां "ग्रहिज्यावयिव्यधि०" इत्यादिना सूत्रेण सम्प्रसारणे पूर्वरूपे, 'गृह् य' इति जाते, द्वित्वे, अभ्यासकार्ये, 'जगृह् य' इति जाते, "रीगृदुपधस्य च" इति रीगागमे, 'जरीगृह्य' इति जाते, तस्य धातुसंज्ञायां लडादिकार्ये, 'जरीगृह्यते' इति सिद्ध्यति ।*

इति यङन्तप्रक्रिया

यङः लुग्विधायकं विधिसूत्रम्-

**यङोऽचि च २ । ४ । ७४**

**यङोऽचि प्रत्यये लुक् स्यात्, चकारात्तं विनापि क्वचित् ।**

**अनैमित्तिकोऽयमन्तरङ्गत्वादादौ भवति । ततः प्रत्ययलक्षणेन यङन्तत्वाद् द्वित्वम् । अभ्यासकार्यम् । धातुत्वाल्लडादयः । शेषात्कर्तरीति परस्मैपदम् । चर्करीतं चेत्यदादौ पाठाच्छपो लुक् ।**

(यङः, लुक्, अचि, च)

***सरलार्थः-*** *अच्प्रत्यये परे यङ्प्रत्ययस्य लुग् भवति सूत्रे चकारग्रहणाद् अच्प्रत्ययपराभावेऽपि कुत्रचिद् यङो लुग् भवति ।*

***बोभवीति/बोभोति*** *- 'पुनः पुनः अतिशयेन वा भवति' इत्यर्थे एकाचो हलादेश्च भू-* भूसत्तायामित्यस्माद्धातोः "धातोरेकाचो हलादेः क्रियासमभिहारे यङ" इति सूत्रेण यङ्प्रत्ययेऽनुबन्धलोपे "सन्यङोः" इति सूत्रेण द्वित्वे प्राप्ते "यङोऽचि च" इति सूत्रेण यङो लुकि च प्राप्तेऽनैमित्तिकस्य यङ्लुकः अन्तरङ्गत्वात् प्रवृत्तौ प्रत्ययलक्षणेन *"सन्यङो"रिति धातोर्द्वित्वे, अभ्यासकार्ये, "गुणो यङ्लुकोः" इति सूत्रेण अभ्यासस्योकारस्य गुणे 'बोभू' इति जाते, तस्य धातुसंज्ञायां, ततो लटि, लस्य स्थाने परस्मैपदे एकवचने तिप्रत्यये 'बोभू ति' इति जाते, शपि, "चर्करीतञ्च" इति अदादिगणे पाठात् शपो लुकि बोभू+ति इति जाते-*

विभाषया इडागमविधायकं विधिसूत्रम्-

**यङो वा ७ । ३ । ९४**

**यङ्लुगन्तात्परस्य हलादेः पितः सार्वधातुकस्येड् वा स्यात् । भूसुवोरिति गुणनिषेधो यङ्लुकि भाषायां न, बोभूतु तेतिक्ते इति छन्दसि निपातनाद् बोभवीति, बोभोति । बोभूतः । अदभ्यस्तात् । बोभुवति ।**

**बोभवाञ्चकार, बोभवामास । बोभविता । बोभविष्यति । बोभवीतु, बोभोतु, बोभूतात् । बोभूताम् । बोभुवतु । बोभूहि । बोभवानि । अबोभवीत्, अबोभोत् । अबोभूताम् । अबोभवुः ।**

**बोभूयात् । बोभूयाताम् । बोभूयुः । बोभूयात् । बोभूयास्ताम् । बोभूयासुः । गातिस्थेति सिचो लुक् । यङो वेतीट्पक्षे गुणं बाधित्वा नित्यत्वाद्वुक् । अबोभूवीत्, अबोभोत् । अबोभूताम् । अबोभूवुः । अबोभविष्यत् ।**

(यङः, वा, पिति, सार्वधातुके, हलि, ईट्, अङ्गस्य)

***सरलार्थः–*** *यङ्लुगन्तादङ्गात् परस्य हलादेः पितः सार्वधातुकसंज्ञकप्रत्ययस्य विभाषया इड् भवति ।*

*इति विभाषया ईडागमेऽनुबन्धलोपे* भूसुवोरिति गुणनिषेधो यङ्लुकि भाषायां न, बोभूतु तेतिक्ते इति छन्दसि निपातनाद् *धातोर्गुणे बोभो+ईति इति जाते ओकारस्य अवादेशे वर्णसम्मेलने बोभवीति सिद्धम् । ईडागमाभावे बोभोति इति रूपं बोध्यम् ।*

*तसादौ- बोभूतः, बोभुवति, बोभवी(भो)षि, बोभूथः, बोभूथ, बोभवी(भो)मि, बोभूवः, बोभूमः ।*

***लिटि*** *बोभवाञ्चकार/बोभयामास ।* ***लुटि–*** *बोभविता ।* ***लृटि–*** *बोभविष्यति ।* ***लोटि–*** *बोभवीतु, बोभोतु,* बोभूतात्, बोभूताम्, बोभुवतुः, बोभूहि, बोभवानि । **लङि–** अबोभवीत्, अबोभोत् । अबोभूताम् । अबोभवुः । वि.लिङि- बोभूयात् । बोभूयाताम् । बोभूयुः । आ.लिङि- बोभूयात् । बोभूयास्ताम् । बोभूयासुः । **गातिस्थेति** सिचो लुक् । यङो वेतीट्पक्षे गुणं बाधित्वा नित्यत्वाद्वुक् । लुङि- अबोभूवीत्, अबोभोत् । अबोभूताम् । अबोभूवुः । लृङि- अबोभविष्यत् ।

*। इति यङ्लुक्प्रक्रिया ।*

## प्रयोगसिद्धिप्रकारः

### बोभूयते

'पुनः पुनः अतिशयेन वा भवति' इत्यर्थे एकाचो हलादेश्च भू-धातोः "धातोरेकाचो हलादेः क्रियासमभिहारे यङ्" इति सूत्रेण यङ्यनुबन्धलोपे 'भू य' इति जाते, "सन्यङोः" इति सूत्रेण धातोर्द्वित्वे, 'भू भू य' इति जाते, अभ्यासकार्ये, 'बुभू य' इति जाते, "गुणो यङ्लुकोः" इति सूत्रेण अभ्यासस्योकारस्य गुणे 'बोभूय' इति जाते, तस्य धातुसंज्ञायां, ततो लटि, ङित्वाल्लस्य स्थाने आत्मनेपदे तादेशे 'बोभूय त' इति जाते, शपि, "अतो गुणे" इति पररूपे, टेरेत्वे च, 'बोभूयते' इति रूपं सिद्धम् ।

### वाव्रज्यते

'कुटिलं व्रजती'ति विग्रहे कौटिल्यार्थकाद् व्रज्-धातोः "नित्यं कौटिल्ये गतौ" इति सूत्रेण यङ्यनुबन्धलोपे, 'व्रज् य' इति जाते, "सन्यङो"रिति द्वित्वे, हलादिशेषे, 'व व्रज् य' इत्यवस्थायां "दीर्घोऽकितः" इत्यभ्यासस्य दीर्घे 'वाव्रज्य' इति जाते, तस्य धातुसंज्ञायां, ततो लटि, ते, टेरेत्वे, शपि, पररूपे च कृते, 'वाव्रज्यते' इति रूपं सिद्ध्यति ।

## नरीनृत्यते

'पुनः पुनः अतिशयेन वा नृत्यति' इत्यर्थे नृत्-धातोः "धातोरेकाचो०" इत्यदिना सूत्रेण यङि, 'नृत्+य' इति जाते, द्वित्वे, अभ्यासकार्ये, 'न नृत् य' इत्यवस्थायां, "रीगृदुपधस्य च" इति सूत्रेण रीगागमेऽनुबन्धलोपे, रीगागमस्य कित्वादभ्यासस्यान्ते कृते, 'नरीनृत्य' इति जाते, तस्य धातुसंज्ञायां, ततो लटि, तादिकार्ये, 'नरीनृत्यते' इति जाते, "अट्कुप्वाङ्नुम्व्यवायेऽपि" इति सूत्रेण परस्य नकारस्य णत्वे प्राप्ते, "क्षुभ्नादिषु च" इति सूत्रेण तन्निषेधे, 'नरीनृत्यते' इति सिद्ध्यति ।

**बोभवीति/बोभोति** – *'पुनः पुनः अतिशयेन वा भवति' इत्यर्थे एकाचो हलादेश्च* भूसत्तायामित्यस्माद्धातोः "धातोरेकाचो हलादेः क्रियासमभिहारे यङ्" इति सूत्रेण यङ्प्रत्ययेऽनुबन्धलोपे "सन्यङोः" इति सूत्रेण द्वित्वे प्राप्ते "यङोऽचि च" इति सूत्रेण यङो लुकि च प्राप्तेऽनैमित्तिकस्य यङ्लुकः अन्तरङ्गत्वात् प्रवृत्तौ प्रत्ययलक्षणेन *"सन्यङो"रिति धातोर्द्वित्वे, अभ्यासकार्ये, "गुणो यङ्लुकोः" इति सूत्रेण अभ्यासस्योकारस्य गुणे 'बोभू' इति जाते, तस्य धातुसंज्ञायां, ततो लटि, लस्य स्थाने परस्मैपदे एकवचने तिप्रत्यये 'बोभू ति' इति जाते, शपि, "चर्करितञ्च" इति अदादिगणे पाठात् शपो लुकि बोभू+ति इति जाते "यङो वा" इति विभाषया ईडागमेऽनुबन्धलोपे* भूसुवोरिति गुणनिषेधो यङ्लुकि भाषायां न, बोभूतु तेतिक्ते इति छन्दसि निपातनाद् *धातोर्गुणे बोभो+ईति इति जाते ओकारस्य अवादेशे वर्णसम्मेलने बोभवीति सिद्धम् । ईडागमाभावे बोभोति इति रूपं बोध्यम् ।*

### अभ्यासार्थाः प्रश्नाः

१. **अधस्तनसूत्राणि तेषां नेपालीभाषायामर्थं च लिखत**

(क) धातोरेकाचो हलादेः क्रियासमभिहारे यङ्
(ख) गुणो यङ्लुकोः
(ग) नित्यं कौटिल्ये गतौ
(घ) यस्य हलः
(ङ) दीर्घोऽकितः
(च) रीगृदुपधस्य च

२. **प्रश्नानामुत्तराणि देयानि**

(क) कस्मिन्नर्थे यङ्प्रत्ययो भवति ?
(ख) यङि परे केन सूत्रेण धातोर्द्वित्वं भवति ?
(ग) कीदृशाद्धातोर्यङ्प्रत्ययो भवति ?
(घ) क्रियासमभिहारशब्दस्य कोऽर्थः ?
(ङ) 'पुनः पुनरतिशयेन वा अभवत्' इत्यर्थे भू-धातोः किं रूपं भवति ?

(च “क्षुभ्नादिषु च” इति सूत्रं किं करोति ?

(छ) “रीगृदुपधस्य च” इति सूत्रेण कीदृशस्य धातोरभ्यासस्य रीगागमो भवति ?

(ज) कृधातोः सनि लटि कानि रूपाणि भवन्ति ?

(झ) वृत्-धातोः यङि लटि रूपाणि लिखत ।

(ञ) यङि परेऽभ्यासस्य गुणविधायकं सूत्रं लिखत ।

३. **अधोलिखितानि पदानि प्रयुज्य प्रत्येकं त्रीणि वाक्यानि रचयत**

बोभूयेते, वाव्रज्यते, अवाव्रज्यत, वरीवृत्यन्ते, नरीनृतिष्यते, जरीगृह्यते ।

४. **समीचीनेषु कथनेषु (√) चिह्नमसमीचीनेषु च (×) चिह्नं दर्शयत**

(क) भृशार्थे धातोः सन्प्रत्ययो भवति ।

(ख) पौनः पुन्येऽर्थे धातोः यङ्प्रत्ययो भवति ।

(ग) पुनः पुनरतिशयेन वा भवेदित्यर्थे ‘बुभूषेत्’ इति रूपं भवति ।

(घ) यङन्ताद्धातोः परस्मैपदं भवति ।

(ङ) यङि यङ्लुकि च परे कितोऽभ्यासस्य दीर्घो भवति ।

५. **प्रत्ययान् संयुज्य निष्पन्नरूपाणि लिखत**

नृत् + यङ् + लट्(झ), वृत् + यङ् + लिट्(इट्), भू + यङ् + लुट्(त), पठ् + यङ् + लोट् (आताम्), भू + यङ् + लङ्(थास्), ग्रह् + यङ् + लङ्(त), व्रज् + यङ् + लट्(ध्वम्), पठ् + यङ् + लिट्(त), व्रज् + यङ् + लुङ्(आथाम्) ।

६. **वाव्रजिता, वरीवृत्यते, बोभूयेत, जरीगृह्यते, इति प्रयोगाणां सिद्धेः प्रक्रियां दर्शयत ।**

७. **अधोलिखितेषु पदेषु ण्यन्तपदानि सन्नन्तपदानि यङन्तपदानि च पृथक्कृत्य दर्शयत**

नरीनृतिता, अबुभूषिष्ट, पाठयन्ति, जिगमिषति, बुभूषाञ्चकार, भावयाञ्चकार, बोभूषाञ्चक्रे, अतिष्ठिपत्, गमयेत्, पिपठिषतु, अजिघत्सत्, अबोभूयिष्ट ।

८. **यङन्तस्य दाधातोर्लटि रूपाणि लिखत ।**

९. **यङन्तानां भू-पठ्-व्रज्-नृत्-वृत्-ग्रह्-धातूनां लटि लृटि लङि च रूपाणि लिखत ।**

## अनुप्रयोगः

१. **अधोलिखितानि वाक्यानि पठत**

(क) तव गृहे उत्सवाः बोभूयन्तु ।

(ख) शत्रूणां गृहेऽपि कलहो न बोभूयताम् ।

(ग) त्वं स्वोद्देश्येषु सफलो बोभूयिषीष्ठाः ।

(घ) नायिका चलचित्रेषु नरीनृत्यते ।

(ङ) दुर्जना वाव्रज्यन्ते ।

(च) बालको मिष्ठान्नं जरीगृह्यते ।

२. **यङ्-प्रत्ययान्तानि पदानि प्रयुज्य एकमनुच्छेदं विलिख्य शिक्षकं दर्शयत ।**

३. **परस्परं मेलयत**

| | |
|---|---|
| पुनः पुनरतिशयेन वा बभूव | जरीगृह्यसे |
| पुनः पुनरतिशयेन वा गृह्णासि | वाव्रज्यताम् |
| पुनः पुनरतिशयेन वा वर्तन्ते | बोभूयाञ्चक्रे |
| पुनः पुनरतिशयेन वा अनृत्यत् | नरीनृत्यते |
| कुटिलं व्रजतु | वरीवृत्यन्ते |
| पुनः पुनरतिशयेन वा नृत्यति | अनरीनृत्यत |

**चतुर्थः पाठः**

# अथ नामधातवः

**पाठपरिचयः**

प्रकरणेऽस्मिन् प्रातिपदिकेभ्यः धातुसंज्ञाप्रयोजकीभूताः प्रत्ययाः विधीयन्ते, नामानि धातवो भवन्ति । अत एवास्य प्रकरणस्य नाम नामधातुप्रकरणम् ।

प्रत्ययविधायकं विधिसूत्रम्-

**सुप आत्मनः क्यच् ३ । १ । ८**

**इषिकर्मण एषितुः सम्बन्धिनः सुबन्तादिच्छायामर्थे क्यच् प्रत्ययो वा स्यात् ।**

(इच्छायाम्, कर्मणः, सुपः, आत्मनः, क्यच्, वा)

***सरलार्थः-*** *इष्-धातुकर्मीभूतव्यापारबोधकेभ्यः इष्-धातोः कर्त्रा सह सम्बन्धिभ्यः सुबन्तेभ्य इच्छायामर्थे क्यच्-प्रत्ययो विकल्पेन भवति । क्यच्-प्रत्ययस्य कचावितौ ।*

*'आत्मनः पुत्रमिच्छति' इत्यर्थे विवक्षिते 'पुत्र + अम्' इत्यस्मात् सुबन्तादनेन सूत्रेण क्यच्-प्रत्ययेऽनुबन्धलोपे, 'पुत्र अम् य' इति जाते, तस्य 'सनाद्यन्ता धातवः' इति धातुसंज्ञायाम् -*

सुपो लुगादेशविधायकं विधिसूत्रम्-

**सुपो धातुप्रातिपदिकयोः २ । ४ । ७१**

**एतयोरवयवस्य सुपो लुक् ।**

(धातुप्रातिपदिकयोः, सुपः, लुक्)

***सरलार्थः-*** *धातोः प्रातिपदिकस्य चाऽवयवस्य सुपो लुग् भवति ।*

*इत्यमो लुकि, 'पुत्र य' इत्यवस्थायाम् -*

ईकारादेशविधायकं विधिसूत्रम्-

**क्यचि च ७ । ४ । ७१**

**अवर्णस्य ईः । आत्मनः पुत्रमिच्छति पुत्रीयति ।**

(अस्य, अङ्गस्य, ई, क्यचि, च)

*सरलार्थः- क्यचि परेऽवर्णस्य स्थाने ईकारादेशो भवति ।*

*इति 'पुत्र' इत्यस्याकारस्य स्थाने ईकारादेशे, 'पुत्रीय' इति जाते, तस्माद्धातोर्लटि, "शेषात्कर्तरी"ति परस्मैपदे, तिपि, शपि, पररूपे, 'पुत्रीयति' इति सिद्ध्यति । (क्यच्-विधायके सूत्रे 'आत्मनः' इति विशेषणपदस्य प्रदानात् आत्मनः कृत इच्छायामर्थ एव क्यच्-प्रत्ययो भवति, परस्य कृत इच्छायामर्थे तु नेति बोध्यम् । यथा - 'परस्य पुत्रमिच्छति' इत्यर्थे विवक्षिते क्यच्-प्रत्ययो न भवति ।)*

*अन्येषु लकारेषु रूपाणि -*

***लिटि*** - *'पुत्रमात्मनः इयेष' इत्यर्थे - पुत्रीयाञ्चकार, पुत्रीयाम्बभूव, पुत्रीयामास ।*

***लुटि*** - *'पुत्रमात्मन एष्टा' इत्यर्थे - पुत्रीयिता ।*

***लृटि*** - *'पुत्रमात्मन एषिष्यति' इत्यर्थे - पुत्रीयिष्यति ।*

***लोटि*** - *'पुत्रमात्मन इच्छतु' इत्यर्थे - पुत्रीयतु ।*

***लङि*** - *'पुत्रमात्मन ऐच्छत्' इत्यर्थे - अपुत्रीयत् ।*

***विधिलिङि*** - *'पुत्रमात्मन इच्छेत्' इत्यर्थे - पुत्रीयेत् ।*

***आशीर्लिङि*** - *'पुत्रमात्मन इष्यात्' इत्यर्थे - पुत्रीय्यात् ।*

***लुङि*** - *'पुत्रमात्मन ऐषीत्' इत्यर्थे - अपुत्रीयीत् ।*

***लृङि*** - *'पुत्रमात्मन ऐषिष्यत्' इत्यर्थे - अपुत्रीयिष्यत् ।*

*(नामधातौ नित्यमेव इडागमो भवति । अनेकाच एकाचश्च सर्वे नामधातुप्रत्ययान्ता धातवः सेटः । एते सर्वे निर्मिता धातवः सन्ति न तूपदिष्टाः । अतः "एकाच उपदेशेऽनुदात्तात्" इति न प्रवर्तते ।)*

काम्यच्प्रत्ययविधायकं विधिसूत्रम्-

**काम्यच्च ३ । १ । ९**

**उक्तविषये काम्यच् स्यात् । पुत्रमात्मन इच्छति पुत्रकाम्यति । पुत्रकाम्यिता ।**

(इच्छायाम्, कर्मणः, सुपः, आत्मनः, काम्यच्, क्यच्, च, वा)

*सरलार्थः- क्यचो विषये काम्यच्प्रत्ययश्च भवति । काम्यचश्चकार इत् । ककारस्य तु उच्चारणसामर्थ्यान्नेत्वम् ।*

*'पुत्रमात्मन इच्छति' इत्यर्थे 'पुत्र+अम्' इत्यस्मात् सुबन्तादनेन सूत्रेण काम्यच्-प्रत्ययेऽनुबन्धलोपे, 'पुत्र अम् काम्य' इति जाते, तस्य धातुत्वात् सुपो लुकि, 'पुत्रकाम्य' इति जाते, तस्माल्लडादिकार्ये 'पुत्रकाम्यति' इति । **लिटि** - पुत्रकाम्याञ्चकार, पुत्रकाम्याम्बभूव, पुत्रकाम्यामास । **लुटि** -*

*'पुत्रमात्मन एषिता' इत्यर्थे काम्यजन्तात् पुत्रकाम्य-धातोर्लुटि, पूर्ववत्प्रक्रियायां 'पुत्रकाम्य इता' इत्यवस्थायाम् "अतो लोपः" इत्यकारलोपे, 'पुत्रकाम्यिता' इति । अत्र 'पुत्रकाम्य' इत्यस्य यकारस्य "यस्य हलः" इति लोपो न भवति, "अर्थवद् ग्रहणे नानर्थकस्य ग्रहणम्" इति परिभाषया निषेधात् । लृडादिलकारेषु क्रमात् - पुत्रकाम्यिष्यति, पुत्रकाम्यतु, अपुत्रकाम्यत्, पुत्रकाम्येत्, पुत्रकाम्य्यात्, अपुत्रकाम्यीत्, अपुत्रकाम्यिष्यत्, इत्यादीनि रूपाणि ।*

क्यच्प्रत्ययविधायकं विधिसूत्रम्-

**उपमानादाचारे ३ । १ । १०**

**उपमानात्कर्मणः सुबन्तादाचारेऽर्थे क्यच् । पुत्रमिवाचरति पुत्रीयति छात्रम् । विष्णूयति द्विजम् ।**

(उपमानाद्, कर्मणः, सुपः, आचारे, क्यच्, वा)

***सरलार्थः-*** *कर्मभूतादुपमानात् सुबन्ताद् आचारेऽर्थे क्यच्-प्रत्ययो भवति । (अत्र आचारः = व्यवहारः । अनेन विहितः क्यच् आचारार्थकः, न त्विच्छार्थकः ।) 'पुत्रीयति छात्रम्' अत्र पुत्र उपमानोऽस्ति, छात्रश्चोपमेयः ।*

*'छात्रं पुत्रमिव आचरति' इत्यर्थे, उपमानवाचकात् कर्मबोधकात् 'पुत्र+अम्' इति सुबन्ताद् अनेन सूत्रेण क्यचि, धातुसंज्ञायां, सुपो लुकि, 'पुत्र य' इत्यवस्थायां, "क्यचि च"ति अवर्णस्येत्वे, 'पुत्रीय' इति धातोर्लडादिकार्ये, 'पुत्रीयति' इति । तथा च, 'द्विजं विष्णुमिव आचरति' इत्यर्थे 'विष्णु+अम्' इति सुबन्तात् क्यचि, धातुसंज्ञायां, सुब्लुकि, 'विष्णु य' इत्यवस्थायाम्, "अकृत्सार्वधातुकयोर्दीर्घः" इत्युकारस्य दीर्घे, विष्णूयधातोर्लडादिकार्ये, 'विष्णूयति द्विजम्' इति ।*

**वा. (सर्वप्रातिपदिकेभ्यः क्विब्वा वक्तव्यः)**

**"अतो गुणे" । कृष्ण इवाचरति कृष्णति । स्व इवाचरति स्वति । सस्वौ ।**

***सरलार्थः-*** *सर्वेभ्यः प्रातिपदिकेभ्य आचारेऽर्थे विकल्पेन क्विप्प्रत्ययो भवति । क्विप्प्रत्ययोऽसुबन्तप्रातिपदिकेभ्यो भवति । क्विप्प्रत्ययस्य सर्वापहारिलोपो भवति, किमपि नावशिष्यते ।*

*'कृष्ण इव आचरति' इत्यर्थे कृष्ण-शब्दाद् अनेन वार्तिकेन क्विप्प्रत्यये, तस्य सर्वापहारिलोपे 'कृष्ण' इति जाते, तस्य धातुसंज्ञायां, तस्माल्लटि, तिपि, शपि, "अतो गुणे" इति पररूपे, 'कृष्णति' । एवमेव स्व इवाचरतीत्यर्थे - स्वति । लिटि - एकाच्त्वान्नाम् । स्वधातोर्लिटि, तिपि, णलि, वृद्धौ, 'स्वा आ' इत्यवस्थायाम् "आत औ णलः" इत्यौकारादेशे, द्वित्वादिकार्ये, 'सस्वौ' ।*

दीर्घादेशविधायकं विधिसूत्रम्-

**अनुनासिकस्य क्विझलोः क्ङिति ६ । ४ । १५**

**अनुनासिकान्तस्योपधाया दीर्घः स्यात्क्वौ झलादौ च क्ङिति । इदमिवाचरति इदामति । राजेव राजानति । पन्था इव पथीनति ।**

(अनुनासिकस्य, अङ्गस्य, उपधायाः, दीर्घः, क्विझलोः, क्ङिति)

***सरलार्थः-*** *अनुनासिकान्तस्य अङ्गस्योपधायाः स्थाने दीर्घो भवति क्विप्रत्यये, झलादौ कित्प्रत्यये ङित्प्रत्यये च परे ।*

*'इदमिव आचरति' इत्यर्थे इदम्-शब्दात् "सर्वप्रातिपदिकेभ्यः क्विबा वक्तव्यः" इति वार्तिकेन क्विप्-प्रत्यये, क्विपरेऽनेन सूत्रेण इदमित्यस्योपधाया अकारस्य दीर्घे, क्विप्प्रत्ययस्य सर्वापहारिलोपे, 'इदाम्' इति जाते, तस्य धातुसंज्ञायाम्, इदाम्-धातोर्लटि, तिपि, शपि, 'इदामति' इति रूपं सिद्धम् । एवमेव - 'पन्था इव आचरति' इत्यर्थे पथिन्-शब्दात् 'पथिनति' इत्यपि सिद्धयति । (अत्र सर्वनामस्थानविभक्तेरभावात् "थो न्थः" इति न्थादेशो न भवति ।)*

क्यङ्प्रत्ययविधायकं विधिसूत्रम्-

**कष्टाय क्रमणे ३ । १ । १४**

**चतुर्थ्यन्तात्कष्टशब्दादुत्साहेऽर्थे क्यङ् स्यात् । कष्टाय क्रमते कष्टायते । पापं कर्तुमुत्सहते इत्यर्थः ।**

(कष्टाय, क्रमणे, क्यङ्, प्रत्ययः, परः, वा)

*क्यङः कङावितौ । अत्र क्रमण-शब्दस्य उत्साहोऽर्थः, कष्ट-शब्दस्य च पापोऽर्थो वर्तत इति ज्ञापनार्थमेव*

*'कष्टायते' इत्यस्य 'पापं कर्तुमुत्सहते' इत्यर्थः प्रदत्तोऽस्ति ।*

***सरलार्थः-*** *चतुर्थ्यन्तात् समर्थादुत्साहेऽर्थे क्यङ्प्रत्ययो भवति । 'कष्टाय क्रमते' इत्यर्थे विवक्षिते चतुर्थ्यन्तात् कष्टशब्दात् ('कष्ट+ङे' इत्यस्मात्) अनेन सूत्रेण क्यङ्यनुबन्धलोपे 'कष्ट ङे य' इति जाते, क्यङन्तत्वाद्धातुसंज्ञायां, सुपो लुकि, 'कष्ट य' इत्यवस्थायाम्, "अकृत्सार्वधातुकयोर्दीर्घः" इति दीर्घे, 'कष्टाय' इति धातोर्लटि, ङित्वादात्मनेपदे, तादिकार्ये, 'कष्टायते' इति ।*

क्यङ्प्रत्ययविधायकं विधिसूत्रम्-

**शब्दवैरकलहाभ्रकण्वमेघेभ्यः करणे ३ । १ । १७**

**एभ्यः कर्मभ्यः करोत्यर्थे क्यङ् स्यात् । शब्दं करोति शब्दायते ।**

(शब्दवैरकलहाभ्रकण्वमेघेभ्यः, कर्मणः, करणे, क्यङ्, प्रत्ययः, परः, वा)

***सरलार्थः-*** *शब्द, वैर, कलह, अभ्र, कण्व, मेघ, इति कर्मभूतेभ्यः षड्भ्यः शब्देभ्यः 'करोति' इत्यर्थे क्यङ्-प्रत्ययो भवति ।*

*'शब्दं करोती'त्यर्थे 'शब्द+अम्' इत्यस्मात् शब्दादनेन क्यङि, 'शब्द अम् य' इति जाते, तस्य धातुसंज्ञायां सुपो लुकि, "अकृत्सार्वधातुकयोर्दीर्घः" इति दीर्घे, 'शब्दाय' इति धातोर्लटि, ङित्वादात्मनेपदे, 'शब्दायते' इति । एवं प्रकारेण- वैरं करोतीत्यर्थे - वैरायते । कलहं करोति - कलहायते, अभ्रं करोति - अभ्रायते, कण्वं करोति - कण्वायते, मेघं करोति - मेघायते, इत्यादीनि रूपाणि च बोध्यानि ।*

***(ग. सू.) तत्करोति तदाचष्टे, इति णिच् । (ग. सू.) प्रातिपदिकाद्धात्वर्थे बहुलमिष्ठवच्च । प्रातिपदिकाद्धात्वर्थे णिच् स्यात्, इष्ठे यथा प्रातिपदिकस्य पुंवद्भावरभावटिलोपविन्मतुब्लोप-यणादिलोपप्रस्थस्फाद्यादेशभसंज्ञास्तद्वण्णावपि स्युः । इत्यल्लोपः । घटं करोत्याचष्टे वा घटयति ।***

***(ग. सू.) तत्करोति तदाचष्टे, इति णिच् ।*** इदं चुरादिगणसूत्रम् । प्रादिपदिकादित्यनुवर्तते ।

***सरलार्थः-*** *तत्करोति तदाचष्टे इति चार्थे प्रातिपदिकाद् णिच्प्रत्ययो भवति । इदञ्च णिच् आचारक्विविव प्रातिपदिकादेव भवति ।*

***ग. सू.) प्रातिपदिकाद्धात्वर्थे बहुलमिष्ठवच्च ।*** इष्ठवदिति सम्तम्यन्ताद् वतिः ।

**सरलार्थः-** प्रातिपदिकाद्धात्वर्थे णिच् प्रत्ययो भवति, इष्ठन्प्रत्यये परे यथा प्रातिपदिकस्य पुंवद्भावरभावटिलोपविन्मतुब्लोपयणादिलोपप्रस्थस्फाद्यादेशभसंज्ञाः भवन्ति तद्वद् णिच् प्रत्यये परेऽपि भवन्तिः ।

अतिशयेन पट्वी पटिष्ठ इत्यत्र **भस्याढे तद्धिते** इति पुंवत्वम् । अतिशयेन दृढः द्रढिष्ठः इत्यत्र **र ऋतो हलादेर्लघोः** इति रभावः । अतिशयेन साधुः साधिष्ठः इत्यत्र टिलोपः । अतिशयेन स्रग्वी स्रजिष्ठः इत्यत्र **विन्मतोर्लुक्** इति विनो लुक् । अतिशयेन गोमान् गविष्ठः इत्यत्र मतुपो लुक् । अतिशयेन स्थूलः स्थविष्ठः इत्यादौ **स्थूलदूरयुव....** ६।४।१५६ इत्यादिना यणादिलोपः पूर्वस्य च गुणः । अतिशयेन प्रियः प्रेष्ठः इत्यादौ **प्रियस्थिर....**६।४।१५७ इत्यादिना प्रादेशः । अतिशयेन स्रग्वी स्रजिष्ठः इत्यन्त्र भत्वान्न कुत्वम् । एते इष्ठन्प्रत्यये परे इव णावपि परतः स्युरित्यर्थः ।

***घटं करोत्याचष्टे वा घटयति ।***

घटं करोति घटमाचष्टे वा इत्यस्मिन्नर्थे **तत्करोति तदाचष्टे** इति वार्तिकाण्णिचि, णस्य चस्य च लोपे, घट इ इति जाते, इष्ठवद्भावाद् भसंज्ञायां **यस्येति च** ६।४।१४८ इत्यकारलोपे, वर्णसम्मेलने घटि इति जाते, **सनाद्यन्ता धातवः** ३।१।३२ इति धातुसंज्ञायां **वर्तमाने लट्** ३।२।१२३ इति लटि, अकारटकारयोरित्संज्ञायां लोपे च कृते लः स्थाने प्रथमपुरुषैकवचनविवक्षायां तिपि, अनुबन्धलोपे, **तिङ्शित्सार्वधातुकम्** ३।४।११३ इति सार्वधातुकसंज्ञायां शपि, शपयोरित्संज्ञायां लोपे च कृते वर्णसम्मेलने घटयति इति रूपं सिद्ध्यति । लिटि **घटयाञ्चकार** । लुडादौ (**घटयिता, घटयिष्यति, घटयतु, अघटयत्, घटयेत्, घट्यात्, अजघटत्, अघटयिष्यत्** इति ।

यक्प्रत्ययविधायकं विधिसूत्रम्-

**कण्ड्वादिभ्यो यक् ३। १। २७**
**एभ्यो धातुभ्यो नित्यं यक् स्यात्स्वार्थे। कण्डुञ् गात्रविघर्षणे।१। कण्डूयति। कण्डूयत इत्यादि।**

(कण्ड्वादिभ्यः, यक्, प्रत्ययः, परश्च)

**सरलार्थः-** कण्डूञित्येवमादिभ्यो यक्प्रत्ययो भवति। द्विधाः कण्ड्वादयः, धातवः प्रातिपादिकानि च। तत्र धात्वधिकाराद् धातुभ्यः एव प्रत्ययो विधीयते, न तु प्रातिपदिकेभ्यः। ञित्वात् कण्डुञ्धातुः उभयपदी।

## प्रयोगसिद्धिप्रकारः

### पुत्रीयति

'आत्मनः पुत्रमिच्छति' इत्यर्थे विवक्षिते 'पुत्र+अम्' इत्यस्मात् सुबन्तात् "सुप आत्मनः क्यच्" इति सूत्रेण क्यच्-प्रत्ययेऽनुबन्धलोपे, 'पुत्र अम् य' इति जाते, तस्य 'सनाद्यन्ता धातवः' इति सूत्रेण धातुसंज्ञायां "सुपो धातुप्रातिपदिकयोः" इत्यमो लुकि, 'पुत्र य' इत्यवस्थायां "क्यचि च" इति सूत्रेण 'पुत्र' इत्यस्याकारस्य स्थाने ईकारादेशे, 'पुत्रीय' इति जाते, पुत्रीय-धातोर्लटि, लस्य स्थाने "शेषात्कर्तरि परस्मैपदम्" इति परस्मैपदे, तिपि, शपि, पररूपे, 'पुत्रीयति' इति रूपं सिद्ध्यति।

### पुत्रकाम्यति

'पुत्रमात्मन इच्छति' इत्यर्थे 'पुत्र+अम्' इत्यस्मात् सुबन्तात् "काम्यच्च" इति सूत्रेण काम्यच्-प्रत्ययेऽनुबन्धलोपे, 'पुत्र अम् काम्य' इति जाते, तस्य धातुसंज्ञायां सुपो लुकि, 'पुत्रकाम्य' इति जाते, तस्माल्लटि, तिपि, शपि, पररूपे, 'पुत्रकाम्यति' इति रूपं सिद्धम्।

### शब्दायते

'शब्दं करोती'त्यर्थे 'शब्द+अम्' इत्यस्माच्छब्दात् "शब्दवैरकलहाभ्रकण्वमेघेभ्यः करणे" इति सूत्रेण क्यङि, अनुबन्धलोपे, 'शब्द अम् य' इति जाते, तस्य धातुसंज्ञायां सुपो लुकि, 'शब्द य' इत्यवस्थायाम्, "अकृत्सार्वधातुकयोर्दीर्घः" इति सूत्रेण 'शब्द' इत्यस्याकारस्य दीर्घे, 'शब्दाय' इति जाते, तस्मात् शब्दायधातोर्लटि, ङित्वादात्मनेपदे, लस्य स्थाने तादेशे, एत्वे, शपि, पररूपे च कृते, 'शब्दायते' इति रूपं सिद्ध्यति।

## अभ्यासार्थाः प्रश्नाः

१. **अधस्तनसूत्राणि तेषां नेपालीभाषायामर्थं च लिखत**

(क) सुप आत्मनः क्यच्		(ख) सुपो धातुप्रातिपदिकयोः

(ग) क्यचि च

(घ) काम्यच्च

(ङ) उपमानादाचारे

(च) कष्टाय क्रमणे

२. **प्रश्नानामुत्तराणि देयानि**

(क) कस्मिन्नर्थे क्यच्प्रत्ययो भवति ?

(ख) कीदृशस्य सुपो लुग्भवति ?

(ग) क्यचि परे कस्य स्थाने ईत्वं भवति ?

(घ) आत्मनः पुत्रमिच्छतीत्यर्थे किं रूपं भवति ?

(ङ) 'पुत्रकाम्यति' इति पदस्य कोऽर्थः ?

(च) "सर्वप्रातिपदिकेभ्यो क्विब्वा वक्तव्यः" इति वार्तिकस्यार्थं लिखत ।

(छ) "शब्दवैर०" इति सूत्रं पूरयत ।

(ज) पुत्रीयधातोर्लङि कानि रूपाणि भवन्ति ?

(झ) अनुनासिकान्तस्योपधाया क्विप्रत्यये, झलादौ कित्प्रत्यये ङित्प्रत्यये च परे केन सूत्रेण किं विधीयते ?

(ञ) क्यचि क्यङि च परे कस्य पदसंज्ञा भवति कस्य च न ? तच्च कुत्र निर्दिष्टम् ?

३. **अधोलिखितानि पदानि प्रयुज्य प्रत्येकं त्रीणि वाक्यानि रचयत**

पुत्रीयति, कष्टायते, शब्दायते, पुत्रकाम्यतु, कृष्णायते, इदामति ।

४. **समीचीनेषु कथनेषु** (√) **चिह्नमसमीचीनेषु च** (×) **चिह्नं दर्शयत**

(क) परेषां कृत इच्छायामर्थे क्यच्प्रत्ययो भवति ।

(ख) धातोः प्रातिपदिकस्य चाऽन्तर्गतस्य सुपो लुग्भवति ।

(ग) पुत्रमात्मनः इच्छेदित्यर्थे 'पुत्रीयेत्' इति रूपं भवति ।

(घ) 'कृष्णति' इति पदस्य 'कृष्ण इवाचरति' इत्यर्थः ।

(ङ) 'पुत्रीय' इति यङन्तधातुर्विद्यते ।

५. **प्रत्ययान् संयुज्य निष्पन्नरूपाणि लिखत**

पुत्र + क्यच् + लट्(सिप्), राजन् + क्यच् + लिट्(तिप्), पुत्र + काम्यच् + लुट्(मिप्), स्व + क्विप् + लट्(झि), शब्द + क्यङ् + लङ्(थास्), कष्ट + क्यङ् + लृट्(त), पथिन् + क्विप् + लट्(सिप्), पुत्र + क्यच् + लुङ्(तस्) ।

६. **पुत्रकाम्यिता, विष्णूयति, पुत्रीयतु, अशब्दायत, घटयति, कण्डूयति इति प्रयोगाणां सिद्धेः प्रक्रियां दर्शयत ।**

७. **नामधातुरिति किमुच्यते ? सोदाहरणं स्पष्टीकुरुत ।**

८. **'शब्दाय' इति नामधातोर्लटि लृटि लङि च सर्वाणि रूपाणि लिखत ।**

९. **पुत्रीयधातोः सर्वेषु लकारेषु रूपाणि लिखत ।**

## अनुप्रयोगः

१. **अधोलिखितानि वाक्यानि पठत**

(क) अङ्गारः करं **कृष्णायते** ।

(ख) माता द्विजं **विष्णूयति** ।

(ग) पुरा राजा दशरथः **पुत्रीयाञ्चकार** ।

(घ) शिक्षकाश्छात्रान् **पुत्रीयन्ति** ।

(ङ) प्रायः सर्वे मनुष्याः **पुत्रकाम्यन्ति** ।

(च) त्वं किमर्थं **शब्दायसे** ?

(छ) दुर्जनाः सदैव **कष्टायन्ते** ।

२. **नामधातुप्रत्ययान्तेभ्यो धातुभ्यो निर्मितानि पाठेऽप्रयुक्तानि दश क्रियापदानि सङ्कलय्य कक्षायां श्रावयत ।**

३. **उचितपदैः रिक्तस्थानं पूरयत**

| **क्रियापदानि** | **अर्थाः** |
|---|---|
| .................. | आत्मनः पुत्रमेष्टा |
| अकष्टायत | .................. |
| .................. | शब्दं कुर्यात् |
| पथीनति | .................. |
| .................. | कृष्ण इवाचरति |
| पुत्रकाम्यन्तु | .................. |

पञ्चमः पाठः

# अथात्मनेपदप्रक्रिया

**पाठपरिचयः**

“**अनुदात्तङित आत्मनेपदम्**” इति सूत्रेण अनुदात्तेद्धातुभ्यः ङिद्धातुभ्यश्च आत्मनेपदसंज्ञकाः प्रत्ययाः विहिताः। “**स्वरितञितः कर्त्रभिप्राये क्रियाफले**” इति सूत्रेण स्वरितेद्धातुभ्यः ञिद्धातुभ्यश्च कर्तृगामिनि क्रियाफले आत्मनेपदसंज्ञकाः प्रत्ययाः विहिताः। तद्भिन्नेभ्यः धातुभ्यः “**शेषात् कर्तरिपरस्मैपदम्**” इति सूत्रेण परस्मैपदसंज्ञकाः प्रत्यया भवन्तीति व्यवस्था भ्वादिप्रकरणे निरूपिता। अत्र च प्रकरणे पुनः धातुभ्यः आत्मनेपदं विधीयते तस्यायमर्थः-

- यदि परस्मैपदिभ्यो धातुभ्य आत्मनेपदमवस्थाविशेषे विहितमस्ति चेत् तदवस्थायां आत्मनेपदं भवति न तु परस्मैपदमित्यर्थः।
- उभयपदिभ्यो धातुभ्यः आत्मनेपदं विधीयते चेत् तत्र अवस्थाविशेषे आत्मनेपदमेव भवति न तु परस्मैपदमित्यर्थः।

आत्मनेपदविधायकं सूत्रम्-

**कर्तरि कर्मव्यतिहारे** १।३।१४

**क्रियाविनिमये द्योत्ये कर्तर्यात्मनेपदम्। व्यतिलुनीते। अन्यस्य योग्यं लवनं करोतीत्यर्थः।**

(कर्मव्यतिहारे, कर्तरि, आत्मनेपदम्)

***सरलार्थः***- *क्रियाविनिमये द्योत्ये सर्वेभ्यो धातुभ्यः कर्तरि विहितस्य लकारस्य स्थाने आत्मनेपदसंज्ञकाः प्रत्यया एव विधातव्याः।*

*व्यत्युपसर्गपूर्वकाद् लूधातोर्विहितस्य लटः स्थाने क्रियाविनिमये द्योत्येऽनेन सूत्रेण आत्मनेपदे, ‘व्यतिलुनीते’ इति सिद्ध्यति। ‘व्यतीलुनीते’ इत्यस्यार्थोऽन्यस्य योग्यं लवनमन्यः करोतीति भवति।*

आत्मनेपदनिषेधविधायकं सूत्रम्-

**न गतिहिंसार्थेभ्यः** १।३।१५

**व्यतिगच्छति। व्यतिघ्नन्ति।**

(गतिहिंसार्थेभ्यः, कर्मव्यतिहारे, आत्मनेपदम्, न)

***सरलार्थः***- *गत्यर्थकेभ्यो हिंसार्थकेभ्यश्च धातुभ्यः क्रियाविनिमये द्योत्ये आत्मनेपदं न भवति ।*

*'अन्यस्य योग्यं गमनमन्यः करोति' इत्यर्थे व्यत्युपसर्गपूर्वकाद् गम्-धातोर्विहितस्य लस्य स्थाने "कर्तरि कर्मव्यतिहारे" इति सूत्रेण आत्मनेपदे प्राप्ते, गम्-धातोर्गत्यर्थकत्वादनेन सूत्रेण तन्निषेधे, लस्य स्थाने "शेषात्कर्तरि परस्मैपदम्" इति परस्मैपदे, तिबादिकार्ये, 'व्यतिगच्छति' इति । एवमेव 'अन्यस्य योग्यं हननमन्ये कुर्वन्ति' इत्यर्थे व्यत्युपसर्गपूर्वकाद् हिंसार्थकाद् हन्धातोर्विहितस्य लस्य स्थाने प्राप्तस्यात्मनेपदस्यापि अनेनैव निषेधात् परस्मैपदे, 'व्यतिघ्नन्ति' इत्यपि सिद्ध्यति ।*

आत्मनेपदविधायकं विधिसूत्रम्-

**नेर्विशः** १ । ३ । १७

**निविशते ।**

(नेः, विशः, आत्मनेपदम्)

***सरलार्थः***- *नि-उपसर्गपूर्वकाद् विश्-धातोरात्मनेपदं भवति । (विश्-धातुः परस्मैपदी वर्तते । 'नि' इत्युपसर्गयोगादात्मनेपदी भवति ।)*

*'नि' इत्युपसर्गपूर्वकाद् विश्धातोर्विहितस्य लटः स्थाने प्रकृतसूत्रेण आत्मनेपदे, तादिकार्ये, 'निविशते' इति रूपं सिद्धम् ।*

आत्मनेपदनियामकं सूत्रम्-

**परिव्यवेभ्यः क्रियः** १ । ३ । १८

**परिक्रीणीते । विक्रीणीते । अवक्रीणीते ।**

(परिव्यवेभ्यः, क्रियः, आत्मनेपदम्)

***सरलार्थः***- *'परि', 'वि' 'अव' इति उपसर्गपूर्वकात् क्रीधातोः क्रियाफलेऽकर्तृगेऽपि आत्मनेपदं भवति । (ञित्वात् क्रीधातुरुभयपदी वर्तते, कर्तृगे फले त्वात्मनेपदी एव भवति ।)*

*परि-उपसर्गपूर्वकात् क्रीधातोर्विहितस्य लटः स्थानेऽनेनात्मनेपदे - परिक्रीणीते । वि-अवाभ्यामुपसर्गाभ्यां परस्मात् क्रीधातोरपि एवं प्रकारेण - विक्रीणीते, अवक्रीणीते इति सिद्ध्यतः ।*

आत्मनेपदविधायकं विधिसूत्रम्-

**विपराभ्यां जेः** १ । ३ । १९

**विजयते । पराजयते**

(विपराभ्याम्, जेः, आत्मनेपदम्)

***सरलार्थः***– *'वि', 'परा' इत्युपसर्गपूर्वकाद् जिधातोरात्मनेपदं भवति ।*

*वि-उपसर्गपूर्वकाद् जिधातोर्विहितस्य लटः स्थाने प्रकृतसूत्रेणात्मनेपदे, तादिकार्ये, 'विजयते' इति रूपं सिद्ध्यति । एवमेव 'परा' इत्यस्य योगे - पराजयते ।*

आत्मनेपदविधायकं विधिसूत्रम्-

**समवप्रविभ्यः स्थः १ । ३ । २२**

**संतिष्ठते । अवतिष्ठते । प्रतिष्ठते । वितिष्ठते**

(सम्-अव-प्र-विभ्यः स्थः आत्मनेपदम्)

***सरलार्थः***– *सम्, अव, प्र, वि, एतेभ्य उपसर्गेभ्यः परस्मात् स्थाधातोरात्मनेपदं भवति ।*

*(परस्मैपदी स्थाधातुरेतेषामुपसर्गाणां योगादात्मनेपदी भवति ।)*

*सम्-उपसर्गपूर्वकात् स्थाधातोर्विहितस्य लटः स्थानेऽनेन सूत्रेण आत्मनेपदे, शपि, 'स्था' इत्यस्य तिष्ठादेशे, पररूपे, मस्यानुस्वारे, 'संतिष्ठते' इति सिद्ध्यति । अव-प्र-वि-उपसर्गाणां योगेऽपि पूर्ववत् प्रक्रियायां क्रमाद् - अवतिष्ठते, प्रतिष्ठते, वितिष्ठते, इत्यादीनि रूपाणि सिद्ध्यन्ति ।*

आत्मनेपदनियामकं सूत्रम्-

**अपह्नवे ज्ञः १ । ३ । २२**

**शतमपजानीते । अपलपतीत्यर्थः ।**

(अपह्नवे, ज्ञः, आत्मनेपदम्)

***सरलार्थः***– *ज्ञा-धातोर्विहितस्य लस्य स्थाने अपह्नवेऽर्थे आत्मनेपदमेव भवति ।*

*अपोपसर्गपूर्वकाद् ज्ञाधातोर्विहितस्य लटः स्थाने प्रकृतसूत्रेण आत्मनेपदे, तादेशे, श्नाप्रत्यये, "ज्ञाजनोर्जा" इति जाऽऽदेशे, 'ना' इत्यस्याकारस्य ईत्वे, टेरेत्वे, 'अपजानीते' इति सिद्ध्यति । उदाहरणार्थम् - शतमपजानीते, शतं रूप्यकाणि अपलपतीत्यर्थः ।*

आत्मनेपदनियामकं सूत्रम्-

**अकर्मकाच्च १ । ३ । ४५**

**सर्पिषो जानीते । सर्पिषोपायेन प्रवर्तत इत्यर्थः**

(अकर्मकात्, च, ज्ञः, आत्मनेपदम्)

***सरलार्थः***– *अकर्मकाद् ज्ञाधातोर्विहितस्य लस्य स्थाने आत्मनेपदमेव भवति । नियोगार्थकादकर्मकाद् ज्ञाधातोर्विहितस्य लटः स्थाने अनेन आत्मनेपदे, पूर्ववत् प्रक्रियायां 'जानीते' इति । 'सर्पिषो जानीते' वाक्येऽस्मिन् 'सर्पिषः' इति षष्ठी "ज्ञोऽविदर्थस्य करणे २ । ३ । ५१" इति सूत्रेण करणेऽर्थे विहिताऽस्ति । अतः वाक्येऽस्मिन् 'सर्पिषः' इत्यस्यार्थः 'सर्पिषा(घृतेन) = उपायभूतेन' इति । 'जानीते' इत्यस्य तु 'प्रवर्तते' इत्यर्थः । अत एव 'सर्पिषो जानीते' इत्यस्यार्थः 'सर्पिषोपायेन प्रवर्तते' इति प्रदत्तोऽस्ति ।*

आत्मनेपदविधायकं विधिसूत्रम् -

**उदश्चरः सकर्मकात्** १ । ३ । ५३

**धर्ममुच्चरते । उल्लङ्घ्य गच्छतीत्यर्थः ।**

(उदः, चरः, सकर्मकात्, आत्मनेपदम्)

***सरलार्थः***– *सकर्मकाद् 'उद्' इत्युपसर्गकात् चर्-धातोरात्मनेपदं भवति ।*

*सकर्मकादुदुपसर्गपूर्वकात् चर्-धातोरनेनात्मनेपदे 'धर्ममुच्चरते' इति रूपं निष्पद्यते । अस्य च धर्ममुल्लङ्घ्य गच्छतीत्यर्थो भवति । अत्र उदुपसर्गपूर्वकस्य चर्-धातोः कर्म 'धर्मम्' इति विद्यते, अतः 'उच्चर्' इति धातुः सकर्मकः सञ्जातः ।*

आत्मनेपदविधायकं विधिसूत्रम्-

**समस्तृतीयायुक्तात्** १ । ३ । ५४

**रथेन सञ्चरते**

(तृतीयायुक्तात्, समः, चरः, आत्मनेपदम्)

***सूत्रार्थः***– *तृतीयान्तेन युक्तात् 'सम्' इत्युपसर्गपूर्वकाच्चर्-धातोरात्मनेपदं भवति ।*

*'रथेन सञ्चरते' अत्र 'रथेन' इति तृतीयान्तेन युक्तात् सम्-उपसर्गपूर्वकाच्चर्-धातोरनेन सूत्रेण आत्मनेपदे, 'रथेन सञ्चरते' इति । 'पथि सञ्चरति' अत्र तु तृतीयान्तस्याभावान्न आत्मनेपदम् । पथीति सप्तम्यन्तं पदम् । वायुयानेन सञ्चरते । मार्गे सञ्चरति ।*

आत्मनेपदनियामकं सूत्रम्-

**दाणश्च सा चेच्चतुर्थ्यर्थे** १ । ३ । ५५

**सम्पूर्वाद्दाणस्तृतीयान्तेन युक्तादुक्तं स्यात् तृतीया चेच्चतुर्थ्यर्थे । दास्या संयच्छते कामी**

(तृतीयायुक्ताद्, समः, दाणः, च, आत्मनेपदम्, सा चेत्, चतुर्थ्यर्थे)

***सरलार्थः-*** *चतुर्थ्यर्थे विहिता या तृतीया तदन्तेन युक्तात् सम्पूर्वकाद् दाण्-धातोः आत्मनेपदं भवति ।*

*दानार्थको दाण्-धातुः परस्मैपदी वर्तते । "अशिष्टव्यवहारे दाणः प्रयोगे चतुर्थ्यर्थे तृतीया" इति वार्तिकेन दाण्-धातोरशिष्टव्यवहारे द्योत्ये चतुर्थ्यर्थे तृतीया भवति । तत्रैव दाण्-धातोरात्मनेपदम् ।*

*'दास्या संयच्छते कामी' इत्यत्र चतुर्थ्यर्थे वर्तमानाद् 'दास्या' इति तृतीयान्तयुक्तात् समुपसर्गपूर्वाद् दाण्-धातोरात्मनेपदे, "पाघ्राध्मास्था०" इत्यादिना सूत्रेण दाणो यच्छादेशे, 'दास्या संयच्छते कामी' इति ।*

आत्मनेपदविधायकं सूत्रम् -

**पूर्ववत्सनः** १ । ३ । ६२

**सनः पूर्वो यो धातुस्तेन तुल्यं सन्नन्तादप्यात्मनेपदं स्यात् । एदिधिषते**

(पूर्ववत्, सनः, धातोः, आत्मनेपदम्)

***सरलार्थः-*** *सन्-प्रत्ययात् पूर्वो यो धातुरात्मनेपदी विद्यते, तस्मात् सन्नन्तादप्यात्मनेपदं भवति, सनः पूर्वो परस्मैपदी चेत् सन्नन्तादपि परस्मैपदमेव ।*

*'एधितुमिच्छति' इत्यर्थे एध्-धातोः सनि, इडागमे, षत्वे, सन्यङोरिति द्वितीयस्यैकाचः 'धि' इत्यस्य द्वित्वे, अभ्यासकार्ये, 'एदिधिष' इति जाते, तस्य धातुत्वाल्लटि, लस्य स्थाने "पूर्ववत्सनः" इति सूत्रेण एध्-धातोरात्मनेपदत्वात् तस्य सन्नन्तस्वरूपादप्यादात्मनेपदे, 'एदिधिषते' इति सिद्ध्यति । 'पिपठिषति' इत्यत्र सनः पूर्वस्य पठ्-धातोः परस्मैपदत्वात् सन्नन्तात् पिपठिष-धातोरपि परस्मैपदम् ।*

आत्मनेपदनियामकं सूत्रम्-

**गन्धनावक्षेपणसेवनसाहसिक्यप्रतियत्नप्रकथनोपयोगेषु कृञः** १ । ३ । ३२

**गन्धनं सूचनम् । उत्कुरुते । सूचयतीत्यर्थः । अवक्षेपणं भर्त्सनम् । श्येनो वर्तिकामुदाकुरुते । भर्त्सयतीत्यर्थः । हरिमुपकुरुते । सेवत इत्यर्थः । परदारान्प्रकुरुते । तेषु सहसा प्रवर्तते । एधो दकस्योपस्कुरुते, गुणमाधत्ते । कथाः प्रकुरुते । प्रकथयतीत्यर्थः । शतं प्रकुरुते । धर्मार्थं विनियुङ्क्ते । एषु किम् ? कटं करोति**

(गन्धना-अवक्षेपण-सेवन-साहसिक्य-प्रतियत्न-प्रकथनोपयोगेषु, कृञः, आत्मनेपदम्)

***सरलार्थः-*** *गन्धनार्थे, अवक्षेपणार्थे, सेवनार्थे, साहसिक्यार्थे, प्रतियत्नार्थे, प्रकथनार्थे, उपयोगार्थे च वर्तमानाद् कृधातोरात्मनेपदं भवति ।*

*गन्धनेऽर्थे वर्तमानाद् उदुपसर्गपूर्वात् कृधातोरनेन सूत्रेण आत्मनेपदे, 'उत्कुरुते' इति सिद्ध्यति । 'उत्कुरुते' इत्यस्य सूचयतीत्यर्थः ।*

*'श्येनो वर्तिकामुदाकुरुते' इत्यत्र अवक्षेपणेऽर्थे वर्तमानाद् 'उद्''आङ्' एताभ्यामुपसर्गाभ्यां परस्मात् कृधातोरनेनैवाऽऽत्मनेपदे, 'उदाकुरुते' इति सिद्ध्यति । श्येनो वर्तिकां भर्त्सयतीत्यर्थः ।*

*'हरिमुपकुरुते' अत्र सेवनेऽर्थे वर्तमानाद् उपपूर्वात् कृधातोरात्मनेपदे, 'उपकुरुते' इति । 'हरिं सेवते' इत्यर्थः ।*

*'परदारान्प्रकुरुते' अत्र साहसिक्येऽर्थे वर्तमानात् प्रपूर्वात् कृधातोरात्मनेपदे, 'प्रकुरुते' इति सिद्ध्यति । 'परदारेषु सहसा प्रवर्तते' इत्यर्थः ।*

*'एधो दकस्योपस्कुरुते' अत्र प्रतियत्नेऽर्थे वर्तमानाद् उपपूर्वात् कृधातोरात्मनेपदे, सुडागमे, उक्तं रूपं सिद्ध्यति । 'एधो दके गुणमाधत्ते' इत्यर्थः । दकशब्दः जलवाची ।*

*'कथाः प्रकुरुते' अत्र प्रकथनेऽर्थे वर्तमानात् प्रपूर्वात् कृधातोरात्मनेपदे, 'प्रकुरुते' इति । कथाः प्रकथयतीत्यर्थः ।*

*'शतं प्रकुरुते' अत्र उपयोगेऽर्थे वर्तमानात् प्रपूर्वात् कृधातोरात्मनेपदे 'प्रकुरुते' इति रूपं सिद्ध्यति । 'शतं धर्मार्थं विनियुङ्क्ते' इत्यर्थः ।*

आत्मनेपदनियामकं सूत्रम् -

**भुजोऽनवने १ । ३ । ६६। ओदनं भुङ्क्ते । अनवने किम् ? महीं भुनक्ति**

(अनवने, भुजः, आत्मनेपदम्)

***सरलार्थः-*** *अवनं - रक्षणं, न अवनम् इति अनवनं, तस्मिन् अनवने अर्थात् रक्षणभिन्नेऽर्थे( अभ्यवहारेऽर्थे) विद्यमानाद् भुज्-धातोरात्मनेपदसंज्ञकाः प्रत्यया भवन्तीत्यर्थः । 'ओदनं भुङ्क्ते' अत्र अभ्यवहारेऽर्थे विद्यमानाद् भुज्-धातोः "भुजोऽनवने" इत्यनेन आत्मनेपदे 'भुङ्क्ते' इति । अवनवेऽर्थे विद्यमानाद् भुज्-धातोस्तु परस्मैपदं भवति । यथा - महीं भुनक्ति । पृथिवीं रक्षतीत्यर्थः ।*

इत्यात्मनेपदप्रक्रिया

## प्रयोगसिद्धिप्रकारः

### निविशते

'नि' इत्युपसर्गपूर्वकाद् विश्धातोर्लटि, लस्य स्थाने प्राप्तं परस्मैपदं बाधित्वा "नेर्विशः" इति सूत्रेण आत्मनेपदे ते, 'नि विश् त' इति जाते, शपि, टेरेत्वे, 'निविशते' इति रूपं सिद्धम् ।

## विजयते

वि-उपसर्गपूर्वकाद् जिधातोर्लटि, लस्य स्थाने प्राप्तं परस्मैपदं बाधित्वा "विपराभ्यां जे:" इति सूत्रेण आत्मनेपदे ते, 'वि जि त' इति जाते, शपि, गुणेऽयादेशे, टेरेत्वे, 'विजयते' इति रूपं सिद्ध्यति ।

## उत्कुरुते

गन्धनेऽर्थे वर्तमानाद् उदुपसर्गपूर्वात् कृधातोर्लट्यनुबन्धलोपे, लस्य स्थाने "गन्धनावक्षेपणसेवन-साहसिक्यप्रतियत्नप्रकथनोपयोगेषु कृञः" इति सूत्रेण आत्मनेपदे तादेशे, 'उत् कृ त' इति जाते, प्राप्तं शपं बाधित्वा "तनादिकृञ्भ्य उः" इति सूत्रेण उप्रत्यये 'उत् कृ उ त' इति जाते, 'कृ' इत्यस्य गुणे रपरत्वे 'उत् कर् उ त' इत्यवस्थायाम् "अत उत्सार्वधातुके" इति सूत्रेण 'कर्' इत्यस्याकारस्योत्वे 'उत् कुर् उ त' इति जाते, ङित्वाद् गुणनिषेधे, टेरेत्वे, 'उत्कुरुते' इति रूपं सिद्ध्यति । ('उत्कुरुते' इत्यस्य सूचयतीत्यर्थः ।)

### अभ्यासार्थाः प्रश्नाः

१. **अधस्तनसूत्राणि तेषां नेपालीभाषायामर्थं च लिखत**

(क) कर्तरि कर्मव्यतिहारे

(ख) परिव्यवेभ्यः क्रियः

(ग) विपराभ्यां जेः

(घ) समवप्रविभ्यः स्थः

(ङ) पूर्ववत्सनः

(च) अपह्नवे ज्ञः

(छ) स्वरितञितः कर्त्रभिप्राये क्रियाफले

(ज) अनुदात्तङित आत्मनेपदम्

(झ) भुजोऽनवने

२. **प्रश्नानामुत्तराणि देयानि**

(क) गतिहिंसार्थेभ्यो धातुभ्यः क्रियाविनिमये द्योत्ये प्राप्तमात्मनेपदं केन सूत्रेण वार्यते ?

(ख) अकर्मकाद् ज्ञाधातोर्विहितस्य लस्य स्थाने केन सूत्रेणाऽऽत्मनेपदं क्रियते ?

(ग) 'सर्पिषो जानीते' इत्यस्य अर्थः कः ?

(घ) 'विक्रीणीते' इत्यत्र केन सूत्रेण आत्मनेपदं भवति ?

(ङ) 'परदारान्प्रकुरुते' इत्यत्र कस्मिन्नर्थे केन सूत्रेण आत्मनेपदं भवति ?

(च) "समस्तृतीयायुक्तात्" इति सूत्रं किं करोति ?

(छ) "गन्धनावक्षेपण०" इति सूत्रं पूरयत ।

(ज) 'क्रियाविनिमय' इत्यनेन किं बोध्यते ?

(झ) 'धर्ममुच्चरते' इत्यस्य कोऽर्थः ?

(ञ) 'व्यतिलुनीते' इत्यत्र कौ उपसर्गौ योजितौ ?

(ट) अवनेऽर्थे वर्तमानाद् भुज्-धातोः परस्मैपदात्मनेपदयोः किं पदं भवति ?

३. **अधोलिखितानां रूपाणां प्रत्येकमुपसर्गधातुलकारपदपुरुषवचनानि निर्दिशत**

व्यतिघ्नन्ति, अवक्रीणीते, वितिष्ठते, संतिष्ठते, व्यतिगच्छति, उपकुरुते, उदाकुरुते ।

४. **समीचीनेषु कथनेषु (√) चिह्नमसमीचीनेषु च (×) चिह्नं दर्शयत**

(क) गत्यार्थकाद्धातोः क्रियाविनिमये द्योत्ये आत्मनेपदं भवति ।

(ख) केभ्यश्चनधातुभ्यः क्रियाफले कर्तृगामिनि सति आत्मनेपदं भवति ।

(ग) सर्वेभ्यो धातुभ्यः परस्मैपदमात्मनेपदञ्च भवतः ।

(घ) अवबोधनेऽर्थे वर्तमानाद् ज्ञाधातोरात्मनेपदं भवति ।

(ङ) 'गन्धनम्' इत्यस्य सूचनमित्यर्थो भवति ।

(च) उभयपदिनो धातुभ्यः कर्तृगे फले परस्मैपदं भवति ।

(छ) तृतीयान्तेन युक्तात् समुपसर्गपूर्वाच्चर्-धातोरात्मनेपदं भवति ।

५. **अर्थवशादपि आत्मनेपदं भवतीति ससूत्रं सोदाहरणं प्रतिपादयत ।**

६. **अधोऽङ्कितानां प्रयोगाणां सिद्धेः प्रक्रियां दर्शयत**

पराजयते, कथाः प्रकुरुते, सर्पिषो जानीते, अवतिष्ठते, विक्रीणीते, एदिधिषते ।

७. **अधोनिर्दिष्टानां पदानां वाक्येषु प्रयोगं कुरुध्वम्**

व्यतिहन्ति, प्रतिष्ठते, निविशन्ते, अविजयत, धर्ममुच्चरेत्, प्रकुर्वाते, उदाकुरुते ।

## अनुप्रयोगः

१. **अधोलिखितानि वाक्यानि शुद्धानि कृत्वाऽभ्यासपुस्तिकायां सारयत**

(क) वीराः पुरुषाः शत्रून् **पराजयन्ति** ।

(ख) शिशुः खट्वायां **शयति** ।

(ग) सर्पिषः शुक्रं **जानाति** ।

(घ) पापिनो जना **धर्ममुच्चरन्ति** ।

(ङ) छात्रा **व्यतिगच्छन्ते** ।

(च) सबलो युद्धे दुर्बलं **विजयति** ।

२. **आत्मनेपदिक्रियापदानां प्रयोगं कृत्वा पञ्चदशवाक्येष्वेकमनुच्छेदं लिखित्वा शिक्षकं दर्शयत ।**

**षष्ठः पाठः**

# अथ परस्मैपदप्रक्रिया

**पाठपरिचयः**

- "अनुदात्तङित आत्मनेपदम्" इति सूत्रेण अनुदात्तेद्धातुभ्यः ङिद्धातुभ्यश्च आत्मनेपदसंज्ञकाः प्रत्ययाः विहिताः ।
- "स्वरितञितः कर्त्रभिप्राये क्रियाफले" इति सूत्रेण स्वरितेद्धातुभ्यः ञिद्धातुभ्यश्च कर्त्रगामिनि क्रियाफले परस्मैपदसंज्ञकाः प्रत्ययाः विहिताः ।
- अवशिष्टेभ्यो धातुभ्यः "शेषात् कर्तरिपरस्मैपदम्" इति सूत्रेण परस्मैपदसंज्ञकाः प्रत्यया भवन्तीति व्यवस्था भ्वादिप्रकरणे निरूपिता । अत्र च प्रकरणे पुनः धातुभ्यः परस्मैपदं विधीयते ।

  तस्यायमर्थः-

  यदि आत्मनेपदिभ्यो धातुभ्यः परस्मैपदमवस्थाविशेषे विहितमस्ति चेत् तदवस्थायां परस्मैपदं भवति न तु आत्मनेपदमित्याशयः ।

  उभयपदिभ्यो धातुभ्यः परस्मैपदं विधीयते तर्हि तत्र अवस्थाविशेषे परस्मैपदमेव भवति न तु आत्मनेपदमित्यवगन्तव्यम् ।

परस्मैपदनियामकं सूत्रम्-

**अनुपराभ्यां कृञः १ । ३ । ७९**

**कर्तृगे च फले गन्धनादौ च परस्मैपदं स्यात् । अनुकरोति । पराकरोति**

(अनुपराभ्याम्, कृञः, परस्मैपदम्)

***सरलार्थः-*** *'अनु', 'परा' एताभ्यामुपसर्गाभ्यां परस्मात् कृधातोः कर्तृगेऽपि फले गन्धनादौ अर्थे च परस्मैपदं भवति ।*

*उभयपदिनः कृञ्धातोः क्रियाफले कर्तृगे "स्वरितञितः०" इति सूत्रेण गन्धनादौ अर्थे च "गन्धनावक्षेपण०" इत्यनेन प्राप्तमात्मनेपदं बाधित्वा अनेन सूत्रेण परस्मैपदं भवति ।*

*अनूपसर्गपूर्वकात् कृधातोः कर्तृगे फले गन्धनादौ च प्राप्तमात्मनेपदं बाधित्वा प्रकृतसूत्रेण परस्मैपदे, तिबादिकार्ये, 'अनुकरोति' इति सिद्ध्यति । एवमेव 'परा' इत्यस्य योगेऽपि पराकृ-धातोः परस्मैपदे, 'पराकरोति' इति ।*

परस्मैपदनियामकं सूत्रम्-

**अभिप्रत्यतिभ्यः क्षिपः १। ३। ८०**

**क्षिप प्रेरणे। स्वरितेत्। अभिक्षिपति**

(अभि-प्रति-अतिभ्यः, क्षिपः, परस्मैपदम्)

***सरलार्थः-*** *अभि, प्रति, अति, एतेभ्य उपसर्गेभ्यः परस्मात् क्षिप्-धातोः परस्मैपदं भवति।*

*क्षिप-धातुः प्रेरणेऽर्थे वर्तते। (स्वरितेत्, उभयपदी, अनिट्, सकर्मकः)*

*अभिप्रत्यतीनां योगे कर्तृगेऽपि फले क्षिप्-धातोः परस्मैपदं भवति।*

*अभि-उपसर्गपूर्वकात् क्षिप्-धातोः कर्तृगेऽपि फलेऽनेन सूत्रेण परस्मैपदे, 'अभिक्षिपति' इति सिद्ध्यति। 'प्रति' 'अति' एतयोर्योगेऽपि पूर्ववत् परस्मैपदे, 'प्रतिक्षिपति', 'अतिक्षिपति' इति सिद्ध्यतः।*

परस्मैपदनियामकं सूत्रम्-

**प्राद्वहः १। ३। ८१**

**प्रवहति**

(प्राद्, वहः, परस्मैपदम्)

***सरलार्थः-*** *प्र-उपसर्गपूर्वस्माद् वह्-धातोः परस्मैपदं भवति।*

*वह्-धातुः स्वरितेदुभयपदी वर्तते। कर्तृगेऽपि फलेऽनेन परस्मैपदम्।*

*प्रपूर्वाद् वह्धातोः अनेन सूत्रेण परस्मैपदे 'प्रवहति' इति सिद्ध्यति।*

परस्मैपदनियामकं सूत्रम्-

**परेर्मृषः १। ३। ८२**

**परिमृष्यति**

(परेः, मृषः, परस्मैपदम्)

***सरलार्थः-*** *परि-उपसर्गपूर्वकाद् मृष्-धातोः परस्मैपदं भवति।*

*मृष्-धातुः स्वरितेदुभयपदी वर्तते। पर्युपसर्गयोगे प्रकृतसूत्रेण कर्तृगेऽपि फले मृष्धातोः परस्मैपदं भवति। परि-उपसर्गपूर्वान् मृष्-धातोः परस्मैपदे - परिमृष्यति।*

परस्मैपदनियामकं सूत्रम्-

**व्याङ्परिभ्यो रमः १। ३। ८३**

**रमु क्रीडायाम्। विरमति**

(वि-आङ्-परिभ्यः, रमः, परस्मैपदम्)

***सरलार्थः-*** *वि-आङ्-परिभ्य उपसर्गेभ्यः परस्माद् रम्-धातोः परस्मैपदं भवति ।*

*रमु-धातुः क्रीडायामर्थे वर्तते । रमोरुकार इत् ।(उभयपदी, अकर्मकः)*

*वि-उपसर्गपूर्वाद् रम्-धातोरनेन सूत्रेण कर्तृगेऽपि फले परस्मैपदे - विरमति । आङ्-पूर्वाद् रम्धातोरपि पूर्ववद् 'आरमति' इति । एवमेव परिपूर्वाद् रम्-धातोः परस्मैपदे - परिरमति ।*

परस्मैपदनियामकं सूत्रम्-

**उपाच्च १ । ३ । ८४**

**यज्ञदत्तमुपरमति । उपरमयतीत्यर्थः । अन्तर्भावितण्यर्थोऽयम्**

(उपाद्, रमः, च, परस्मैपदम्)

***सरलार्थः-*** *उप-उपसर्गपूर्वाद् रम्धातोः कर्तृगेऽपि फले परस्मैपदं भवति । उपोपसर्गपूर्वाद् रम्-धातोरनेन सूत्रेण परस्मैपदे, 'उपरमति' इति सिद्ध्यति । अत्र रम्-धातोरण्यन्तत्वादप्यन्तर्भावितण्यर्थत्वात् सकर्मकत्वम् ।*

इति परस्मैपदप्रक्रिया

## प्रयोगसिद्धिप्रकारः

### अनुकरोति

अनूपसर्गपूर्वकात् कृधातोर्लट्यनुबन्धलोपे, लस्य स्थाने "स्वरितञितः कर्त्रभिप्राये क्रियाफले" इति सूत्रेण आत्मनेपदे प्राप्ते, तं प्रबाध्य, "अनुपराभ्यां कृञः" इत्यनेन कर्तृगेऽपि फले परस्मैपदे तिपि 'अनु कृ ति' इति जाते, प्राप्तं शपं बाधित्वा "तनादिकृञ्भ्य उः" इति सूत्रेण उप्रत्यये 'अनु कृ उ ति' इति जाते, 'कृ' इत्यस्य गुणे रपरत्वे 'अनु कर् उ ति' सार्वधातुकत्वाद् गुणे, वर्णयोगे, 'अनुकरोति' इति रूपं सिद्धम् ।

### प्रवहति

प्रपूर्वाद् वह्धातोर्लटि, लस्य स्थाने "प्राद्वहः" इति सूत्रेण कर्तृगेऽपि फले परस्मैपदे, तिपि, शबादिकार्ये, 'प्रवहति' इति रूपं सिद्ध्यति ।

### विरमति

वि-उपसर्गपूर्वाद् रम्-धातोर्लटि, लस्य स्थाने "व्याङ्परिभ्यो रमः" इति सूत्रेण कर्तृगेऽपि फले परस्मैपदे तिपि, शबादिकार्ये 'विरमति' इति रूपं सिद्ध्यति ।

## अभ्यासार्थाः प्रश्नाः

१. **अधस्तनसूत्राणि तेषां नेपालीभाषायामर्थं च लिखत**

(क) अनुपराभ्यां कृञः

(ख) शेषात्कर्तरि परस्मैपदम्

(ग) अभिप्रत्यतिभ्यः क्षिपः

(घ) व्याङ्परिभ्यो रमः

(ङ) लः परस्मैपदम्

(च) परेर्मृषः

२. **प्रश्नानामुत्तराणि देयानि**

(क) कीदृशाद्धातोः परस्मैपदं भवति ?

(ख) परापूर्वात् कृधातोः केन सूत्रेण परस्मैपदं क्रियते ?

(ग) वि-उपसर्गपूर्वाद् रम्-धातोः कर्तृगे फले किं पदं भवति ?

(घ) केभ्यः उपसर्गेभ्यो रम्धातोः कर्तृगेऽपि फले परस्मैपदं भवति ?

(ङ) 'व्यरमत्' इत्यत्र क उपसर्गः ?

(च) "उपाच्च" इति सूत्रं किं करोति ?

(छ) उभयपदिनः धातोः अकर्तृगे फले किं पदं भवति ?

(ज) कस्मिन्नर्थे भुज्-धातोः परस्मैपदं भवति ?

३. **अधोलिखितानां रूपाणां प्रत्येकमुपसर्गधातुलकारपदपुरुषवचनानि निर्दिशत**

आरमन्ति, पर्यरमन्, उपरमामि, परिमृष्येत्, प्रत्यक्षिपत्, अतिक्षिपन्तु, अन्वकरोः ।

४. **समीचीनेषु कथनेषु (√) चिह्नमसमीचीनेषु च (×) चिह्नं दर्शयत**

(क) पालनार्थकाद् भुज्-धातोरात्मनेपदं भवति ।

(ख) उभयपदिधातुभ्यः कर्तृगे फले परस्मैपदं भवति ।

(ग) अनुदात्तेतो ङितश्च धातोरात्मनेपदं भवति ।

(घ) प्रतिपूर्वात् क्षिप्-धातोः परस्मैपदं भवति ।

(ङ) आत्मनेपदनिमित्तहीनाद्धातोः कर्तरि परस्मैपदं भवति ।

(च) परस्मैपदिधातुभ्यो भावे कर्मणि च परस्मैपदं भवति ।

(छ) सर्वेभ्यो णिजन्तेभ्यो धातुभ्य उभयपदं भवति ।

५. **उपसर्गवशादपि आत्मनेपदं परस्मैपदं वा भवतीति ससूत्रं सोदाहरणं प्रतिपादयत ।**

६. **निम्नाङ्कितप्रयोगाणां सिद्धेः प्रक्रियां दर्शयत**

पराकरोति, अभिक्षिपति, परिमृष्यति, आरमति, उपरमति, अतिक्षिपति ।

७. **अधोनिर्दिष्टानां पदानां वाक्येषु प्रयोगं कुरुध्वम्**

परिरमति, प्रतिक्षिपति, परिरमति, अनुकरोति, पर्यरमत्, आरमन्तु, उपरमेत्, भुनक्ति ।

## अनुप्रयोगः

१. **अधोलिखितानि वाक्यानि शुद्धानि कृत्वाऽभ्यासपुस्तिकायां सारयत**

(क) राजा महीं **भुङ्क्ते** ।

(ख) अनुज ओदनं **भुनक्ति** ।

(ग) देवदत्तो **यज्ञदत्तमुपरमते** ।

(घ) विद्यार्थिभिः पाठाः **पठ्यन्ति** ।

(ङ) हिमालयतो नद्यः **प्रवहन्ते** ।

(च) स **आरमते** ।

२. **परस्मैपद एव प्रयुज्यमानानां पञ्चदशधातूनां सूचीं निर्माय शिक्षकं दर्शयत ।**

३. **प्रदत्तेभ्यो धातुभ्यः कानि पदानि भवन्ति, उदाहरणमनुसृत्य लिखत**

| **यथा– धातवः** | **पदानि** | | |
|---|---|---|---|
| जि | परस्मैपदम् | वि+क्री | .................. |
| वि+जि | आत्मनेपदम् | व्यति+हन् | .................. |
| कृ | उभयपदम् | वि+स्था | .................. |
| अव+क्री | .................. | उप+रम् | .................. |
| परा+कृ | .................. | वि+रम् | .................. |
| व्यति+गम् | .................. | प्रति+स्था | .................. |
| व्यति+लू | .................. | परि+रम् | .................. |
| परा+जि | .................. | वह् | .................. |
| रम् | .................. | प्र+वह् | .................. |
| आ+रम् | .................. | क्षिप् | .................. |
| स्था | .................. | अभि+क्षिप् | .................. |
| सम्+स्था | .................. | नि+विश् | .................. |
| अव+स्था | .................. | परि+क्री | .................. |
| | | प्रति+क्षिप् | .................. |

# अथ भावकर्मप्रक्रिया

*अकर्मकाद् भूधातोः "लः कर्मणि च भावे चाकर्मकेभ्यः" इति सूत्रेण भावे सर्वेषु लकारेषु प्राप्तेषु, वर्तमानक्रियावृत्तौ "वर्तमाने लट्" इति सूत्रेण लट्यनुबन्धलोपे, 'भू ल्' इति जाते, लस्य स्थाने "लः परस्मैपदम्" इति परस्मैपदसंज्ञकेषु तिबादिषु प्राप्तेषु -*

आत्मनेपदविधायकं विधिसूत्रम् -

**भावकर्मणोः** १ । ३ । १३

**लस्यात्मनेपदम् ।**

(भावकर्मणोः, लस्य, आत्मनेपदम्)

***सरलार्थः-*** *भावे कर्मणि च विहितस्य लस्य स्थाने आत्मनेपदं भवति ।*

*अनेन सूत्रेण लस्यात्मनेपदसंज्ञकेषु तादिषु प्राप्तेषु, भाववाच्ये युष्मदस्मद्भ्यां सामानाधिकरण्याभावात् "शेषे प्रथमः" इति प्रथमपुरुषसंज्ञकेषु त, आताम्, झ, इत्येतेषु प्राप्तेषु, तिङ्वाच्यक्रियाया(भावस्य) अद्रव्यत्वरूपत्वेन द्वितीयादीनामप्रतीयमानत्वाद् औत्सर्गिक एकवचने 'भू त' इति जाते, 'त' इत्यस्य "तिङ्शित्सार्वधातुकम्" इति सार्वधातुकसंज्ञायाम् -*

यक्विकरणविधायकं विधिसूत्रम् -

**सार्वधातुके यक्** ३ । १ । ६७

**धातोर्यक् भावकर्मवाचिनि सार्वधातुके । भावः क्रिया । सा च भावार्थकलकारेणानूद्यते । युष्मदस्मद्भ्यां सामानाधिकरण्याभावात् प्रथमः पुरुषः । तिङ्वाच्यक्रियाया अद्रव्यरूपत्वेन द्वित्वाद्यप्रतीतेर्न द्विवचनादि, किं त्वेकवचनमेवोत्सर्गतः । त्वया मया अन्यैश्च भूयते । बभूवे ।**

(धातोः, यक्, प्रत्ययः, परश्च, भावकर्मणोः सार्वधातुके)

***सरलार्थः-*** *भावे कर्मणि चार्थे विहिते सार्वधातुकसंज्ञके प्रत्यये परे धातोः यक्प्रत्ययो भवति ।*

*यकः ककार इत् । अनेन सूत्रेण यक्-प्रत्ययेऽनुबन्धलोपे, 'भू य त' इति जाते, कित्वाद् गुणनिषेधे, टेरेत्वे, 'भूयते' इति रूपं सिद्ध्यति ।*

*त्वया, युवाभ्यां, युष्माभिः, मया, आवाभ्याम्, अस्माभिः, तेन, ताभ्यां, तैः, अन्यैश्च भूयते । युष्मदस्मदोः शेषशब्दानाञ्च एकत्वद्वित्वबहुत्वसङ्ख्याविशिष्टरूपकर्तुः 'भूयते' इत्येव*

*एकवचनान्तक्रिया। अनुक्तकर्तृत्वात् तृतीयान्तकर्तृवाचकपदम्। अत एव त्वया भूयते, मया भूयते, अन्यैश्च भूयत इति।* ***लिटि*** *– भूधातोर्भावे लिटि, लस्य स्थाने पूर्ववत् प्रथमपुरुषस्य औत्सर्गिक एकवचने तादेशे, तस्य स्थाने एश्-आदेशे, द्वित्वे, अभ्यासादिकार्ये, 'बभूवे' इति।* ***लुटि*** *– अकर्मकाद् भूधातोर्भावे लुटि, पूर्ववत् ते, 'भू त' इति जाते, प्राप्तं यकं बाधित्वा "स्यतासी लृलुटोः" इति तासिप्रत्ययेऽनुबन्धलोपे 'भू तास् त' इत्यवस्थायाम् -*

चिणीव कार्यातिदेशविधायकमिडागमविधायकञ्च सूत्रम्-

**स्यसिच्सीयुट्तासिषु भावकर्मणोरुपदेशेऽज्झनग्रहदृशां वा चिण्वदिट् च ६। ४। ६२**

**उपदेशे योऽच् तदन्तानां हनादीनां च चिणीवाङ्गकार्यं वा स्यात्स्यादिषु भावकर्मणोर्गम्यमानयोः, स्यादीनामिडागमश्च। चिण्वद्भावपक्षेऽयमिट्। चिण्वद्भावाद् वृद्धिः। भाविता, भविता। भाविष्यते, भविष्यते। भूयताम्। अभूयत। भाविषीष्ट। भविषीष्ट।**

(उपदेशे, अच्-हन-ग्रहदृशाम्, वा, चिण्वदिट् च, स्यसिच्सीयुट्तासिषु, भावकर्मणोः)

***सरलार्थः***– *भावे कर्मणि च वाच्ये उपदेशेऽजादीनां धातूनां हन्-ग्रह्-दृश्-धातूनाञ्च स्य-सिच्-सीयुट्-तासिप्रत्ययेषु परेषु चिणि परे इव कार्यं वा भवति, चिण्वद्भावपक्षे स्य-सिच्-सीयुट्-तासीनामिडागमश्च भवति। "सन्नियोगशिष्टानां सहैव प्रवृत्तिः सहैव निवृत्तिश्च" इति परिभाषया चिण्वद्भावपक्ष एव इड् भवति। चिण्वद्भावाऽभावपक्षे तु सेड्धातुषु इड् भवति, अनिट्त्सु न।*

*अकर्मकाद् भूधातोर्भावे लुटि, लस्य स्थाने "भावकर्मणोः" इत्यात्मनेपदे, प्रथमाया एकवचने तादेशे, 'भू त' इति जाते, प्राप्तं यकं बाधित्वा "स्यतासी लृलुटोः" इति तासिप्रत्ययेऽनुबन्धलोपे, 'भू तास् त' इति जाते, प्रकृतसूत्रेण विकल्पेन चिण्वद्भावे इडागमे च कृते, 'भू इ तास् त' इति जाते, चिण्वद्भावाद् "अचो ञ्णिति" इति वृद्धौ, अवादेशे, 'भाव् इ तास् त' इति जाते, "लुटः प्रथमस्य डारौरसः" इत्यनेन तस्य डादेशेऽनुबन्धलोपे, 'भाव् इ तास् आ' इति जाते, डित्वविधानसामर्थ्यादभस्यापि टेर्लोपे, 'भावयिता' इति सिद्ध्यति। चिण्वदिडभावपक्षे तु "आर्धधातुकस्येड्वलादेः" इति इटि, गुणे, अवादेशे, तस्य टादेशे, टिलोपे, 'भविता' इति च।*

*लृटि - चिण्वद्भावपक्षे - भाविष्यते, अन्ये पक्षे - भविष्यते। लोटि - भूयताम्। लङि - अभूयत। विधिलिङि - भूयेत। आशीर्लिङि - चिण्वद्भावपक्षे - भाविषीष्ट, अन्ये पक्षे - भविषीष्ट। लुङि - भूधातोर्भावे लुङि, अडागमे, लस्यात्मनेपदे तादेशे, च्लौ, च्लेः सिजादेशे प्राप्ते तं प्रबाध्य -*

चिणादेशविधायकं विधिसूत्रम्-

**चिण् भावकर्मणोः ३। १। ६६**

**च्लेश्चिण् स्याद् भावकर्मवाचिनि तशब्दे परे। अभावि। अभाविष्यत, अभाविष्यत।**

**अकर्मकोऽप्युपसर्गवशात्सकर्मकः । अनुभूयते आनन्दश्चैत्रेण त्वया मया च । अनुभूयेते । अनुभूयन्ते । त्वमनुभूयसे । अहमनुभूये । अन्वभावि । अन्वभाविषाताम्, अन्वभविषाताम् । णिलोपः । भाव्यते । भावयाञ्चक्रे, भावयाम्बभूवे, भावयामासे । चिण्वदिट् । आभीयत्वेनासिद्धत्वाण्णिलोपः । भाविता, भावयिता । भाविष्यते, भावयिष्यते । अभाव्यत । भाव्येत । भाविषीष्ट, भावयिषीष्ट । अभावि । अभाविषाताम्, अभावयिषाताम् । बुभूष्यते । बुभूषाञ्चक्रे । बुभूषिता । बुभूषिष्यते । बोभूय्यते । बोभूयते**

**"अकृत्सार्वधातुकयोर्दीर्घः" । स्तूयते विष्णुः । स्ताविता, स्तोता । स्ताविष्यते, स्तोष्यते । अस्तावि । अस्ताविषाताम्, अस्तोषाताम् । ऋ गतौ । गुणोऽर्तीति गुणः । अर्यते । स्मृ स्मरणे । सस्मरे । उपदेशग्रहणाच्चिण्वदिट् । आरिता, अर्ता । स्मारिता, स्मर्ता । अनिदितामिति नलोपः । स्रस्यते । इदितस्तु नन्द्यते । सम्प्रसारणम् । इज्यते ।**

(भावकर्मणोः,ते, च्लेः, चिण्)

***सरलार्थः***- *भावे कर्मणि च अर्थे विहिते तशब्दे परे पूर्वस्य च्लेः स्थाने चिणादेशो भवति । प्रकृतसूत्रेण च्लेश्चिचण्यनुबन्धलोपे, 'अभू इ त' इति जाते, वृद्धौ, अवादेशे, 'अभावि त' इत्यवस्थायां "चिणो लुक् ६ । ४ । १०४" इति सूत्रेण 'त' इत्यस्य लोपे, 'अभावि' इति सिद्ध्यति । लृङि - चिण्वद्भावपक्षे - अभाविष्यत, अन्ये पक्षे - अभविष्यतेति ।*

*अकर्मकधातुरप्युपसर्गवशात् सकर्मको भवति । अकर्मके भूधातौ 'अनु' इत्युपसर्गयोगानन्तरम् 'अनुभू' इति धातुः सकर्मकः । 'अनुभूयते आनन्दश्चैत्रेण त्वया मया च' अत्र अनुभूधातोः कर्मणि वर्तमानकाले लटि, लस्यात्मनेपदे ते, यगादिकार्ये पूर्ववद् 'अनुभूयते' इति सिद्ध्यति ।*

*कर्मणि लकारे विहिते सति कर्म उक्तं भवति, कर्ता चानुक्तः । कर्मवाच्ये उक्ते कर्मणि प्रथमा भवति, अनुक्तकर्तरि च तृतीया । अत एव 'अनुभूयते आनन्दश्चैत्रेण त्वया मया च' अत्र उक्तकर्मण आनन्दशब्दात् प्रथमा, अनुक्तकर्तृभ्यां युष्मदस्मद्भ्यां च तृतीया ।*

*कर्मवाच्ये कर्मस्थया एकत्वद्वित्वबहुत्वसङ्ख्यायाः वाचकाः तादयः भवन्ति । अत एव 'अनुभूयते आनन्दश्चैत्रेण त्वया मया च' अत्र 'आनन्दः' इति कर्मणि एकत्वस्य विद्यमानत्वाद् 'अनुभूयते' इत्येकवचनम् । आनन्दस्य द्वित्वविवक्षायां क्रियायामपि द्विवचनं भवति । बहुत्वविवक्षायाञ्च बहुवचनमेव । यथा - 'अनुभूयेते आनन्दौ चैत्रेण त्वया मया अन्यैश्च'। अत्र अनुभूधातोः कर्मणि लटि, लस्यात्मनेपदे, द्वित्वविवक्षायां प्रथमपुरुषस्य द्विवचने आताम्प्रत्यये, यगादिकार्ये 'अनुभूयेते' इति सिद्ध्यति । आनन्दस्य बहुत्वविवक्षायान्तु 'अनुभूयन्ते आनन्दाश्चैत्रेण त्वया मया अन्यैश्च' इति । अत्र अनुभूधातोः कर्मणि लटि, लस्य स्थाने झप्रत्यये, झोऽन्तादेशे, यगादिकार्ये, 'अनुभूयन्ते' इति । 'त्वमनुभूयसे चैत्रेण त्वया मया अन्यैश्च' अत्र अनुभूधातोः कर्मणि विहितस्य तिङो युष्मद्-शब्देन सह सामानाधिकरण्यत्वाद् मध्यमपुरुषस्यैकवचने थास्प्रत्यये, थासः 'से' इत्यादेशे, यगादिकार्ये, 'अनुभूयसे' इति सिद्ध्यति । एवं युवामनुभूयेथे, यूयमनुभूयध्वे, इत्यपि ।*

*‘अहमनुभूये चैत्रेण त्वया मया अन्यैश्च’ अत्र अनुभूधातोः कर्मणि विहितस्य तिङोऽस्मच्छब्देन सह सामानाधिकरण्यत्वाल्लस्य स्थाने उत्तमपुरुषस्यैकवचने इटि, यगादिकार्ये - अनुभूये। एवमेव आवामनुभूयावहे, वयमनुभूयामहे, इत्यपि बोध्यम् । अनुभूधातोः कर्मणि अन्येषु लकारेषु रूपाणि यथा -* ***लिटि*** *- अनुबभूवे ।* ***लुटि*** *- अनुभाविता, अनुभविता ।* ***लृटि*** *- अनुभाविष्यते, अनुभविष्यते ।* ***लोटि*** *- अनुभूयताम् ।* ***लङि*** *- अन्वभूयत ।* ***विधिलिङि*** *- अनुभूयेत ।* ***आशीर्लिङि*** *- अनुभाविषीष्ट, अनुभविषीष्ट ।* ***लुङि*** *- अन्वभावि ।* ***लृङि*** *- अन्वभाविष्यत, अन्वभविष्यत ।*

***ण्यन्तभूधातोः कर्मणि रूपाणि -***

*‘भवन् देवदत्तो यज्ञदत्तेन प्रेर्यते’ इत्यर्थे ण्यन्ताद् भावि-धातोः कर्मणि लटि, लस्यात्मनेपदे ते, यगादिकार्ये ‘भावि यते’ इत्यवस्थायां “णेरनिटि” इति णिलोपे ‘भाव्यते’ इति सिद्ध्यति । ‘भाव्यते देवदत्तो यज्ञदत्तेन’ इति । लिटि - ण्यन्ताद् भाविधातोः कर्मणि लिटि, आम्प्रत्यये, णेरयादेशे, लिटो लुकि, ‘भावयाम्’ इति जाते, तस्मात् कृभ्वसामनुप्रयोगे, तेभ्य आत्मनेपदे, क्रमाद् भावयाञ्चक्रे, भावयाम्बभूवे, भावयामासे, इत्यादीनि रूपाणि सिद्ध्यन्ति । लुटि तु स्यसिजिति चिण्वदिट्, भाविता, भावयिता इति । अत्र चिण्वदिट्पक्षे “असिद्धवदत्राभात्” इति इडागमस्यासिद्धत्वात् णिलोपः । चिण्वदिडभावे तु “आर्धधातुकस्येड्वलादेः” इति विहितस्य इडागमस्य सिद्धत्वान् णिलोपाभावे गुणोऽयादेशश्च । एवमन्यत्रापि ।* ***लृटि*** *- भाविष्यते, भावयिष्यते ।* ***लोटि*** *- भाव्यताम् ।* ***लङि*** *- अभाव्यत ।* ***विधिलिङि*** *- भाव्येत ।* ***आशीर्लिङि*** *- भाविषीष्ट, भावयिषिष्ट ।* ***लुङि*** *- अभावि ।* ***लृङि*** *- अभाविष्यत, अभावयिष्यत ।*

***सन्नन्ताद् अकर्मकाद् भूधातोर्भावे रूपाणि -***

*सन्नन्ताद् ‘बुभूष’ इति धातोर्भावे लटि, लस्यात्मनेपदे ते, यगादिकार्ये ‘बुभूष य ते’ इति जाते, “अतो लोपः” इति ‘बुभूष’ इत्यस्य अकारस्य लोपे, ‘बुभूष्यते’ इति रूपं सिद्धम् । ‘बुभूष्यते त्वया मया अन्यैश्च’ इति प्रयोगः । एवमेव अन्येषु लकारेष्वपि “अतो लोपः” इति अल्लोपो बोध्यः ।* ***लिटि*** *- बुभूषाञ्चक्रे, बुभूषाम्बभूवे, बुभूषामासे ।* ***लुटि*** *- बुभूषिता ।* ***लृटि*** *- बुभूषिष्यते ।* ***लोटि*** *- बुभूष्यताम् ।* ***लङि*** *- अबुभूष्यत ।* ***विधिलिङि*** *- बुभूष्येत ।* ***आशीर्लिङि*** *- बुभूषिषीष्ट ।* ***लुङि*** *- अबुभूषिष्ट ।* ***लृङि*** *- अबुभूषिष्यत ।*

***यङन्ताद् अकर्मकाद् भूधातोर्भावे रूपाणि -***

*‘पुनः पुनरतिशयेन वा भूयते’ इत्यर्थे यङन्ताद् ‘बोभूय’ इति धातोर्भावे लटि, लस्यात्मनेपदे ते, यगादिकार्ये, ‘बोभूय यते’ इत्यवस्थायाम्, “अतो लोपः” इत्यकारलोपे ‘बोभूय्यते’ इति रूपम् । एवं प्रकारेण* ***लिटि*** *- बोभूयाञ्चक्रे, बोभूयाम्बभूवे, बोभूयामासे ।* ***लुटि*** *- बोभूयिता ।* ***लृटि*** *- बोभूयिष्यते ।* ***लोटि*** *- बोभूय्यताम् ।* ***लङि*** *- अबोभूय्यत ।* ***विधिलिङि*** *- बोभूय्येत ।* ***आशीर्लिङि*** *- बोभूयिषीष्ट ।* ***लुङि*** *- अबोभूयिष्ट ।* ***लृङि*** *- अबोभूयिष्यत ।*

***यङ्लुगन्ताद्*** *बोभूधातोस्तु भावे लटि, लस्यात्मनेपदे ते, यकि, 'बोभूयते' इति सिद्ध्यति ।)*

***'स्तूयते*** *विष्णुः' अत्र स्तुधातोः कर्मणि लटि, लस्य स्थाने ते, एत्वे, यकि, "अकृत्सार्वधातुकयोर्दीर्घः' इति सूत्रेण 'स्तु' इत्यस्य उकारस्य दीर्घे, 'स्तूयते' इति । स्तुधातोः कर्मणि लुटि तु चिण्वदिट्पक्षे 'स्ताविता', अन्ये पक्षे तु इट्-निषेधे 'स्तोता' इति । तथा हि -* ***लृटि*** *- स्ताविष्यते, स्तोष्यते ।* ***लोटि*** *- स्तूयताम् ।* ***लङि*** *- अस्तूयत ।* ***विधिलिङि*** *- स्तूयेत ।* ***आशीर्लिङि*** *- स्ताविषीष्ट, स्तोषीष्ट ।* ***लुङि*** *- अस्तावि ।* ***लृङि*** *- अस्ताविष्यत, अस्तोष्यत ।*

*अदादिगणस्थ ऋधातुर्गमनार्थको वर्तते । ऋधातोः कर्मणि लटि, लस्य स्थाने आत्मनेपदे ते, यगादिकार्ये 'ऋ यते' इत्यवस्थायां "गुणोऽर्तिसंयोगाद्योः ७ । ४ । २९" इति सूत्रेण गुणे, रपरत्वे 'अर्यते' इति सिद्ध्यति ।* ***लिटि*** *- अरे । लुडादिष्वार्धधातुकेषु लकारेषु चिण्वदिट् ।* ***लुटि*** *- आरिता, अर्ता ।* ***लृटि*** *- आरिष्यते, अरिष्यते (अत्र "ऋद्धनोः स्ये" इति इडागमो भवति ।) ।* ***लोटि*** *- अर्यताम् ।* ***लङि*** *- आर्यत ।* ***विधिलिङि*** *- अर्येत ।* ***आशीर्लिङि*** *- आरिषीष्ट, ऋषीष्ट ।* ***लुङि*** *- आरित ।* ***लृङि*** *- आरिष्यत ।*

***स्मृ****धातुः स्मरणार्थको वर्तते । स्मृधातोः कर्मणि लटि, यगादिकार्ये, पूर्ववद् गुणे रपरत्वे - स्मर्यते । लिटि - सस्मरे । लुटि लृटि च ऋधातुवत् प्रक्रियायां क्रमात् स्मारिता/स्मर्ता, स्मारिष्यते/स्मरिष्यते इति ।* ***लोटि*** *- स्मर्यताम् ।* ***लङि*** *- अस्मर्यत ।* ***विधिलिङि*** *- स्मर्येत ।* ***आशीर्लिङि*** *- स्मारिषीष्ट/स्मृषीष्ट ।* ***लुङि*** *- अस्मारि ।* ***लृङि*** *- अस्मारिष्यत/अस्मरिष्यत ।*

*स्रंस् धातोर्भावे लटि ते, यगादिकार्ये 'स्रंस् यते' इत्यवस्थायां, कित्परत्वाद् "अनिदितां हल उपधाया क्ङिति" इति सूत्रेण 'स्रन्स्' इत्यस्योपधाया नकारस्य लोपे 'स्रस्यते' इति सिद्ध्यति । एवं प्रकारेणैव भ्रंश्धातोः- भ्रश्यते, ध्वंस् → ध्वस्यते । संसादेर्हलन्तत्वाद् लुडादिषु चिण्वदिण् न भवति । लुङि तु च्लेश्चिण् भवतीति बोध्यम् ।*

*नन्द्-धातोर्भावे लटि, लस्य ते, यगादिकार्ये 'नन्द्यते' इति सिद्ध्यति । अत्र नन्द्धातोः ह्रस्वस्य इकारस्येत्वान् नलोपो न ।*

*यज्-धातोः कर्मणि लटि, ते, यगादिकार्ये, 'यज् यते' इत्यवस्थायां "वचिस्वपियजादीनां किति" इति सूत्रेण सम्प्रसारणे, पूर्वरूपे 'इज्यते' इति सिद्ध्यति । लिडादिषु लकारेषु - ईजे, यष्टा, यक्ष्यते, इत्यादीनि रूपाणि भवन्ति ।*

आकारादेशविधायकं विधिसूत्रम्-

**तनोतेर्यकि ६ । ४ । ४४**

**आकारोऽन्तादेशो वा स्यात् । तायते, तन्यते**

(तनोतेः, अङ्गस्य, विभाषा, आत्, यकि)

***सरलार्थः-*** *यकि परे तन्-धातोरन्त्यस्यालः स्थाने आकारादेशो वा भवति ।*

*तन्-धातोः कर्मणि लटि, लस्य ते, यगादिकार्ये 'तन् यते' इत्यवस्थायां प्रकृतसूत्रेण वैकल्पिके आकारान्तादेशे, सवर्णदीर्घे 'तायते' इति सिद्ध्यति । अन्ये पक्षे तु - तन्यते ।*

चिणादेशनिषेधविधायकं सूत्रम्-

**तपोऽनुतापे च ३ । १ । ६५**

**तपश्च्लेश्चिण् न स्यात् कर्मकर्तर्यनुतापे च । अन्वतप्त पापेन । घुमास्थेतीत्त्वम् । दीयते । धीयते । ददे**

(तपः, च्लेः, चिण्,न, कर्मकर्तरि, अनुतापे च)

***सरलार्थः-*** *कर्मकर्तरि पश्चात्तापे च अर्थे तपः विहितस्य च्लेः स्थाने चिणादेशो न भवति ।*

*अनूपसर्गपूर्वकात् तप्धातोर्भावे लटि 'अनुतप्यते' इति रूपं भवति । लुङि तु -*

*अनुपूर्वकात् तप्धातोः भावे लुङि, अडागमे, लस्य ते, च्लौ 'अनु अतप् च्लि त' इत्यवस्थायां प्राप्तस्य च्लेश्चिणः प्रकृतसूत्रेण निषेधे, ततः च्लेः सिचि, इडागमस्य निषेधे 'अनु तप् स् त' इति जाते "झलो झलि" इति सकारलोपे, ततः यणि 'अन्वतप्त' इति सिद्ध्यति ।*

***दा****-धातोः कर्मणि लटि, लस्य स्थाने ते, यगादिकार्ये 'दा य ते' इत्यवस्थायां यक आर्धधातुकत्वाद् "घुमास्थागापाजहातिसां हलि ६ । ४ । ६६" इति सूत्रेण घुसंज्ञकस्य दाधातोराकारस्य स्थाने ईत्वे 'दीयते' इति रूपं सिद्ध्यति । एवमेव धाधातोः- धीयते ।* ***लिटि*** *- दा → ददे, धा → दधे । लुडादिषु चिण्वदिट् ।* ***लुटि*** *तु -*

युक्-आगमविधायकं विधिसूत्रम्-

**आतो युक् चिण्कृतोः ७ । ३ । ३३**

**आदन्तानां युगागमः स्याच्चिणि ञ्णिति कृति च । दायिता, दाता । दायिषीष्ट, दासीष्ट । अदायि । अदायिषाताम् । भज्यते ।**

(आतः, अङ्गस्य, युक्, चिण्कृतोः, ञ्णिति)

***सरलार्थः-*** *आदन्तस्याङ्गस्य युगागमः भवति चिणि, ञिति, णिति, कृति च परे ।*

*दाधातोः कर्मणि लुटि, लस्य ते, तासिप्रत्यये, तस्य डादेशे, टिलोपे 'दा ता' इत्यवस्थायां "स्यसिच्सीयुट्०" इत्यादिना सूत्रेण विकल्पेन चिण्वदिटि, चिण्वद्भावत्वात् प्रकृतसूत्रेण युगागमे 'दायिता' इति । चिण्वदिडभावे तु युगागमस्याप्यभावे, प्राप्तस्येडागमस्य निषेधे 'दाता'*

*इत्यपि सिद्ध्यति । एवमेव - धा → धायिता/धाता । **लृटि** - दा → दायिष्यते/दास्यते, धा → धायिष्यते/धास्यते । **लोटि** - दा → दीयताम्, धा → धीयताम् । **लङि** - दा → अदीयत, धा → अधीयत । **विधिलिङि** - दा → दीयेत, धा → धीयेत । **आशीर्लिङि** - दा → दायिषीष्ट/दासीष्ट, धा → धायिषीष्ट/धासीष्ट । **लुङि** - दाधातोः कर्मणि लुङि, अडागमे, लस्य स्थाने प्रथमपुरुषस्यैकवचने ते, च्लौ, च्लेश्चिणि, तस्य लुकि, युगागमे 'अदायि' इति । एवमेव - धा → अधायि । द्विवचने तु दाधातोर्लुङि, अटि, आतामि, च्लौ, च्लेः सिचि, चिण्वदिटि, युगागमादिकार्ये 'अदायिषाताम्' इति सिद्ध्यति । चिण्वदिडभावे तु 'अदा स् आताम्' इत्यवस्थायां "स्थाघ्वोरिच्च" इत्यनेन 'दा' इत्यस्याऽऽकारस्य इत्वे, सिचः कित्वाद् गुणनिषेधे, षत्वे 'अदिषाताम्' इत्यपि । बहुवचने - अदायिषत, अदिषत । **लृङि** - दा → अदायिष्यत/अदास्यत, धा → अधायिष्यत/अधास्यत ।*

***भञ्ज्***-*धातोः कर्मणि लटि, लस्य ते, यगादिकार्ये 'भञ्ज् यते' इत्यवस्थायां "अनिदितां हल उपधाया क्ङिति" इत्युपधाया नकारस्य लोपे 'भज्यते' इति । लुङि तु -*

नलोपविधायकं विधिसूत्रम्-

**भञ्जेश्च चिणि ६ । ४ । ३३**

**नलोपो वा स्यात् । अभाजि, अभञ्जि । लभ्यते ।**

(भञ्जेः,च, उपधायाः, नलोपः,विभाषा)

***सरलार्थः***- *चिणि परे भञ्ज्-धातोरुपधाया नकारस्य लोपो वा भवति ।*

*भञ्ज्-धातोः कर्मणि लुङि, अडागमे, लस्य ते, च्लौ, च्लेश्चिणि, तस्य लोपे 'अभञ्ज् इ' इत्यवस्थायां प्रकृतसूत्रेण विकल्पेन नलोपे, "अत उपधायाः" इति उपधावृद्धौ 'अभाजि' इति सिद्ध्यति । नलोपाभावपक्षे तु 'अभञ्जि' इति । आतामि "चोः कुः" इति कुत्वे, षत्वे, क्षत्वे - अभङ्क्षाताम् । झे - अभङ्क्षत । लृङि - अभङ्क्षत । एवमन्येऽपि बोध्याः ।*

*लभ्धातोः कर्मणि लटि, लस्य स्थाने तादेशे, यगादिकार्ये 'लभ्यते' इति सिद्ध्यति । अन्येषु लकारेषु **लिटि** लेभे, **लुटि** लब्धा, **लृटि** लप्स्यति, **लोटि** लभ्यताम्, **लङि** अलभ्यत, **विधिलिङि** लभ्येत, **आशीर्लिङि** लप्सीष्ट, इत्यादीनि रूपाणि भवन्ति । **लुङि** तु विशेषः -*

नुमागमविधायकं विधिसूत्रम्-

**विभाषा चिण्णमुलोः ७ । १ । ६९ ।**

**लभेर्नुमागमो वा स्यात् । अलम्भि, अलाभि**

(लभेः, अङ्गस्य, नुम्, विभाषा, चिण्णमुलोः)

***सरलार्थः***– *चिणि परे णमुलि च लभ्धातोर्नुमागमो वा भवति ।*

*लभ्धातोः कर्मणि लुङि, अटि, लस्य ते, च्लौ, च्लेश्चिणि, तस्य लुकि, 'अलभ् इ' इत्यवस्थायां प्रकृतसूत्रेण विकल्पेन नुमि, अनुस्वारे, परसवर्णे 'अलम्भि' इति सिद्धयति । नुमभावे तु वृद्धौ 'अलाभि' इत्यपि सिद्धयति ।* ***लृङि*** *अलप्स्यतेति ।*

इति भावकर्मप्रक्रिया

## अथ कर्मकर्तृप्रक्रिया

**यदा कर्मैव कर्तृत्वेन विवक्षितं तदा सकर्मकाणामप्यकर्मकत्वात्कर्तरि भावे च लकारः ।**

कर्मवद्भावविधायकमतिदेशसूत्रम्-

**कर्मवत्कर्मणा तुल्यक्रियः ३ । १ । ८७**

**कर्मस्थया क्रियया तुल्यक्रियः कर्ता कर्मवत्स्यात् । कार्यातिदेशोऽयम् । तेन यगात्मनेपदचिण्चिण्वदिटः स्युः । पच्यते फलम् । भिद्यते काष्ठम् । अपाचि । अभेदि । भावे, भिद्यते काष्ठेन ।**

(धातोः, परः, कर्तरि, प्रत्ययः, कर्मवत्, कर्मणा, तुल्यक्रियः)

***सरलार्थः***– *कर्मणि विद्यमाना क्रिया कर्मक्रिया तया कर्मस्थया क्रियया तुल्यक्रियः कर्ता कर्मवद् भवति । कर्मवाच्ये यथा यक्-आत्मनेपद-चिण्-चिण्वद्-इटः आदेशा भवन्ति ते सर्वेऽपि आदेशाः इहापि भवन्ति ।*

*विवक्षातः कारकाणि भवन्तीति हि नियमोऽतो "रामः काष्ठेन ओदनं पचति" अस्मिन् वाक्ये रामः कर्ता, ओदनं कर्म, पचति क्रिया, अत्र वाक्ये कर्तृत्वेन काष्ठस्य विवक्षा यदा भवति तदा कर्म एव कर्ता भवति । एवंस्थितौ प्रयोगसिद्धिप्रक्रिया कीदृशीति विषयः प्रकरणेस्मिन् प्रतिपाद्यते । (यदा सौकर्यातिशयं द्योतयितुं कर्तृव्यापारस्य विवक्षा न क्रियते तदा कारकान्तराण्यपि कर्तृसंज्ञां लभन्ते स्वव्यापारे स्वतन्त्रत्वात्)*

*"कर्मवत्कर्मणा तुल्यक्रियः" अनेन सूत्रेण कर्मण एव कर्तृत्वेन विवक्षा यदा भवति तदा धातुभ्यः कर्मणि प्रत्यये सति यानि कार्याणि भवन्ति तानि सर्वाणि कार्याण्यत्रापि जायन्त इति कार्यातिदेशः क्रियते । तेन यगात्मनेपदचिण्वदिटः भवन्ति । इति हि प्रकरणस्य आशयः तथैव च रूपाणि सम्पद्यन्ते यथा काष्ठेन पच्यते, अग्निना पच्यते इत्यादि ।*

इति कर्मकर्तृप्रक्रिया

# प्रयोगसिद्धिप्रकारः

## भूयते

भावेऽर्थे विवक्षिते सति अकर्मकाद् भूधातोः "लः कर्मणि च भावे चाकर्मकेभ्यः" इति सूत्रेण भावे सर्वेषु लकारेषु प्राप्तेषु, वर्तमानक्रियावृत्तौ "वर्तमाने लट्" इति सूत्रेण लट्यनुबन्धलोपे, 'भू ल्' इति जाते, लस्य स्थाने "लः परस्मैपदम्" इति परस्मैपदसंज्ञकेषु तिबादिषु प्राप्तेषु "भावकर्मणोः" इति सूत्रेण लस्यात्मनेपदसंज्ञकेषु तादिषु प्राप्तेषु, भाववाच्ये युष्मदस्मद्भ्यां सामानाधिकरण्याभावात् "शेषे प्रथमः" इति प्रथमपुरुषसंज्ञकेषु त, आताम्, झ, इत्येतेषु प्राप्तेषु, तिङ्वाच्यक्रियाया(भावस्य) अद्रव्यत्वरूपत्वेन द्वितीयादीनामप्रतीयमानत्वाद् औत्सर्गिक एकवचने 'भू त' इति जाते, 'त' इत्यस्य "तिङ्शित्सार्वधातुकम्" इति सार्वधातुकसंज्ञायाम् "सार्वधातुके यक्" इति सूत्रेण यक्-प्रत्ययेऽनुबन्धलोपे, 'भू य त' इति जाते, कित्वाद् गुणनिषेधे, टेरेत्वे, 'भूयते' इति रूपं सिद्ध्यति ।

## अन्वभावि

अनूपसर्गपूर्वकाद् भूधातोः कर्मणि लुङि, अडागमे, लस्यात्मनेपदे तादेशे 'अनु अभू त' इति जाते, च्लौ, च्लेः सिजादेशे प्राप्ते तं प्रबाध्य "चिण् भावकर्मणोः" इति सूत्रेण च्लेश्चिचण्यनुबन्धलोपे, 'अनु अभू इ त' इति जाते, वृद्धौ, अवादेशे, 'अनु अभावि त' इत्यवस्थायां "चिणो लुक्" इति सूत्रेण 'त' इत्यस्य लोपे, ततः यणि 'अन्वभावि' इति रूपं सिद्ध्यति ।

## दीयते

दाधातोः कर्मणि लटि, लस्य स्थाने तादेशे 'दा त' इति जाते, सार्वधातुकसंज्ञायां, "सार्वधातुके यक्" इति सूत्रेण यकि, टेरेत्वे 'दा य त' इत्यवस्थायां यक आर्धधातुकत्वाद् "घुमास्थागापाजहातिसां हलि" इति सूत्रेण घुसंज्ञकस्य दाधातोराकारस्य स्थाने ईत्वे 'दीयत' इति रूपं सिद्ध्यति ।

### अभ्यासार्थाः प्रश्नाः

**१. अधस्तनसूत्राणि तेषां नेपालीभाषायामर्थं च लिखत**

(क) भावकर्मणोः
(ख) सार्वधातुके यक्
(ग) चिण् भावकर्मणोः
(घ) आतो युक् चिण्कृतोः
(ङ) तनोतेर्यकि
(च) विभाषा चिण्णमुलोः

**२. प्रश्नानामुत्तराणि देयानि**

(क) कीदृशेभ्यो धातुभ्यो भावे लकारा भवन्ति ?

(ख) कर्मणि लकाराः कीदृशेभ्यो धातुभ्यो भवन्ति ?

(ग) भावकर्मणोः परस्मैपदात्मनेपदयोः कतरत् पदं भवति ?

(घ) भावकर्मवाचिनि सार्वधातुके प्रत्यये परे धातोः केन सूत्रेण कः प्रत्ययो भवति ?

(ङ) भावे लकारे विहिते सति तस्य स्थाने कः पुरुषो भवति ? किञ्च तद्वचनम् ?

(च) "स्यसिच्सीयुट्०" इति सूत्रं पूरयत ।

(छ) भावकर्मणोर्वाच्ययोः कर्तृकर्मभावादिषु किमुक्तं भवति ? किञ्चानुक्तम् ?

(ज) कर्मवाच्ये उक्तकर्मण्यनुक्तकर्तरि च के विभक्ती भवतः ?

(झ) केषु प्रत्ययेषु परेषु स्यसिजिति चिण्वदिड्भवति ?

(ञ) कस्यां स्थितौ आदन्तानां धातूनां युगागमो भवति ?

३. **पदानि प्रयुज्य वाक्यानि रचयत**

अनुभूयन्ते, पठ्यसे, गम्ये, अभूयत, ददे, लब्धा, लप्स्यते, क्रियते, स्तूयते, भाव्यते, बुभूष्यते, सस्मरे, पठ्यताम्, दीयेत, अश्रूयत, पीयते, स्नायते, एध्यताम्, शय्यते ।

४. **समीचीनेषु कथनेषु (√) चिह्नमसमीचीनेषु च (×) चिह्नं दर्शयत**

(क) कर्मणि लकारे विहिते सति धातोरात्मनेपदं भवति ।

(ख) चिणः परस्य प्रत्ययस्य लुग् भवति ।

(ग) भाववाच्येऽनुक्ते कर्तरि प्रथमाविभक्तिर्भवति ।

(घ) कर्मवाच्ये उक्ते कर्मणि प्रथमाविभक्तिर्भवति ।

(ङ) भावकर्मवाचिन्यार्धधातुके प्रत्यये परे धातोर्यक्प्रत्ययो भवति ।

५. **भाववाच्ये कथं प्रथमपुरुषस्यैकवचनस्यैव क्रिया प्रयुज्यते ? सोदाहरणं प्रकाशयत ।**

६. **अधस्तनप्रयोगाणां सिद्धेः प्रक्रियां दर्शयत**

बभूवे, अभावि, भाविता/भविता, अनुभूयन्ते, भाव्यते, बुभूष्यते, बोभूय्यते, बोभूयते, स्तूयते, अस्तावि, अर्यते, सस्मरे, इज्यते, तायते/तन्यते, अन्वतप्त, दायिता/दाता, अदायि, धीयते, भज्यते, अभाजि/अभञ्जि, लभ्यते, अलम्भि/अलाभि ।

७. **अधोनिर्दिष्टेषु क्रियापदेषु यथोचितं कर्मपदं संयुज्य लिखत**

यथा - अनुभूये→अहम् अनुभूये ।

अनुभूयेथे, पठ्यन्ते, क्रियेते, गम्यते, दीयन्ते, दीयन्ताम्, लभ्येत, लब्धा, पच्यते, श्रूयन्ते,

पीयते, पाठ्यन्ते, पिपठिष्यते, दृश्यसे, हन्यते, अस्मर्यत, खाद्यन्ते, अर्च्यध्वे, कथ्यन्ते ।

८. **कोष्ठकात् समुचितपदं चित्वा रिक्तस्थानं पूरयत**

(क) कर्मवाच्ये अनुक्ते ................ तृतीयाविभक्तिर्भवति । (कर्तरि, कर्मणि)

(ख) कर्तृवाच्ये अनुक्तकर्मणि ................ विभक्तिर्भवति । (प्रथमा, द्वितीया, तृतीया)

(ग) भावे कर्मणि च लकारे विहिते सति धातोः ......... भवति । (आत्मनेपदम्, परस्मैपदम्)

(घ) भावकर्मवाचिनि ................ प्रत्यये परे धातोर्यक्प्रत्ययो भवति । (सार्वधातुके, आर्धधातुके)

(ङ) ................ धातुभ्यः कर्तरि भावे च लकाराः भवन्ति । (सकर्मकेभ्यः, अकर्मकेभ्यः)

(च) भाववाच्ये ................ तृतीयाविभक्तिर्भवति । (उक्तकर्तरि, अनुक्तकर्तरि)

९. **अधोलिखितेषु क्रियापदेषु भाववाच्यलकारयुक्तानि कर्मवाच्यलकारयुक्तानि च क्रियापदानि वर्गीकुरुत**

अश्रूयत, एध्यताम्, पच्यन्ते, यायते, भाव्यते, अनुभूयेत, चीयते, पीयते, नृत्यन्ताम्, शय्येत, स्नायते, दीव्यते, बोभूयिषीष्ट, अस्तावि, दायिष्यते, धायिता, रुध्यते ।

१०. **शीङ्-धातोः भावे सर्वेषु लकारेषु रूपाणि लिखत ।**

११. **पठ्-धातोः कर्मणि लट्-लृट्-लोट्-लङ्-लकारेषु सर्वाणि रूपाणि लिखत ।**

१२. **कृ-अनुभू-लिख्-खाद्-गम्-पच्-पा-धातूनां कर्मणि लटि सर्वाणि रूपाणि लिखत ।**

१३. **'लभ्यते' इति पदं प्रयुज्य त्रीणि वाक्यानि रचयत ।**

## अनुप्रयोगः

१. **अधोलिखितानि वाक्यानि पठत**

(क) बालकेन पाठः पठ्यते ।

(ख) बालकैः पाठः पठ्यते ।

(ग) आवाभ्यां पाठः पठ्यते ।

(घ) युष्माभिः पाठः पठ्यते ।

(ङ) त्वया पाठौ पठ्येते ।

(च) मया पाठाः पठ्यन्ते ।

(छ) त्वया अहं दृश्ये ।

(ज) युष्माभिरहं दृश्ये ।

(झ) अस्माभिः त्वं दृश्यसे ।

(ञ) अस्माभिः युवां दृश्येथे ।

(ट) अस्माभिः यूयं दृश्यध्वे ।

(ठ) तया आवां दृश्यावहे ।

(ड) तया वयं दृश्यामहे ।

(ढ) गुरुणा छात्रः दृश्यते ।

(ण) गुरुणा छात्रौ दृश्येते ।

(त) गुरुणा छात्राः दृश्यन्ते ।

(थ) धनिकैर्दरिद्रेभ्यो धनं दीयताम् ।

(द) त्वया ह्यः किमन्वभूयत ।

(ध) मया श्व आनन्दोऽनुभाविता ।

(न) बालकेन चतुरेण अभावि ।

२. **स्थूलाक्षरपदान्यनुसृत्याधोलिखितानि वाक्यानि शुद्धानि कृत्वाऽभ्यासपुस्तिकायां सारयत**

(क) अस्माभिः प्रतियोगितायां प्रथमेन **भूयामहे** ।

(ख) छात्रैः गृहकार्यं **क्रियन्ते** ।

(ग) यूस्माभिः फलानि **खादथ** ।

(घ) **त्वं** कुत्र गम्यते ?

(ङ) विद्यार्थिना **पाठान्** पठ्यन्ते ।

(च) **अहं** कथा श्रूयते ।

(छ) बालिकया **नृत्यन्ते** ।

(ज) त्वया **हस्यसे** ।

(झ) वयं **विष्णुः स्तूयते** ।

(ञ) शिशुभिः खट्वायां **शय्यन्ते** ।

(ट) अहं त्वां **दृश्ये** ।

(ठ) मात्रा वयं **पश्यामहे** ।

(ड) **बालकाः** कन्दुकेन क्रीड्यते ।

(ढ) द्वाभ्यां बालकाभ्यां भूमौ **स्थीयेते** ।

(ण) कविना कविता **लिखति** ।

३. **कर्मवाच्ये भाववाच्ये वा परिवर्तनं कुरुत**

(क) यूयं पाठशालां गच्छथ ।

(ख) विद्यार्थिनो द्वारे तिष्ठन्ति ।

(ग) गावः जलं पिबन्ति ।

(घ) माता पुत्राय भोजनं यच्छति ।

(ङ) धनिकः खट्वायां शेते ।

(च) युवां पाठान् पठथः ।

४. **वाक्यानि कर्तृवाच्येषु परिवर्तयत**

(क) गुरुभिः पाठौ पाठ्येते ।

(ख) ताभिर्विद्यालयो गम्यते ।

(ग) मया व्याघ्रादपि न भीयते ।

(घ) बालकैर्दुग्धं पीयते ।

(ङ) मात्रा हरिः भज्यते ।

(च) कपिना फलानि खाद्यन्ते ।

(छ) त्वया आनन्दौ अनुभूयेते ।

(ज) विद्यार्थिना पठनशीलेन भूयते ।

(ञ) शूरेण शत्रुर्जीयते ।

५. **कर्मवाच्ययुक्तानि वाक्यानि प्रयुज्य दशवाक्येषु स्वविद्यालयं वर्णयत, कक्षायाञ्च श्रावयत ।**

अष्टमः पाठः

# अथ लकारार्थप्रक्रिया

**लः कर्मणि च भावे चाकर्मकेभ्यः** इति सूत्रेण लकाराः कर्तरि,कर्मणि, भावे च अर्थे भवन्तीति विषयं भ्वादिगणे प्रतिपाद्य वर्तमानादिषु अर्थेषु लकारादयः प्रत्ययाः भवन्तीति च विस्तरेण प्रतिपादितं तथाहि-

**लट् -**

**वर्तमाने लट्** ३ । २ । १२३ वर्तमानक्रियावृत्तेर्धातोर्लट् लकारो भवति । यथा - पठति, पठतः, पठन्ति ।

लिट् -

**परोक्षे लिट्** ३।२।१०५ भूतानद्यतनपरोक्षार्थवृत्तेर्धातोः लिट्लकारो भवति । यथा- बभूव, बभूवतुः, बभूवुः ।

**लुट्-**

**अनद्यतने लुट्** ३।३।१५ भविष्यत्यनद्यतनेऽर्थे लुट्लकारो भवति । यथा- श्वः कार्यक्रमो भविता । अष्टमे दिवसे रामः गृहं श्वो गन्ता । भविता । अर्चिता । एधिता । शयिता । दाता ।

**लृट्-**

**लृट् शेषे च** ३ । ३ । १३ भविष्यदर्थाद्धातोर्लृट् लकारः क्रियार्थायां क्रियायां सत्यामसत्यां वा । भविष्यति । अर्चिष्यति । एधिष्यते ।

**लेट्लकारस्य प्रयोगो वेदे भवति ।**

**लोट्-**

**लोट् च** ३ । ३ । १६२ विध्याद्यर्थेषु धातोर्लोट् भवति ।

यजताम्, इह भुञ्क्ताम्, इहास्ताम्, पुत्रमध्यापयतु भवान्, किं भो वेदमध्ययै उत तर्कम् ?

लङ्-

**अनद्यतने लङ्** ३ । २ । १११ अनद्यतनभूतार्थवृत्तेर्धातोर्लङ्लकारो भवति ।

स ह्योऽगच्छत् । अभवत् । आर्चत् । ऐधत । अशेत । अयच्छत् । अविद्यत ।

वि.लिङ्

**विधिनिमन्त्रणामन्त्रणाधीष्टसम्प्रश्नप्रार्थनेष' लिङ् ३ । ३ ।** १६१ विध्यादिष्वर्थेषु धातोर्लिङ् । इदं सूत्रं विस्तरेण अस्मिन्नेव प्रकरणे व्याख्यास्यते ।

आ.लिङ्

**आशिषि लिङ्लोटौ ३ । ३ । १७३**

आशीर्वादेऽर्थे वर्तमानाद्धातोर्लिङ्-लोटौ प्रत्ययौ भवतः । भवतां सुकीर्तिः प्रसरतु, भवतां सुकीर्तिः प्रस्रियात् । त्वं पुत्रवती भव/भवतात्, त्वं पुत्रवती भूयाः । अर्चतु, अर्चतात् । अर्च्यात् । एधताम् । एधिषीष्ट ।

लुङ्-

**लुङ् ३ । २ ।** १९० भूतार्थे धातोर्लुङ् भवति । अभूत् । आर्चीत् । ऐधिष्ट । अशयिष्ट । अदात् ।

**माङि लुङ् ३ । ३ । १७५** 'माङ्' इति शब्दे उपपदे सर्वलकारान् बाधित्वा धातोर्लुङ्प्रत्ययो भवति । 'मा (भवान्) भूत्' मा अर्चीत् । मा एधिष्ट । मा शयिष्ट । मा दात् । मा वित्त । मा कार्षीत् ।

**स्मोत्तरे लङ् च ३ । ३ ।** १७६ स्मोत्तरे माङि लङ् लुङ् च । मा स्म भवत् । मा स्म भूत् इत्यादीनि उदाहरणानि । मा स्म अर्चत्, मा स्म अर्चीत् । मा स्म एधत, मा स्म एधिष्ट । मा स्म शेत, मा स्म शयिष्ट । मा स्म यच्छत्, मा स्म दात् । मा स्म विद्यत, मा स्म वित्त । मा स्म करोत्, मा स्म कार्षीत् । इत्यादयोऽपि बोध्याः ।

लृङ्-

**लिङ्निमित्ते लृङ् क्रियातिपत्तौ ३ । ३ ।** १३९ हेतुहेतुमद्भावादि लिङ्निमित्तं तत्र भविष्यत्यर्थे लृङ् भवति क्रियाया अनिष्पत्तौ गम्यमानायाम् । *सुवृष्टिश्चेदभविष्यत् तदा सुभिक्षमभविष्यत् । 'कृष्णमनंस्यच्चेत् सुखमयास्यत्' इत्यादीनि उदाहरणानि ।*

*इदानीमस्मिन् प्रकरणे अन्येष्वर्थेषु च एते लकाराः भवन्तीति प्रतिपाद्यते-*

लृट्-लकारविधायकं विधिसूत्रम्

**अभिज्ञावचने लृट् ३ । २ । ११२**

**स्मृतिबोधिन्युपपदे भूतानद्यतने धातोर्लृट् । लङोऽपवादः । वस निवासे । स्मरसि कृष्ण गोकुले वत्स्यामः । एवं बुध्यसे, चेतयसे इत्यादिप्रयोगोऽपि ।**

(अभिज्ञावचने, भूते, अनद्यतने, धातोः, लृट्)

***सरलार्थः-*** *स्मृतिबोधके (स्मरणार्थके) धातौ उपपदे भूतानद्यतनेऽर्थे वर्तमानाद् धातोर्लृट्प्रत्ययो भवति ।*

**वस निवासे ।** *निवासेऽर्थे वर्तमानस्य वस-धातोरन्त्याकार इत् । (अनिट्, सकर्मकः)*

*'स्मरसि कृष्ण गोकुले वत्स्यामः' अत्र 'स्मरसि' इति स्मृतिबोधकधातूपपदत्वाद् वस्-धातोरनद्यतने भूतेऽर्थे "अनद्यतने लङ्" इत्यनेन प्राप्तं लङं बाधित्वा प्रकृतसूत्रेण लृट्-लकारे, लस्य स्थान उत्तमपुरुषस्य बहुवचने मसि, स्यादिकार्ये, 'वत्स्यामः' इति सिद्ध्यति । एवं प्रकारेणैव 'बुध्यसे कृष्ण गोकुले वत्स्यामः', 'चेतयसे कृष्ण गोकुले वत्स्यामः' इत्यादिप्रयोगेऽपि लृट्लकारो बोध्यः ।*

लृडादेशनिषेधविधायकं विधिसूत्रम्-

**न यदि ३ । २ । ११३**

**यद्योगे उक्तं न । अभिजानासि कृष्ण यद्वने अभुञ्ज्महि ।**

(अभिज्ञावचने, भूते, अनद्यतने, धातोः, लृट्, यदि, न)

***सरलार्थः-*** *यद्-शब्देन योगे स्मृतिबोधकधातौ उपपदे भूतानद्यतनेऽर्थे वर्तमानाद् धातोर्लृड् न भवति ।*

*'अभिजानासि कृष्ण यद्वने अभुञ्ज्महि' 'अभिजानासि' इति स्मृतिबोधिन्युपपदत्वाद् भुज्-धातोरनद्यतने भूतेऽर्थे प्राप्तं लङं बाधित्वा "अभिज्ञावचने लृट्" इति लृटि प्राप्ते, यद्-शब्दस्य योगत्वादनेन सूत्रेण निषेधे, बाधकाभावे पुनः लङि, 'अभुञ्ज्महि' इति सिद्ध्यति ।*

लट्लकारविधायकं विधिसूत्रम्-

**लट् स्मे ३ । २ । ११८**

**लिटोऽपवादः । यजति स्म युधिष्ठिरः ।**

(स्मे, परोक्षे, अनद्यतने, भूते, धातोः, लट्)

***सरलार्थः-*** *स्म इत्युपपदे परोक्षेऽनद्यतने भूतेऽर्थे वर्तमानाद् धातोर्लट्-प्रत्ययो भवति । 'स्म' इत्यनेन योगे उक्तेऽर्थे "परोक्षे लिट्" इति प्राप्तं लिटं बाधित्वा अनेन लट्-लकारो भवति ।*

*'यजति स्म युधिष्ठिरः' अत्र स्मशब्देन योगे भूतानद्यतनपरोक्षार्थवृत्तेर्यज्-धातोः प्राप्तं लिटं बाधित्वा प्रकृतसूत्रेण लटि 'यजति' इति सिद्ध्यति । स्मशब्देन योगे लिटो विषये लटः प्रयोगः प्रसिद्धो वर्तते । यथा - पठति स्म । खादति स्म । भवति स्म । गच्छन्ति स्म । जयति स्म । क्रीडति स्म । पश्यति स्म । पिबति स्म । करोति स्म । पाठयति स्म । पिपठिषति स्म ।*

वर्तमानसामीप्ये वर्तमानवद्भावविधायकमतिदेशसूत्रम्-

**वर्तमानसामीप्ये वर्तमानवद् वा ३ । ३ । १३१**

**वर्तमाने ये प्रत्यया उक्तास्ते वर्तमानसामीप्ये भूते भविष्यति च वा स्युः। कदागतोऽसि। अयमागच्छामि,**

**अयमागमं वा। कदा गमिष्यसि। एष गच्छामि, गमिष्यामि वा।**

(वर्तमानसामीप्ये, वर्तमानवद्, वा)

***सरलार्थः-*** *वर्तमानकालेऽर्थे विहिताः प्रत्ययाः वर्तमानसमीपकाले भूते भविष्यति चार्थे विभाषया भवन्ति।*

*'कदा आगतोऽसि ?' अत्र भूतकालिकप्रश्ने भूतस्य वर्तमानसामीप्यत्वात् तदुत्तरे प्राप्तं लुङं बाधित्वा प्रकृतसूत्रेण विकल्पेन लटि, 'अयमागच्छामि' इति। लडभावे लुङि 'अयमागमम्' इत्यपि। एवं प्रकारेण 'कदा गमिष्यसि ?' इति भविष्यत्कालविषयके प्रश्ने भविष्यत्कालस्यैवोत्तरस्यापेक्षायां प्राप्तं लृटं बाधित्वा भविष्यतो वर्तमानेन सह सामीप्यात् प्रकृतसूत्रेण विकल्पेन लटि, 'एष गच्छामि' इति। लडभावे तु लृटि - एष गमिष्यामि।*

लिङ्लकारविधायकं विधिसूत्रम्-

**हेतुहेतुमतोर्लिङ् ३। ३। १५३**

**वा स्यात्। कृष्णं नमेच्चेत्सुखं यायात्। कृष्णं नंस्यति चेत्सुखं यास्यति। वा. (भविष्यत्येवेष्यते) नेह, हन्तीति पालयते। विधिनिमन्त्रणेति लिङ्। विधिः प्रेरणं भृत्यादेर्निकृष्टस्य प्रवर्तनम्। यजेत। निमन्त्रणं नियोगकरणम्, आवश्यके श्राद्धभोजनादौ दौहित्रादेः प्रवर्तनम्। इह भुञ्जीत। आमन्त्रणं कामचारानुज्ञा। इहासीत। अधीष्टं सत्कारपूर्वको व्यापारः। पुत्रमध्यापयेद्भवान्। संप्रश्नः सम्प्रधारणम्। किं भो वेदमधीयीय उत तर्कम् ? प्रार्थनं याच्ञा। भो भोजनं लभेय। एवं लोट्।**

(हेतुहेतुमतोः, विभाषा, धातोः, लिङ्, कृत्, प्रत्ययः, परश्च)

***सरलार्थः-*** *हेतुभूतेऽर्थे वर्तमानाद् हेतुमद्भावेऽर्थे वर्तमानाच्च धातोर्लिङ्प्रत्ययो वा भवति। सर्वलकाराणामपवादः अयम्। अत्र हेतुहेतुमन्तौ द्वे क्रिये भवतः। भविष्यत्कालेऽनेन सूत्रेण द्वाभ्यामेव लिङ् भवति। 'कृष्णं नमेच्चेत्सुखं यायात्' अत्र हेतुक्रियाबोधकान् नम्धातोः हेतुमत्क्रियाबोधकाद् याधातोश्च प्राप्तौ लृटौ बाधित्वा प्रकृतसूत्रेण उभयत्र विकल्पेन लिङि 'नमेत्' 'यायात्' इति सिद्ध्यतः। लिङभावे तु "लृट् शेषे च" इति सूत्रेण उभयत्र लृटि 'कृष्णं नंस्यति चेत्सुखं यास्यति' इति च।*

*अयं लिङ् भविष्यति काले हि इष्यत इति "भविष्यत्येवेष्यते" इति वार्तिकाद् बोध्यते। अत एव 'हन्तीति पलायते' अत्र हेतुहेतुमद्भावत्वादपि भविष्यत्कालस्याभावान्न लिङ्।*

**विधिनिमन्त्रणामन्त्रणाधीष्टसम्प्रश्नप्रार्थनेषु लिङ् ३। ३। १६१** अनेन सूत्रेण विधि-निमन्त्रण-

आमन्त्रण-अधीष्ट-सम्प्रश्न-प्रार्थनेषु अर्थेषु वर्तमानाद्धातोर्लिङ्प्रत्ययो भवति ।

**विधिः** = प्रेरणम्, स्वानुकृष्टानां भृत्यादीनां प्रवर्तनम् । यजेत । *विध्यर्थे वर्तमानाद् यज्-धातोः प्रकृतसूत्रेण लिङि, तादिकार्ये 'यजेत' इति ।*

**निमन्त्रणम्** = नियोजनम्, आवश्यके श्राद्धभोजनादौ दौहित्रादेः सम्बन्धिनां प्रवर्तनम् । *'इह भुञ्जीत' अत्र निमन्त्रणायामर्थे वर्तमानाद् भुज्-धातोरनेन सूत्रेण लिङि 'भुञ्जीत' इति ।*

**आमन्त्रणम्** = कामचारानुज्ञा । *'इहासीत' अत्र आमन्त्रणार्थे वर्तमानाद् आस्-धातोर्लिङि - आसीतेति ।*

**अधीष्टम्** = सत्कारपूर्वको व्यापारः । *'पुत्रमध्यापयेद्भवान्' अत्र अधीष्टार्थे वर्तमानाद् 'अधि' इत्युपसर्गपूर्वाद् ण्यन्ताद् इङ्-धातोः प्रकृतसूत्रेण लिङि - अध्यापयेदिति ।*

**संप्रश्नः** = सम्प्रधारणम् । *'किं भो वेदमधीयीय उत तर्कम् ?' अत्र संप्रश्नेऽर्थे वर्तमानाद् 'अधि+इ' इत्यस्माद्धातोरनेन सूत्रेण लिङि - अधीयीय ।*

**प्रार्थनम्** = *याच्ञा । 'भो भोजनं लभेय' अत्र प्रार्थनेऽर्थे वर्तमानाद् लभ्-धातोरप्यनेनैव लिङि, थासादिकार्ये - लभेय ।*

विध्यादिष्वर्थेषु गम्यमानेषु लोट् च ३ । ३ । १६२ इति सूत्रेण लोट्लकारोऽपि भवति । उक्तेष्वर्थेषु क्रमाद् यजताम्, इह भुञ्क्ताम्, इहास्ताम्, पुत्रमध्यापयतु भवान्, किं भो वेदमध्ययै उत तर्कम् ?, भो भोजनं लभै, इत्यादयः प्रयोगा अपि भवन्त्येव । विध्यर्थे वर्तमानाद् यज्-धातोरनेन लोटि - 'यजताम्' इति सिद्ध्यति ।

इति लकारार्थप्रक्रिया
इति तिङन्तं समाप्तम्

## प्रयोगसिद्धिप्रकारः

### स्मरसि कृष्ण गोकुले वत्स्यामः

'स्मरसि कृष्ण गोकुले वत्स्यामः' अत्र 'स्मरसि' इति स्मृतिबोधकधातूपपदत्वाद् वस्-धातोरनद्यतने भूतेऽर्थे "अनद्यतने लङ्" इत्यनेन लङि प्राप्ते तं बाधित्वा "अभिज्ञावचने लृट्" इति सूत्रेण लृट्-लकारे, लस्य स्थान उत्तमपुरुषस्य बहुवचने मसि, स्यादिकार्ये, 'वत्स्यामः' इति सिद्ध्यति ।

### यजति स्म युधिष्ठिरः

'यजति स्म युधिष्ठिरः' अत्र भूतानद्यतनपरोक्षार्थवृत्तेर्यज्-धातोः "परोक्षे लिट्" इति लिटि प्राप्ते तं प्रबाध्य, स्मशब्देन योगे "लट् स्मे" इति सूत्रेण लटि, तिबादिकार्ये 'यजति' इति सिद्ध्यति ।

## अभ्यासार्थाः प्रश्नाः

१. **अधस्तनसूत्राणि तेषां नेपालीभाषायामर्थं च लिखत**

(क) लट् स्मे (ख) अभिज्ञावचने लृट्

(ग) वर्तमानसामीप्ये वर्तमानवद् वा (घ) हेतुहेतुमतोर्लिङ्

२. **प्रश्नानामुत्तराणि देयानि**

(क) लकाराः कति सन्ति ? के च ते ?

(ख) कर्तरि लृङ्लकारान्तानि त्रीणि पदानि प्रयुज्य वाक्यानि रचयत ।

(ज) स्म इत्युपपदे सति धातोः केन सूत्रेण को लकारो भवति ?

(झ) "लोट् च" इति सूत्रं किं करोति ?

(ञ) "हेतुहेतुमतोर्लिङ्" इति सूत्रस्यार्थं सोदाहरणं लिखत ।

३. **समीचीनेषु कथनेषु (√) चिह्नमसमीचीनेषु च (×) चिह्नं दर्शयत**

(क) अनद्यतने भूते परोक्षेऽर्थे वर्तमानाद्धातोर्लिट्-लकारो भवति ।

(ख) भविष्यत्यनद्यतनेऽर्थे धातोर्लृट्-लकारो भवति ।

(ग) सामान्यभूतकाले लुङ्लकारो प्रयुज्यते ।

(घ) माङुपपदाद्धातोर्लङ्लुङौ वा भवतः ।

(ङ) विध्यादिष्वर्थेषु लिङ्लोटौ भवतः ।

(च) वर्तमानसामीप्ये भूते भविष्यति च लङ्वा भवति ।

(छ) सम्प्रश्नेऽर्थे वर्तमानाद्धातोर्लुट्-लकारो भवति ।

५. **"विधिनिमन्त्रणा०" इति सूत्रं पूरयित्वा सोदाहरणं तस्यार्थं लिखत ।**

६. **अधस्तनप्रयोगाणां सिद्धेः प्रक्रियां दर्शयत**

पठति स्म, चेतयसे कृष्ण गोकुले वत्स्यामः, अभिजानासि कृष्ण यद्वने अभुञ्ज्महि, कदा गमिस्यसि ? एष गच्छामि, कृष्णं नमेच्चेत् सुखं यायात्, इह भुञ्जीत, यजेत ।

७. **अद्यतनानद्यतनशब्दयोरर्थं स्पष्टीकुरुत ।**

८. **कोष्ठकात् समुचितपदं चित्वा रिक्तस्थानं पूरयत**

(क) यद्योगे स्मृतिबोधिन्युपपदे भूतानद्यतने धातोः ................ भवति । (लृट्, लङ्)

(ख) स्मृतिबोधिन्युपपदे भूतानद्यतनेऽर्थे धातोः ............... लकारः प्रयुज्यते । (लृट्, लुट्)

(ग) अधीष्टेऽर्थे वर्तमानाद्धातोः ................ लकारो भवति । (विधिर्लिङ्, आशीर्लिङ्)

(घ) स्म इत्युपपदे धातोः ................ भवति । (लट्, लिट्)

(च) हेतुहेतुमद्भावेऽर्थे धातोः............. भवति । (लिङ्, लिट्)

**९. स्म इत्युपपदे भूधातोः सर्वाणि रूपाणि लिखत ।**

## अनुप्रयोगः

**१. अधोलिखितानि वाक्यानि पठत**

(क) यूयमष्टमकक्षायां **पठथ** ।

(ख) पुरा भारतवर्षे रामो राजा **बभूव** ।

(ग) पुरा ब्राह्मणा **यजन्ति स्म** ।

(घ) अहं परश्वः पाठशालां न **गन्तास्मि** ।

(ङ) त्वं कदा **गमिष्यसि** ?

(च) यूयं प्रश्नानामुत्तराणि सम्यग् **लिखत** ।

(छ) सर्वे जनाः सुखिनो **भवन्तु** ।

(ज) अस्माकं विद्यालये ह्यः कविताप्रतियोगिता **अभवत्** ।

(झ) ते सुशीला **भवेयुः** ।

(ञ) त्वं सम्यक् **पठेः** ।

(ट) सम्यक् पठेच्चेद्विद्वान् **भवेत्** ।

(ठ) सर्वत्र कल्याणं **भूयात्** ।

(ड) स गृहकार्यम् **अकृत** ।

(ढ) दरिद्रो धनिकेभ्यो धनं **मा दात्** ।

(ण) स स्वमातुलगृहं **मा स्म गच्छत्** ।

(त) सज्जनो दुष्कर्म **मा स्म कार्षीत्** ।

(थ) कौमुदीमपठिष्यच्चेद् विद्वान**भविष्यत्** ।

**२. निर्देशनानुसारेण रिक्तस्थानं पूरयत**

(क) त्वमत्र ................ । (आगम्, लोट्)

(ख) भवान् मम पुत्रं ................ । (पाठि, लिङ्)

(ग) यूयं श्वः किं ................ । (कृ, लुट्)

(घ) त्वं शत्रून् ................ । (जि, लिङ्)

(ङ) पितामहः प्रतिदिनं देवपूजां ................ स्म । (कृ)

(च) वयं वार्तालापं मा ................ । (कृ)

(छ) पुरा रामो रावणं ................ । (हन्, लिट्)

(ज) रावणो हरेर्नाम मा ................ स्म । (जप्)

(झ) ते साफल्यं ................ । (लभ्, लृट्)

(ञ) सर्वे जना निरामयाः ................ । (अस्, लोट्)

(ट) तव गृहे ह्यः किम् ................ । (अस्, लङ्)

(ठ) ते कुत्र ................ । (गम्, लुङ्)

३. **परस्परं मेलयत**

| अ | आ |
|---|---|
| वर्तमानेऽर्थे धातोः | लङ्-लकारो भवति । |
| भूतेऽर्थे धातोः | लृट्-लकारो भवति । |
| अनद्यतने भूतेऽर्थे धातोः | लिङ्लोटौ लकारौ भवतः । |
| अनद्यतनपरोक्षे भूतेऽर्थे धातोः | लिङ्लोटौ लकारौ भवतः । |
| भविष्यत्यर्थे धातोः | लुट्-लकारो भवति । |
| अनद्यतने भविष्यत्यर्थे धातोः | लिट्-लकारो भवति । |
| विध्यादिष्वर्थेषु धातोः | लट्-लकारो भवति । |
| आशिष्यर्थे धातोः | लुङ्-लकारो भवति । |

# अथ कृदन्तप्रकरणे कृत्यप्रक्रिया

*(तव्यत्, तव्य, अनीयर्, यत्, ण्यत्, क्यप्, केलिमर् इत्येषां प्रत्ययानां निरूपणम्, कृत्यप्रत्ययान्तनिष्पन्नशब्दानां प्रयोगश्च)*

## पाठपरिचयः

पाठेऽस्मिन् कृत्संज्ञायाः कृत्यसंज्ञायाश्च निरूपणपुरस्सरं तव्यदादिकृत्यप्रत्ययान्तशब्दानां ससूत्रं प्रतिपादनं विहितमस्ति ।

## प्रकृतपाठस्थाः कतिपयविशेषविषयाः

- **कृत्संज्ञा** – धातोः इत्यधिकारे विहितानां तिङ्भिन्नप्रत्ययानां "कृदतिङ्" इति सूत्रेण कृत्संज्ञा विधीयते ।
- कृत्संज्ञकाः प्रत्ययाः "कर्तरि कृत्" इति सूत्रेणोत्सर्गतः कर्तर्यर्थे भवन्ति ।
- अत्र पाठे निरूपितानां "ण्वुल्तृचौ" इत्यतः पूर्ववर्तिनां प्रत्ययानां कृत्संज्ञया सह "कृत्याः" इति सूत्रेण कृत्यसंज्ञापि भवति ।
- कृत्यसंज्ञकाः प्रत्ययाः "तयोरेवकृत्यक्तखलर्थाः" इति सूत्रेण भावे कर्मणि चार्थे भवन्ति ।
- कृत्संज्ञकेषु कृत्यसंज्ञकेषु वा प्रत्ययेषु असरूपा अपवादप्रत्ययाः उत्सर्गप्रत्ययानां "वाऽसरूपोऽस्त्रियाम्" इति सूत्रेण विभाषया बाधकाः भवन्ति, सरूपप्रत्ययास्तु नित्यं बाधकाः भवन्ति, स्त्र्यर्थप्रत्ययेषु त्वयं नियमो नास्ति ।
- तव्यत्, तव्य, अनीयर्, यत्, ण्यत्, क्यप्, केलिमर् इत्यादयः कृत्यसंज्ञकाः प्रत्ययाः सकर्मकेभ्यो धातुभ्यः कर्मणि, अकर्मकेभ्यो धातुभ्यस्तु भावेऽर्थे भवन्ति ।

अधिकारसूत्रम्-

**धातोः ३ । १ । ९१**

(धातोः)

**आतृतीयाध्यायसमाप्तेर्ये प्रत्ययास्ते धातोः परे स्युः । कृदतिङिति कृत्संज्ञा ।**

***सरलार्थः-*** *आतृतीयाध्यायसमाप्तेर्यानि प्रत्ययविधायकानि सूत्राणि तेषु 'धातोः' इति*

*पदमुपतिष्ठते । तथा च धात्वधिकारे विहिताः प्रत्यया धातोः परे भवन्तीति ज्ञेयम् ।*

*'धातोः' इति सूत्राधिकारे पठिताः तिङ्भिन्नाः प्रत्ययाः कृत्संज्ञकाः भवन्ति । (कृदतिङ् ३ । १ । ९३ अत्र धात्वधिकारे तिङ्भिन्नः प्रत्ययः कृत्संज्ञः स्यात् ।*

परिभाषासूत्रम्-

**वासरूपोऽस्त्रियाम् ३ । १ । ९४**

**अस्मिन्धात्वधिकारेऽसरूपोऽपवादप्रत्यय उत्सर्गस्य बाधको वा स्यात् स्त्र्यधिकारोक्तं विना ।**

(तत्र, असरूपः, कृत्, प्रत्ययः, धातोः, परश्च, वा, अस्त्रियाम्)

***सरलार्थः-*** *'धातोः' इत्यस्याधिकारे विहितोऽसरूपोऽपवादः प्रत्यय उत्सर्गस्य(सामान्यशास्त्रस्य) विकल्पेन बाधको भवति, 'स्त्रियां क्तिन्' इत्यस्याधिकारे(स्त्र्यधिकारे) उक्तं प्रत्ययं विना । स्त्र्यधिकारोक्तोऽपवादप्रत्ययस्तु उत्सर्गस्य नित्यमेव बाधको भवति । एवमेव धातोर्विहितः सरूपोऽपवादः प्रत्ययोऽपि उत्सर्गस्य नित्यमेव बाधक इत्याशयः ।*

कृत्यसंज्ञाविधायकं सूत्रम् -

**कृत्याः ३ । १ । ९५**

**ण्वुल्तृचावित्यतः प्राक् कृत्यसंज्ञाः स्युः ।**

(कृत्याः)

***सरलार्थः-*** *इतः परं 'ण्वुल्तृचौ ३ । १ । १३३ ' इत्यतः प्राग् विहिताः प्रत्ययाः कृत्यसंज्ञका भवन्ति । कृत्यसंज्ञकाः प्रत्ययाः सप्त सन्ति । ते यथा- तव्यत्, तव्य, अनीयर्, यत्, ण्यत्, क्यप्, केलिमर् ।*

कृत अर्थनिर्धारकं सूत्रम्-

**कर्तरि कृत् ३ । ४ । ६७**

**कृत्प्रत्ययः कर्तरि स्यात् । इति प्राप्ते-**

(धातोः, कृत्, कर्तरि)

***सरलार्थः-*** *कृत्संज्ञकः प्रत्ययः कर्त्रर्थे भवति ।*

कृत्यक्तखलर्थप्रत्ययानामर्थनिर्धारकं सूत्रम्-

**तयोरेव कृत्यक्तखलर्थाः ३ । ४ । ६८**

**एते भावकर्मणोरेव स्युः ।**

(धातोः, कृत्यक्तखलर्थाः, प्रत्ययः, परश्च, तयोः, एव)

***सरलार्थः-*** *कृत्यप्रत्ययाः, क्तप्रत्ययः, खल्प्रत्ययस्यार्थे विहिताः प्रत्ययाश्च अकर्मकेभ्यो धातुभ्यः भावे, सकर्मकेभ्यो धातुभ्यस्तु कर्मणि एव भवन्ति (न तु कर्तरि) इत्यर्थः ।*

तव्यत्तव्यानीयर्प्रत्ययविधायकं विधिसूत्रम्-

**तव्यत्तव्यानीयरः ३ । १ । ९६**

**धातोरेते प्रत्ययाः स्युः । एधितव्यम्, एधनीयं त्वया । भावे औत्सर्गिकमेकवचनं क्लीबत्वं च । चेतव्यश्चयनीयो वा धर्मस्त्वया ।**

(धातोः, तव्यत्तव्यानीयरः, प्रत्ययः, परश्च)

***सरलार्थः-*** *धातोः तव्यत्, तव्य, अनीयर् एते प्रत्ययाः कर्मणि भावे च भवन्तिः । तव्यत्प्रत्ययस्य तकार इत्संज्ञकः । तव्यत्तव्ययोः स्वरे एव विशेषः, वर्णानुपूर्व्यां तु अविशेष एव । अतस्तयोः पृथगुदाहरणानि न प्रदर्श्यन्ते । 'अनीयर्' इत्यस्य रेफ इत्संज्ञकः । 'एधितुं योग्यं शक्यं वा' इति विग्रहे एध्-धातोः प्रकृतसूत्रेण अकर्मकत्वाद् भावे तव्यत्प्रत्ययेऽनुबन्धलोपे 'एध् + तव्य' इति जाते, इडागमे, 'एधितव्य', कृदन्तत्वात् प्रातिपदिकसंज्ञायां, भावे औत्सर्गिक एकवचने सौ नपुंसकत्वे च, 'एधितव्यम्' इति । भावे प्रत्ययविधानाद् अनुक्तकर्तरि तृतीया, एधितव्यं त्वया । एवमेव 'एधितुं योग्यं शक्यं वा' इत्येव विग्रहे एध्-धातोः अनीयर्प्रत्यये रेफस्य इत्-संज्ञायां, एधनीय, स्वादिकार्ये, एधनीयम् । एधनीयं त्वया । (त्वया, मया, अन्यैश्च एधितव्यम्, एधनीयम् ।) 'चेतुं योग्यः, शक्यो वा' इति विग्रहे चिधातोः सकर्मकत्वात् कर्मणि तव्यत्प्रत्यये, अनुदात्तत्वाद् इण्-निषेधे, गुणे 'चेतव्य' ततः सौ 'चेतव्यः' इति रूपम् । अनीयर्प्रत्यये तु गुणे, अयादेशे, स्वादिकार्ये 'चयनीयः' इति । अस्य विशेष्ये धर्मशब्दे पुंलिङ्गैकवचनत्वाद् अत्रापि पुंलिङ्गस्यैकवचनम्, चेतव्यश्चयनीयो वा धर्मस्त्वया । (चेतव्यौ चयनीयौ वा धर्मौ त्वया, चेतव्याश्चयनीया वा धर्मास्त्वया, चेतव्यं धर्मम्, चेतव्येन धर्मेण, चेतव्यं पुष्पम्, चेतव्ये पुष्पे, चेतव्यानि पुष्पाणि, चेतव्या सृतिः) एवं भवितव्यम्, भवनीयम् । जेतव्यम्, जयनीयम् । कर्तव्यम्, करणीयम्, कर्तव्यः, करणीयः, कर्तव्या, करणीया इत्यादयः ।*

**वा**. (केलिमर उपसङ्ख्यानम्) पचेलिमा माषाः । पक्तव्या इत्यर्थः । भिदेलिमा सरलाः । भेत्तव्या इत्यर्थः । कर्मणि प्रत्ययः ।

***सरलार्थः-*** *भावे कर्मणि च धातोः केलिमर्-प्रत्ययो भवतीत्यर्थः । रेफककारौ इतौ । पक्तुं योग्याः शक्या वा इत्यर्थे पच्धातोः कर्मणि केलिमर्-प्रत्यये 'पचेलिम' इति । 'माषाः' इत्यत्र बहुवचनत्वाद् अत्रापि प्रथमाया बहुवचने जसि, 'पचेलिमा माषाः' इति । एवमेव भेत्तुं योग्या इत्यर्थे भिद्-धातोः केलिमर्-प्रत्यये 'भिदेलिमाः सरलाः' इत्यपि ।*

बाहुलकात् कृत्यल्युटोः विधायकं नियमसूत्रम्-

**कृत्यल्युटो बहुलम् ३ । ३ । ११३**

**क्वचित्प्रवृत्तिः क्वचिदप्रवृत्तिः क्वचिद् विभाषा क्वचिदन्यदेव ।**

**विधेर्विधानं बहुधा समीक्ष्य चतुर्विधं बाहुलकं वदन्ति । स्नात्यनेनेति स्नानीयं चूर्णम् । दीयतेऽस्मै दानीयो विप्रः ।**

(धातोः, कृत्यल्युटः, बहुलम्, कृत्, प्रत्ययः, परश्च)

***सरलार्थः-*** *कृत्यसंज्ञकाः प्रत्ययाः, ल्युट्प्रत्ययश्च बाहुलकाद् भवन्ति ।*

*तत्र बहुलपदार्थमाह क्वचित्प्रवृत्तिः.... इति कारिकया-*

***कारिकार्थ- क्वचित्प्रवृत्तिः-*** *बाहुलकविधयः कुत्रचित् प्रवृत्त्योग्यस्थलेष्वपि प्रवर्तन्ते ।* ***क्वचिदप्रवृत्तिः-*** *कुत्रचित् प्रवृत्तियोग्यस्थलेष्वपि न प्रवर्तन्ते,* ***क्वचिद्विभाषा-*** *कुत्रचिद् विभाषया प्रवर्तन्ते,* ***क्वचिदन्यदेव -*** *कुत्रचिद् अन्यदपि विधयो जायन्ते इति प्रकारचतुष्टयं बाहुलकविधीनां भवतीति कारिकाशयः । अत एव स्नानीयं चूर्णमित्यत्र स्नात्यनेन इति विग्रहे करणेऽर्थे, दानीयो विप्रः इत्यत्र दीयतेऽस्मै इति विग्रहे सम्प्रदानेऽर्थे च अनीयर्प्रत्ययः । ल्युड्विषयः सम्बद्धस्थले स्पष्टीभविष्यति ।*

यत्प्रत्ययविधायकं विधिसूत्रम्-

**अचो यत् ३ । १ । ९७**

**अजन्ताद्धातोर्यत् स्यात् । चेयम् ।**

(अचः, धातोः, भावकर्मणोः, यत्)

***सरलार्थः-*** *अजन्ताद् धातोः भावे कर्मणि च यत्प्रत्ययो भवति । यतः तकार इत् ।*

*असरूपत्वात् तव्यदादिप्रत्ययानां वैकल्पिको बाधकः । 'चेतुं योग्यम्' इत्यर्थे चिधातोः यत्प्रत्ययेऽनुबन्धलोपे, गुणे, चेय, तस्मान्नपुंसकलिङ्गे सौ 'चेयम्' इति सिद्ध्यति । (चेयं पुष्पम् ।) एवमेव जेतुं योग्यमित्यर्थे जिधातोर्यति 'जेयम्' । (जेयं मनः)*

ईकारादेशविधायकं विधिसूत्रम्-

**ईद्यति ४। ६ । ६५**

**यति परे आत ईत्स्यात् । देयम् । ग्लेयम् ।**

(आतः, ईद्, यति)

***सरलार्थः*****-** *यत्प्रत्यये परे आकारस्य स्थाने ईकारो भवति । दातुं योग्यमिति विग्रहे दाधातोः ‘अचो यत्’ इति कर्मणि यत्प्रत्ययेऽनुबन्धलोपे ‘दा + य’ इत्यवस्थायां यत्प्रत्यये परे ‘दा’ इत्यस्याकारस्य प्रकृतसूत्रेण ईत्वे, ‘दी + य’, गुणे, स्वादिकार्ये ‘देयम्’ इति । (देयं धनम्) एवमेव ग्लैधातोः ‘आदेच उपदेशे०’ इति आत्वे, ग्लातुं योग्यमित्यर्थे ग्लाधातोर्भावे यति पूर्ववद् ‘ग्लेयम्’ इति सिद्ध्यति ।*

*(त्वया, मया, अन्यैश्च ग्लेयम्)*

यत्प्रत्ययविधायकं विधिसूत्रम्-

**पोरदुपधात् ३ । १ । ९८**

**पवर्गान्ताददुपधाद्यत्स्यात् । ण्यतोऽपवादः । शप्यम् । लभ्यम् ।**

(पोः, अदुपधात्, धातोः, यत्, भावकर्मणोः)

***सरलार्थः*****-** *पवर्गान्ताद् ह्रस्व-अकारोपधाद् धातोः भावे कर्मणि च यत्प्रत्ययो भवति । (सरूपत्वाद् ण्यतो नित्यमेव बाधकः ।)*

*शप्तुं योग्यमित्यर्थे ‘ऋहलोर्ण्यत्’ इति प्राप्तं ण्यतं नित्यं बाधित्वा यति, सौ ‘शप्यम्’ इति रूपम् । एवमेव लब्धुं योग्यमिति विग्रहे लभ्धातोः पूर्ववत् ‘लभ्यम्’ इति सिद्ध्यति ।*

क्यप्प्रत्ययविधायकं विधिसूत्रम्

**एतिस्तुशास्वृदृजुषः क्यप् ३ । १ ।१०९**

**एभ्यः क्यप् स्यात् ।**

(एति-स्तु-शास्-वृ-दृ-जुषः, धातोः, क्यप्, भावकर्मणोः)

***सरलार्थः*****-** *इण् गतौ, स्तुञ् स्तुतौ, शासु अनुशिष्टौ, वृञ् वरणे, दृङ् विदारणे, जुषी प्रीतिसेवनयोः इत्येतेभ्यः धातुभ्यः क्यप्प्रत्ययो भवति ।*

तुगागमविधायकं विधिसूत्रम्-

**ह्रस्वस्य पिति कृति तुक् ६। १। ७१**

**इत्यः । स्तुत्यः । शासु अनुशिष्टौ ।**

(ह्रस्वस्य, पिति, कृति, तुक्)

***सरलार्थः*****-** *ह्रस्ववर्णस्य कृत्संज्ञके पित्प्रत्यये परे तुग्-आगमो भवति । इण् गतौ इत्यस्माद् धातोः तयोरेव...इत्यादिसूत्रसहकारेण एतिस्तुशास्वृदृजुषः क्यप् इति सूत्रेण क्यप्प्रत्ययेऽनुबन्धलोपे इ+*

*य इत्यवस्थायाम् अनेन सूत्रेण इकारस्य तुगागमेऽनुबन्धलोपे इत्य इत्यस्य प्रातिपदिकसंज्ञायां स्वादिकार्ये इत्यः इति सिध्यति ।*

शास उपधायाः स्थाने इत्वविधायकं विधिसूत्रम्-

**शास इदङ्हलोः ६ । ४ । ३४**

**शास उपधाया इत्स्यादङि हलादौ क्ङिति । शिष्यः । वृत्यः । आदृत्यः ।**

(शासः, उपधायाः, इत्, अङ्हलोः, क्ङिति)

***सरलार्थः-*** *शासधातोः उपधायाः स्थाने इकारादेशो भवति अङि प्रत्यये, हलादौ किति ङिति च प्रत्यये परतः ।*

***शिष्यः-*** *शासितुं योग्य इत्यर्थे* ***शासु अनुशिष्टौ*** *इत्यस्माद् धातोः* ***एतिस्तुशास्वृदृजुषः क्यप्*** *इति सूत्रेण क्यप्प्रत्ययेऽनुबन्धलोपे शास् य इति जाते* ***शास इदङ्हलोः*** *इति सूत्रेण शास उपधायाः आकारस्य इत्वे* ***शिस् य*** *इति जाते* ***शासिवसिघसिनाञ्च*** *इति सूत्रेण सस्य सत्वे शिष्य इत्यस्य प्रातिपदिकसंज्ञायां विभक्तिकार्ये शिष्यः इति रूपं सिद्ध्यति ।*

विभाषया क्यप्-प्रत्ययविधायकं विधिसूत्रम् -

**मृजेर्विभाषा ३ । १ । ११३**

**मृजेः क्यब्वा । मृज्यः ।**

(मृजेः, धातोः, क्यप्, विभाषा, भावकर्मणोः)

***सरलार्थः-*** *मृज्धातोः विभाषया क्यप्प्रत्ययो भवति । तयोरेवेति भावकर्मणोः । ककारपकारौ इतौ । मृज्धातोः अनेन सूत्रेण क्यप्प्रत्ययेऽनुबन्धलोपे, क्यपः कित्वाद् गुणनिषेधे, मृज्य इत्यस्य प्रातिपदिकसंज्ञायां विभक्ति कार्ये मृज्यः इति रूपं सिद्ध्यति । क्यबभावे आह-*

ण्यत्प्रत्ययविधायकं विधिसूत्रम्-

**ऋहलोर्ण्यत् ३ । १ । १२४ ।**

**ऋवर्णान्ताद्धलन्ताच्च धातोर्ण्यत् । कार्यम् । हार्यम् । धार्यम्**

(ऋहलोः, धातोः, ण्यत्, भावकर्मणोः)

***सरलार्थः-*** *ऋवर्णान्ताद् हलन्ताच्च धातोः भावे कर्मणि च ण्यत्प्रत्ययो भवति । ण्यतः तकारणकारौ इतौ । सरूपत्वाद् यतो नित्यमेव बाधकः, असरूपत्वात् तव्यदादिप्रत्ययानान्तु वैकल्पिको बाधकः ।*

*कर्तुं योग्यमित्यर्थे कृधातोः यत्प्रत्ययं नित्यं बाधित्वा कर्मणि ण्यत्प्रत्ययेऽनुबन्धलोपे 'कृ+य' इत्यवस्थायां, णित्वाद् 'अचो ञ्णिति' इति वृद्धौ, ततः सौ 'कार्यम्' इति रूपम् । एवमेव हृ+ण्यत् = हार्यम्, धृ+ण्यत् = धार्यम् ।*

*मृज्धातोः कर्मण्यर्थे क्यबभावपक्षे* ***ऋहलोर्ण्यत्*** *इति सूत्रेण ण्यत्प्रत्ययेऽनुबन्धलोपे मृज्+य इति जाते आह-*

कुत्वादेशविधायकं विधिसूत्रम्-

**चजोः कु घिण्यतोः** ७ । ३ । ६९

**चजोः कुत्वं स्यात् घिति ण्यति च परे ।**

(चजोः, कु, घिण्यतोः)

***सरलार्थः-*** *चकारस्य जकारस्य च स्थाने कवर्गादेशो भवति घिति ण्यति च प्रत्यये परे ।*

*अनेन जकारस्य कुत्वेन गकारे मृग्+य इति जाते गुणे प्राप्ते आह-*

वृद्ध्यादेशविधायकं विधिसूत्रम् -

**मृजेर्वृद्धिः** ७ । २ । ११४

**मृजेरिको वृद्धिः सार्वधातुकार्धधातुकयोः । मार्ग्यः ।**
(मृजेः, इकः, वृद्धिः, सार्वधातुकार्धधातुकयोः)

***सरलार्थः-*** *मृज्धातोः अवयवस्य इकः स्थाने वृद्ध्यादेशो भवति सार्वधातुकार्धधातुकयोः प्रत्यययोः परतः ।*

*अनेन ऋकारस्य आर्वृद्धौ मार्ग्य इत्यस्य प्रातिपदिकसंज्ञायां स्वादिकार्ये मार्ग्यः इति रूपं सिद्ध्यति ।*

भक्ष्येऽर्थे भोज्यशब्दस्य निपातकं विधिसूत्रम्-

**भोज्यं भक्ष्ये** ७ । ३ । ६९

**भोग्यमन्यत् ।**

(भोज्यम्, भक्ष्ये)

***सरलार्थः-*** *भक्ष्येऽर्थे भोज्यशब्दः निपात्यते । भुज्धातोः कर्मण्यर्थे* ***ऋहलोर्ण्यत्*** *इति सूत्रेण*

*ण्यत्प्रत्ययेऽनुबन्धलोपे **सार्वधातुकार्धधातुकयोः** इति सूत्रेण गुणे भोज्+ य इति जाते जकारस्य **चजोः कु घिण्यतोः** इति सूत्रेण कुत्वे प्राप्ते अनेन सूत्रेण कुत्वाभावस्य निपाते भोज्यम् इति रूपं सिद्ध्यति ।*

*अन्यार्थे तु जकारस्य कुत्वेन गकारे भोग्यमिति रूपं सिद्ध्यति ।*

## प्रयोगसिद्धिप्रकारः

### एधितव्यम्

'एधितुं योग्यं शक्यं वा' इति विग्रहे एध्-धातोः 'कृत्याः' 'तयोरेव कृत्यक्तखलर्थाः' इति सूत्रद्वयसहकारेण 'तव्यत्तव्यानीयरः' इति सूत्रेण अकर्मकत्वाद् भावे तव्यत्प्रत्ययेऽनुबन्धलोपे 'एध् + तव्य' इति जाते, आर्धधातुकसंज्ञायाम्, 'आर्धधातुकस्येड्वलादेः' इति सूत्रेण इडागमेऽनुबन्धलोपे, वर्णसम्मेलने 'एधितव्य' इति जाते, कृदन्तत्वात् 'कृत्तद्धितसमासाश्च' इति प्रातिपदिकसंज्ञायाम्, भावे औत्सर्गिक एकवचने सौ नपुंसकत्वे च, 'एधितव्यम्' इति रूपं सिद्धम् ।

### देयम्

दातुं योग्यमिति विग्रहे दाधातोः 'अचो यत्' इति कर्मणि यत्प्रत्ययेऽनुबन्धलोपे 'दा + य' इत्यवस्थायां यत्प्रत्यये परे 'दा' इत्यस्याकारस्य 'ईद्यति' इति सूत्रेण ईत्वे, 'दी + य' इति जाते, आर्धधातुकसंज्ञायां 'सार्वधातुकार्धधातुकयोः' इति सूत्रेण गुणे 'देय' इति जाते, कृदन्तत्वात् प्रातिपदिकसंज्ञायां, स्वादिकार्ये 'देयम्' इति रूपं सिद्धम् ।

### कार्यम्

कर्तुं योग्यमित्यर्थे कृधातोः 'अचो यत्' इति प्राप्तं यत्प्रत्ययं नित्यं बाधित्वा 'ऋहलोर्ण्यत्' इति सूत्रेण कर्मणि ण्यत्प्रत्ययेऽनुबन्धलोपे 'कृ + य' इत्यवस्थायां, णित्वाद् 'अचो ञ्णिति' इति वृद्धौ, रपरत्वे 'कार्य' इति जाते, कृदन्तत्वात् प्रातिपदिकसंज्ञायां ततः सौ, सोरमि, पूर्वरूपे 'कार्यम्' इति रूपं सिद्धम् ।

### अभ्यासार्थाः प्रश्नाः

१. **अधस्तनसूत्राणामर्थं लिखत**

(क) वासरूपोऽस्त्रियाम्　　(ख) कर्तरि कृत्　　(ग) कृत्याः

(घ) तयोरेव कृत्यक्तखलर्थाः　　(ङ) पोरदुपधात्　　(च) ईद्यति

२. **प्रश्नानामुत्तराणि देयानि**

(क) हलन्ताद् धातोः केन सूत्रेण ण्यद् भवति ?

(ख) 'अचो यत्' इति सूत्रं किं करोति ?

(ग) कृत्यप्रत्ययाः के ?

(घ) कस्य कृत्संज्ञा भवति ?

(ङ) कृत्यप्रत्ययाः कस्मिन्नर्थे भवन्ति ?

(च) 'तव्यत्त०' इति सूत्रं पूरयत ।

(छ) 'लभ्यम्' इत्यत्र यद्विधायकं सूत्रं किम् ?

३. **अधोलिखितानि पदानि प्रयुज्य वाक्यानि रचयत**

श्रव्यम्, चेतव्यम्, गन्तव्यम्, करणीयः, हार्यम्, कर्तव्यः, भवनीयम्, शप्यम्, पठितव्याः, पठनीयम्, शयितव्यम्, पचेलिमाः, जेतव्यम्, दातव्यः, पातव्यम्, हरणीयः ।

४. **प्रकृतिप्रत्ययौ पृथक् कुरुत**

ग्लेयम्, भवितव्यम्, शयनीयम्, दातव्यम्, हार्यम्, जेयम्, कार्यः, चेयः, चेतव्यः, भिदेलिमाः, कार्यम्, वक्तव्यम्, भव्यम्, क्रेयम्, श्रवणीयम्, एधनीयम्, शप्यम् ।

५. **प्रत्ययान् संयुज्य निष्पन्नरूपाणि लिखत**

भू + अनीयर्, हृ + ण्यत्, लभ् + ण्यत्, कृ + तव्यत्, पा + अनीयर्, दा + यत्, चि + अनीयर्, श्रु + तव्य, पच् + ण्यत्, भिद्+ केलिमर्, पठ् + तव्यत्, वच् + ण्यत्, जि + यत्, ग्लै + यत्, लिख् + अनीयर् ।

६. **अधस्तनप्रयोगाणां सिद्धिप्रक्रियां दर्शयत**

चेयम्, कार्यम्, भवितव्यम्, पचेलिमाः, लभ्यम्, ग्लेयम्, एधनीयम्, कर्तव्यम्, चयनीयः ।

७. **समुचितपदं चित्वा रिक्तस्थानं पूरयत**

(क) ऋवर्णान्ताद्धातोः ........................ भवति । (यत्, ण्यत्)

(ख) 'कृदतिङ्' इति .................. कृत्संज्ञा भवति । (तिङ्प्रत्ययानां, तिङ्भिन्नप्रत्ययानां)

(ग) कृत्यप्रत्ययः ............... भवति । (कर्तरि कर्मणि च, कर्मणि भावे च, कर्तरि भावे च)

(घ) .................. स्वकार्यं सम्यक् कर्तव्यम् । (अस्माभिः, वयम्)

(ङ) अयं पाठः ..................... । (पठनीयः, पठनीयम्)

## अनुप्रयोगः

१. **अधो लिखितानि वाक्यानि पठत**

(क) छात्रैः सदैव गृहकार्यं **करणीयम् ।**

(ख) अस्माभिः भगवद्भक्तिः **कार्या** ।

(ग) युष्माभिः गुरोराज्ञा **पालनीया** ।

(घ) विद्यार्थिभिः पाठाः **पठनीयाः** ।

(ङ) बालकै प्रातः न **शयितव्यम्** ।

(च) सर्वैः परोपकारः **कर्तव्यः** ।

(छ) धनिकेन दरिद्राय धनं **देयम्** ।

(ज) बालकैः पुष्पं न **चेयम्** ।

२. **कृत्यप्रत्ययान्तानि पदानि प्रयुज्य एकमनुच्छेदं विलिख्य कक्षायां श्रावयत ।**

३. **कोष्ठकाद् विशेष्यपदं चित्वा रिक्तस्थानं पूरयत**

| | | | |
|---|---|---|---|
| कर्तव्यानि | ..................... | चेतव्यम् | ..................... |
| चेतव्यौ | ..................... | चेतव्येन | ..................... |
| चेतव्या | ..................... | चेतव्यः | ..................... |
| जेयम् | ..................... | पठनीयाः | ..................... |

| मनः, धर्मौ, धर्मेण, पाठाः, कार्याणि, धर्मः, सृतिः, पुष्पम् |
|---|

**दशमः पाठः**

# अथ पूर्वकृदन्तम्

(ण्वुल्-तृजादिडान्तप्रत्ययानां निरूपणम्)

**पाठपरिचयः**

- पाठेऽस्मिन् ण्वुल्, तृच्, ल्यु, णिनि, अच्, क, अण्-ट-खश्-खच्-मनिन्,क्वनिप्,,वनिप्, विच्, क्विप्, ड चेति प्रत्ययाः निरूपिताः सन्ति ।
- णिनिप्रत्ययद्वयं "नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः" इति सूत्रेण सामान्यतः कर्तर्यर्थे विहितः, "सुप्यजातौ णिनिस्ताच्छील्ये" इति सूत्रेण ताच्छील्यार्थविशिष्टे कर्तर्यर्थे विहितश्च । ताच्छील्यं स्वभावो धर्मः ।
- एतत्पाठस्थाः सर्वेऽपि प्रत्ययाः "कर्तरि कृत्" इति सूत्रेण कर्तर्यर्थे भवन्ति ।
- "कर्मण्यण्" इत्यादिभिः सूत्रैः कर्मादिषूपपदेषु धातुभ्योऽणादिप्रत्ययानां विधानात् तत्र शब्देषु सर्वत्र "उपपदमतिङ्" इति सूत्रेण समासो बोध्यः ।
- ण्वुल्-तृच्-ल्यु-णिनि-अच्-अण्-कप्रत्यया विशेषतो पाठ्यक्रमे निश्चिताः, अतोऽत्र प्रत्ययेषु विशेषेण ध्यानं देयम् ।

ण्वुल्-तृच्-प्रत्ययविधायकं विधिसूत्रम्

**ण्वुल्तृचौ ३ । १ । १३३**

**धातोरेतौ स्तः । कर्तरि कृदिति कर्त्रर्थे ।**

(धातोः, ण्वुल्तृचौ, प्रत्ययः, परश्च, कर्तरि)

***सरलार्थः-*** *धातोः ण्वुल्तृचौ प्रत्ययौ कर्त्रर्थे भवतः । एतौ प्रत्ययौ "कर्तरि कृत्" इति कर्त्रर्थे भवतः ।*

*ण्वुल्प्रत्ययस्य णलावितौ । तृचश्चकार इत् ।*

अन-अक-आदेशविधायकं विधिसूत्रम् -

**युवोरनाकौ ७ । १ । १**

**यु वु एतयोरनाकौ स्तः । कारकः । कर्ता**

(अङ्गस्य, युवोः,अनाकौ)

*सरलार्थः- 'यु' इत्यस्य स्थाने 'अन' इति,'वु' इत्यस्य 'अक' इत्यादेशौ भवतः ।*

*करोतीति विग्रहे कृधातोः "ण्वुल्तृचौ" इति सूत्रेण कर्त्रर्थे ण्वुल्प्रत्ययेऽनुबन्धलोपे 'कृ+वु' इति जाते, प्रकृतसूत्रेण वोरकादेशे 'कृ अक' इत्यवस्थायां स्थानिवद्भावेन णित्वाद् "अचो ञ्णिति" इति ऋकारस्य वृद्धौ रपरत्वे 'कारक' इति जाते "कृत्तद्धितसमासाश्च" इति सूत्रेण प्रातिपदिकसंज्ञायां, तस्मात् सौ, रुत्वे, विसर्गे 'कारकः' इति सिद्ध्यति । करोतीति विग्रहे कृधातोः कर्त्रर्थे तृच्प्रत्ययेऽनुबन्धलोपे 'कृ+तृ' इत्यवस्थायामार्धधातुकत्वात् "सार्वधातुकार्धधातुकयोः" इति गुणे रपरत्वे 'कर्तृ' इति जाते, प्रातिपदिकसंज्ञायां, तस्मात् सौ 'कर्ता' इति सिद्ध्यति । एवं - भावकः, भविता । जायकः, जेता । श्रावकः, श्रोता ।*

ल्यु-णिनि-अच्-प्रत्ययविधायकं विधिसूत्रम्-

**नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः ३ । १ । १३४ ।**

**नन्द्यादेर्ल्यु, ग्रह्यादेर्णिनि, पचादेरच् स्यात् । नन्दयतीति नन्दनः । जनमर्दयतीति जनार्दनः । लवणः । ग्राही । स्थायी । मन्त्री । पचादिराकृतिगणः ।**

(नन्दिग्रहिपचादिभ्यः, धातोः, ल्युणिन्यचः, प्रत्ययः, परश्च, कर्तरि, कृत्)

*सरलार्थः- नन्दि-आदिधातुभ्यः ल्युः, ग्रह-आदिधातुभ्यः णिनि, पच-आदिधातुभ्यः अच् च प्रत्ययाः भवन्ति । 'ल्यु' इत्यस्य लित्वाद् 'यु' इति शिष्यते, 'णिनि' इत्यस्य इणोरित्वाद् 'इन्' इति शिष्यते, अचस्तु चित्वाद् 'अ' इति शिष्यते । एते प्रत्ययाः कर्तरि कृदिति कर्त्रर्थे भवन्ति ।*

*नन्दयतीति विग्रहे, ण्यन्तान् नन्दिधातोः प्रकृतसूत्रेण कर्तरि ल्युप्रत्यये, लकारस्य "लशक्वतद्धिते" इतीत्संज्ञायां लोपे 'नन्दि यु' इति जाते, "युवोरनाकौ" इति योरनादेशे 'नन्दि अन' इति जाते, "णेरनिटि" इति णिलोपे 'नन्दन' इति जाते, तस्य कृदन्तत्वात् प्रातिपदिकत्वे, तस्मात् सौ 'नन्दनः' इति सिद्ध्यति । 'जनमर्दयतीति विग्रहे 'जन+ङस्' इत्युपपदाद् अर्दिधातोः कर्तरि ल्यौ, योरनादेशे, णिलोपे 'जन ङस् अर्दन' इत्यवस्थायां समासे, समासत्वात् प्रातिपदिकत्वेन सुपो लुकि 'जन अर्दन' इति जाते, सवर्णदीर्घे, स्वादिकार्ये 'जनार्दनः' इति । एवं लुनातीति विग्रहे लूधातोर्ल्यौ, योरनादेशे, नन्द्यादिगणपाठे णत्वनिपातनान् णत्वे, स्वादिकार्ये 'लवणः' इति ।*

*गृह्णातीति विग्रहे ग्रह्धातोः प्रकृतसूत्रेण णिनिप्रत्ययेऽनुबन्धलोपे 'ग्रह् इन्' इति जाते, णित्वाद् "अत उपधायाः" इत्युपधावृद्धौ 'ग्राहिन्' इति जाते, तस्मात् सौ 'ग्राही' इति । तिष्ठतीति विग्रहे स्थाधातोर्णिनिप्रत्यये 'स्था इन्' इत्यवस्थायाम् "आतो युक् चिण्कृतोः" इति युगागमे 'स्थायिन्' इत्यस्मात् सौ 'स्थायी' इति । एवं मन्त्रयतीति विग्रहे ण्यन्तान् मन्त्रिधातोर्णिनिप्रत्यये, णिलोपे, पूर्ववत् 'मन्त्री' इति सिद्ध्यति ।*

*पचतीति विग्रहे पच्-धातोः प्रकृतसूत्रेण अच्प्रत्ययेऽनुबन्धलोपे 'पच' इति जाते, स्वादिकार्ये 'पचः' इति ।*

कप्रत्ययविधायकं विधिसूत्रम् -

**इगुपधज्ञाप्रीकिरः कः ३ । १ । १३५**

**एभ्यः कः स्यात् । बुधः । कृशः । ज्ञः । प्रियः । किरः**

(इगुपधज्ञाप्रीकिरः, धातोः, कः, कर्तरि)

***सरलार्थः-*** *इगुपधेभ्यो धातुभ्यो ज्ञा-प्री-कृधातुभ्यश्च कप्रत्ययो भवति । कित् ।*

*'बुध्यते' इत्यर्थे बुध्-धातोः प्रकृतसूत्रेण कप्रत्ययेऽनुबन्धलोपे 'बुध् अ' इति जाते, कित्वाद् गुणनिषेधे, स्वादिकार्ये 'बुधः' इति सिद्ध्यति । एवमेव 'कृश्यति' इत्यर्थे कृश्-धातोः के - कृशः । एवं 'जानाति' इत्यर्थे ज्ञाधातोः के 'ज्ञा अ' इत्यवस्थायाम् "आतो लोप इटि च" इति आलोपे 'ज्ञ' इत्यस्मात् सौ 'ज्ञः' इति । 'प्रीणाति' इत्यर्थे प्रीधातोः के, गुणनिषेधे, 'प्री अ' इत्यवस्थायाम् इयङादेशे, स्वादिकार्ये 'प्रियः' इति सिद्ध्यति । किरतीत्यर्थे कृधातोः कप्रत्यये 'कृ अ' इत्यवस्थायाम् "ऋृत इद्धातोः" इति ऋृकारस्य इत्वे रपरत्वे 'किर' इति जाते, तस्मात् सौ 'किरः' इति सिद्ध्यति ।*

कप्रत्ययविधायकं विधिसूत्रम्-

**आतश्चोपसर्गे ३ । १ । १३६**

**प्रज्ञः । सुग्लः ।**

(उपसर्गे, आतः, च, धातोः, कः, कर्तरि)

***सरलार्थः-*** *उपसर्गपूर्वाद् आकारान्ताद्धातोः कप्रत्ययो भवति ।*

*प्रकर्षेण जानातीत्यर्थे प्रपूर्वकाद् ज्ञाधातोः प्रकृतसूत्रेण कप्रत्ययेऽनुबन्धलोपे 'प्रज्ञा अ' इत्यवस्थायाम् "आतो लोप इटि च" इत्याकारलोपे 'प्रज्ञ' इत्यस्मात् सौ, तस्य रुत्वे विसर्गे च कृते 'प्रज्ञः' इति रूपं सिद्धम् । एवं प्रकारेण 'सुष्ठु ग्लायति' इत्यर्थे सुपूर्वकाद् ग्ला(ग्लै)धातोः के, पूर्ववत्प्रक्रियायां 'सुग्लः' इति ।*

कप्रत्ययविधायकं विधिसूत्रम् -

**गेहे कः ३ । १ । १४४**

**गेहे कर्तरि ग्रहेः कः स्यात् । गृहम् ।**

(गेहे, कः, कर्तरि)

***सरलार्थः-*** *गृहे कर्तरि सति ग्रहधातोः कप्रत्ययो भवति ।*

*‘गृह्णाति धान्यादिकम्’ इति विग्रहे ग्रह्-धातोः प्रकृतसूत्रेण कप्रत्यये, कित्वाद् “ग्रहिज्या०” इति सम्प्रसारणे ‘गृह’ इति जाते, स्वादिकार्ये ‘गृहम्’ इति रूपं सिद्ध्यति ।*

अण्प्रत्ययविधायकं विधिसूत्रम्-

**कर्मण्यण् ३ । २ । १**

**कर्मण्युपपदे धातोरण् प्रत्ययः स्यात् । कुम्भं करोतीति कुम्भकारः ।**

(कर्मणि, धातोः, अण्, कर्तरि)

***सरलार्थः-*** *कर्मणि उपपदे सति धातोः अण्प्रत्ययो भवति । “गतिकारकोपपदानां कृद्भिः सह समासवचनं प्राक्सुबुत्पत्तेः” इति सुबुत्पत्तेः प्रागेव समासो भवति । ‘कुम्भं करोती’ति विग्रहे कर्मबोधकात् ‘कुम्भ+ङस्’ इति सुबन्तोपपदात् कृधातोः प्रकृतसूत्रेण अण्-प्रत्ययेऽनुबन्धलोपे ‘कुम्भ ङस् कृ अ’ इति जाते, णित्वात् ‘कृ’ इत्यस्य ऋकारस्य “अचो ञ्णिति” इति वृद्धौ रपरत्वे ‘कुम्भ ङस् कार’ इत्यवस्थायां “गतिकारक०” इति परिभाषया “उपपदमतिङ्” इति सुबुत्पत्तेः प्रागेव समासे, समासत्वात् प्रातिपदिकसंज्ञायां सुब्लुकि ‘कुम्भकार’ इति जाते, स्वादिकार्ये ‘कुम्भकारः’ इति सिद्ध्यति ।*

कप्रत्ययविधायकं विधिसूत्रम्-

**आतोऽनुपसर्गे कः ३ । २ । ३**

**आदन्ताद्धातोरनुपसर्गात्कर्मण्युपपदे कः स्यात् । अणोऽपवादः । “आतो लोप इटि च” । गोदः । धनदः । कम्बलदः । अनुपसर्गे किम् ? गोसन्दायः ।**

(अनुपसर्गे, आतः, धातोः, कः, कर्तरि)

***सरलार्थः-*** *अनुपसर्गाद् आकारान्ताद्धातोः कर्मण्युपपदे सति कप्रत्ययो भवति । गां ददातीत्यर्थे कर्मबोधकाद् ‘गो+ङस्’ इत्युपपदाद् दाधातोः “कर्मण्यण्” इति प्राप्तम् अणं बाधित्वा प्रकृतसूत्रेण कप्रत्यये, आकारलोपे ‘गो ङस् द’ इत्यवस्थायाम् उपपदसमासे, सुब्लुकि, स्वादिकार्ये ‘गोदः’ इति सिद्ध्यति । एवमेव धनं ददातीति धनदः । कम्बलं ददातीति कम्बलद इत्यादयः ।*

***उपसर्गे*** *तु - गां सन्ददातीति विग्रहे ‘गो+ङस्’ इत्युपपदात् समुपसर्गपूर्वकाद् दाधातोः “कर्मण्यण्” इति अणि, “आतो युक् चिण्कृतोः” इति युगागमे, समासादिकार्ये ‘गोसन्दायः’ इति ।*

***(वा.) मूलविभुजादिभ्यः कः । मूलानि विभुजति मूलविभुजो रथः । आकृतिगणोऽयम् । महीध्रः । कुध्रः ।***

***सरलार्थः-*** *मूलविभुजादिशब्दानां सिद्धये कप्रत्ययस्य उपसङ्ख्यानं कर्तव्यम् ।*

*मूलानि विभूजति इत्यर्थे मूलानि इति कर्मणि उपपदे भुज्धातोः कप्रत्यये उपपदसमासे मूलविभुज इत्यस्य प्रातिपदिकसंज्ञायां स्वादिकार्ये मूलविभुजशब्दः सिद्ध्यति । एवमेव महिं धरतीति विग्रहे महिम् इत्युपपदपूर्वकाद् धृधातोः कप्रत्ययेऽनुबन्धलोपे, यणि, उपपदसमासे, प्रातिपदिकसंज्ञायाम्, स्वादिकार्ये च महिध्रः इति सिद्ध्यति । एवमेव कुं धरतीति कुध्रः इति बोध्यम् ।*

टप्रत्ययविधायकं विधिसूत्रम्

**चरेष्टः** ३ । २ । १६

**अधिकरणे उपपदे । कुरुचरः**

(चरेः, धातोः, टः कर्तरि)

***सरलार्थः-*** *अधिकरणे उपपदे चर्धातोः कर्तर्यर्थे टप्रत्ययः स्यात् ।*

*कुरुषु चरतीति विग्रहे कुरुषु इति अधिकरणे उपपदे चर्धातोः अनेन सूत्रेण कर्तर्यर्थे टप्रत्ययेऽनुबन्धलोपे वर्णसम्मेलने उपपदसमासे, प्रातिपदिकसंज्ञायां स्वादिकार्ये च कुरुचरः इति रूपं सिद्ध्यति ।*

टप्रत्ययविधायकं विधिसूत्रम्-

**भिक्षासेनादायेषु च** ३ । २ । १७

**भिक्षाचरः । सेनाचरः । आदायेति ल्यबन्तम् आदायचरः ।**

(भिक्षासेनादायेषु, चरेः, टः, कर्तरि)

***सरलार्थः-*** *भिक्षा, सेना, आदाय इति शब्देषु उपपदेष्वपि चर्धातोः कर्तर्यर्थे टप्रत्ययो भवति ।*

*भिक्षां चरतीति विग्रहे भिक्षामित्युपपदपूर्वकाद् चर्धातोः अनेन सूत्रेण टप्रत्ययेऽनुबन्धलोपे वर्णसम्मेलने, उपपदसमासे, प्रातिपदिकसंज्ञायाम्, स्वादिकार्ये च भिक्षाचरः इति रूपं सिद्ध्यति ।*

*एवमेव सेनां चरतीति सेनाचरः । आदाय चरतीति विग्रहे आदायचरः । आदाय इति आङ् इत्युपसर्गपूर्वकाद् दाधातोः क्त्वाप्रत्यये तस्य ल्यपि आदेशे च रूपम् ।*

टप्रत्ययविधायकं विधिसूत्रम्

**कृञो हेतुताच्छील्यानुलोम्येषु** ३ ।२ । २०

**एषु द्योत्येषु करोतेष्टः स्यात् ।**

(कृञः, टः, हेतुताच्छील्यानुलोम्येषु)

***सरलार्थः***- *कृधातोः कर्तर्यर्थे टप्रत्ययो भवति हेतु-ताच्छील्य-आनुलोम्येषु अर्थेषु गम्यमानेषु । हेतु = कारण, प्रयोजनं वा । ताच्छील्यमिति स्वभावः । आनुलोम्यं नाम अनुकूलता ।*

सकारादेशविधायकं विधिसूत्रम्-

**अतः कृकमिकंसकुम्भपात्रकुशाकर्णीष्वनव्ययस्य ८ । ३ ४६**

**आदुत्तरस्यानव्ययस्य विसर्गस्य समासे नित्यं सादेशः करोत्यादिषु परेषु । यशस्करी विद्या । श्राद्धकरः । वचनकरः ।**

(अनव्ययस्य, अतः, विसर्जनीयस्य, नित्यम्, सः, कृकमिकंसकुम्भपात्रकुशाकर्णीषु, समासे, अनुत्तरपदस्थस्य)

***सरलार्थः***- *अकारात् परस्य अव्ययभिन्नस्य अनुत्तरपदस्थस्य विसर्गस्य स्थाने कृ-कमि-कंस-कुम्भ-पात्र-कुशा-कर्णी एतेषु शब्देषु परेषु नित्यं सकारादेशो भवति ।*

***यशः करोति तच्छीलः*** *इति विग्रहे करोते* ***कृञो हेतुताच्छील्यानुलोम्येषु*** *इति सूत्रेण टप्रत्ययेऽनुबन्धलोपे, सार्वधातु....इत्यादिना सूत्रेण गुणे, उपपदसमासे, यशस्+ कर इति जाते सस्य रुत्वे विसर्गे च यशः कर इत्यवस्थायाम्* ***अत कृकमि*** *इत्यादिना सूत्रेण विसर्गस्य स्थाने सकारादेशे यशस्कर इत्यस्य प्रातिपदिकसंज्ञायां स्त्रीत्वविवक्षायां* ***टिड्ढाणञ्द्वय***.......*इत्यादिना सूत्रेण ङीपि, अनुबन्धलोपे अकारस्य* ***यस्येति च*** *इति लोपे वर्णसम्मेलने स्वादिकार्ये च यशस्करी इति रूपं सिद्ध्यति । एवमेव श्राद्धं करोति तच्छीलः इत्यर्थे श्राद्धकरः । वचनं करोति तच्छीलः इत्यर्थे वचनकरः इति च रूपे सिद्ध्यतः ।*

खश्प्रत्ययविधायकं विधिसूत्रम् -

**एजेः खश् ३ । २ । २८**

**ण्यन्तादेजेः खश् स्यात् ।**

(कर्मणि, एजेः, धातोः, खश्, प्रत्ययः, परश्च)

***सरलार्थः***- *णिच्प्रत्ययान्ताद् एजृकम्पने इत्यस्माद्धातो परः कर्तर्यर्थे खश्-प्रत्ययो भवति ।*

मुम्-आगमविधायकं विधिसूत्रम् -

**अरुर्द्विषदजन्तस्य मुम् ६ । ३ । ६७**

**अरुषो द्विषतोऽजन्तस्य च मुमागमः स्यात्खिदन्ते परे नत्वव्ययस्य । शित्वाच्छबादिः । जनमेजयतीति जनमेजयः ।**

(अरुर्द्विषदजन्तस्य, मुम्, खिति, अनव्ययस्य)

***सरलार्थः-*** *अरुष्-द्विषतोः शब्दयोः, अजन्तस्य शब्दस्य च स्थाने मुमागमः स्यात् खिदन्ते शब्दे परे सति, नतु अव्ययस्य ।*

***जनम् एजयतीति विग्रहे जनमित्युपपदपूर्वकाद् ण्यन्ताद् एजिधातोः एजेः खश्*** *इति सूत्रेण खश्प्रत्ययेऽनुबन्धलोपे शित्वात् कर्तरि शप् इति सूत्रेण शप्यनुबन्धलोपे, धातोः गुणे अयादेशे ततो उपपदसमासे विभक्तिलोपे जन+ एजयः इति जाते अनेन सूत्रेण मुमागमेऽनुबन्धलोपे वर्णसम्मेलने प्रातिपदिकसंज्ञायां स्वादिकार्ये च जनमेजयः इति रूपं सिद्ध्यति ।*

खच्प्रत्ययविधायकं विधिसूत्रम्-

**प्रियवशे वदः खच् ३ ।२ ।३८**

**प्रियंवदः । वशंवदः ।**

(प्रियवशे, वदः, धातोः, खच्, प्रत्ययः, परश्च)

***सरलार्थः-*** *प्रिय-वश-शब्दयोः उपपदयोः सतोः वद्धातोः कर्तर्यर्थे खच्प्रत्ययो भवति । खकारचकारौ इतौ । अकारः अवशिष्यते ।*

मनिन्-क्वनिप्-वनिप्-विच्-प्रत्ययविधायकं विधिसूत्रम् -

**अन्येभ्योऽपि दृश्यन्ते ३ ।२ ।७५**

**मनिन् क्वनिप् वनिप् विच् एते प्रत्ययाः धातोः स्युः ।**

(अन्यभ्यः, धातोः, अपि, मनिन्क्वनिप्वनिपः, विच्, दृश्यन्ते)

***सरलार्थः-*** *अन्येभ्यः= अनाकारान्तेभ्यः धातुभ्यः अपि मनिन्, क्वनिप्, वनिप्, विच् एते प्रत्ययाः कर्तर्यर्थे दृश्यन्ते ।*

इण्निषेधविधायकं सूत्रम्-

**नेड्वशि कृति ७ । २ । ८**

**वशादेः कृत इण् न स्यात् । शृ हिंसायाम् । सुशर्मा प्रातरित्वा ।**

(न, इट्, वशि, कृति, अङ्गस्य)

***सरलार्थः-*** *वश्-प्रत्याहारादेः, कृतः, इडागमो न भवति ।*

*सूपसर्गपूर्वकात् शृधातोः* ***अन्येभ्योऽपि दृश्यन्ते*** *इति सूत्रेण मनिन्प्रत्ययेऽनुबन्धलोपे सुशृ+वन् इति जाते* ***आर्धधातुकस्येड्वलादेः*** *इति सूत्रेण इडागमे प्राप्ते तस्य* ***नेड्वशि कृति*** *इति सूत्रेण निषेधे* ***सार्वधातुकार्धधातुकायोः*** *इति सूत्रेण गुणे सुशर्मन्शब्दस्य प्रातिपदिकसंज्ञायां स्वादिकार्ये सुशर्मा इति रूपं सिद्ध्यति । प्रातर्गामी इत्यर्थः ।*

आकारादेशविधायकं विधिसूत्रम्-

**विड्वनोरनुनासिकस्यात् ६ । ४ । ४१**

**अनुनासिकस्याऽऽत्स्यात् । विजायत इति विजावा । ओणृ अपनयने । अववा । विच् । रुष रिष हिंसायाम् । रोट् । रेट् । सुगण् ।**

(विट्-वनोः, अनुनासिकस्य, आत्)

***सरलार्थः-*** *विट्-वनिप् अनयोः प्रत्यययोः परतः अनुनासिकस्य स्थाने आकारादेशो भवति ।*

*विजायते इति विग्रहे विपूर्वकाद् जन्धातोः **अन्येभ्योऽपि दृश्यन्ते** इति सूत्रेण वनिप्प्रत्ययेऽनुबन्धलोपे विजन्+वन् इति जाते आर्धधातुकस्येड्वलादेः इति सूत्रेण इडागमे प्राप्ते तस्य नेड्वशि कृति इति सूत्रेण निषेधे विड्वनोरनुनासिकस्यात् इति सूत्रेण नकारस्य आकारादेशे विजावन्-शब्दस्य प्रातिपदिकसंज्ञायां स्वादिकार्ये विजावा इति रूपं सिद्ध्यति ।*

*एवमेव ओणृ अपनयने धातोः वनिप्प्रत्यये अवावा इति रूपं भवति ।*

*रुष रिष हिंसायाम् इत्याभ्यां धातुभ्यां कर्तर्यर्थे अन्येभ्योऽपि दृश्यन्ते इति सूत्रेण विच्-प्रत्यये सर्वापहारिलोपे प्रत्ययलक्षणेन उपधागुणे कृदन्तत्वात् प्रातिपदिकसंज्ञायां स्वादिकार्ये क्रमेण रोट्, रोड्, रेट्, रेड् इति च रूपाणि सिद्ध्यन्ति । एवं सुष्ठु गणयतीति विग्रहे गण सङ्ख्याने धातोः कर्तर्यर्थे विच्प्रत्यये सुगण् इति रूपं बोध्यम् ।*

क्विप्-प्रत्ययविधायकं विधिसूत्रम्-

**क्विप् च ३ । २ । ७६**

**अयमपि दृश्यते । उखास्रत् । पर्णध्वत् । वाहभ्रट् ।**

(धातोः, क्विप्, च)

***सरलार्थः-*** *सर्वेभ्यो धातुभ्यः कर्तर्यर्थे क्विप् प्रत्ययश्च भवति ।*

*उखायाः स्रंसते इति इति विग्रहे स्रंसुधातोः क्विप्प्रत्यये सर्वापहारिलोपे समासे प्रातिपदिकसंज्ञायां सौ सस्य लोपे स्रंसधातोः सस्य **वसुस्रंसुध्वंस्वनडुहां दः** इति सूत्रेण दकारादेशे चर्त्वे च उखास्रत् इति रूपं सिद्ध्यति । एवं पर्णात् ध्वंसते इत्यर्ते पर्णध्वत्, वाहाद् भ्रंसते इत्यर्थे वाहभ्रट् च पूर्ववद् ज्ञेयौ ।*

णिनिप्रत्ययविधायकं विधिसूत्रम्-

**सुप्यजातौ णिनिस्ताच्छील्ये ३ । २ । ७८**

**अजात्यर्थे सुपि धातोर्णिनिस्ताच्छील्ये द्योत्ये । उष्णभोजी ।**

(अजातौ, सुपि, धातोः, णिनिः, ताच्छील्ये)

***सरलार्थः***- *जात्यर्थभिन्ने सुबन्तोपपदे धातोर्णिनिप्रत्ययो भवति, ताच्छील्येऽर्थे द्योत्ये ।*

*'उष्णं भुङ्क्ते तच्छीलः' इत्यर्थे 'उष्ण+ङस्' इत्युपपदाद् भुज्-धातोः प्रकृतसूत्रेण णिनिप्रत्ययेऽनुबन्धलोपे 'उष्ण ङस् भुज् इन्' इति जाते, लघूपधगुणे, समासादिकार्ये 'उष्णभोजिन्' इति जाते, तस्मात् सौ 'उष्णभोजी' इति सिद्ध्यति ।*

णिनिप्रत्ययविधायकं विधिसूत्रम्-

**मनः** ३ । २ । ८२

**सुपि मन्यतेर्णिनिः स्यात् । दर्शनीयमानी ।**

(सुपि, मनः, धातोः, णिनि,कर्तरि)

***सरलार्थः***- *सुबन्तोपपदे सति कर्तर्यर्थे मन्-धातोर्णिनिप्रत्ययो भवति ।*

*'दर्शनीयं मन्यते' इत्यर्थे 'दर्शनीय+ङस्' इति पूर्वान् मन्-धातोः प्रकृतसूत्रेण णिनिप्रत्यये पूर्ववत्प्रक्रियायां 'दर्शनीयमानिन्', तस्मात् सौ 'दर्शनीयमानी' इति सिद्ध्यति ।*

खश्-णिनि-प्रत्ययविधायकं विधिसूत्रम्-

**आत्ममाने खश्च** ३ ।२ ।८३

**स्वकर्मके मनने वर्त्तमानान्मन्यतेः सुपि खश् स्यात् चाण्णिनिः ।**

**पण्डितमात्मानं मन्यते पण्डितम्मन्यः । पण्डितमानी ।**

(आत्ममाने, मनः, धातोः खः, णिनि, च, सुपि)

***सरलार्थः***- *आत्मकर्मके मनने विद्यमानाद् मन्धातोः सुबन्ते उपपदे खश्प्रत्ययो भवति चकाराद् णिनिप्रत्ययश्च भवति ।*

*पण्डितमात्मानं मन्यते इति विग्रहे पण्डित अम् इति सुबन्तोपपदपूर्वकाद् मन्धातो अनेन सूत्रेण खश्प्रत्ययेऽनुबन्धलोपे दिवादित्वात् श्यनि, अनुबन्धलोपे, पररूपे, उपपदसमासे पण्डित+मन्य इत्यवस्थायां अरुद्विष....इत्यादिना मुमि, अनुबन्धलोपे अनुस्वारे परसवर्णे च पण्डितम्मन्य इत्यस्य प्रातिपदिकसंज्ञायां स्वादिकार्ये पण्डितम्मन्यः इति रूपं सिद्ध्यति । णिनिपक्षे मन्धातोः उपधावृद्धौ पण्डितमानी इति रूपं बोध्यम् ।*

ह्रस्वादेशविधायकं विधिसूत्रम्-

**खित्यनव्ययस्य** ६ ।३ ।६६

**खिदन्ते परे पूर्वपदस्य ह्रस्वः । ततो मुम् । कालिम्मन्या ।**

(अनव्ययस्य, खिति, उत्तरपदे, ह्रस्वः)

***सरलार्थः***- *अव्ययभिन्नस्य पूर्वपदस्य खिदन्ते उत्तरपदे परे ह्रस्वादेशो भवति ।*

*आत्मानं कालीं मन्यते इति विग्रहे काली अम् इतिसुबन्तोपपदपूर्वकाद् मन्धातोः* ***आत्ममाने खश्च*** *इति सूत्रेण खशि, अनुबन्धलोपे दिवादित्वात् श्यनि, अनुबन्धलोपे पररूपे, समासे, अनेन सूत्रेण कालीशब्दस्य ह्रस्वादेशे खिदन्ते परे मुमागमे, अनुबन्धलोपे अनुस्वारे परसवर्णे प्रातिपदिकसंज्ञायां स्त्रीत्वविवक्षायां टापि स्वादिकार्ये च कालिम्मन्या इति रूपं सिद्ध्यति ।*

णिनिप्रत्ययविधायकं विधिसूत्रम्-

**करणे यजः ३ । २ । ८५**

**करणे उपपदे भूतार्थे यजेर्णिनिः कर्तरि । सोमेनेष्टवान् सोमयाजी । अग्निष्टोमयाजी ।**

(करणे, भूते, यजः, णिनि, कर्तरि)

***सरलार्थः***- *करणे उपपदे सति भूतार्थे गम्यमाने कर्तर्यर्थे यज्धातोः णिनिप्रत्ययो भवति ।*

*'सोमेन इष्टवान्' इत्यर्थे 'सोम+टा' इति करणबोधकसुबन्तोपपदाद् यज्-धातोरनेन सूत्रेण णिनिप्रत्यये 'सोम टा यज् इन्' इति जाते, णित्वादुपधावृद्धौ, समासादिकार्ये 'सोमयाजिन्' इति प्रातिपदिकात् सौ 'सोमयाजी' इति सिद्ध्यति । एवमेव 'अग्निष्टोमेन इष्टवान्' इत्यर्थे 'अग्निमोष्ट+टा+यज्' इत्यस्मान् णिनिप्रत्यये पूर्ववत् - अग्निष्टोमयाजी ।*

क्वनिप्-प्रत्ययविधायकं विधिसूत्रम्-

**दृशेः क्वनिप् ३। २ । ९४**

**कर्मणि भूते । पारं दृष्टवान् पारदृश्वा ।**

(कर्मणि, भूते, दृशेः,क्वनिप्)

***सरलार्थः***- *कर्मण्युपपदे दृश्धातोः भूते कर्तर्यर्थे क्वनिप्प्रत्ययो भवति । क्वनिप् इत्यत्र ककारेकारपकाराः इतः ।*

*पारं दृष्टवान् इति विग्रहे पारमिति कर्मणि उपपदे दृश्धातोः भूते कर्तर्यर्थे अनेन सूत्रेण क्वनिप्प्रत्ययेऽनुबन्धलोपे क्वनिपः कित्वाद् गुणाभावे पारदृश्वन्शब्दस्य प्रातिपदिकसंज्ञायां स्वादिकार्ये पारदृश्वा इति रूपम् सिद्ध्यति ।*

क्वनिप्प्रत्ययविधायकं विधिसूत्रम्-

**राजनि युधि कृञः ३ ।२ ।९५**

**क्वनिप् स्यात् । युधिरन्तर्भावितण्यर्थः । राजानं योधितवान् राजयुध्वा । राजकृत्वा ।**

(राजनि, कर्मणि, भूते, युधि-कृञः, धातोः, क्वनिप्)

***सरलार्थः-*** *राजनि इत्युपपदे अन्तर्भावितण्यर्थाद् युध्धातोः, कृधातोश्च क्वनिप्प्रत्ययो भवति । कर्तरि कृदिति कर्तर्यर्थे ।*

*राजानं योधितवान् इति विग्रहे अन्तर्भावितण्यर्थाद् युध् धातोः अनेन सूत्रेण क्वनिप्प्रत्ययेऽनुबन्धलोपे उपपदसमासे राजयुध्वन् इत्यस्य प्रातिपदिकसंज्ञायां स्वादिकार्ये राजयुध्वा इति रूपं सिद्ध्यति । एवमेव राजानं कृतवान् इति विग्रहे राजकृत्वा इति बोध्यम्, ह्रस्वस्य पिति....इत्यादिना अत्र तुग्विशेषः ।*

क्वनिप्प्रत्ययविधायकं विधिसूत्रम्-

**सहे च ३ ।२ ।९६**

**कर्मणीति निवृत्तम् । सह योधितवान् सहयुध्वा । सहकृत्वा ।**

(सहे, च, युधिकृञः, धातोः, भूते, क्वनिप्)

***सरलार्थः-*** *सह इत्युपपदेऽपि युध्धातोः कृधातोश्च भूते कर्तर्यर्थे क्वनिप्प्रत्ययो भवति । सह योधितवान्, सह कृतवान् इति च विग्रहे अनेन सूत्रेण क्वनिप्प्रत्यये सहयुध्वा, सहकृत्वा इति पूर्ववद् बोध्यम् ।*

डप्रत्ययविधायकं विधिसूत्रम्-

**सप्तम्यां जनेर्डः ३ । २ ।९७**

(सप्तम्याम्, जनेः, डः)

***सरलार्थः-*** *सप्तम्यन्ते उपपदे जन्धातोः डप्रत्ययो भवति । कर्तरि कृदिति कर्तर्यर्थे ।*

*सरसि जायते इति विग्रहे सरसि इति सप्तम्यन्ते उपपदे जन्धातोः डप्रत्ययेऽनुबन्धलोपे डित्वसामर्थ्यात् जन्धातोः टेर्लोपे उपपदसमासे, सुपो धातुप्रातिपदिकयोः इति सूत्रेण ङिविभक्तेः लुकि प्राप्ते आह-*

ङेरलुगिविधायकं विधिसूत्रम्-

**तत्पुरुषे कृति बहुलम् ६ । ३ । ९४**

**ङेरलुक् । सरसिजम्, सरोजम् ।**

(तत्पुरुषे, कृति, उत्तरपदे, सप्तम्याः, बहुलम्, अलुग्)

***सरलार्थः-*** *तत्पुरुषे समासे कृदन्ते उत्तरपदे परे सप्तम्याः बहुलमलुग् भवति ।*

*अनेन ङेरलुकि सरसिज इत्यस्य प्रातिपदिकसंज्ञायां स्वादिकार्ये सरसिजमिति रूपं सिद्ध्यति ।*

डप्रत्ययविधायकं विधिसूत्रम्-

**उपसर्गे च संज्ञायाम्** ३ ।२ ।९९

**प्रजा स्यात्संततौ जने ।**

(उपसर्गे, च, जनेः, डः, संज्ञायाम् )

***सरलार्थः-*** *उपसर्गे च उपपदे जन्धातोः डप्रत्ययो भवति संज्ञायां गम्यमानायाम् । प्र इत्युपसर्गपूर्वकाद् जन्धातो संज्ञायां गम्यमानायाम् अनेन सूत्रेण डप्रत्ययेऽनुबन्धलोपे डित्वादभस्यापि टेर्लोपे वर्णसम्मेलने स्त्रीत्वविवक्षायाम् अजाद्यतस्टाप् इति टापि स्वादिकार्ये प्रजा इति सिद्ध्यति । प्रजा इति समुदायोपाधिः संज्ञा ।*

## प्रयोगसिद्धिप्रकारः

### कर्ता

करोतीति विग्रहे कृधातोः कर्त्रर्थे "ण्वुल्तृचौ" इति सूत्रेण तृच्प्रत्ययेऽनुबन्धलोपे 'कृ+तृ' इति जाते, 'तृ' इत्यस्य आर्धधातुकसंज्ञायां "सार्वधातुकार्धधातुकयोः" इति 'कृ' इत्यस्य ऋकारस्य गुणे रपरत्वे 'कर्तृ' इति जाते, कृदन्तत्वाद् "कृत्तद्धितसमासाश्च" इति सूत्रेण 'कर्तृ' इत्यस्य प्रातिपदिकसंज्ञायां, तस्मात् सौ 'कर्तृ स्' इति जाते "ऋदुशनस्पुरुदंशोऽनेहसाञ्च" इति सूत्रेण ऋकारस्य अनङादेशेऽनुबन्धलोपे 'कर्तन् स्' इति जाते "अप्-तृन्-तृच्०" इत्यादिना सूत्रेण उपधादीर्घे 'कर्तान् स्' इति जाते, अपृक्तसंज्ञकस्य 'स्' इत्यस्य "हल्ङ्याब्भ्यो दीर्घात्०" इत्यादिना सूत्रेण लोपे 'कर्तान्' इति जाते "नलोपः प्रातिपदिकान्तस्य" इति सूत्रेण नकारस्य लोपे 'कर्ता' इति रूपं सिद्धम् ।

### कुम्भकारः

'कुम्भं करोती'ति विग्रहे कर्मबोधकात् 'कुम्भ+ङस्' इति सुबन्तोपपदात् कृधातोः "कर्मण्यण्" इति सूत्रेण अण्-प्रत्ययेऽनुबन्धलोपे 'कुम्भ ङस् कृ अ' इति जाते, णित्वात् 'कृ' इत्यस्य ऋकारस्य "अचो ञ्णिति" इति सूत्रेण वृद्धौ रपरत्वे 'कुम्भ ङस् कार' इत्यवस्थायां "गतिकारकोपपदानां कृद्भिः सह समासवचनं प्राक्सुबुत्पत्तेः" इति परिभाषया "उपपदमतिङ्" इति सुबुत्पत्तेः प्रागेव समासे, समासत्वात् प्रातिपदिकसंज्ञायां "सुपो धातुप्रातिपदिकयोः" इति सूत्रेण सुब्लुकि 'कुम्भकार' इति जाते, स्वादिकार्ये 'कुम्भकारः' इति सिद्ध्यति ।

### प्रज्ञः

प्रकर्षेण जानातीत्यर्थे प्रोपसर्गपूर्वकाद् ज्ञाधातोः "आतश्चोपसर्गे" इति सूत्रेण कप्रत्ययेऽनुबन्धलोपे 'प्रज्ञा अ' इत्यवस्थायाम् "आतो लोप इटि च" इत्याकारलोपे 'प्रज्ञ' इति जाते, तस्य प्रातिपदिकत्वेन सौ, सकारस्य रुत्वे विसर्गे च कृते 'प्रज्ञः' इति रूपं सिद्धम् ।

## अभ्यासार्थाः प्रश्नाः

१. **सूत्राणि पठित्वा तेषामर्थं लिखत**

(क) युवोरनाकौ

(ख) आतोऽनुपसर्गे कः

(ग) कर्मण्यण्

(घ) इगुपधज्ञाप्रीकिरः कः

(ङ) कृञो हेतुताच्छील्यानुलोम्येषु

(च) सुप्यजातौ णिनि ताच्छील्ये

२. **प्रश्नानामुत्तराणि देयानि**

(क) "**गेहे कः**" इति सूत्रेण कः प्रयोगः साध्यते ?

(ख) "अतः कृकमि...." इत्यादिसूत्रं पूरत्विा उदाहरणं लिखत ।

(ग) "कर्मण्यण्" इति सूत्रस्य त्रीणि उदाहरणानि लिखत ।

(घ) क्विप्प्रत्ययविधायकं सूत्रं तदर्थञ्च लिखत ।

(ङ) डप्रत्यय-विधायकं सूत्रं विलिख्य सोदाहरणमर्थं लिखत ?

(च) अजात्यर्थे सुपि कस्मिन्नर्थे धातोर्णिनिप्रत्ययो भवति ?

(छ) सुबन्तोपपदे मन्धातोर्णिनिविधायकं सूत्रं किम् ?

(ज) "नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः" इति सूत्रस्यार्थं सोदाहरणं प्रकाशयत ।

(झ) 'यु' इति प्रत्ययस्य क आदेशो भवति ?

(ञ) "आत्ममाने" खश्च इति सूत्रस्य सोदाहरणमर्थं प्रतिपादयत ।

३. **अधोलिखितानि पदानि प्रयुज्य वाक्यानि रचयत**

कारकः, जनार्दनः, ज्ञः, गृहम्, सेविता, कुम्भकारः, महीध्रः, भिक्षाचरः, जनमेजयः, वशंवदः, सुशर्मा, उष्णभोजी, योद्धा, धनदः, सुखदायी, पण्डितम्मन्यः, राजकृत्वाः, सरसिजम्, प्रजा ।

**४. प्रकृतिप्रत्ययौ पृथक् कुरुत**

गन्ता, गायकः, बोधकः, भर्ता, रक्षकः, नन्दनः, स्थायी, कम्बलदः, योद्धा, श्रोता, मन्त्री, हर्ता, जेता, दाता, अध्यापकः, सेवकः, ग्राहकः, कारकः, भावकः, शासकः, रोचकः, चरः, लवणः ।

**५. प्रत्ययान् संयुज्य निष्पन्नरूपाणि लिखत**

प्र+ईर्+ण्वुल्, भू+तृच्, श्रु+तृच्, गो+दा+क, शीत+भुज्+णिनि, सु+ग्लै+क, गै+ण्वुल्, शस्त्र+कृ+अण्, पाल्+ण्वुल्, ग्रह्+णिनि, बुध्+क, ब्रू+तृच् ।

**६. अधस्तनप्रयोगाणां सिद्धिप्रक्रियां दर्शयत**

कारकः, जनार्दनः, लवणः, प्रियः, गृहम्, गोदः, उष्णभोजी, दर्शनीयमानी ।

**७. समुचितपदं चित्वा रिक्तस्थानं पूरयत**

(क) वोः ........................आदेशो भवति । (अन, अक)

(ख) ण्वुल्तृचौ प्रत्ययौ .................. अर्थे भवतः । (कर्तरि, कर्मणि)

(ग) कृञो हेतुताच्छील्यानुलोम्येषु इति सूत्रेण ..................प्रत्ययो विधीयते । (णिनि, ट)

(घ) .................. अजन्तस्य शब्दस्य मुमागमो भवति । (खिति परे, किति परे)

(ङ) ..................जन्धातोः डप्रत्ययो भवति । (पञ्चम्यन्ते उपपदे, सप्तम्यन्ते उपपदेः)

**८. समीचीनेषु कथनेषु (√) चिह्नमसमीचीनेषु च (×) चिह्नं दर्शयत**

(क) ण्वुल्तृच्प्रत्ययान्तानां शब्दानां त्रिषु लिङ्गेषु रूपाणि चलन्ति ।

(ख) इगुपधज्ञाप्रीकिरः धातुभ्यः टप्रत्ययो भवति ।

(ग) आदाय इति यत्प्रत्ययान्तमस्ति ।

(घ) “कर्मण्यण्’ इति सूत्रेण विधीयमानः अण्प्रत्ययः: कर्तरि अर्थे भवति ।

(ङ) नन्द्यादेर्धातोः अच्प्रत्ययो भवति ।

(च) उपसर्गपूर्वकादादन्ताद्धातोः कप्रत्ययो भवति ।

(छ) प्रियवशे वदः खश् भवति ।

**९. कारकशब्दस्य कर्तृशब्दस्य च त्रिषु लिङ्गेषु सर्वासु विभक्तिषु रूपाणि लिखत ।**

**१०. उष्णभोजिन्–शब्दस्य त्रिषु लिङ्गेषु सर्वासु विभक्तिषु रूपाणि लिखत ।**

११. **अधोलिखितान् प्रयोगान् ससूत्रं साधयत**

कर्ता, मन्त्री, बुधः, यशस्करी विद्या, जनमेजयः, प्रियंवदः, उष्णभोजी, पण्डितम्मन्यः, सोमयाजी, सहकृत्वा, सरसिजम्, प्रजा ।

**अनुप्रयोगः**

१. **अधो लिखितानि वाक्यानि पठत**

(क) कृष्णः जगतः **कर्ता** वर्तते ।

(ख) अग्रजः मम अध्ययने **प्रेरको** वर्तते ।

(ग) **प्रज्ञः** गुरुः अध्यापयति ।

(घ) सम्प्रति **भिक्षाचरः** दुर्लभो भवति ।

(ङ) **कुम्भकारो** घटं करोति ।

(च) **वशंवदेन** जनेन स्वच्छतया कार्यं न क्रियते ।

(छ) **उष्णभोजिनं** छात्रमनुगच्छ ।

२. **तृच्प्रत्ययान्तानि पदानि प्रयुज्य एकमनुच्छेदं विलिख्य शिक्षकं दर्शयत ।**

३. **कोष्ठकाद् विशेष्यपदं चित्वा रिक्तस्थानं पूरयत**

अत्र पाठे पठितान् पञ्च प्रत्ययान् प्रयुज्य वाक्यानि निर्माय शिक्षकं दर्शयत ।.

# पूर्वकृदन्ते क्तक्तवत्वादिप्रत्ययाः

## पाठपरिचयो ध्यातव्याः विषयाश्च

- पाठेस्मिन् कृत्संज्ञकेषु क्त, क्तवतु, कानच्, क्वसु, शतृ, शानच्, तृन्, षाकन्, उ, क्विप्, ष्ट्रन्, इत्र चेति प्रत्ययाः निरूपिताः सन्ति ।
- तत्र क्तप्रत्ययो सकर्मकेभ्यो धातुभ्यः कर्मणि, अकर्मकेभ्यो धातुभ्यः भावे चार्थे भवति, क्तवतुप्रत्ययस्तु "कर्तरि कृत्"इति सूत्रेण कर्तर्यर्थे भवति ।
- लिटः स्थाने जायमाने कानच् इत्यादेशे, शानच्प्रत्यये च आन इत्येवावशिष्यते । आन इत्यस्य "तङानावात्मने पदम्" इति सूत्रेण आत्मनेपदसंज्ञा भवति । अतः कानच्शानच्प्रत्ययौ आत्मनेपदिभ्यो धातुभ्य एव भवत इति बोध्यम् ।
- क्तक्तवतुप्रत्यययोः "क्तक्तवतू निष्ठा" इति सूत्रेण निष्ठासंज्ञा, शतृशानच्प्रत्यययोः "तौ सत्" इति सूत्रेण सत्संज्ञा च भवतीति बोध्यम् ।
- क्त-क्तवतु-शतृ-शानच्-उ-प्रत्ययाः विशेषतः पाठ्यक्रमे निर्धारिताः, अतो विद्यार्थिभिः अत्र विशेषेण ध्यानं देयम् ।

निष्ठासंज्ञाविधायकं संज्ञासूत्रम्-

**क्तक्तवतू निष्ठा १ । १ । २६**

**एतौ निष्ठासंज्ञौ स्तः ।**

(क्तक्तवतू, निष्ठा)

***सरलार्थः-*** *क्त-क्तवतुप्रत्ययौ निष्ठासंज्ञौ भवतः ।*

निष्ठासंज्ञकप्रत्ययविधायकं विधिसूत्रम् -

**निष्ठा ३ । २ । १०२**

**भूतार्थवृत्तेर्धातोर्निष्ठा स्यात् । तत्र तयोरेवेति भावकर्मणोः क्तः । कर्तरि कृदिति कर्तरि क्तवतुः । उकावितौ । स्नातं मया । स्तुतस्त्वया विष्णुः । विश्वं कृतवान् विष्णुः ।**

(भूते, धातोः, निष्ठा)

*__सरलार्थः__- भूतेऽर्थे वर्तमानाद्धातोर्निष्ठासंज्ञकौ क्तक्तवतुप्रत्ययौ भवतः ।*

*तत्र "तयोरेवकृत्यक्तखलर्थाः" इति क्तप्रत्ययः अकर्मकाद्धातोः भावे भवति, सकर्मकाद्धातोस्तु कर्मणि भवति । क्तप्रत्ययस्य ककार इत् । क्तवतुप्रत्ययस्तु सर्वेभ्यो धातुभ्यः "कर्तरि कृत्" इति सूत्रेण कर्तर्यर्थे भवति । क्तवतुप्रत्ययस्य उकारककारौ इतौ ।*

*__स्नातं मया__ - 'अस्नायि' इति विग्रहे भूतेऽर्थे वर्तमानादकर्मकात् स्ना-धातोः प्रकृतसूत्रेण भावे क्तप्रत्ययेऽनुबन्धलोपे 'स्ना त' इति जाते, अनिट्त्वान्नेटि, 'स्नात' इति प्रातिपदिकात् सौ 'स्नातम्' इति सिद्ध्यति । भावे प्रत्ययविधानान् नपुंसकत्वम् । भावस्य अद्रव्यत्वरूपत्वेन द्वितीयादीनामप्रतीयमानत्वाद् औत्सर्गिकमेकवचनमेव । अनुक्तकर्तरि तृतीया भवति । यथा - स्नातं त्वया मया अन्यैश्च ।*

*__स्नातवान्__ - 'अस्नासीत्' इति विग्रहे स्नाधातोः प्रकृतसूत्रेण कर्तरि क्तवतुप्रत्ययेऽनुबन्धलोपे 'स्नातवत्' इति जाते, तस्मात् प्रातिपदिकात् सौ, "अत्वसन्तस्यचाधातोः" इत्युपधाया दीर्घे, उगिदचामिति नुमि, 'स्नातवान्त् स्' इत्यवस्थायाम् अपृक्तसंज्ञकस्य सकारस्य "हल्ङ्याभ्यो०" इति लोपे, संयोगान्तस्य तकारस्य "संयोगान्तस्य लोपः" इति लोपे 'स्नातवान्' इति सिद्ध्यति । स स्नातवान्, तौ स्नातवन्तौ, ते स्नातवन्तः । सा स्नातवती, ते स्नातवत्यौ, ताः स्नातवत्यः । तत् स्नातवत्, ते स्नातवती, तानि स्नातवन्ति ।*

*__स्तुतस्त्वया विष्णुः__- 'अस्तावि' इति विग्रहे भूतेऽर्थे वर्तमानात् सकर्मकात् स्तुधातोः कर्मणि क्तप्रत्ययेऽनुबन्धलोपे 'स्तु त' इति जाते, कित्वाद् गुणनिषेधे 'स्तुत' इति प्रातिपदिकात् सौ 'स्तुतः' इति । अस्य कर्मणि 'विष्णुः' इत्यत्र पुंलिङ्गस्य प्रथमैकवचनत्वाद् अत्रापि पुंलिङ्गस्य प्रथमैकवचनमेव । तस्य अनुक्तकर्तरि युष्मच्छब्दे च तृतीया - स्तुतस्त्वया विष्णुः । यदि कर्म 'देवी' इति भवेच्चेत् 'स्तुता देवी' इति । कर्मणि प्रत्ययं विधाय निष्पन्नधातुरूपाणां कर्मणा सहैव सामानाधिकरण्यं भवति । स्तूतौ विष्णू । स्तुताः विष्णवः । स्तुतेन विष्णुना । स्तुते देव्यौ । स्तुताः देव्यः । स्तुतां देवीम् ।*

*__विश्वं कृतवान् विष्णुः__- 'अकार्षीत्' इति विग्रहे भूतेऽर्थे वर्तमानात् कृधातोः कर्तरि क्तवतुप्रत्ययेऽनुबन्धलोपे 'कृ तवत्' इति जाते, कित्वाद् गुणनिषेधे, स्वादिकार्ये 'कृतवान्' इति । 'विश्वं कृतवान् विष्णुः' अत्र कर्तरि प्रत्ययविधानाद् उक्तकर्तरि प्रथमा, अनुक्तकर्मणि च द्वितीया । कृतवान् हरिः, कृतवन्तौ हरिहरौ, कृतवन्तो हरिहरपितामहाः । कृतवती देवी । कृतवत्यै देव्यै । इत्यादि ।*

नकारादेश-दकारादेशविधायकं विधिसूत्रम्-

**रदाभ्यां निष्ठातो नः पूर्वस्य च दः ८ । २ । ४२**

**रदाभ्यां परस्य निष्ठातस्य नः स्यात्, निष्ठापेक्षया पूर्वस्य धातोर्दस्य च । शॄ हिंसायाम् । "ॠत**

**इत्" । रपरः । णत्वम् । शीर्णः । भिन्नः । छिन्नः ।**

(रदाभ्याम्, निष्ठातः, नः, पूर्वस्य, दः च )

***सरलार्थः–*** *रदाभ्यामव्यवहितस्य निष्ठासंज्ञकप्रत्ययस्य अवयवस्य तस्य स्थाने, निष्ठाप्रत्ययाव्यवहितस्य पूर्वस्य धातोर्दस्य स्थाने च नकारादेशो भवति ।*

*शॄधातुर्हिंसायामर्थे वर्तते । (परस्मैपदी, अनिट्, सकर्मकः)*

*'अशारि' इति विग्रहे शॄधातोः कर्मणि "निष्ठा" इति क्तप्रत्यये 'शॄ त' इति जाते "ॠत इद्धातोः" इतीत्वे रपरत्वे, उपधादीर्घे 'शीर् त' इति जाते, प्रकृतसूत्रेण तकारस्य नत्वे, णत्वे, स्वादिकार्ये 'शीर्णः' इति । क्तवतौ तु - शीर्णवान् । एवम् 'अभेदि' इति विग्रहे भिद्-धातोः कर्मणि क्ते, प्रकृतसूत्रेण तकारस्य नत्वे धातो दकारस्य च नत्वे 'भिन्न' इति प्रातिपदिकात् सौ 'भिन्नः' इति । क्तवतौ - भिन्नवान् ।*

*एवमेव 'अच्छेदि' इति विग्रहे छिद्-धातोः छिन्नः, छिन्नवान् इति ।*

नकारादेशविधायकं विधिसूत्रम्-

**संयोगादेरातो धातोर्यण्वतः ८ । २ । ४३**

**निष्ठातस्य नः स्यात् । द्राणः । ग्लानः**

(संयोगादेः, आतः, यण्वतः, धातोः, निष्ठातः, नः)

***सरलार्थः–*** *संयोगादेर्यण्वत आकारान्ताद्धातोः परस्य निष्ठासम्बन्धिनस्तकारस्य स्थाने नकारादेशो भवति ।*

*'अद्रायि' इति विग्रहे द्राधातोः क्तः, प्रकृतसूत्रेण तकारस्य नत्वे, णत्वे, स्वादिकार्ये - द्राणः । तथा च ग्ला(ग्लै)धातोः क्ते, नत्वादिकार्ये - ग्लानः ।*

नकारादेशविधायकं विधिसूत्रम्-

**ल्वादिभ्यः ८ । २ । ४४**

**एकविंशतेर्लूञादिभ्यः प्राग्वत् । लूनः । ज्या धातुः । ग्रहिज्येति सम्प्रसारणम् ।**

(ल्वादिभ्यः, धातोः, निष्ठातः, नः)

***सरलार्थः–*** *लूञादिभ्य एकविंशतेर्धातुभ्यः परस्य निष्ठासंज्ञकप्रत्ययस्य तस्य नादेशो भवति ।*

*लूधातोः क्ते, प्रकृतसूत्रेण तस्य नत्वे, स्वादिकार्ये 'लूनः' इति । ज्याधातोः क्तप्रत्यये, कित्वाद् ग्रहिज्येति सम्प्रसारणे पूर्वरूपे 'जि त' इति जाते, प्रकृतसूत्रेण तस्य नत्वे 'जि न' इत्यवस्थायाम्-*

दीर्घादेशविधायकं विधिसूत्रम्-

**हलः ६ । ४ । २**

**अङ्गावयवाद्धलः परं यत्संप्रसारणं तदन्तस्य दीर्घः । जीनः ।**

(अङ्गस्य, हलः, सम्प्रसारणस्य, दीर्घः)

***सरलार्थः-*** *अङ्गस्य अवयवो यो हल् तदुत्तरं यत्संप्रसारणं तदन्तस्य दीर्घादेशो भवति । अलोन्त्यस्य इति अन्त्यस्य दीर्घः ।*

*इत्यनेन सूत्रेण इकारस्य दीर्घे, स्वादिकार्ये 'जीनः' इति सिद्ध्यति ।*

नकारादेशविधायकं विधिसूत्रम्-

**ओदितश्च ८ । २ । ४५**

**भुजो, भुग्नः । टुओश्वि, उच्छूनः ।**

(ओदितः, धातोः, च, निष्ठातः, नः)

***सरलार्थः-*** *ओदितो धातोः परस्य निष्ठासंज्ञकप्रत्ययावयवस्य तकारस्य नादेशो भवति ।*

*ओकारेतो भुज्-धातोः क्ते, प्रकृतसूत्रेण तस्य नत्वे, "चोः कुः" इति जकारस्य कुत्वेन गकारे, स्वादिकार्ये 'भुग्नः' इति । तथा च उदुपसर्गपूर्वकाद् ओदितः श्विधातोः क्ते, "श्वीदितो निष्ठायाम्" इति इडागमस्य निषेधे, वचिस्वपीति सम्प्रसारणे पूर्वरूपे, 'उद् शु त' इति जाते, "हलः" इति दीर्घे, प्रकृतसूत्रेण तस्य नत्वे 'उद् शू न' इति जाते, दकारस्य श्चुत्वेन जकारे, जकारस्य खरि चेति चर्त्वेन चकारे, शकारस्य छत्वे 'उच्छून' इत्यस्मात् प्रातिपदिकात् सौ 'उच्छूनः' इति सिद्ध्यति ।*

ककारादेशविधायकं विधिसूत्रम्-

**शुषः कः ८ । २ । ५१**

**निष्ठातस्य कः । शुष्कः ।**

(शुषः, धातोः, निष्ठातः, कः)

***सरलार्थः-*** *शुष्-धातोः परस्य निष्ठाऽवयवस्य तस्य ककारादेशो भवति ।*

*शुष्-धातोः क्ते, प्रकृतसूत्रेण तस्य ककारे, स्वादिकार्ये 'शुष्कः' इति ।*

वकारादेशविधायकं विधिसूत्रम्-

**पचो वः ८ । २ । ५२**

**पक्वः । क्षै क्षये ।**

(पचः, धातोः, निष्ठातः, वः)

***सरलार्थः-*** *पच्-धातोः परस्य निष्ठाऽवयवस्य तकारस्य स्थाने वकारादेशो भवति ।*

*पच्-धातोः क्तप्रत्यये, चोः कुरिति चकारस्य कुत्वे, प्रकृतसूत्रेण तस्य वकारे, स्वादिकार्ये 'पक्वः' इति । क्षयेऽर्थे वर्तमानस्य क्षैधातोरशित्प्रत्ययस्य विवक्षायाम् "आदेश उपदेशेऽशिति" इति आत्वे 'क्षा' इत्यस्माद्धातोः क्तप्रत्यये 'क्षा त' इति जाते -*

मकारादेशविधायकं विधिसूत्रम्-

**क्षायो मः ८ । २ । ५३**

**क्षामः ।**

(क्षायः, धातोः, निष्ठातः, मः)

***सरलार्थः-*** *क्षैधातोः परस्य निष्ठासम्बन्धिनस्तकारस्य स्थाने मकारादेशो भवति ।*

*प्रकृतसूत्रेण तकारस्य मत्वे, स्वादिकार्ये 'क्षामः' इति सिद्ध्यति ।*

णिलोपविधायकं विधिसूत्रम्-

**निष्ठायां सेटि ८ । ४ । ५२**

**णेर्लोपः । भावितः । भावितवान् । दृह हिंसायाम् ।**

(सेटि, निष्ठायाम्, णेः, लोपः)

***सरलार्थः-*** *निष्ठासंज्ञके सेट्प्रत्यये परे णेर्लोपो भवति ।*

*ण्यन्ताद् भाविधातोः क्तप्रत्यये, इडागमे 'भावि इत' इत्यवस्थायां प्रकृतसूत्रेण णेर्लोपे 'भावित' इति जाते, स्वादिकार्ये 'भावितः' इति । क्तवतौ तु - भावितवान् ।*

दृढशब्दस्य निपातनविधायकं विधिसूत्रम्-

**दृढः स्थूलबलयोः ७ ।२ ।२० ।**

**स्थूले बलवति च निपात्यते ।**

(स्थूलबलयोः, दृढः, न, इट् निष्ठायाम्)

***सरलार्थः-*** *स्थूले बलवति चार्थे दृढः शब्दः साधु । दृह्धातोः निष्ठायां प्रत्यये परे इडागमो न भवति इत्यर्थः ।*

*दृह हिंसायाम् इत्यस्माद्धातोः स्थूले बलवति च अर्थे क्तप्रत्ययेऽनुबन्धलोपे दृह् +त इति जाते इडागमे प्राप्ते, अनेन सूत्रेण इडागमस्य निषेधे हस्य ढत्वे तकारस्य* ***झषस्तथो****.... इत्यादिना धकारे, ष्टुत्वेन धकारस्य ढकारे* ***ढो ढे लोपः*** *इति पूर्वढकारस्य लोपे दृढ इत्यस्य प्रातिपदिकसंज्ञायां स्वादिकार्ये च दृढः इति रूपं सिद्ध्यति ।*

हि-आदेशविधायकं विधिसूत्रम् -

**दधातेर्हिः ७ । ४ । ४२**

**तादौ किति । हितम् ।**

(दधातेः, धातोः, हि, ति, किति)

***सरलार्थः-*** *तकारादौ कित्प्रत्यये परे 'धा' इति धातोः स्थाने 'हि' इत्यादेशो भवति ।*

*धा-धातोः क्तप्रत्यये 'धा त' इति जाते, प्रकृतसूत्रेण 'धा' इत्यस्य ह्यादेशे 'हित' इत्यस्मात् प्रातिपदिकात् सौ, नपुंसकत्वादमि 'हितम्' इति सिद्ध्यति । क्तवतौ - हितवान् ।*

दध् इत्यादेशविधायकं विधिसूत्रम्-

**दो दद् घोः ४ ।७ ।४६**

**घुसंज्ञकस्य दा इत्यस्य दध् स्यात् तादौ किति । चर्त्वम् । दत्तः ।**

(घोः, दः, दध, ति, किति)

***सरलार्थः-*** *घुसंज्ञकस्य दाधातोः स्थाने दध् इत्यादेशो भवति तकारादौ किति प्रत्यये परे ।*

*दाधातोः भूते कर्मणि च अर्थे* ***निष्ठा*** *इति सूत्रेण क्तप्रत्ययेऽनुबन्धलोपे दा+त इति जाते अनेन सूत्रेण दा इत्यस्य स्थाने दध् इत्यादेशे* ***खरि*** *चेति सूत्रेण चर्त्वे दत्त इत्यस्य प्रातिपदिकसंज्ञायां स्वादिकार्ये दत्तः इति रूपं सिद्ध्यति ।*

कानच्-इत्यादेशविधायकं विधिसूत्रम्-

**लिटः कानज्वा ३ । २ । १०६**

(**धातोः**, **लिटः**, **कानच्**, **वा**)

***सरलार्थः-*** *छन्दसि धातोः विहितस्य लिटः स्थाने विभाषया कानच् इत्यादेशो भवति ।*

क्वसु -इत्यादेशविधायकं विधिसूत्रम्-

**क्वसुश्च ३ ।२ । १०७**

**लिटः कानच् क्वसुश्च वा स्तः । तङानावात्मनेपदम् । चक्राणः ।**

(धातोः, लिटः, कानच्, वा)

***सरलार्थः-*** *छन्दसि धातोः विहितस्य लिटः स्थाने विभाषया क्वसु कानच्च प्रत्ययौ स्तः ।*

*कृधातोः परोक्षानद्यनभूतार्थे लिट्लकारे तस्य स्थाने अनेन सूत्रेण कानच्प्रत्ययेऽनुबन्धलोपे धातोः* ***लिटिधातोरनभ्यासस्य*** *इति सूत्रेण द्वित्वे अभ्याससंज्ञायां अभ्यासस्य गुणे, हलादिशेषे* ***कुहोश्चुः*** *इति चवर्गादेशे चकृ+आन इत्यवस्थायां यणि, णत्वे च चक्राण इत्यस्य प्रातिपदिकसंज्ञायां स्वादिकार्ये च चक्राणः इति रूपं सिद्ध्यति ।*

नकारादेशविधायकं विधिसूत्रम्-

**म्वोश्च ८ । २ । ६५**

**मान्तस्य धातोर्नत्वं म्वो परतः । जगन्वान् ।**

(मः,नः, धातोः, म्वोः, च )

***सरलार्थः-*** *मकारान्तस्य धातोः स्थाने नकारादेशो भवति मकारवकारयोः परतः । अलोन्त्यस्य इति मकारस्य नकारः ।*

*भूतानद्यतनपरोक्षार्थवृत्तेः गम् धातोः लिट्लकारे* ***क्वसुश्च*** *इति सूत्रेण लिटः क्वसुरादेशेऽनुबन्धलोपे चक्राण इतिवद् धातोर्द्वित्वादिकार्ये* ***कुहोश्चुः*** *इति सूत्रेण अभ्यासकवर्गस्य गकारस्य स्थाने चवर्गादेशे जकारे जगम्+वस् इति जाते अनेन सूत्रेण धातोः मकारस्य स्थाने नकारादेशे जगन्वस् इत्यस्य प्रातिपदिकसंज्ञायां स्वादिकार्ये जगन्वान् इति रूपं सिद्ध्यति ।*

शतृ-शानच्-आदेशविधायकं विधिसूत्रम्-

**लटः शतृशानचावप्रथमासमानाधिकरणे ३ । २ । १२४**

**अप्रथमान्तेन समानाधिकरणे लट एतौ वा स्तः । शबादि । पचन्तं चैत्रं पश्य ।**

(धातोः, लटः, शतृशानचौ, कृत्, अप्रथमासमानाधिकरणे)

***सरलार्थः-*** *अप्रथमान्तेन समानाधिकरणे सति धातोर्विहितस्य लटः स्थाने शतृ-शानचौ प्रत्ययौ विभाषया भवतः ।*

*'शतृ' इति परस्मैपदम्, ऋकारशकारौ इतौ । 'शानच्' इति त्वात्मनेपदम्, चकारशकारौ इतौ । परस्मैपदिधातुभ्यः शतृप्रत्ययो भवति । आत्मनेपदिधातुभ्यः शानच्प्रत्ययो भवति । उभयपदिधातुभ्यस्तु उभौ प्रत्ययौ भवतः । सार्वधातुकत्वात् शबादिप्रत्यया भवन्ति ।*

***पचन्तं चैत्रं पश्य*** *– पच्-धातोर्लटि, लस्य स्थानेऽकर्तृगे फले प्रकृतसूत्रेण परस्मैपदसंज्ञके शतृप्रत्ययेऽनुबन्धलोपे 'पच् अत्' इति जाते, शपि, पररूपे 'पचत्' इति जाते, तस्मात् अमि, उगिदचामिति नुमागमे 'पचन्तम्' इति सिद्ध्यति ।*

मुक्-आगमविधायकं विधिसूत्रम्-

**आने मुक् ७ । २ । ८४**

**अदन्ताङ्गस्य मुगागमः स्यादाने परे । पचमानं चैत्रं पश्य । लडित्यनुवर्तमाने पुनर्लड्ग्रहणात्प्रथमासामानाधिकरण्येऽपि क्वचित् । सन् द्विजः ।**

(अतः, अङ्गस्य मुक्, आने)

***सरलार्थः–*** *ह्रस्व-अकारान्तस्याङ्गस्य मुक्-आगमो भवति आने परे ।*

***पचमानं चैत्रं पश्य*** *– पच्-धातोर्लटि, लस्य स्थाने कर्तृगे फले "लटः शतृशानचावप्रथमा०" इत्यादिना सूत्रेण आत्मनेपदसंज्ञके शानच्प्रत्ययेऽनुबन्धलोपे 'पच् आन' इति जाते, शपि 'पच आन' इत्यवस्थायां प्रकृतसूत्रेण मुगागमेऽनुबन्धलोपे 'पचमान' इत्यस्मात् प्रातिपदिकादमि, पूर्वरूपे 'पचमानम्' इति ।*

*"लटः शतृशानचावप्रथमा०" इति सूत्रे लडित्यनुवर्तमाने पुनर्लड्ग्रहणात् प्रथमासामानाधिकरण्येऽपि क्वचित् शतृशानचौ भवत इति वृत्तिकारस्याशयः । यथा – 'सन् द्विजः', अत्र अस्-धातोः प्रथमान्तेन द्विजशब्देन समानाधिकरणेऽपि शतरि, शपि, शब्लुकि, "श्नसोरल्लोपः" इति अकारलोपे 'सत्' इति प्रातिपदिकात् सौ, नुमादिकार्ये 'सन्' इति । क्वचिदित्युक्तेऽपि सम्प्रति प्रथमान्तानां शतृशानचप्रत्ययान्तानां पदानां प्रयोगः पूर्णरूपेण प्रचलन् वर्तते ।*

वसु-आदेशविधायकं विधिसूत्रम्-

**विदेः शतुर्वसुः ७ । १ । ३६**

**वेत्तेः परस्य शतुर्वसुरादेशो वा । विदन् । विद्वान् ।**

(विदेः, शतुः, वसुः, वा)

***सरलार्थः–*** *विद्-धातोः परस्य शतृप्रत्ययस्य स्थाने विकल्पेन 'वसु' इत्यादेशो भवति । वसोरुकार इत् ।*

*विद्-धातोर्लटि, लस्य स्थाने शतरि, प्रकृतसूत्रेण शतुर्वस्वादेशेऽनुबन्धलोपे 'विद्वस्' इति जाते, तस्मात् प्रातिपदिकत्वात् सौ, विभक्तिकार्ये 'विद्वान्' इति । वस्वभावे तु 'विदन्' इति सिद्ध्यति ।*

सत्संज्ञाविधायकं सूत्रम्-

**तौ सत् ३ । ।२ ।१२७**
**तौ शतृशानचौ सत्संज्ञौ स्तः ।**
(धातोः, तौ, सत् )

***सरलार्थः***- *धातोः विहितौ शतृशानच्प्रत्ययौ सत्संज्ञकौ भवतः ।*

विभाषया शतृशानच्प्रत्ययविधायकं विधिसूत्रम्-

**लृटः सद्वा ३ ।३ ।१४**
**व्यवस्थितविभाषेयम् । तेनाप्रथमासामानाधिकरण्ये प्रत्ययोत्तरपदयोः सम्बोधने लक्षणहेत्वोश्च नित्यम् । करिष्यन्तं करिष्यमाणं पश्य ।**

(धातोः, लृटः, सद्, वा)

***सरलार्थः***- *धातोः विहितस्य लृट्लकारस्य स्थाने कर्तर्यर्थे विभाषया शतृशानचौ प्रत्ययौ भवतः । इयं व्यवस्थितविभाषा वर्तते । शब्दव्यवस्थायाः अनुसारेण विभाषया नित्यञ्च लृटः स्थाने शतृशानचौ प्रत्ययौ भवतः इत्याशयः । तेन अप्रथमासामानाधिरण्ये सति, प्रत्ययोत्तरयोः परतः, लक्षणहेत्वोश्च विषये नित्यं लृटः स्थाने शतृशानचौ भवतः ।*

***करिष्यन्तं करिष्यमाणं वा पश्य*** = *कृधातोः लृट्लकारे तस्य स्थाने अनेन सूत्रेण शतृशानचोः आदेशयोः सतोः अनुबन्धलोपे, क्रमेण कृ +अत्/ कृ+आन इति च जाते* ***स्यतासी लृलुटोः*** *इति सूत्रेण धातोः परः स्यप्रत्यये,: धातोर्गुणे स्य इत्यस्य आर्धधातुकसंज्ञायामिडागमे करिष्यत् /करिष्यमाण इत्यनयोः प्रातिपदिकसंज्ञायां द्वितीयाविभक्तेरेकवचने विभक्तिकार्ये च करिष्यन्तं करिष्यमाणं वा पश्य इति रूपे सिद्धयतः ।*

अधिकारसूत्रम्-

**आक्वेस्तच्छीलतद्धर्मतत्साधुकारिषु ३ ।२ ।१३४**
**क्विपमभिव्याप्य वक्ष्यमाणाः प्रत्ययास्तच्छीलादिषु कर्तृषु बोध्याः ।**
(आक्वेः, तच्छीलतद्धर्मतत्साधुकरिषु, धातोः, प्रत्ययः परश्च)

***सरलार्थः***- *क्विप्रत्ययावधिं यावत् धातोः परे विधास्यमानाः प्रत्ययाः तच्छीलतद्धर्मतत्साधुकारिषु अर्थेषु बोध्याः ।*

तृन्प्रत्ययविधायकं विधिसूत्रम्-

**तृन् ३ ।२ ।१३५**
**कर्ता कटान् ।**
(धातोः, तृन्, तच्छीलतद्धर्मतत्साधुकारिषु)

***सरलार्थः-*** *सर्वधातुभ्यः तृन्प्रत्ययो भवति तच्छीलतद्धर्मतत्साधुकारिषु अर्थेषु ।* ***कर्तरि कृदिति*** *कर्तर्यथ एव । नकारः इत्, स्वरार्थः ।*

***कर्ता कटान्*** *- करोति तच्छिलः इत्यादिष्वर्थेषु कृधातो अनेन सूत्रेण तृन् प्रत्ययेऽनुबन्धलोपे धातोः* ***सार्वधातुकार्धधातुकयोः*** *इति गुणे कर्तृ इत्यस्य प्रातिपदिकसंज्ञायां स्वादिकार्ये कर्ता इति रूपं सिद्ध्यति । कटानाम् निर्माणे कुशलः, कटनिर्माणशीलवान्, कटनिर्माणमेव धर्मः यस्य इति वा अर्थः ।* ***न लोकाव्यय..****इत्यादिना सूत्रेण षष्ठीनिषेधः ।*

षाकन्प्रत्ययविधायकं विधिसूत्रम्-

**जल्पभिक्षकुट्टलुण्टवृङः षाकन् ३ ।२ ।१५५**

(जल्पभिक्षकुट्टलुण्टवृङः, षाकन्)

***सरलार्थः-*** *जल्प-भिक्ष-कुट्ट-लुण्ट-वृङधातुभ्यः परः षाकन् प्रत्ययो भवति तच्छीलतद्धर्मतत्साधुकारिषु अर्थेषु कर्तरि । षकारनकारौ इतौ । षकारः* ***षिद्गौरादिभ्यश्च*** *इति ङीषर्थः । तत्र षकारस्य इत्संज्ञाविधायकं सूत्रमाह-*

इत्संज्ञाविधायकं सूत्रम्-

**षः प्रत्ययस्य १ । ३ । ६**

**प्रत्ययस्यादिः ष इत्संज्ञः स्यात् । जल्पाकः । भिक्षाकः । कुट्टाकः । लुण्टाकः । वराकः । वराकी ।**

(उपदेशे, प्रत्ययस्य, आदिः, षः, इत्)

***सरलार्थः-*** *उपदेशे प्रत्ययादौ स्थितः षकारः इत्संज्ञको भवति ।*

*जल्पनं शीलमस्य इति विग्रहे* ***जल्पधातोः जल्पभिक्षकुट्टलुण्टवृङः षाकन् ३ ।२ ।१५५*** *इति सूत्रेण षाकन् प्रत्यये षकारस्य अनेन सूत्रेण इत्संज्ञायाम्, लोपे, वर्णसम्मेलने जल्पाक इत्यस्य प्रातिपदिकसंज्ञायां स्वादिकार्ये च जल्पाकः इति रूपं सिद्ध्यति । एवमेव भिक्षणं शीलमस्य, कुट्टनं शीलमस्य, लुण्टनं शीलमस्य, वरणं शीलमस्य चेति विग्रहे भिक्षाकः, कुट्टाकः, लुण्टाकः, वराकः इति च रूपाणि बोध्यानि । स्त्रियां ङीषि वराकी ।*

उ-प्रत्ययविधायकं विधिसूत्रम्-

**सनाशंसभिक्ष उः ३ । २ । १६८**

**चिकीर्षुः । आशंसुः । भिक्षुः ।**

(सनाशंसभिक्षः, धातोः, तच्छीलतद्धर्मतत्साधुकारिषु, उः)

***सरलार्थः-*** *सन्नन्ताद्धातोः आङ्-पूर्वकात् शंस्धातोः भिक्ष्धातोश्च परः उप्रत्ययो भवति ।*

*'चिकीर्षति तच्छीलः' इत्यर्थे सन्नन्ताच्चिकीर्षधातोः प्रकृतसूत्रेण उप्रत्यये 'चिकीर्ष उ' इत्यवस्थायाम् "अतो लोपः" इति अकारलोपे, स्वादिकार्ये 'चिकीर्षुः' इति । तथा च 'आशंसति तच्छीलः' इत्यर्थे आङुपसर्गपूर्वकात् शंस्धातोः पूर्ववद् उप्रत्यये, स्वादिकार्ये 'आशंसुः' इति । एवमेव 'भिक्षते तच्छीलः' इत्यर्थे भिक्ष्धातोः पूर्ववत् 'भिक्षुः' इति सिद्ध्यति ।*

क्विप्प्रत्ययविधायकं विधिसूत्रम्-

**भ्राजभासधुर्विद्युतोर्जिपॄजुग्रावस्तुवः क्विप् ३। २ ।१७७**

**विभ्राट् । भाः ।**

(भ्राजभासधुर्विद्युतोर्जिपॄजुग्रावस्तुवः, क्विप्, तच्छीलतद्धर्मतत्साधुकारिषु)

***सरलार्थः-*** *भ्राज-भास-धुर्-विद्युत-ऊर्जि-पॄ-जु-ग्राव-स्तुधातुभ्यः परः क्विप् प्रत्ययो भवति तच्छीलतद्धर्मतत्साधुकारिष्वर्थेषु गम्यमानेषु कर्तरि ।*

*विभ्राट् -विभ्राजते तच्छीलः इत्यादिषु अर्थेषु विपूर्वकात् भ्राजधातोः अनेन सूत्रेण तच्छिलादिषु कर्तर्यर्थे क्विप् प्रत्यये सर्वापहारिलोपे कृदन्तत्वात्प्रातिपदिकसंज्ञायां स्वादिकार्ये विभ्राट् इति रूपं सिद्ध्यति । एवं भ्रासधातोः भाः ।*

छकारवकारयोः लोपविधायकं विधिसूत्रम्-

**राल्लोपः ६ ।४ । २१**

**रेफाच्छ्वोर्लोपः क्वौ झलादौ क्ङिति । धूः । विद्युत् । ऊर्क् । पूः । दृशिग्रहणस्यापकर्षाज्जवतेर्दीर्घः । जूः । ग्रावस्तुत् । (क्विब्वचिप्रच्छ्यायतस्तुकटप्रुजुश्रीणां दीर्घोऽसम्प्रसारणं च -वा.) । वक्तीति वाक्**

(अङ्गस्य, रात्, छ्वोः, लोपः, क्विझलोः, क्ङिति)

***सरलार्थः-*** *रेफादुत्तरयोः छकारवकारयोः लोपो भवति क्वौ परतः, झलादौ किति ङिति च परतः ।*

श्-ऊठ् इत्यादेशविधायकं विधिसूत्रम्-

**च्छ्वोः शूडनुनासिके च ६ ।४ । १९**

**सतुक्कस्य छस्य वस्य च क्रमात् श् ऊठ् इत्यादेशौ स्तोऽनुनासिके क्वौ झलादौ च क्ङिति । पृच्छतीति प्राट् । आयतं स्तौतीति आयतस्तूः । कटं प्रवते कटप्रूः । जूरुक्तः। श्रयति हरिं श्रीः ।**

(अङ्गस्य, च्छ्वोः, श्-ऊठ्, क्विझलोः, क्ङिति)

***सरलार्थः-*** *तुका सहितस्य छस्य वस्य च स्थाने क्रमेण श् ऊठ् इत्यादेशौ भवतः क्वौ परतः, झलादौ किति ङिति च परतः ।*

ष्ट्रन्प्रत्ययविधायकं विधिसूत्रम्-

**दाम्नीशसयुयुजस्तुतुदसिसिचमिहपतदशनहः करणे ३ । २ । १८२**

**दाबादेः ष्ट्रन् स्यात्करणेर्थे । दात्यनेन दात्रम् । नेत्रम् ।**

(दाम्नीशसयुयुजस्तुतुदसिसिचमिहपतदशनहः, ष्ट्रन्, करणे)

***सरलार्थः-*** *दाप्-नी-शस-यु-युज-स्तु-तुद-सि-सिच-मिह-पत-दश-नहधातुभ्यः करणेऽर्थे ष्ट्रन् प्रत्ययो भवति ।*

इण्निषेधविधायकं सूत्रम्-

**तितुत्रतथसिसुसरकसेषु च ७ । २ । ९ ।**

**एषां दशानां कृत्प्रत्ययानामिण् न । शस्त्रम् । योत्रम् । योक्त्रम् । स्तोत्रम् । तोत्रम् । सेत्रम् । सेक्त्रम् । मेढ्रम् । पत्रम् । दंष्ट्रा । नद्धी**

(तितुत्रतथसिसुसरकसेषु, च, नेड् )

***सरलार्थः-*** *कृत्संज्ञकानां ति-तु-त्र-त-थ-सि-सु-सर-क-स-प्रत्ययानामिडागमो न भवति ।*

इत्रप्रत्ययविधायकं विधिसूत्रम्-

**अर्तिलूधूसूखनसहचर इत्रः ३ । २ । १८४**

**अरित्रम् । लवित्रम् । धुवित्रम् । सवित्रम् । खनित्रम् । सहित्रम् । चरित्रम्**

(अर्तिलूधूसूखनसहचरः, इत्रः, करणे)

***सरलार्थः-*** *ऋगतौ, लूञ् छेदने, धू विधूनने, षू प्रेरणे, खनु अवदारणे,षह मर्षणे, चर गतिभक्षणयोः इत्येतेभ्यो धातुभ्यः परः करणेऽर्थे इत्रप्रत्ययो भवति ।*

इत्रप्रत्ययविधायकं विधिसूत्रम् -

**पुवः संज्ञायाम् ३ । २ । १८५**

**पवित्रम् ।**

(पुवः, संज्ञायाम्, इत्रः, करणे)

***सरलार्थः-*** *पुवः धातोः करणेऽर्थे इत्रप्रत्ययो भवति समुदायेन संज्ञावगम्यते चेत् ।*

इति पूर्वकृदन्तम् ।

## अथोणादयः

**कृवापाजिमिस्वदिसाध्यशूभ्य उण् ।उ.सू.१।**

**करोतीति कारुः । वातीति वायुः । पायुर्गुदम् । जायुरौषधम् । मायुः पित्तम् । स्वादुः । साध्नोति परकार्यमिति साधुः । आशु शीघ्रम् ।**

***सरलार्थः-*** *कृ-वा-पा-जि-मि-स्वदि-साध्य-शूभ्यो धातुभ्यः परः उण्प्रत्ययः कर्तर्यर्थे भवति ।*

*करोतीति विग्रहे कृधातोः कर्तयर्थे उण्प्रत्ययेऽनुबन्धलोपे कृ+उ इति जाते "अचो ञ्णिति" इति सूत्रेण धातोः वृद्धौ वर्णसम्मेलने कारु इत्यस्य प्रातिपदिकसंज्ञायां स्वादिकार्ये कारुः इति सिद्धयति ।*

*वातीति विग्रहे वा गतिगन्धनयोः इत्यस्माद् धातोः उण्प्रत्यये वायुः इति, पाति रक्षति मलादिनिष्काशनेनेनि विग्रहे पा रक्षणे अस्माद्धातोः उण्प्रत्यये "आतो युक् चिण्कृतोः" इति सूत्रेण युचागमे पायुः इति गुदमित्यर्थः ।*

*जयति रोगान् इति विग्रहे जि अभिभवे इत्यस्माद्धातोः उण्प्रत्यये णित्वाद् वृद्धौ आयादेशे वर्णसम्मेलने जायुः इति औषधमित्यर्थः ।*

*मिनोति प्रक्षिपति देहे उष्माणमिति मायुः डुमिञ् प्रक्षेपणे इति धातोः पूर्ववद् उणि रूपं पित्तमित्यर्थः ।*

*स्वादुः ष्वद आस्वादने । स्वदते इति स्वादुः । स्वद्धातोः उणि उपधावृद्धौ रूपम् ।*

*साध्नोति परकार्यमित्यर्थे साध संसिद्धौ इति धातोः उणि साधुः इति रूपम् ।*

*आशु अश्नुते व्याप्नोति वेत्यर्थे अश्धातोः उणि आशुः इति रूपं शीघ्रमित्यर्थः ।*

विभाषया उणादिप्रत्ययविधायकं सूत्रम्-

**उणादयो बहुलम् ३ । ३ । १ ।**

**एते वर्तमाने संज्ञायाञ्च बहुलं स्युः । केचिदविहिता अप्यूह्याः ।**

**संज्ञासु धातुरूपाणि प्रत्ययाश्च ततः परे ।**

**कार्याद्विद्यादनूबन्धमेतच्छास्त्रमुणादिषु**

(धातोः, उणादयः, बहुलम्, कर्तरि,वर्तमाने, संज्ञायाम्)

***सरलार्थः-*** *धातुभ्यः बाहुलकात् उणादयः प्रत्ययाः भवन्ति वर्तमानेऽर्थे संज्ञायां गम्यमानायाम् ।*

***संज्ञासु धातुरूपाणि ....।***

***सरलार्थः–*** *संज्ञाशब्देषु धातुरूपाणि, धातुभ्यः परः प्रत्ययाः, कार्यं दृष्ट्वा प्रत्ययेषु धातुषु च अनुबन्धाश्च कल्पनीयाः । यत्र एवं कल्प्यन्ते तदनुकूलानि कार्याणि च क्रियन्ते यत्र तद् उणादिशास्त्रं बोध्यम् ।*

## प्रयोगसिद्धिप्रकारः

### कृतवान्

'अकार्षीत्' इति विग्रहे भूतेऽर्थे वर्तमानात् कृधातोः कर्तरि अर्थे "क्तक्तवतू निष्ठा" इति सूत्रसहकारेण "निष्ठा" इति सूत्रेण क्तवतुप्रत्ययेऽनुबन्धलोपे 'कृ तवत्' इति जाते, क्त्वाद् गुणनिषेधे, कृदन्तत्वात् 'कृतवत्' इत्यस्य प्रातिपदिकसंज्ञायां ततः सौ 'कृतवत् स्' इत्यवस्थायाम् "अत्वसन्तस्य चाधातोः" इत्युपधादीर्घे 'कृतवात् स्' इति जाते "उगिदचां सर्वनामस्थानेऽधातोः" इति सूत्रेण नुमागमेऽनुबन्धलोपे 'कृतवान्त्स्' इति जाते, अपृक्तसंज्ञकस्य सकारस्य हल्ङ्यादिलोपे, 'कृतवान्त्' इति जाते, संयोगान्तस्य तकारस्य लोपे 'कृतवान्' इति रूपं सिद्धयति ।

### अभ्यासार्थाः प्रश्नाः

१. **सूत्राणि पठित्वा तेषामर्थं लिखत**

(क) क्तक्तवतू निष्ठा
(ख) रदाभ्यां निष्ठातो नः पूर्वस्य च दः
(ग) दृढः स्थूलबलयोः
(घ) लिटः कानज्वा
(ङ) लृटः सद्वा
(च) आने मुक्

२. **प्रश्नानामुत्तराणि देयानि**

(क) निष्ठासंज्ञकौ प्रत्ययौ कौ ?

(ख) "हलः" इति सूत्रं किं करोति ?

(ग) "सनाशंसभिक्ष उः" इति सूत्रस्य उदाहरणानि लिखत ।

(घ) लटः स्थाने शतृशानजादेशविधायकं सूत्रं तदर्थञ्च लिखत ।

(ङ) कीदृशस्य धातोर्लटः स्थाने शत्रादेशः शानजादेशश्च भवति ?

(च) आक्वेस्तच्छीलतद्धर्मतत्साधुकारिषु अस्य सूत्रस्य अर्थं लिखत ?

(छ) दा इत्यस्य दथ्-इत्यादेशविधायकं सूत्रं किम् ?

(ज) "उणादयो बहुलम्" इति सूत्रस्यार्थं सोदाहरणं प्रकाशयत ।

(झ) पच्धातोर्विहितस्य निष्ठासंज्ञकस्य प्रत्ययस्य तकारस्य स्थाने कः आदेशो भवति ?

(ञ) "रदाभ्यां०" इति सूत्रं पूरयत ।

३. **अधोलिखितानि पदानि प्रयुज्य वाक्यानि रचयत**

कृतः, पठितवान्, कुर्वन्ती, गतवन्तः, सेविताः, पठन्, वर्धमानाः, पश्यन्, युक्तवान्, गच्छन्तम्, भीतवान्, विदुषः, हसन्ती ।

४. **प्रकृतिप्रत्ययौ पृथक् कुरुत**

सन्, वर्धमानः, कुर्वाणः, दत्तः, ज्ञातवान्, दृष्टः, भिन्नः, उक्तवान्, युद्धः, लब्धः, हतः, हितवान्, तृप्तः, गच्छन्, कुर्वन्, बुद्धः, यजमानः, लभमानः, भवन्, जायमानः, वर्तमानः ।

५. **प्रत्ययान् संयुज्य निष्पन्नरूपाणि लिखत**

खाद्+क्तवतु, कम्प्+शानच्, कृ+क्त, भिद्+क्तवतु, जन्+शानच्, भू+क्त, दा+क्तवतु, अद्+शतृ, चर्+शतृ, गम्+क्त, एध्+शानच्, शुष् + क्त, ज्या+क्त, पच्+क्तवतु ।

६. **अधस्तनप्रयोगाणां सिद्धिप्रक्रियां दर्शयत**

स्नातम्, स्तुतः, पठितवान्, शीर्णः, ग्लानः, जीनः, भुग्नः, शुष्कः, पक्वः, क्षामः, भावितवान्, हितम्, पचन्तम्, पचमानः, विद्वान्, भिक्षुः,नेत्रम्, श्रीः, स्तोत्रम्, चरित्रम् ।

७. **समुचितपदं चित्वा रिक्तस्थानं पूरयत**

(क) .................. निष्ठासंज्ञा भवति । (शतृशानचोः, क्तक्तवतुप्रत्यययोः)

(ख) सत्संज्ञकौ प्रत्ययौ .................. अर्थे भवतः । (कर्तरि, कर्मणि)

(ग) क्तप्रत्ययः ................ भवति । (कर्तरि कर्मणि च, कर्मणि भावे च, कर्तरि भावे च)

(घ) .................. वर्तमानाद्धातोर्निष्ठा भवति । (भूतेऽर्थे, भविष्यत्यर्थे)

(ङ) .....................धातोः शानच्प्रत्ययो भवति । (आत्मनेपदिनः, परस्मैपदिनः)

८. **समीचीनेषु कथनेषु (√) चिह्नमसमीचीनेषु च (×) चिह्नं दर्शयत**

(क) क्तक्तवतुप्रत्ययान्तानां शब्दानां त्रिषु लिङ्गेषु रूपाणि चलन्ति ।

(ख) आत्मनेपदिधातुभ्यः शतृप्रत्ययो भवति ।

(ग) उभयपदिधातुभ्यः शतृशानचौ भवतः ।

(घ) क्तक्तवतुप्रत्ययौ कर्तरि अर्थे भवतः ।

(ङ) विद्धातोः परस्य शतुर्वस्वादेशो वा भवति ।

(च) शतृप्रत्ययस्य आत्मनेपदसंज्ञा भवति ।

**९. पठित-शब्दस्य पठितवत्-शब्दस्य च त्रिषु लिङ्गेषु सर्वासु विभक्तिषु रूपाणि लिखत ।**

**१०. पचत्-शब्दस्य पचमान-शब्दस्य च त्रिषु लिङ्गेषु सर्वासु विभक्तिषु रूपाणि लिखत ।**

## अनुप्रयोगः

**१. अधो लिखितानि वाक्यानि पठत**

(क) **पीतं** दुग्धं बलं वर्धयति ।

(ख) मया पाठाः **पठिताः** सन्ति ।

(ग) स गृहकार्यं न **कृतवान्** ।

(घ) **एधमानेन** रोगेण जनाः **पीडिता** भवन्ति ।

(ङ) कन्दुकेन **क्रीडतीः** बालिकाः पश्य ।

**२. क्तप्रत्ययान्तानि पदानि प्रयुज्य एकमनुच्छेदं विलिख्य शिक्षकं दर्शयत ।**

**३. कोष्ठकाद् विशेष्यपदं चित्वा रिक्तस्थानं पूरयत**

| | | | |
|---|---|---|---|
| पठितानि | .................... | गच्छन्ती | .................... |
| श्रूता | .................... | लिखितवत् | .................... |
| शयानः | .................... | पाठ्यतः | .................... |
| जितान् | .................... | प्रदत्तानाम् | .................... |

प्रश्नानाम्, कथा, पुस्तकानि, बालिका, शत्रून्, अध्यापकस्य, बालकः, मित्रम्

**४. अधोलिखितानि सूत्राणि शुद्धं लिखित्वा शिक्षकं प्रदर्श्य श्रावयत-**

रदाभ्यां निष्ठातो नः पूर्वस्य च दः

आक्वेस्तच्छीलतद्धर्मतत्साधुकारिषु

भ्राजभासधुर्विद्युतोर्जिपृजुग्रावस्तुवः क्विप्

च्छ्वोः शूडनुनासिके च

दाम्नीशसयुयुजस्तुतुदसिसिचमिहपतदशनहः करणे

तितुत्रतथसिसुसरकसेषु च ।

# अथोत्तरकृदन्तप्रकरणम्

## पाठपरिचयो ध्यातव्या विषयाश्च

- पाठेऽस्मिन् कृत्प्रत्ययेषु तुमुन्, ण्वुल्, घञ्, क, अच्, अप्, क्त्रि, अथुच्, नङ्, नन्, कि,क्तिन्, क्विप्, अ, युच्, क्त, ल्युट्, घ, खल्, क्त्वा,णमुल् चेति प्रत्ययाः निरूपिताः सन्ति ।
- तत्राव्ययसंज्ञायाः प्रयोजकाः तुमुन्-क्त्वा-णमुल्प्रत्ययाः "अव्ययकृतो भावे" इति नियमाद् भावेऽर्थे भवन्ति ।
- ण्वुल्प्रत्ययो द्वेधा भवतः एकः ण्वुल्तृचौ इति सूत्रेण विधीयमानः, अपरः तुमुन्ण्वुलौ क्रियायां क्रियार्थायाम्" इति सूत्रेण तत्र "ण्वुल्तृचौ" इति सूत्रेण यत्र ण्वुल्प्रत्ययः तत्र कर्मणि षष्ठी भवति यथा- पुस्तकस्य पाठकाः, यज्ञस्य कारकाः इति, "तुमुन्ण्वुलौ...." इत्यादिना यत्र ण्वुल्प्रत्ययः तत्र तु कर्मणि द्वितीयैव भवति "अकेनोः भविष्याधमर्णयोः" इति सूत्रेण इति विशेषोऽत्र ज्ञेयः ।
- पूर्वकृदन्ते प्राधान्येन कर्तर्यर्थे प्रायः कृत्प्रत्ययाः विधीयन्ते अत्रोत्तरकृदन्ते तु तत्तद्विशेषसूत्रैः तत्तत्कारकेषु भावे चार्थे कृत्प्रत्ययानां विधानम्, अयमेव प्रमुखो हेतुः पूर्वोत्तरकृदन्तप्रकरणयोः विभाजने बोध्यः ।
- तुमुन्-घञ्-अच्-अप्-क्तिन्-अ-क्त-ल्युट्-क्त्वा-ल्यप्-णमुल्प्रत्ययाः विशेषेणात्र पाठ्यक्रमे निर्धारिताः, अत एषु प्रत्ययेषु विद्यार्थिभिः सातिशयं ध्यानं देयम् ।

तुमुन्-ण्वुल्-प्रत्ययविधायकं विधिसूत्रम्-

**तुमुन्ण्वुलौ क्रियायां क्रियार्थायाम् ३ । ३ । १० ।**

**क्रियार्थायां क्रियायामुपपदे भविष्यत्यर्थे धातोरेतौ स्तः । मान्तत्वादव्यत्वम् । कृष्णं द्रष्टुं याति । कृष्णं दर्शको याति ।**

(धातोः, तुमुन्ण्वुलौ, क्रियार्थायाम्, क्रियायाम्,)

***सरलार्थः-*** *क्रिया अर्थः प्रयोजनं यस्याः सा क्रियार्था तस्यां क्रियायामुपपदे धातोः भविष्यत्यर्थे तुमुन्ण्वुलौ प्रत्ययौ भवतः ।*

*तुमुन्प्रत्ययस्य 'उन्' इत्यनुबन्धत्वात् 'तुम्' इति शिष्यते । मान्तत्वात् "कृन्मेजन्तः" इत्यव्ययत्वम् । अव्ययत्वाच्च* ***अव्ययकृतो भावे*** *इति भावेर्थे एतौ प्रत्ययौ भवतः।*

***कृष्णं द्रष्टुं याति*** *- अत्र गमनक्रिया दर्शनक्रियाया निमित्ताऽस्ति। 'याति' इति क्रियानिमित्तक्रियोपपदमस्ति। भविष्यत्यर्थे वर्तमानाद् दृश्-धातोः प्रकृतसूत्रेण तुमुन्प्रत्ययेऽनुबन्धलोपे 'दृश् तुम्' इति जाते "सृजिदृशो०" इत्यमि 'दृ अश् तुम्' इति जाते, यणि, व्रश्चभ्रस्जेति शकारस्य षत्वे, तकारस्य ष्टुत्वे 'द्रष्टुम्' इति जाते, मान्तकृत्वात् "कृन्मेजन्तः" इत्यव्ययसंज्ञायां, तस्मात् सौ, सुब्लुकि 'द्रष्टुम्' इति, तस्य कर्मवाचकात् कृष्णशब्दात् "कर्तृकर्मणोः कृति" इति षष्ठ्यां प्राप्तायाम् अव्ययस्य कर्मत्वाद् "नलोक०" इति निषेधे, ततः "कर्मणि द्वितीया" इति द्वितीयाविभक्तौ 'कृष्णं द्रष्टुं याति' इति।*

***कृष्णं दर्शको याति*** *- भविष्यदर्थकाद् दृश्-धातोः प्रकृतसूत्रेणैव ण्वुल्प्रत्ययेऽनुबन्धलोपे, वोरकादेशे, गुणे, स्वादिकार्ये 'दर्शकः' इति। अस्य कर्मवाचकात् कृष्णशब्दात् पूर्ववत् प्राप्ताया षष्ठ्या "अकेनोः०" इति निषेधे, ततः द्वितीयाविभक्तौ 'कृष्णं दर्शको याति' इति सिद्ध्यति। एवमेव - सभायामुपस्थितो भवितुं याति, सभायामुपस्थितो भावको याति। जलं पातुं याति, जलं पायको याति। शत्रुं जेतुं याति, शत्रुं जायको याति। कथां श्रोतुं याति, कथां श्रावको याति। इत्यादि।*

तुमुन्प्रत्ययविधायकं विधिसूत्रम्-

**कालसमयवेलासु तुमुन् ३। ३। १६७**

**कालार्थेषूपपदेषु तुमुन्। कालः समयो वेला वा भोक्तुम्।**

(कालसमयवेलासु, धातोः, तुमुन् )

***सरलार्थः-*** *कालार्थेषु शब्देषूपपदेषु धातोः भावेऽर्थे तुमुन्प्रत्ययो भवति।*

***कालो भोक्तुम्*** *- कालार्थोपपदाद् भुज्-धातोः प्रकृतसूत्रेण तुमुन्प्रत्ययेऽनुबन्धलोपे 'भुज् तुम्' इति जाते, उकारस्य गुणे, जकारस्य कुत्वे, चर्त्वे 'भोक्तुम्' इति जाते, तस्याव्ययत्वाद्विहितस्य सुपो लुकि 'भोक्तुम्' इति सिद्ध्यति। एवमेव - समयो भोक्तुम्, वेला भोक्तुम् इत्यपि। अत्र काल, समय, वेला, एतेभ्यः शब्देभ्यः प्रातिपदिकार्थमात्रे प्रथमा।*

घञ्प्रत्ययविधायकं विधिसूत्रम्-

**भावे ३। ३। १८**

**सिद्धावस्थापन्ने धात्वर्थे वाच्ये धातोर्घञ्। पाकः**

(भावे, धातोः, घञ्, प्रत्ययः, परश्च)

***सरलार्थः-*** *सिद्धावस्थापन्ने अर्थे वाच्ये धातोः घञ् प्रत्ययो भवति। घञ्प्रत्ययस्य घकारञकारौ इतौ। धातूनां द्वौ अर्थौ भवतः, साध्यः सिद्धश्च। तत्र क्रियान्तराकाङ्क्षा यया क्रियया भवति*

*सा सिद्धावस्थापन्ना क्रिया, यथा गमनम्, भक्षणम् इत्यादि । यत्र च क्रियान्तराकाङ्क्षा न भवति सा साध्यावस्थापन्ना क्रिया यथा- भवति, गच्छति, खादति इत्यादि । तिङन्तक्रियाया धात्वर्थः साध्यो भवति । कृदन्तक्रियाया धात्वर्थस्तु सिद्धावस्थापन्नः । उक्तमस्ति - "**कृदभिहितो भावो द्रव्यवत् प्रकाशते ।**" अतः भावेऽर्थे निष्पन्नशब्देभ्यः सर्वाणि लिङ्गवचनानि भवन्ति । घञ्प्रत्ययान्ताः शब्दाः पुंलिङ्गे प्रयुज्यन्ते । (लिङ्गानुशासनसूत्रम् "**घञबन्तः**")*

*पचनमित्यर्थे पच्-धातोः प्रकृतसूत्रेण घञ्प्रत्ययेऽनुबन्धलोपे 'पच् अ' इति जाते, उपधावृद्धौ, "चजोः कु घिण्ण्यतोः" इति कुत्वे 'पाक' इति जाते, घञन्तत्वात् पुंलिङ्गे सौ, रुत्वे विसर्गे 'पाकः' इति सिद्ध्यति । एवमेव - भावः । पायः । एधः । हारः । इत्यादि ।*

घञ्प्रत्ययविधायकं विधिसूत्रम्-

**अकर्तरि च कारके संज्ञायाम् ३ । ३ । १९**

**कर्तृभिन्ने कारके घञ् स्यात् ।**

(अकर्तरि, च, कारके, धातोः, घञ्, संज्ञायाम्, प्रत्ययः, परश्च)

***सरलार्थः-*** *कर्तृभिन्ने कारके संज्ञायां विषये धातोर्घञ्प्रत्ययो भवति । आहारः ।*

*'आहरन्ति रसमस्मादिति विग्रहे आङुपसर्गपूर्वकाद् हृधातोः प्रकृतसूत्रेण घञ्प्रत्यये 'आहृ अ' इति जाते, वृद्धौ रपरत्वे, स्वादिकार्ये 'आहारः' इति । सूत्रे चकारग्रहणादसंज्ञायामपि घञ्प्रत्ययो भवति । यथा - दायः, लाभः ।*

नकारलोपविधायकं विधिसूत्रम्-

**घञि च भावकरणयोः ६ । ४ । २७**

**रञ्जेर्नलोपः स्यात् । रागः । अनयोः किम् ? रज्यत्यस्मिन्निति रङ्गः ।**

(भावकरणयोः, घञि, च, रञ्जेः, उपधायाः, नलोपः )

***सरलार्थः-*** *भावेऽर्थे करणेऽर्थे च विहिते घञि परे रञ्ज्-धातोः उपधायाः नस्य लोपो भवति ।*

*'रञ्जनम्, रज्यतेऽनेन वा' इति विग्रहे, भावेऽर्थे "भावे" इति सूत्रेण घञि, करणेऽर्थे तु "अकर्तरि च कारके संज्ञायाम्" इति घञि 'रञ्ज् अ' इत्यवस्थायां प्रकृतसूत्रेण 'रञ्ज्' इत्यस्य नकारस्य लोपे 'रज् अ' इति जाते, उपधावृद्धौ, कुत्वे, स्वादिकार्ये 'रागः' इति । भावकर्मभिन्नेऽर्थे घञि तु अनेन सूत्रेण रञ्जेर्नलोपो नैव भवति । यथा 'रज्यत्यस्मिन्नि'ति विग्रहे रञ्ज्-धातोः अधिकरणेऽर्थे घञि, जकारस्य कुत्वे, नकारस्यानुस्वारे परसवर्णे स्वादिकार्ये 'रङ्गः' इति । अत्र भावकर्मणोर्विहितस्य घञ्प्रत्ययस्य परत्वाभावान् नकारलोपस्याप्यभावः ।*

घञ्प्रत्यय-ककारादेश-विधायकं विधिसूत्रम्-

**निवासचितिशरीरोपसमाधानेष्वादेश्च कः ३ । ३ । ४१**

**एषु चिनोतेर्घञ् आदेश्च ककारः । उपसमाधानं राशीकरणम् । निकायः । कायः । गोमयनिकायः ।**

(निवासचितिशरीरोपसमाधानेषु, चेः, धातोः, घञ्, आदेः, च, कः)

***सरलार्थः-*** *निवास-चिति-शरीर-उपसमाधानेषु अर्थेषु चिधातोघञ्प्रत्ययो भवति, धातोरादेश्च (चकारस्य स्थाने) ककारो भवति ।*

***निवासेऽर्थे*** *- निकायः । 'निचीयते धान्यादिकमस्मिन्' इति विग्रहे न्युपसर्गपूर्वकाच्चिधातोः प्रकृतसूत्रेण अधिकरणेऽर्थे घञि, चकारस्य ककारे च कृते 'निकि अ' इति जाते, वृद्धौ, आयादेशे, स्वादिकार्ये 'निकायः' इति ।*

***चित्यर्थे*** *- आकायम् । 'आचीयन्तेऽस्मिनिष्टकाः' इति विग्रहे चित्यर्थे बोधिते सति आङ् पूर्वकाच्चिधातोरधिकरणेऽर्थे घञि, पूर्ववद् 'आकायम्' इति सिद्ध्यति ।*

***शरीरेऽर्थे*** *- कायः । 'चीयते अस्थ्यादिकमस्मिन्' इति विग्रहे शरीरेऽर्थे बोधिते सति चिधातोः प्रकृतसूत्रेण घञ्प्रत्यये कत्वे च कृते, पूर्ववत् 'कायः' इति सिद्ध्यति ।*

***उपसमाधानेऽर्थे*** *- गोमयनिकायः । राशीकरणेऽर्थे बोधिते सति निपूर्वकाच्चिधातोघृञि कत्वे च, पूर्ववन् 'निकायः' इति, 'गोमयस्य निकायः' इत्यस्य षष्ठीतत्पुरुषसमासे 'गोमयनिकायः' इति सिद्ध्यति ।*

अच्-प्रत्ययविधायकं विधिसूत्रम्-

**एरच् ३ । ३ । ५६**

**इवर्णान्तादच् । चयः । जयः ।**

(एः, धातोः, अच्, भावे, अकर्तरि च कारके संज्ञायाम्)

***सरलार्थः-*** *इवर्णान्ताद्धातोर्भावेऽर्थे कर्तृभिन्ने कारकेऽर्थे च अच्प्रत्ययो भवति ।*

*'चयनम्' इत्यर्थे चिधातोः "भावे" इति प्राप्तं घञं बाधित्वा प्रकृतसूत्रेण अच्प्रत्ययेऽनुबन्धलोपे 'चि अ' इत्यवस्थायां गुणेऽवादेशे, विभक्तिकार्ये 'चयः' इति । एवमेव जयनमित्यर्थे जिधातोः- जयः ।*

अप्-प्रत्ययविधायकं विधिसूत्रम्-

**ऋृदोरप् ३ । ३ । ५७**

**ऋृवर्णान्तादुवर्णान्तच्चाप् । करः । गरः । यवः । लवः । स्तवः । पवः**

(ॠदोः, धातोः, अप्, भावे, अकर्तरि च कारके संज्ञायाम्)

***सरलार्थः***– *दीर्घ-ॠकारान्ताद् उकारान्ताच्च धातोर्भावेऽर्थे कर्तृभिन्ने कारके चार्थे अप्प्रत्ययो भवति । अपः पकार इत् ।*

*'किरति अनेन' इत्यर्थे कॄधातोः प्रकृतसूत्रेण अप्यनुबन्धलोपे 'कॄ अ' इति जाते, गुणे रपरत्वे, विभक्तिकार्ये 'करः' इति सिद्ध्यति । एवमेव 'गीर्यते (शिवेन)' इत्यर्थे गॄधातोः पूर्ववद् गरः । 'यूयते अम्भसा' इत्यर्थे युधातोर्यवः । लवनमित्यर्थे लूधातोर्लवः । 'स्तवनम्, स्तूयते अनेन वा' इत्यर्थे स्तुधातोः स्तवः । पवनमित्यर्थे पूधातोः पवश्च ।*

*(घञर्थे कविधानम्) प्रस्थः । विघ्नः ।*

***सरलार्थः*** *घञ्प्रत्ययस्य विषये कप्रत्ययस्यापि उपसङ्ख्यानं कर्तव्यम् । धातोः भावे, अकर्तरि कारके संज्ञायाञ्चार्थे कप्रत्ययोऽपि भवति ।*

*प्रोपसर्गपूर्वकात् स्थाधातोः* ***प्रतिष्ठन्ते धान्यान्यस्मिन्*** *इति विग्रहे अनेन वार्तिकेन अधिकरणेऽर्थे कप्रत्ययेऽनुबन्धलोपे धातोः आकारस्य* ***आतो लोप इटि च*** *इति सूत्रेण आकारस्य लोपे वर्णसम्मेलने प्रातिपदिकसंज्ञायां स्वादिकार्ये प्रस्थः इति रूपम् ।*

***विहन्यन्तेऽस्मिन्निति*** *विग्रहे विपूर्वकाद् हन्धातोः अधिकरणेऽर्थे कप्रत्ययेऽनुबन्धलोपे विहन्+अ इति जाते* ***गमहनजनखनघसां लोप क्ङित्यनङि*** *इति सूत्रेण उपधालोपे हकारस्य* ***हो हन्तेर्ञ्णिन्नेषु*** *इति सूत्रेण हनः हकारस्य कुत्वेन घकारे विघ्न इत्यस्य प्रातिपदिकसंज्ञायां स्वादिकार्ये विघ्नः इति रूपं सिद्ध्यति ।*

क्त्रिप्रत्ययविधायकं विधिसूत्रम्-

**ड्वितः क्त्रिः ३ । ३ । ८८**

(ड्वितः, धातोः,भावे, क्त्रि, प्रत्ययः परश्च)

***सरलार्थः***– *डु इत्यस्य इत्संज्ञा भवति यस्मिन् धातौ तस्माद्धातोः परः भावेऽर्थे क्त्रिप्रत्ययो भवति ।*

मप्प्रत्ययविधायकं विधिसूत्रम्-

**क्त्रेर्मप्नित्यम्** ४ । ४ । २०

**क्त्रिप्रत्ययान्तान्मप् निर्वृत्तेऽर्थे । पाकेन निर्वृत्तं पक्त्रिमम् । डुवप् उप्त्रिमम् ।**

(क्त्रेः, मप्, नित्यम्, निर्वृत्ते)

***सरलार्थः***– *क्त्रिप्रत्ययान्ताद् धातोः निर्वृत्तेऽर्थे मप्प्रत्ययो भवति । निर्वृत्तं नाम सिद्धम् ।*

***पाकेन निर्वृत्त**मित्यर्थे डुपचष् पाके इत्यस्माद् धातोः "ड्वितः क्त्रि" इति सूत्रेण क्त्रिप्रत्ययेऽनुबन्धलोपे पच्+त्रि इति जाते "**चजोः कुघिण्यतोः**" इति सूत्रेण चस्य कुत्वेन ककारे पक्त्रि इत्यस्य कृदन्तत्वात्प्रातिपदिकसंज्ञायां स्वादिकार्येण च सिद्धात् तृतीयान्ताद् पक्त्रिशब्दाद् निवृत्तेऽर्थे "क्त्रेर्मप्नित्यम्" इति सूत्रेण मप्प्रत्ययेऽबन्धलोपे तद्धितान्तत्वात् प्रातिपदिकसंज्ञायां टाविभक्तर्लुकि स्वादिकार्ये पक्त्रिमम् इति रूपं सिद्धयति ।*

*एवमेव डुवप् बीजसन्ताने धातोः क्त्रिप्रत्यये "**वचिस्वपियजादीनां किति**" इति सूत्रेण धातोः सम्प्रसारणे तृतीयान्ताद् उप्त्रिशब्दाद् निर्वृत्तार्थे अनेन सूत्रेण मप् प्रत्यये प्रातिपदिकसंज्ञायां स्वादिकार्ये उप्त्रिमम् इति रूपञ्च सिद्धयति ।*

*एवं क्रयेण निर्वृत्तमित्यर्थे डुक्रीञ्द्रव्यविनिमये इत्यमाद् धातोः क्रीत्रिममिति ज्ञेयम् ।*

अथुच्प्रत्ययविधायकं विधिसूत्रम्-

**ट्वितोऽथुच् ३ । ३ । ८९**

**टुवेपृ कम्पने, वेपथुः ।**

(ट्वितः, धातोः, भावे, अथुच्, प्रत्ययः, परश्च)

***सरलार्थः- ** टु इत्संज्ञको वर्तते यत्र तादृशाद् धातोः भावेऽर्थे अथुच्प्रत्ययो भवति ।*

***वेपथुः** = वेपनम् इत्यर्थे अनेन सूत्रेण टुवेपृकम्पने इत्यस्माद् धातोः भावेऽर्थे अथुच्प्रत्ययेऽनुबन्धलोपे वर्णसम्मलने वेपथु इत्यस्य प्रातिपदिकसंज्ञायां स्वादिकार्ये वेपथुः इति रूपं सिद्धयति ।*

नङ्प्रत्ययविधायकं विधिसूत्रम्-

**यजयाचयतविच्छप्रच्छरक्षो नङ् ३ । ३ । ९०**

**यज्ञः । याच्ञा । यत्नः । विश्नः । प्रश्नः । रक्ष्णः ।**

(यजयाचयतविच्छप्रच्छरक्षः, धातोः, भावे, अकर्तरि कारके च संज्ञायाम्, नङ्, प्रत्ययः, परश्च)

***सरलार्थः- ** यज-याच-यत-विच्छ-प्रच्छ-रक्षधातुभ्यः परः भावे, संज्ञायां गम्यमानायामकर्तरि कारके चार्थयोः नङ् प्रत्ययो भवति । ङकार इत् ।*

***यज्ञः** = यजनं यज्ञः यज देवपूजासङ्गतिकरणदानेषु इत्यस्माद् धातोः भावेऽर्थे अनेन सूत्रेण नङ्प्रत्ययेऽनुबन्धलोपे यज्+न इत्यवस्थायां नकारस्य "स्तोः श्चुना श्चुः" इति सूत्रेण श्चुत्वेन ञकारे जञोर्ज्ञे यज्ञ इत्यस्य प्रातिपदिकसंज्ञायां स्वादिकार्ये यज्ञः इति रूपं सिद्धयति । एवमेव याचनम्, यतनम्, वेशनम्, प्रच्छनम्, रक्षणञ्चार्थे क्रमेण याच्ञा, यत्नः, विश्नः,प्रश्नः, रक्ष्णः इति रूपाणि ज्ञेयानि ।*

ननप्रत्ययविधायकं विधिसूत्रम्-

**स्वपो नन् ३ । ३ । ९१**

**स्वप्नः ।**

(स्वपः, धातोः, भावे, अकर्तरि च कारके संज्ञायाम्, नन्, प्रत्ययः, परश्च)

***सरलार्थः-*** *स्वप्धातोः भावे, संज्ञायां गम्यमानायामकर्तृभिन्ने कारके चाऽर्थयो नन् प्रत्ययो भवति ।*

***स्वप्नः-*** *स्वपनमित्यर्थे "ञिष्वप शये" इत्यस्माद् धातोः भावेऽर्थे अनेन सूत्रेण नन्प्रत्ययेऽनबन्धलोपे धात्वादेः षस्य "धात्वादेः षः सः" इति सूत्रेण सत्वे च स्वप्न इत्यस्य प्रातिपदिकसंज्ञायां स्वादिकार्ये च स्वप्नः इति रूपं सिद्धयति ।*

किप्रत्ययविधायकं विधिसूत्रम्-

**उपसर्गे घोः किः ३ । ३ ।९२**

**प्रधिः । उपधिः ।**

(उपसर्गे, घोः, धातोः, भावे, अकर्तरि च कारके सञ्ज्ञायाम्, किः, प्रत्ययः, परश्च)

***सरलार्थ :-*** *उपसर्गे उपपदे घुसंज्ञकाद् धातोः भावे, संज्ञायां गम्यमानायां कर्तृभिन्ने कारके च अर्थयोः किप्रत्ययो भवति ।*

***प्रधिः-*** *प्रोपसर्गपूर्वकाद् डुधाञ् धारणपोषणयोः इत्यस्माद् धातोः प्रधियन्ते काष्ठान्यस्मिन्निति विग्रहे अधिकरणेऽर्थेऽनेन सूत्रेण किप्रत्ययेऽनुबन्धलोपे प्रधा+इ इति जाते "आतो लोप इटि च" इति सूत्रेण आकारस्य लोपे वर्णसम्मेलने प्रधि इत्यस्य प्रातिपदिकसंज्ञायां स्वादिकार्ये प्रधिः इति रूपं सिद्धयति । रथस्य नेमिः इत्यर्थः ।*

***एवमेव उपधियते=*** *आरोप्यते अनेन इत्यर्थे उपपूर्वकाद् धाधातोःकिप्रत्यये उपधिशब्दो ज्ञेयः । छलः इत्यर्थः ।*

क्तिन्प्रत्ययविधायकं विधिसूत्रम्-

**स्त्रियां क्तिन् ३ । ३ । ९४**

**स्त्रीलिङ्गे भावे क्तिन् । घञोऽपवादः । कृतिः । स्तुतिः ।**

*क्तिन्प्रत्ययस्य ककारनकारयोरित्संज्ञायां लोपे 'ति' इति शिष्यते । अयं घञ्प्रत्ययस्यापवादो वर्तते ।*

*करणमित्यर्थे कृधातोः प्राप्तं घञं बाधित्वा प्रकृतसूत्रेण स्त्रीलिङ्गे भावेऽर्थे क्तिन्प्रत्ययेऽनुबन्धलोपे 'कृ ति' इति जाते, कित्वाद् गुणनिषेधे, विभक्तिकार्ये 'कृतिः' इति सिद्ध्यति । एवमेव - स्तवनमित्यर्थे स्तुधातोः पूर्ववत् स्तुतिः ।*

***वा.(ॠल्वादिभ्यः क्तिन्निष्ठावद्वाच्यः) तेन नत्वम् । कीर्णिः । लूनिः । धूनिः । पूनिः ।***

***सरलार्थ :-*** *दीर्घ-ॠकारान्ताद्धातोर्ल्वादिभ्यो धातुभ्यश्च परः क्तिन्प्रत्ययो निष्ठावद् भवति । निष्ठावद्त्वात् तकारस्य स्थाने नकारो भवति ।*

*करणमित्यर्थे कृधातोः "स्त्रियां क्तिन्" इति क्तिन्प्रत्ययेऽनुबन्धलोपे 'कॄ ति' इत्यवस्थायाम् "ॠत इद्धातोः" इतीत्वे रपरत्वे, "हलि चे"त्युपधादीर्घे 'कीर् ति' इति जाते, अनेन वार्तिकेन क्तिनो निष्ठावद्भावे, "रदाभ्यां०" इति सूत्रेण तकारस्य नत्वे, नकारस्य णत्वे, विभक्तिकार्ये 'कीर्णः' इति ।*

एवं प्रकारेण लवनमित्यर्थे लूनिः, पवनमित्यर्थे पूनिः, धवनमित्यर्थे धूनिश्च सिद्ध्यन्ति ।

**वा. (संपदादिभ्यः क्विप् ) । संपत् । विपत् । आपत् ।**

(**क्तिन्नपीष्यते**) **सम्पत्तिः । विपत्तिः । आपत्तिः ।**

*सम्पदादिगणपठितेभ्यो धातुभ्यः भावे, संज्ञायां गम्यमानायां कर्तृभिन्ने कारके चार्थे क्विप्प्रत्ययः क्तिन् प्रत्ययश्च भवतः ।*

*सपूर्वकात् पद-गतौ इत्यस्माद् धातोः अनेन वार्तिकेन क्विप्प्रत्यये सर्वापहारिलोपे सम्पत्शब्दस्य प्रातिपदिकसंज्ञायां स्वादिकार्ये च सम्पत् इति रूपं बोध्यम् । एवमेव विपत् । आपत् । क्तिन्प्रत्यये दकारस्य चर्त्वे, स्वादिकार्ये - सम्पत्तिः । विपत्तिः, आपत्तिः ।*

ऊतियुति- आदिशब्दानां निपातकं विधिसूत्रम्-

**ऊतियूतिजूतिसातिहेतिकीर्तयश्च ३ । ३ ।९७ ।**

**एते निपात्यन्ते**

(ऊतियूतिजूतिसातिहेतिकीर्तयः, च, भावे, अकर्तरि च कारके संज्ञायाम्)

***सरलार्थः-*** *ऊति, यूति, जूति, साति, हेति, कीर्ति एते क्तिन्नन्ताः शब्दाः भावे, कर्तृभिन्ने कारके चार्थयोः निपात्यन्ते ।*

*तत्र **अव रक्षणे** इत्यस्माद् धातो ऊतिशब्दस्य निपातनम् । अन्तोदात्तः प्रयोजनम् ।*

***यु मिश्रामिश्रणयोः*** *इत्यस्माद् धातोः यूतिशब्दस्य निपातनम्, अनेन सूत्रेण अत्र धातोः उकारस्य स्थाने दीर्घादेशः ।*

***जु गतौ वेगे च*** *इति सौत्रधातोः जूतिः इत्यस्य निपातनम् अत्रापि अनेन सूत्रेण उकारस्य दीर्घः । षोऽन्तकर्मणि अस्माद् धातोः सातिशब्दस्य निपातनम्, अत्र अनेन सूत्रेण इत्वस्य निषेधः ।*

***हि गतौ*** *अस्माद् धातोः हेति शब्दस्य निपातनम्, अत्र अनेन सूत्रेण क्तिनः कित्वेऽपि धातोः इकारस्य स्थाने गुणादेशः ।*

*कीर्तिशब्दः* ***कृत संशब्दने*** *धातोः सिद्ध्यति । कृतधातु चुरादौ वर्तते अतः ण्यन्ताद् "ण्यासश्रन्थो युच्" इति सूत्रेण युच्प्राप्तः अनेन तं बाधित्वा क्तिन् प्रत्यये कीर्तिशब्दो बोध्यः ।*

ऊठादेशविधायकं विधिसूत्रम्-

**ज्वरत्वरस्रिव्यविमवामुपधायाश्च ३ । ३ । ९७**

**एषामुपधावकारयोरूठ् अनुनासिके क्वौ झलादौ क्ङिति । अतः क्विप् । जूः । तूः । स्रूः ।ऊः । मूः ।**

(ज्वरत्वरस्रिव्यविमवाम्, उपधायाः, च्छ्वोः, च, ऊठ्, क्विझलोः, क्ङिति)

***सरलार्थः-*** *ज्वर-त्वर-स्रिवि-अवि-मवां धातूनामुपधायाः वकारस्य च स्थाने ऊठादेशो भवति अनुनासिके, क्वौ, झलादौ किति ङिति च परतः ।*

***जूः-*** *ज्वरणं जूः इत्यर्थे अनेन सूत्रेण ऊठो विधानसामर्थ्यात् ज्वर रोगे इत्यस्माद् धातोः संपदादिभ्यः क्विप्प्रत्यये सति अनेन सूत्रेण उपधावकारयोः स्थाने ऊठादेशेऽनुबन्धलोपे जू इत्यस्य प्रातिपदिकसंज्ञायां स्वादिकार्ये च जूः इति सिद्ध्यति ।*

*एवमेव ञित्वराँ संभ्रमे त्वरणं तूः । स्रिवु गतौ स्रेवणं स्रूः । अव रक्षणे अवम् ऊः । मव बन्धने मवनं मूः इति च बोध्याः ।*

इच्छाशब्दस्य निपातकं विधिसूत्रम्-

**इच्छा ३ । ३ । १०१**

**इषेर्निपातोऽयम् ।**

(इच्छा,स्त्रियाम्, भावे)

***सरलार्थः-*** *इष्धातोः स्त्रियां भावेऽर्थे इच्छा इत्यस्य निपातनं भवति । अभिलाषा इत्यर्थः ।*

***इच्छा*** *= अत्र एषणम् इत्यर्थे इषु इच्छायामित्यस्माद् धातोः भावेऽर्थे तुदादित्वात् निपातनेन शप्रत्ययेऽनुबन्धलोपे शित्वात् "सार्वधातुके यक्" इति यकि प्राप्ते अनेन सूत्रेण तन्निषेधे*

*"इषुगमियमां छः" इति सूत्रेण छप्रत्यये पररूपे धातोः तुगागमे श्चुत्वे प्रातिपदिकसंज्ञायां स्त्रियां टापि विभक्तिकार्ये च **इच्छा** इति सिद्ध्यति ।*

अ-प्रत्ययविधायकं विधिसूत्रम्-

**अ प्रत्ययात् ३ । ३ । १०२**

**प्रत्ययान्तेभ्यो धातुभ्यः स्त्रियामकारः प्रत्ययः स्यात् । चिकीर्षा । पुत्रकाम्या ।**

(प्रत्ययात्, धातोः, अ, स्त्रियाम्)

***सरलार्थः-*** *प्रत्ययान्तेभ्यः धातुभ्यः स्त्रियाम् अ-प्रत्ययो भवति । क्तिनोऽपवादोऽयम् ।*

*'कर्तुमिच्छा' इति विग्रहे सन्नन्ताच् चिकीर्षधातोः प्राप्तं क्तिनं बाधित्वा प्रकृतसूत्रेण अ-प्रत्यये 'चिकीर्ष अ' इत्यवस्थायाम् "अतो लोपः" इत्यकारलोपे, स्त्रीत्वविवक्षायां टापि 'चिकीर्षा' इत्यस्मात् शब्दात् सौ, हल्ङ्यादिलोपे 'चिकीर्षा' इति । एवमेव पुत्रकाम्यनमिति विग्रहे पुत्रकाम्यधातोः पूर्ववत् - पुत्रकाम्या । एवमेव - पुत्रीया । पिपासा । बुभूषा । सुश्रूषा । जिगमिषा । जिज्ञासा । जिघत्सा । बोभूया इत्यपि ।*

अ-प्रत्ययविधायकं विधिसूत्रम्-

**गुरोश्च हलः ३ । ३ । १०३**

**गुरुमतो हलन्तात्स्त्रियामकारः प्रत्ययः स्यात् । ईहा ।**

(गुरोः, च, हलः, धातोः, अः, स्त्रियाम्)

***सरलार्थः-*** *गुरुमतः हलन्ताद् धातोरपि स्त्रियाम् अ-प्रत्ययो भवति ।*

*क्तिनोऽपवादः । ईहनमिति विग्रह ईह्-धातोः प्राप्तं क्तिनं बाधित्वा प्रकृतसूत्रेण अ-प्रत्यये, टापि, स्वादिकार्ये 'ईहा' इति । एवमेव ऊहा, श्लाधा, अर्चा, अर्घा, नन्दा, गर्हा, इत्यादीनि रूपाण्यपि सिद्ध्यन्ति ।*

युच्प्रत्ययविधायकं विधिसूत्रम्

**ण्यासश्रन्थो युच् ३ । ३ । ११७**

**अकारस्यापवादः । कारणा । हारणा**

(ण्यासश्रन्थः, धातोः, भावे, स्त्रियाम्, अकर्तरि च कारके संज्ञायाम्, युच्, प्रत्ययः, परश्च)

***सरलार्थः-*** *ण्यन्तधातुभ्यः आस-श्रन्थधातुभ्याञ्च परः भावे कर्तृभिन्ने कारके च अर्थयोः स्त्रियां युच् प्रत्ययो भवति । ण्यन्तधातुभ्यः "अ प्रत्ययात्" इति सूत्रेण, आसश्रन्थधातुभ्यां "गुरोश्च हलः" इति सूत्रेण अप्रत्यये प्राप्ते अनेन युच्प्रत्ययः ।*

***कारणा*** *– डुकृञ् करणे अस्माद् ण्यन्ताद् कारिधातोः अप्रत्ययाद् इति सूत्रेण अप्रत्यये प्राप्ते अनेन सूत्रेण युच्प्रत्ययेऽनुबन्धलोपे कारि+यु इत्यवस्थायाम्, "युवोरनाकौ" इति यु इत्यस्य स्थाने अन इत्यादेशे "णेरनिटि" इति णेर्लोपे वर्णसम्मलने प्रातिपदिकसंज्ञायां स्त्रियां टापि, स्वादिकार्ये च कारणा इति रूपं सिद्ध्यति ।*

*एवमेव हृञ् हरणे अस्माद् ण्यन्ताद् हारिधातोः हारणा ।*

क्तप्रत्ययविधायकं विधिसूत्रम्-

**नपुंसके भावे क्तः ३ । ३ । ११४**

(नपुंसके, भावे, धातोः, क्तः)

***सरलार्थः***– *नपुंसकलिङ्गे भाव एवार्थे कालसामान्ये धातोः क्तप्रत्ययो भवति ।*

ल्युट्प्रत्ययविधायकं विधिसूत्रम् -

**ल्युट् च ३ । ३ । ११५**

**हसितम्, हसनम् ।**

(नपुंसके, भावे, धातोः, ल्युट्, च)

***सरलार्थः***– *नपुंसकलिङ्गे भावेऽर्थे धातोर्ल्युट्प्रत्ययोऽपि भवति ।*

*'हासः' इत्यर्थे हस्-धातोः "नपुंसके भावे क्तः" इति क्तप्रत्ययेऽनुबन्धलोपे, इडागमे 'हसित' इति जाते, तस्मात् सौ, नपुंसकत्वात् सोरमि, पूर्वरूपे 'हसितम्' इति सिद्ध्यति । ल्युट् चेति ल्युट्प्रत्यये तु योरनादेशे 'हसन' इत्यवस्थायां पूर्ववद् 'हसनम्' इति । एवमेव - भूतम्, भवनम् । श्रुतम्, श्रवणम् । जितम्, जयनम् । पीतम्, पानम् । शयितम्, शयानम् । हुतम्, हवनम् । हृतम्, हरणम् । गतम्, गमनम् । स्नातम्, स्नानम् । इत्यादि ।*

घप्रत्ययविधायकं विधिसूत्रम्-

**पुंसि संज्ञायां घः प्रायेण ३ ।३ । ११८ ।**

(पुंसि, संज्ञायाम्, धातोः, घ, प्रायेण, करणाधिकरणयोः, प्रत्ययः, परश्च)

***सरलार्थः***– *धातोः पुंसि संज्ञायां करणाधिकरणयोः अर्थयोः प्रायेण घप्रत्ययो भवति ।*

ह्रस्वादेशविधायकं विधिसूत्रम्-

**छादेर्घेऽद्व्युपसर्गस्य ६ ।४ । ९६**

**द्विप्रभृत्युपसर्गहीनस्य छादेर्ह्रस्वो घे परे । दन्ताश्छाद्यन्तेऽनेनेति दन्तच्छदः । आकुर्वन्त्यस्मिन्नित्याकरः**

(अद्व्युपसर्गस्य, छादेः, अङ्गस्य उपधायाः, घे, ह्रस्वः)

***सरलार्थः-*** *द्वौ द्व्यधिकाः वा उपसर्गा पूर्वस्मिन् नास्ति यस्य तादृशस्य छकारादिधातोः अचः ह्रस्वादेशो भवति घप्रत्यये परतः ।*

***दन्तच्छदः-*** *दन्ताः छाद्यन्ते अनेन इत्यर्थे छद अपवारणे अस्माद् ण्यन्ताद् छादिधातोः "पुंसि संज्ञायां घ प्रायेण" इति सूत्रेण घप्रत्ययेऽनुबन्धलोपे "णेरनिटि' इति सूत्रेण णेर्लोपे छाद्+अ इति कृदन्तस्य दन्त+आम् इत्यनेन सह समासे दन्त आम् छाद्+अ इत्यवस्थायामनेन उपधायाः आकारस्य स्थाने अकारादेशे वर्णसम्मेलने समासे तुगागमेऽनुबन्धलोपे तकारस्य श्चुत्वेन चकारे दन्तच्छद इत्यस्य प्रातिपदिकसंज्ञायां स्वादिकार्ये च दन्छच्छदः इति रूपं सिद्ध्यति । ओष्ठौ इत्यर्थः ।*

***आकरः- आकुर्वन्यस्मिन्नित्यर्थे*** *आङ् इत्युपसर्गपूर्वकाद् कृधातोः "पुंसि संज्ञायां घः प्रायेण" इति सूत्रेण अधिकरणेऽर्थे घप्रत्ययेऽनुबन्धलोपे धातोर्गुणे वर्णसम्मेलने आकर इत्यस्य प्रातिपदिकसंज्ञायां स्वादिकार्ये आकर इति रूपं सिद्धम् ।*

घञ्प्रत्ययविधायकं विधिसूत्रम्-

**अवे तृस्त्रोर्घञ् ३ । ३ । १२०**

**अवतारः कूपादेः । अवस्तारो जवनिका ।**

(अवे, तृस्त्रोः, धातोः, करणाधिकरणयोः, पुंसि, घञ्)

***सरलार्थः-*** *अव-उपसर्गपूर्वकाद् तृधातोः स्तृधातोश्च करणेऽधिकरणे चार्थे घञ्प्रत्ययो भवति ।*

*'अवतरन्ति अनेन' इति विग्रहे अवपूर्वकात् तृधातोः प्रकृतसूत्रेण घञि, वृद्धौ रपरत्वे, सौ 'अवतारः' इति सिद्ध्यति । एवमेव 'अवस्तीर्यते अनेन' इति विग्रह अवस्तृधातोर्घञि पूर्ववद्* ***अवस्तारः*** *।*

घञ्प्रत्ययविधायकं विधिसूत्रम्-

**हलश्च ३ । ३ । १२१**

**हलन्ताद् घञ् । घापवादः । रमन्ते योगिनोऽस्मिन्निति रामः । अपमृज्यतेऽनेन व्याध्यादिरित्यपामार्गः**

(हलः, च, धातोः, घञ्, करणाधिकरणयोः, पुंसि, संज्ञायाम् )

***सरलार्थः-*** *हलन्ताद्धातोः पुंलिङ्गे संज्ञायां विषये करणेऽधिकरणे चार्थे घञ्प्रत्ययो भवति । "पुंसि संज्ञायां घः प्रायेण" इत्यस्यापवादः ।*

*'रमन्ते योगिनोऽस्मिन्' इति विग्रहे अधिकरणेऽर्थे रम्धातोः प्राप्तं घप्रत्ययं बाधित्वा प्रकृतसूत्रेण घञ्प्रत्यये 'रम् अ' इति जाते, उपधावृद्धौ, सौ 'रामः' इति सिद्ध्यति ।*

खल्प्रत्ययविधायकं विधिसूत्रम्-

**ईषद्दुस्सुषु कृच्छ्राकृच्छ्रार्थेषु खल् ३ । ३ । १२६**

**करणाधिकरणयोरिति निवृत्तम् । एषु दुःखसुखार्थेषूपपदेषु खल् । तयोरेवेति भावे कर्मणि च । कृच्छ्रे – दुष्करः कटो भवता । अकृच्छ्रे– ईषत्करः । सुकरः ।**

(कृच्छ्राकृच्छ्रार्थेषु, ईषद्दुस्सुषु, धातोः, खल्)

***सरलार्थः–*** *कृच्छ्रम्- दुःखम्, अकृच्छ्रम्- सुखम् । सुखदुःखार्थेषु ईषद् दुस् सु एषु उपसर्गेषु उपपदेषु सत्सु भावे कर्मणि च अर्थयोः धातोः खल्प्रत्ययो भवति । खकारलकारौ इतौ ।*

***दुष्करः कटो भवता – दःखेन क्रियते*** *इत्यर्थे दुःखार्थके दुस् इत्युपसर्गे उपपदे सति* ***अनेन सूत्रेण कृधातोः कर्मण्यर्थे खल्प्रत्ययेऽनुबन्धलोपे*** *धातोर्गुणे समासे सस्य विसर्गे विसर्गस्य "इदुदूपधस्य चाप्रत्ययस्य" इति षत्वे दुष्कर इत्यस्य प्रातिपदिकसंज्ञायां स्वादिकार्ये दुष्करः इति रूपं सिद्ध्यति ।*

*एवमेव सुखेन क्रियते इति* ***सुकरः*** *। सुखेन ईषत् क्रियते इति* ***ईषत्करः*** *।*

युच्प्रत्ययविधायकं विधिसूत्रम्-

**आतो युच् ३ । ३ । १२८ ।**

**खलोऽपवादः । ईषत्पानः सोमो भवता । दुष्पानः । सुपानः**

(आतः, धातोः, कृच्छ्राकृच्छ्रार्थेषु, ईषद्दुस्सुषु, युच्, प्रत्ययः, परश्च )

***सरलार्थः–*** *सुखदुःखार्थेषु ईषद् दुस् सु एषु उपसर्गेषु उपपदेषु सत्सु भावे कर्मणि च अर्थे आकारान्ताद् धातोः युच् प्रत्ययो भवति । चकारः इत्, यु इत्यस्य स्थाने* ***युवोरनाकौ*** *इति अनादेशः ।*

क्त्वाप्रत्ययविधायकं विधिसूत्रम्-

**अलंखल्वोः प्रतिषेधयोः प्राचां क्त्वा ३ । ४ । १८**

**प्रतिषेधार्थयोरलंखल्वोरुपपदयोः क्त्वा स्यात् । प्राचां ग्रहणं पूजार्थम् । अमैवाव्ययेनेति नियमान्नोपपदसमासः । "दो दद् घोः" । अलं दत्त्वा । घुमास्थेतीत्त्वम् । पीत्वा खलु । अलंखल्वोः किम् ? मा कार्षीत् । प्रतिषेधयोः किम् ? अलङ्कारः ।**

(अलंखल्वोः, प्रतिषेधयोः, धातोः, क्त्वा, प्राचाम्)

***सरलार्थः-*** *प्रतिषेधार्थयोः अलम्-खल्वोः शब्दयोः उपपदयोः सतोः धातोः परः क्त्वाप्रत्ययो भवति ।*

*'क्त्वा' इत्यस्य ककार इत् । अत्र "अमैवाव्ययेन" इति नियमसूत्रेण निषेधादुपपदसमासो न भवति । क्त्वाप्रत्ययान्ताः शब्दा अव्ययसंज्ञका भवन्ति । (क्त्वातोसुन्कसुनः १ । १ । २०)*

*'न देयम्' इति विग्रहे 'अलम्' इति प्रतिषेधार्थशब्दोपपदाद् दाधातोः प्रकृतसूत्रेण क्त्वाप्रत्ययेऽनुबन्धलोपे 'दा त्वा' इति जाते, प्राप्तस्य इडागमस्य निषेधे, "दो दध् घोः" इति सूत्रेण 'दा' इत्यस्य दध्-आदेशे, धकारस्य चर्त्वे 'दत्त्वा' इति जाते, क्त्वाप्रत्ययान्तत्वादव्ययसंज्ञायां, सौ, सोर्लुकि दत्त्वा' इति सिद्धयति । एवं 'न पेयम्' इति विग्रहे 'खलु' इति निषेधार्थकोपपदात् पाधातोः क्त्वाप्रत्यये, "घुमास्थागापाजहातिसां हलि" इति सूत्रेण आकारस्य ईत्वे पूर्ववत् 'पीत्वा' इति । 'मा कार्षीत्' इत्यत्र तु अलंखल्वोरभावात् क्त्वोऽप्यभावे "माङि लुङ्" इति लुङ् भवति । तथा च भूषणार्थे वर्तमानाद् 'अलम्' इति शब्दोपपदात् कृधातोस्तु प्रतिषेधार्थत्वाभावान्न क्त्वि, ततो घञि 'अलङ्कारः' इति ।*

क्त्वाप्रत्ययविधायकं विधिसूत्रम्-

**समानकर्तृकयोः पूर्वकाले ३ । ४ । २१**

**समानकर्तृकयोर्धात्वर्थयोः पूर्वकाले विद्यमानाद्धातोः क्त्वा स्यात् । भुक्त्वा व्रजति । द्वित्वमतन्त्रम् । भुक्त्वा पीत्वा व्रजति ।**

(समानकर्तृकयोः, धातोः, पूर्वकाले, क्त्वा, प्रत्ययः परश्च)

***सरलार्थः-*** *समानः कर्ता ययोः धात्वर्थयोः तत्र पूर्वकाले धात्वर्थे विद्यमानाद् धातोः क्त्वा प्रत्ययो भवति ।*

*भुक्त्वा व्रजति 'भोजनानन्तरं गमनं करोति' इति विग्रहे भुज्-धातोः प्रकृतसूत्रेण क्त्वाप्रत्यये 'भुज् त्वा' इति जाते "चोः कुः" इति सूत्रेण कुत्वे, चर्त्वे, स्वादिकार्ये 'भुक्त्वा' इति सिद्धयति । तथा च - 'भोजनस्य पानस्य च अनन्तरं गच्छति' इति विग्रहे अपेक्षया पूर्वकाले विद्यमानाभ्यां 'भुज्','पा' एताभ्यामुभाभ्यामेव धातुभ्यां प्रकृतसूत्रेण क्त्वाप्रत्यये पूर्ववद् 'भुक्त्वा', 'पीत्वा' इति सिद्धयतः । एवं - भूत्वा, गत्वा, एधित्वा, हत्वा, स्नात्वा ।*

कित्वनिषेधकमतिदेशसूत्रम्-

**न क्त्वा सेट् १ । २ । १८**

**सेट् क्त्वा किन्न स्यात् । शयित्वा । सेट् किम् ? कृत्वा ।**

(सेट्, क्त्वा, कित्, न)

*सरलार्थः- क्त्वाप्रत्ययः इटा विशिष्टो भवति चेत् किद् न भवति ।*

*'शयनं कृत्वा, शयनस्य अनन्तरं वा' इति विग्रहे उत्तरकालिकक्रियाया विवक्षायां शीधातोः "समानकर्तृकयोः पूर्वकाले" इति क्त्वाप्रत्यये, सेट्त्वादिडागमे 'शी इत्वा' इति जाते "यदागमस्तद् गुणीभूतास्तद्ग्रहणेन गृह्यन्ते" इति न्यायेन इटा सहितस्य क्त्वः कित्वाद् गुणनिषेधे प्राप्ते प्रकृतसूत्रेण कित्वनिषेधे, कित्वाभावे गुणनिषेधस्याप्यभावे गुणेऽयादेशे, स्वादिकार्ये 'शयित्वा' इति । शयित्वा पठतीति प्रयोगः । अनिट्त्सु तु कित्वाद् गुणनिषेधो भवत्येव । यथा - कृत्वा ।*

किद्वद्भावविधायकमतिदेशसूत्रम्-

**रलो व्युपधाद्धलादेः संश्च १ । २ । २६**

**इवर्णोवर्णोपधाद्धलादेः रलन्तात्परौ क्त्वासनौ सेटौ वा कितौ स्तः । द्युतित्वा, द्योतित्वा । लिखित्वा, लेखित्वा । व्युपधात्किम् ? वर्तित्वा । रलः किम् ? सेवित्वा । हलादेः किम् ? एषित्वा । सेट् किम् ? भुक्त्वा ।**

(हलादेः, रल, व्युपधाद्, धातोः, क्त्वा, सेट् संश्च, वा, कित्):

***सरलार्थ* :- *इवर्णः उवर्णश्च उपधायां यस्य तादृशाद् हलादिरलन्ताद् धातोः परौ सेटौ क्त्वासन्प्रत्ययौ विभाषया कितौ भवतः ।***

***द्युतित्वा, द्योतित्वा* - *द्युत दीप्तौ इत्यस्माद् धातोः "समानकर्तृकयोः पूर्वकाले" इति सूत्रेण क्त्वाप्रत्ययेऽनुबन्धलोपे त्वा इत्यस्यार्धधातुकसंज्ञायां इडागमे द्युत् +इत्वा इत्यवस्थायामनेन सूत्रेण विभाषया किदभावे "पुगन्तलघूपधस्य च" इति सूत्रेण उकारस्य गुणे द्योतित्वा इति रूपम् । कित्वपक्षे धातोः गुणाभावे वर्णसम्मेलने द्युतित्वा इति च रूपं बोध्यम् ।***

*एवमेव **लिख अक्षरविन्यासे** धातो लिखित्वा/लेखित्वा इति रूपे भवतः ।*

*अत्र सूत्रे व्युपधादिति कथनेन वृत्धातोः विहितौ सेटौ क्त्वासनौ कितौ न भवतः एव तेन वर्तित्वा इति रूपम् । रलन्ताद् इति कथनेन सिवादिधातुभ्यः परौ सेटौ क्त्वासनौ न कितौ सेवित्वा । हलादिरिति कथनेन इषु इच्छायां धातोः गुणो भवत्येव । सेट् इति कथनेन अनिडः भुज्धातुतः विहितौ क्त्वासनौ कितौ भवतः एव तेन भुक्त्वा इत्यत्र न गुणः ।*

विभाषया इडागमविधायकं विधिसूत्रम्-

**उदितो वा ७ । २ । ५६**

**उदितः परस्य क्त्व इड्वा । शमित्वा, शान्त्वा । देवित्वा, द्युत्वा । दधातेर्हिः । हित्वा ।**

(उदितः, क्वि, इट्, वा)

***सरलार्थः-*** *ह्रस्वः उकारः इत् यत्र धातोः तादृशाद् धातोः विहितस्य क्त्वाप्रत्ययस्य विभाषया इडागमो भवति ।*

*शमित्वा/शान्त्वा -* ***शमु उपशमे*** *इत्यस्माद् धातोः "समानकर्तृकयोः पूर्वकाले"इति सूत्रेण क्त्वा प्रत्ययेऽनुबन्धलोपे शम् +क्वा इति जाते शम्धातो अनिट्त्वाद् इडभावे प्राप्ते अनेन सूत्रेण विभाषया इडागमे वर्णसम्मेलने शमित्वा इति रूपम् । इडागमाभावपक्षे शम्+त्वा इत्यवस्थायां "अनुनासिकस्य क्विझलोः क्ङिति" इति सूत्रेण उपधायाः दीर्घे मकारस्यानुस्वारे परसवर्णे च शान्त्वा इति रूपं बोध्यम् ।*

हि-इत्यादेशविधायकं विधिसूत्रम्-

**जहातेश्च क्त्वि ७ । ४ । ४३**

**हित्वा । हाङश्तु- हात्वा**

(जहातेः, अङ्गस्य, च, हि, क्त्वि)

***सरलार्थः-*** *ओहाक् त्यागे इत्यस्य धातोः स्थाने हि इत्ययम् आदेशो भवति, क्त्वाप्रत्यये परे ।*

***हित्वा*** *- "ओहाक् त्यागे" अस्माद् धातोः "समानकर्तृकयोः पूर्वकाले" इति सूत्रेण क्त्वाप्रत्ययेऽनुबन्धलोपे हा +त्वा इत्यवस्थायाम् "घुमास्थागापाजहातिसां हलि" इति सूत्रेण इत्वे प्राप्ते अनेन सूत्रेण हा इत्यस्य हि इत्यादेशे हित्वा इति रूपम् ।*

*जहातेः इति "ओहाक् त्यागे" इति धातोः अत्र ग्रहणात् "ओहाङ् गतौ" इत्यस्माद् धातोः क्त्वा प्रत्यये तु हात्वा इत्येव रूपं भवति ।*

ल्यप्-आदेशविधायकं विधिसूत्रम्-

**समासेऽनञ्पूर्वे क्त्वो ल्यप् ७ । १ । ३७**

**अव्ययपूर्वपदेऽनञ्समासे क्त्वो ल्यबादेशः स्यात् । तुक् । प्रकृत्य । अनञ् किम् ? अकृत्वा ।**

(अनञ्पूर्वे, समासे, धातोः, क्त्वः, ल्यप्)

***सरलार्थः-*** *अव्ययपूर्वपदं यत्र तस्मिन् अनञ्समासे धातोः विहितस्य क्त्वाप्रत्ययस्य स्थाने ल्यब्-आदेशो भवति ।*

*ल्यपो लकारपकारौ इतौ । "ह्रस्वस्य पिति कृति तुक् ६ । १ । ७१" इति पिति कृति परे ह्रस्वस्य तुगागमो भवति । तुक उकारककारौ इतौ ।*

*प्र-उपसर्गपूर्वकात् कृधातोः क्त्वाप्रत्यये, "कुगतिप्रादयः" इति समासे, प्रकृतसूत्रेण क्त्वो*

*ल्यबादेशेऽनुबन्धलोपे 'प्रकृ य' इत्यवस्थायां पित्वाद् "ह्रस्वस्य पिति कृति तुक्" इति सूत्रेण ह्रस्वस्य 'कृ' इत्यस्य ऋकारस्य तुगागमेऽनुबन्धलोपे 'प्रकृत्य' इति जाते, स्थानिवत्त्वादव्ययसंज्ञायां सुपो लुकि 'प्रकृत्य' इति सिद्ध्यति । एवं विजित्य । ह्रस्वस्यैव तुगागमो भवति । संभूय । आदाय । विलिख्य ।*

*'न कृत्वा - अकृत्वा' इत्यत्र तु नञ्समासत्वात् क्त्वो ल्यब्न भवति ।*

णमुल्प्रत्ययविधायकं विधिसूत्रम्-

**आभीक्ष्ण्ये णमुल् च ३ । ४ । २२**

**आभीक्ष्ण्ये द्योत्ये पूर्वविषये णमुल् स्यात् क्त्वा च ।**

(आभीक्ष्ण्ये, समानकर्तृकयोः, पूर्वकाले, धातोः,णमुल्, क्त्वा, च)

***सरलार्थः-*** *आभीक्ष्ण्येऽर्थे द्योत्ये समानकर्तृकयोर्धात्वर्थयोर्मध्ये पूर्वकाले विद्यमानाद्धातोर्णमुल् प्रत्ययः, क्त्वाप्रत्ययश्च भवतः । णमुलः उकारणकारलकारा इतः, 'अम्' इत्येव शिष्यते ।*

द्वित्वविधायकं विधिसूत्रम्-

**नित्यवीप्सयोः ८ । १ । ४**

**आभीक्ष्ण्ये वीप्सायां च द्योत्ये पदस्य द्वित्वं स्यात् । आभीक्ष्ण्यं तिङन्तेष्वव्ययसंज्ञकेषु कृदन्तेषु च । स्मारं स्मारं नमति शिवम् । स्मृत्वा स्मृत्वा । पायम्पायम् । भोजम्भोजम् । श्रावं श्रावम् ।**

(नित्यवीप्सयोः, सर्वस्य, द्वे)

***सरलार्थः-*** *आभीक्ष्ण्यं नाम पौन पुन्यं भृशार्थश्च, तत्र द्योत्ये, वीप्सायाञ्च पदस्य द्वित्वं भवति ।*

*आभीक्ष्ण्यं क्रियानिष्ठधर्मः स च तिङन्तेषु, अव्ययसंज्ञकेषु, कृदन्तेषु च भवति । यथा - स्मारं स्मारं नमति शिवम् ।*

***स्मारं स्मारं नमति शिवम्*** *अत्र आभीक्ष्ण्येऽर्थे द्योत्ये समानकर्तृकयोर्धात्वर्थयोर्मध्ये पूर्वकाले विद्यमानात् स्मृधातोः "आभीक्ष्ण्ये णमुल् च" इति सूत्रेण णमुल्प्रत्यये उकारणकारलकाराणामित्संज्ञायां लोपे 'स्मृ अम्' इति जाते, णित्वाद् ऋकारस्य वृद्धौ रपरत्वे 'स्मारम्' इति जाते, मान्तकृत्वादव्ययसंज्ञायां, तस्मात् सौ, सुब्लुकि, प्रकृतसूत्रेण 'स्मारम्' इति पदस्य द्वित्वे 'स्मारं स्मारं नमति शिवम्' इति । अन्ये पक्षे क्त्वाप्रत्यये पूर्ववत्प्रक्रियायां 'स्मृत्वा स्मृत्वा नमति शिवम्' इत्यपि सिद्ध्यति । एवमेव - पायम्पायं भुङ्क्ते, पीत्वा पीत्वा भुङ्क्ते । भोजम्भोजं हसति, भुक्त्वा भुक्त्वा हसति । श्रावं श्रावं मुञ्चति, श्रुत्वा श्रुत्वा मुञ्चति इत्यपि बोध्यम् ।*

णमुल्प्रत्ययविधायकं विधिसूत्रम्-

**अन्यथैवंकथमित्थंसु सिद्धाप्रयोगश्चेत् ३ । ४ । २७**

**एषु कृञो णमुल् स्यात् । सिद्धोऽप्रयोगोऽस्य एवम्भूतश्चेत् कृञ् । व्यर्थत्वात्प्रयोगानर्ह इत्यर्थः । अन्यथाकारम् । एवङ्कारम् । कथङ्कारम् । इत्थङ्कारं भुङ्क्ते ।, सिद्धेति किम् ? शिरोन्यथा कृत्वा भुङ्क्ते ।**

(अन्यथैवंकथमित्थंसु, कृञः, धातोः, णमुल्, सिद्धाप्रयोगश्चेत्)

***सरलार्थः-*** *अन्यथा, एवम्, कथम्, इत्थम् एषु उपपदेषु कृञ्धातोः णमुल्प्रत्ययो भवति । वाक्ये कृञ्धातुः अनर्थकः प्रतीयते चेत् ।*

***अन्यथाकारम्*** *– अन्यथा भुङ्क्ते इत्यस्मिन् अर्थे अन्यथा इत्युपपदपूर्वकात् कृधातोः अनेन सूत्रेण णमुल् प्रत्ययेऽनुबन्धलोपे अन्यथा कृ+अम् इति जाते कृधातोः "अचो ञ्णिति" इति वृद्धौ रपरत्वे वर्णसम्मेलने उपपदसमासे समासत्वात् प्रातिपदिकसंज्ञायां स्वादिकार्ये मान्तत्वाद् अव्ययत्वेन सुपो लुकि अन्यथाकारम् इति रूपं सिद्ध्यति । अत्र कृधातोः प्रयोगे अप्रयोगे च अर्थे विशेषाभावात् कृधातु अनर्थकोऽस्ति ।*

*एवम् एवङ्कारम् । कथङ्कारम् । इत्थङ्कारं भुङ्क्ते इत्यादि प्रयोगाः ज्ञेयाः । कृञः प्रयोगो व्यर्थो नास्ति चेत् अनेन णमुल् प्रत्ययो न भवति यथा -शिरोन्यथा कृत्वा भुङ्क्ते अत्र न णमुल् ।*

इत्युत्तरकृदन्तप्रक्रणम्

## प्रयोगसिद्धिप्रकारः

### पठितुम्

पठनक्रियानिमित्तकैषणादिरूपक्रियायां विवक्षितायां भविष्यत्यर्थे वर्तमानाद् पठ्-धातोः "तुमुन्ण्वुलौ क्रियायां क्रियार्थायाम्" इति सूत्रेण तुमुन्प्रत्ययेऽनुबन्धलोपे 'पठ् तुम्' इति जाते 'तुम्' इत्यस्य आर्धधातुकसंज्ञायाम् "आर्धधातुकस्येड्वलादेः" इति सूत्रेण तस्यार्धधातुकस्य इडागमेऽनुबन्धलोपे 'पठ् इतुम्' इति जाते, वर्णसम्मेलने 'पठितुम्' इति जाते, मान्तकृत्वात् "कृन्मेजन्तः" इत्यव्ययसंज्ञायां, कृदन्तत्वात्प्रातिपदिकसंज्ञायां च ततः सौ, अव्ययत्वाद् "अव्ययादाप्सुपः" इति सोर्लुकि 'पठितुम्' इति रूपं सिद्ध्यति । (पाठं पठितुमिच्छतीति प्रयोगः ।)

### पाकः

पचनमित्यर्थे पच्-धातोः "भावे" इति सूत्रेण घञ्प्रत्यये घकारञकारयोरित्संज्ञायां लोपे 'पच् अ' इति जाते, "अत उपधायाः" इत्युपधावृद्धौ 'पाच् अ' इत्यवस्थायां "चजोः कु घिण्ण्यतोः" इति चकारस्य कुत्वे 'पाक' इति जाते, कृदन्तत्वात् प्रातिपदिकसंज्ञायां, घञन्तत्वात् "घञबन्तः" इति सूत्रनियमानुसारेण पुंलिङ्गे सौ, सकारस्य रुत्वे विसर्गे 'पाकः' इति सिद्ध्यति ।

## स्तुतिः

स्तवनमित्यर्थे स्तुधातोः “भावे” इति सूत्रेण घञ्प्रत्यये प्राप्ते तं बाधित्वा “स्त्रियां क्तिन्” इति सूत्रेण स्त्रीलिङ्गे भावेऽर्थे क्तिन्प्रत्यये ककारनकारयोरित्संज्ञायां लोपे ‘स्तु ति’ इति जाते, कित्वाद् गुणनिषेधे ‘स्तुति’ इत्यस्य प्रातिपदिकसंज्ञायां विभक्तिकार्ये ‘स्तुतिः’ इति रूपं सिद्ध्यति ।

## श्रुत्वा शेते

‘श्रवणानन्तरं शयनं करोति’ इति विग्रहे समानकर्तृकयोर्धात्वर्थयोर्मध्ये पूर्वकाले विद्यमानात् श्रु-धातोः “समानकर्तृकयोः पूर्वकाले” इति सूत्रेण क्त्वाप्रत्यये ककारस्य इत्संज्ञायां लोपे ‘श्रुत्वा’ इति जाते तस्य “क्त्वातोसुन्कसुनः” इति सूत्रेण अव्ययसंज्ञायां, तस्मात् सौ, अव्ययत्वात् सुब्लुकि ‘श्रुत्वा शेते’ इति सिद्ध्यति ।

### अभ्यासार्थाः प्रश्नाः

१. **सूत्राणि तेषामर्थं च लिखत**

(क) तुमुन्ण्वुलौ क्रियायां क्रियार्थायाम्

(ख) भावे

(ग) एरच्

(घ) स्त्रियां क्तिन्

(ङ) हलश्च

(च) न क्त्वा सेट्

(छ) उपसर्गे घोः किः

(ज) अ प्रत्ययात्

(झ) समासेऽनञ्पूर्वे क्त्वोल्र्यप्

२. **प्रश्नानामुत्तराणि देयानि**

(क) ‘उपसमाधानम्’ इति पदस्य कोऽर्थः ?

(ख) मान्तकृदन्तानां केन सूत्रेण अव्ययसंज्ञा क्रियते ?

(ग) कालार्थेषूपपदेषु धातोः को प्रत्ययो भवति ?

(घ) सिद्धावस्थापन्ने धात्वर्थे वाच्ये धातोः केन सूत्रेण कः प्रत्ययो भवति ?

(ङ) “अकर्तरि च कारके संज्ञायाम्” इति सूत्रेण कस्मिन्नर्थे कः प्रत्ययो विधीयते ?

(च) ‘रङ्गः’ इति प्रयोगे रञ्जेर्नलोपो कथं न भवति ?

(छ) प्रत्ययान्ताद्धातोः स्त्रियां भावे कः प्रत्ययो भवति ?

(ज) गुरुमतो हलन्ताद्धातोः कस्मिन् लिङ्गे अकारप्रत्ययो भवति ?

(झ) नपुङसकलिङ्गे भावेऽर्थे धातोः कौ प्रत्ययौ भवतः ?

(ञ) 'अवतारः' इति पदस्यार्थं विलिख्य तत्र घञ्विधायकं सूत्रं लिखत ।

(ट) 'रमन्ते योगिनोऽस्मिन्' इति विग्रहे किं रूपं निष्पद्यते ?

(ठ) 'अलङ्करोतीति अलङ्कारः' इत्यस्मिन् प्रयोगे 'अलम्' इत्युपपदात् कृधातोः कथं क्त्वाप्रत्ययो न भवति ?

(ड) कीदृशः क्त्वाप्रत्ययो कित् न भवति ?

(ढ) कस्मिन्नवस्थायां क्त्वो ल्यबादेशो भवति ?

(ण) पिति कृति परे ह्रस्वस्य तुगागमविधायकं सूत्रं लिखत ।

(त) 'आभीक्ष्ण्यम्' इति पदस्य कोऽर्थः ? तच्च कुत्र कुत्र भवति ?

(थ) 'निवासचितिo' इति सूत्रं पूरयत ।

(ध) नित्यवीप्सयोः इति सूत्रस्यार्थं लिखत ।

३. **अधोलिखितानि पदानि प्रयुज्य वाक्यानि रचयत**

गत्वा, भवितुम्, पाठकः, कृतिः, भावः, रागः, रङ्गः, कायः, यवः, विपत्तिः, पुत्रकाम्या, ऊहा, दत्तम्, श्रवणम्, अवस्तारः, अलं गत्वा, पीत्वा खलु, जग्ध्वा, आकर्ण्य, स्मारं स्मारम्, कथङ्कारम् ।

४. **प्रकृतिप्रत्ययौ पृथक् कुरुत**

श्रावकः, गन्तुम्, हरणम्, गतिः, प्रदाय, लिखित्वा, प्रयुज्य, पिपासा, पातुम्, अवतारः, नन्दा, आपत्तिः, लूनिः, स्तवः, जयः, निकायः, हारः, लाभः, अत्तुम् ।

५. **प्रत्ययान् संयुज्य निष्पन्नरूपाणि लिखत**

हन्+तुमुन्, जि+ण्वुल्, धा+क्त्वा, नश्+घञ्, भू+क्तिन्, दा+क्त्वा, वि+जि+ल्यप्, चि+अच्, भज्+क्तिन्, पठ्+घञ्, मन्+क्तिन्, नश्+क्त, अद्+क्त, मन्+क्त्वा, वि+स्मृ+ल्यप् ।

६. **अधस्तनप्रयोगाणां सिद्धिप्रक्रियां दर्शयत**

द्रष्टुम्, दर्शकः, कालो भोक्तुम्, पाकः, रागः, गोमयनिकायः, चयः, करः, कृतिः, सम्पत्तिः, चिकीर्षा, ईहा, हसितम्, पठनम्, रामः, अलं दत्त्वा, भुक्त्वा, शयित्वा, प्रकृत्य, स्मारं स्मारम् ।

७. **समुचितपदं चित्वा रिक्तस्थानं पूरयत**

(क) घञ्प्रत्ययान्ता अप्प्रत्ययान्ताश्च शब्दा ...................... प्रयुज्यन्ते । (पुंलिङ्गे, स्त्रीलिङ्गे, नपुङसकलिङ्गे)

(ख) क्रियानिमित्तकक्रियोपपदे ........................ अर्थे धातोः तुमुन्ण्वुलौ भवतः । (भूते, वर्तमाने, भविष्यति)

(ग) आभीक्ष्ण्येऽर्थे द्योत्ये समानकर्तृकयोर्धात्वर्थयोर्मध्ये पूर्वकाले विद्यमानाद्धातोः ........................ प्रत्ययौ भवतः । (क्त्वाणमुलौ, क्तिन्णमुलौ, क्त्वातुमुनौ)

(घ) ........................ अर्थे द्योत्ये पदस्य द्वित्वं भवति । (आभीक्ष्ण्ये, वीप्सायाम्, आभीक्ष्ण्ये वीप्सायां च)

(ङ) क्त्वाप्रत्ययान्तानां शब्दानामव्ययसंज्ञा ........................ सूत्रेण भवति ? (कृन्मेजन्तः, क्त्वातोसुन्कसुनौ)

(च) रज्यत्यस्मिन्निति विग्रहे रञ्ज्-धातो ..................... रूपं सिद्ध्यति । (रागः, रङ्गः)

८. **"समानकर्तृकयोः पूर्वकाले" इति सूत्रस्यार्थं सोदाहरणं प्रकाशयत ।**

९. **समीचीनेषु कथनेषु (√) चिह्नमसमीचीनेषु च (×) चिह्नं दर्शयत**

(क) अव्ययपूर्वपदे नञ्समासे क्त्वो ल्यबादेशो भवति ।

(ख) आभीक्ष्ण्यं तिङन्तेष्वव्ययसंज्ञकेषु कृदन्तेषु च भवति ।

(ग) समानकर्तृकयोर्धात्वर्थयोर्मध्ये उत्तरकाले विद्यमानाद्धातोः क्त्वाप्रत्ययो भवति ।

(घ) गुरुमतो हलन्ताद्धातोः क्तिन्प्रत्ययो भवति ।

(ङ) संपदादिगणपठितेभ्यो धातुभ्यः क्तिन्नपीष्यते ।

(च) इवर्णान्ताद्धातोः भावे कर्तृभिन्ने कारके चार्थे घञ्प्रत्ययो भवति ।

(छ) क्त्वाप्रत्ययान्ताः शब्दा अव्ययसंज्ञका भवन्ति ।

१०. **हसन-शब्दस्य सर्वासु विभक्तिषु सर्वेषु वचनेषु च रूपाणि लिखत ।**

११. **कृति-शब्दस्य सर्वासु विभक्तिषु सर्वेषु वचनेषु च रूपाणि लिखत ।**

१२. **राम-शब्दस्य सर्वासु विभक्तिषु सर्वेषु वचनेषु च रूपाणि लिखत ।**

## अनुप्रयोगः

१. **अधो लिखितानि वाक्यानि पठत**

(क) केशवो महान् **गायको भवितुमिच्छ**ति ।

(ख) छात्रः **पठितुं** विद्यालयं गच्छति ।

(ग) त्वं किं **श्रोतुमि**च्छसि ?

(घ) अहं दरिद्रेभ्यो वस्त्रं **दातुं** न समर्थोऽस्मि ।

(ङ) बालकः दुग्धं **पीत्वा** शेते ।

(च) बालिका **भुक्त्वा पीत्वा** व्रजति ।

(छ) स कवितां **विलिख्य** कक्षायां श्रावयति ।

(ज) अहं **स्मारं स्मारं** शम्भुं नमामि ।

(झ) ग्रीष्मर्तौ अतीव **पिपासा** जायते ।

(ञ) तव **कृतिः** प्रशंसनीया अनुकरणीया च वर्तते ।

(ट) छात्रः **कराभ्यां** लिखति ।

२. **तुमुन्प्रत्ययान्तानि ण्वुल्प्रत्ययान्तानि च पदानि प्रयुज्य एकमनुच्छेदं विलिख्य कक्षायां श्रावयत ।**

३. **क्त्वाप्रत्ययान्तानि ल्यप्प्रत्ययान्तानि च पदानि प्रयुज्य आत्मन एकदिवसस्य कार्यकलापान् लिखित्वा शिक्षकं दर्शयत ।**

## मिश्रिताभ्यासः

१. **धातुभिः सह प्रत्ययान् योजयित्वा तालिकां पूरयत**

| | धातुः | क्त | क्तवतु | क्त्वा | तुमुन् | शतृ | तव्य | अनीयर् |
|---|---|---|---|---|---|---|---|---|
| **यथा** | कृ | कृत | कृतवत् | कृत्वा | कर्तुम् | कुर्वत् | कर्तव्य | करणीय |
| | गम् | ......... | .......... | ........ | ........ | ........ | .......... | .......... |
| | स्था | ......... | .......... | ........ | ........ | ........ | .......... | .......... |
| | श्रु | ......... | .......... | ........ | ........ | ........ | .......... | .......... |
| | पठ् | ......... | .......... | ........ | ........ | ........ | .......... | .......... |
| | भू | ......... | .......... | ........ | ........ | ........ | .......... | .......... |
| | पत् | ......... | .......... | ........ | ........ | ........ | .......... | .......... |

२. **कृत-कृतवत्-कुर्वत्-कर्तव्य-करणीयशब्दानां त्रिषु लिङ्गेषु रूपाणि लिखत ।**

इति कृदन्तप्रकरणम्

## त्रयोदशः पाठः

# अथ विभक्त्यर्थप्रकरणम् (कारकप्रकरणम्)

### कारकपरिचयः

करोति अर्थात् क्रियायां विशेषरूपतामापादयतीति कारकम् । क्रियाजनकत्वं क्रियान्वयित्वं वा कारकत्वमिति कारकस्य सामान्यलक्षणम् । क्रियायाः साधकं क्रियान्वयि वा कारकमुच्यते । कारकाणि साक्षात् परम्परया वा क्रियां सम्पादयन्ति । अत एव - साक्षात् परम्परया वा क्रियाजनकत्वं कारकत्वम् इति फलति । कर्तृकर्मादिभेदेन कारकाणि षड्विधानि सन्ति । तानि यथा -

**कर्ता कर्म च करणं सम्प्रदानं तथैव च ।**

**अपादानाधिकरणमित्याहुः कारकाणि षट् ।**

कर्ता, कर्म, करणम्, सम्प्रदानम्, अपादानम्, अधिकरणञ्चेति कारकाणि षड्विधानि भवन्ति । तेषु कर्तृ-कर्म-करणकारकाणि साक्षात् क्रियां सम्पादयन्ति । सम्प्रदानापादानाधिकरणकारकाणि तु परम्परयैव क्रियां सम्पादयन्ति ।

विभक्तिस्तु सङ्ख्याकारकसम्बन्धादीनां बोधिका भवति । विभक्तयः शब्दानां भिन्नानि रूपाणि निर्मान्ति, भिन्नान् अर्थान् च प्रकटयन्ति । प्रथमादिभेदेन ताः सप्तविधा भवन्ति । कर्तृकर्मादिकारकेषु प्रथमद्वितीयादिविभक्तयः भवन्ति । क्रियया सह सम्बन्धस्याऽभावाद् अर्थात् क्रियान्वयाभावेन सम्बन्धः (षष्ठीविभक्तिः) कारकत्वं नार्हति । तथैव सम्बोधनमपि पृथक् कारकं न मन्यते । सम्बोधनेऽपि प्रथमाविभक्तेः प्रयोगो भवति ।

विभक्तीनाम् अर्थाः विभक्त्यर्थाः, ते च कर्तृकर्मादिकारकाणि सम्बन्धश्च । कारकेऽर्थे विहिता विभक्तिः कारकविभक्तिः । पदमुपजीव्य जायमाना विभक्तिरुपपदविभक्तिरिति । अथ क्रमात् प्रथमादिविभक्तीनामर्थाः ससूत्रं प्रतिपाद्यन्ते -

प्रथमाविभक्तिविधायकं विधिसूत्रम्-

**प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा २ । ३ । ४६**

**नियतोपस्थितिकः प्रातिपदिकार्थः । मात्रशब्दस्य प्रत्येकं योगः । प्रातिपदिकार्थमात्रे लिङ्गमात्राद्याधिक्ये परिमाणमात्रे सङ्ख्यामात्रे च प्रथमा स्यात् । प्रातिपदिकार्थमात्रे- उच्चैः । नीचैः । कृष्णः । श्रीः । ज्ञानम् । लिङ्गमात्रे- तटः, तटी, तटम् । परिमाणमात्रे- द्रोणो व्रीहिः । वचनं सङ्ख्या । एकः, द्वौ, बहवः ।**

(प्रातिपदिकार्थ-लिङ्ग-परिमाण-वचनमात्रे, प्रातिपदिकाद्, प्रथमा)

***सरलार्थः–*** *प्रातिपदिकार्थमात्रे, लिङ्गमात्राद्याधिक्ये, परिमाणमात्रे, सङ्ख्यामात्रे च वर्तमानात् प्रातिपदिकात् प्रथमा विभक्तिर्भवति ।*

*प्रातिपदिकार्थश्च लिङ्गञ्च परिमाणञ्च वचनञ्च तानि प्रातिपदिकार्थलिङ्गपरिमाणवचनानि, तान्येव प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रम्, तस्मिन् प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे इति समाहारद्वन्द्वः । "द्वन्द्वान्ते श्रूयमाणं पदं प्रत्येकमभिसंबध्यते" इति नियमः । तेन मात्रशब्दस्य प्रत्येकं योगो भवति ।*

***नियतोपस्थितिकः प्रातिपदिकार्थः–*** *यस्मिन् प्रातिपदिके उच्चरिते यस्यार्थस्य नियमेन उपस्थितिः सः प्रातिपदिकार्थः । तत्र अलिङ्गा (अव्ययशब्दाः) नियतलिङ्गाश्च प्रातिपदिकार्थमात्र इत्यस्योदाहरणानि । यथा - उच्चैः, नीचैः । अत्र उच्चैस्, नीचैस् इत्येताभ्याम् अलिङ्गाव्ययशब्दाभ्यां प्रकृतसूत्रेण प्रातिपदिकार्थमात्रे प्रथमाविभक्तौ, अव्ययत्वाद् "अव्ययादाप्सुपः" इति सुब्लुकि, सकारस्य रुत्वे विसर्गे 'उच्चैः', 'नीचैः' इति प्रयोगौ साधू । तथा च नियतलिङ्गानामुदाहरणं यथा - कृष्णः, श्रीः, ज्ञानम् । अत्र नित्यपुंलिङ्गात् कृष्णशब्दात्, नित्यस्त्रीलिङ्गात् श्रीशब्दात्, नित्यनपुंसकलिङ्गाद् ज्ञानशब्दाच्च प्रकृतसूत्रेण प्रातिपदिकार्थमात्रे प्रथमाविभक्तौ, विभक्तिकार्ये 'कृष्णः, श्रीः, ज्ञानम्' इति प्रयोगाः साधवः ।*

***अनियतलिङ्गास्तु लिङ्गमात्राधिक्यस्योदाहरणानि ।*** *यथा - तटः, तटी, तटम् । अत्र अनियतलिङ्गात् तटरूपात् प्रातिपदिकात् प्रकृतसूत्रेण लिङ्गमात्राधिक्ये (स्वार्थद्रव्यभिन्ने लिङ्गमात्रविवक्षिते) प्रथमाविभक्तौ, विभक्तिकार्ये, पुंलिङ्गे 'तटः' इति, स्त्रीलिङ्गे 'तटी' इति, नपुंसकलिङ्गे 'तटम्' इति ।*

***परिमाणमात्रे –*** *द्रोणो व्रीहिः । अत्र परिमाणवाचकाद् द्रोणशब्दात् प्रकृतसूत्रेण परिमाणरूपेऽर्थे प्रथमाविभक्तौ, व्रीहिशब्दात्तु प्रातिपदिकार्थमात्रे प्रथमाविभक्तौ, विभक्तिकार्ये 'द्रोणो व्रीहिः' इति, द्रोणरूपं यत्परिमाणं तत्परिच्छिन्नो व्रीहिरित्यर्थः ।*

***वचनं सङ्ख्या ।*** *वचनमात्रस्योदाहरणानि यथा - एकः, द्वौ, बहवः । अत्र प्रकृतसूत्रेण वचनमात्रे प्रथमाविभक्तौ, एकत्वसङ्ख्याबोधकाद् एकशब्दाद् एकवचने सौ, द्वित्वसङ्ख्याबोधकाद् द्विशब्दाद् द्विवचने औप्रत्यये, बहुत्वसङ्ख्याबोधकाद् बहुशब्दाच्च बहुबचने जसि, विभक्तिकार्ये 'एकः, द्वौ, बहवः' इति सिद्धयन्ति ।*

*अभिहिते कर्तरि, अभिहितेषु कर्मादिषु च विभक्त्यन्तरविधानाभावात् प्रातिपदिकार्थमात्रत्वाश्रयणात् प्रथमा विभक्तिर्भवति । अभिधानं च तिङा कृता तद्धितेन समासेन वा भवति । क्वचिन्निपातेनाऽप्यभिधानं भवति । तत्र तिङाऽभिधानं यथा - बालकश्चतुरो भवति, बलवता शत्रुर्जीयते । कृताऽभिधानं यथा - कटान् कर्ता पुरुषः, लक्ष्म्या सेवितो हरिः, स्नानीयं चूर्णम् ।*

*तद्धितेनाऽभिधानं यथा - शत्योश्वः । समासेनाऽभिधानं यथा - प्राप्तोदको ग्रामः । निपातेनाऽभिधानं यथा - क्रमादमुं नारद इत्यबोधि सः ।*

सम्बोधनेऽर्थे प्रथमाविभक्तिविधायकं विधिसूत्रम्-

**सम्बोधने च २ । ३ । ४७**

**इहापि प्रथमा स्यात् । हे राम ।**

(सम्बोधने, च, प्रातिपदिकात्, प्रथमा)

***सरलार्थः-*** *पराभिमुखस्य स्वाभिमुखीकरणं सम्बोधनम् । सम्बोधनाधिक्येऽर्थे बोधिते च प्रातिपदिकात् प्रथमाविभक्तिर्भवति ।*

*'हे राम !' इत्यत्र प्रकृतसूत्रेण सम्बोधनाधिक्ये रामशब्दात् प्रथमाविभक्तौ, विभक्तिकार्ये 'हे राम !' इति रूपं सिद्ध्यति । एवमेव - भो गुरवः !, हे सीते !, भो मातः !, हे ज्ञान ! ।*

इति प्रथमा

कर्मसंज्ञाविधायकं सूत्रम्-

**कर्तुरीप्सिततमं कर्म १ । ४ । ४९**

**कर्तुः क्रियया आप्तुमिष्टतमं कारकं कर्मसंज्ञं स्यात् ।**

(कर्तुः, ईप्सिततमम्, कारके, कर्म )

अधिकारसूत्रम्-

**अनभिहिते २ । ३ । १**

**इत्यधिकृत्य ।**

***सरलार्थः-*** *अनभिहिते = अनुक्ते, इत्यधिकृत्य द्वितीयादि वक्ष्यते ।*

द्वितीयाविभक्तिविधायकं विधिसूत्रम्-

**कर्मणि द्वितीया २ । ३ । २**

**अनुक्ते कर्मणि द्वितीया स्यात् । हरिं भजति । अभिहिते तु कर्मादौ प्रथमा - हरिः सेव्यते । लक्ष्म्या सेवितः ।**

***सरलार्थः-*** *अनभिहिते कर्मणि द्वितीयाविभक्तिर्भवति ।*

*'हरिं भजति' इत्यत्र भजनक्रियया आप्तुमिष्टतमस्य हरिशब्दस्य "कर्तुरीप्सिततमं कर्म" इति सूत्रेण कर्मसंज्ञायां कर्तृवाच्ये कर्मणोऽनुक्तत्वात् प्रकृतसूत्रेण अनुक्ते कर्तरि द्वितीयाविभक्तौ,*

*विभक्तिकार्ये 'हरिं भजति' इति प्रयोगः साधुः । एवमेव - छात्रः पाठं पठतीत्यादि ।*

*अभिहिते तु कर्मणि कर्त्रादौ च "प्रातिपदिकार्थ०" इति प्रथमैव विभक्तिर्भवति । यथा - हरिः सेव्यते । अत्र कर्मणि लकारस्य विधानात् कर्म उक्तमस्ति । उक्तकर्मणि अनेन द्वितीया नैव भवति । एवमेव - छात्रेण पाठः पठ्यते । लक्ष्म्या सेवितो हरिः । अत्र कर्मणि क्तप्रत्ययस्य विधानात् कर्म उक्तं वर्तते ।*

कर्मसंज्ञाविधायकं सूत्रम्-

अकथितं च १ । ४ । ५१ ।

**अपादानादिविशेषैरविवक्षितं कारकं कर्मसंज्ञं स्यात् ।**

**"दुह्याच्पच्दण्ड्रुधिप्रच्छिचिब्रूशासुजिमथ्मुषाम् ।**

**कर्मयुक् स्यादकथितं तथा स्यान्नीहृकृष्वहाम् ।१।"**

***कारिकार्थः-*** *'दुह्यादीनां दुह्, याच्, पच्, दण्ड्, रुध्, प्रच्छ्, चि, ब्रू, शास्, जि, मथ्, मुष्, इत्येतेषां द्वादशानां नीप्रभृतीनां नी, हृ, कृष्, वह् इति चतुर्णां धातूनाञ्च कर्मणा यद् युज्यते तदेव अकथितं कर्म' इति परिगणनं कर्तव्यमित्यर्थः । एते धातवो द्विकर्मका धातवः सन्ति ।*

**गां दोग्धि पयः । बलिं याचते वसुधाम् । तण्डुलानोदनं पचति । गर्गान् शतं दण्डयति । व्रजमवरुणद्धि गाम् । माणवकं पन्थानं पृच्छति । वृक्षमवचिनोति फलानि । माणवकं धर्मं ब्रूते शास्ति वा । शतं जयति देवदत्तम् । सुधां क्षीरनिधिं मथ्नाति । देवदत्तं शतं मुष्णाति । ग्राममजां नयति हरति कर्षति वहति वा । अर्थनिबन्धनेयं संज्ञा । बलिं भिक्षते वसुधाम् । माणवकं धर्मं भाषते अभिधत्ते वक्तीत्यादि ।**

***'गां गोग्धि पयः'*** *इत्यत्र गोशब्दोऽपादानबोधकोऽस्ति परन्तु अत्र तस्य अपादानत्वमविवक्षितम् । तस्य अपादानत्वस्याविवक्षायां प्रकृतसूत्रेण गो-शब्दस्य कर्मसंज्ञायां, दोहनक्रियया आप्तुमिष्टतमस्य पयस्-शब्दस्य तु "कर्तुरीप्सिततमं कर्म" इति कर्मसंज्ञायां "कर्मणि द्वितीया" इति सूत्रेण उभयत्र द्वितीयाविभक्तौ 'गां दोग्धि पयः' इति प्रयोगः साधुः । अपादानत्वस्य विवक्षायां तु गोशब्दात् पञ्चमी विभक्तिर्भवति, तेन 'गोर्दोग्धि पयः' इति प्रयोगोऽपि भवति ।*

***बलिं याचते वसुधाम्,*** *(बलेर्याचते वसुधाम्) ।*

***माणवकं पन्थानं पृच्छति,*** *(माणवकात् पन्थानं पृच्छति) ।*

***वृक्षम् अवचिनोति फलानि,*** *(वृक्षादवचिनोति फलानि) ।*

***शतं जयति देवदत्तम्,*** *(शतं जयति देवदत्तात्) ।*

***सुधां क्षीरनिधिं मथ्नाति,*** *(सुधां क्षीरनिधेर्मथ्नाति) ।*

***देवदत्तं शतं मुष्णाति,*** *(देवदत्तात् शतं मुष्णाति) ।*

***गर्गान् शतं दण्डयति,*** *(गर्गेभ्यः शतं दण्डयति) ।*

***'तण्डुलान् ओदनं पचति'*** *इत्यत्र करणबोधकस्य तण्डुलशब्दस्य करणत्वस्याविवक्षायां तस्य कर्मसंज्ञायां गौणकर्मणि तण्डुले मुख्यकर्मणि ओदने च द्वितीयाविभक्तिर्भवति । तत्र करणत्वविवक्षायां तु तृतीयाविभक्तौ - तण्डुलैरोदनं पचतीति भवति ।*

***'व्रजम् अवरुणद्धि गाम्'*** *इत्यत्र अधिकरणबोधकव्रजशब्दस्य अधिकरणत्वाविवक्षायां कर्मसंज्ञायां, गौणकर्मणि व्रजशब्दे मुख्यकर्मणि गोशब्दे च द्वितीयाविभक्तिर्भवति । तत्र अधिकरणत्वविवक्षायां तु सप्तमीविभक्तौ 'व्रजेऽवरुणद्धि गाम्' इति ।*

***ग्रामम् अजां नयति हरति कर्षति वहति वा,*** *(ग्रामेऽजां नयति हरति कर्षति वहति वा) । 'माणवकं धर्मं ब्रूते शास्ति वा' इत्यत्र सम्प्रदानबोधके माणवकशब्दे सम्प्रदानत्वाविवक्षायां तस्य कर्मसंज्ञायां गौणकर्मणि माणवके मुख्यकर्मणि धर्मे च पूर्ववत् द्वितीया । तत्र सम्प्रदानत्वे विवक्षिते सति 'माणवकाय धर्मं वक्ति शास्ति वा' इति ।*

*उपर्युक्तानां दुह्यादिधातुनाम् अर्थैः समानार्थकानां धातूनामपि अत्र ग्रहणं कर्तव्यम् । याच्-धातोरर्थेन समानार्थको भिक्ष्धातुः, ब्रूधातोरर्थेन समानार्थकाः भाष्-अभिधा-वजादिधातवश्च द्विकर्मकाः सन्ति । यथा -* ***बलिं भिक्षते वसुधाम्,*** *(बलेर्भिक्षते वसुधाम्) ।* ***माणवकं धर्मं भाषते अभिधत्ते वक्ति वा ।*** *एवमन्यत्रापि बोध्यम् ।*

इति द्वितीया

कर्तृसंज्ञाविधायकं सूत्रम्-

**स्वतन्त्रः कर्ता १ । ४ । ५४**

**क्रियायां स्वातन्त्र्येण विवक्षितोऽर्थः कर्ता स्यात् ।**

(कारके, स्वतन्त्रः, कर्ता)

***सरलार्थः-*** *स्वतन्त्रः प्रधानभूतः । क्रियायाः सिद्धौ प्रधानतया यः स्वातन्त्र्येण विवक्ष्यते तत् कारकं कर्तृसंज्ञं भवति ।*

करणसंज्ञाविधायकं सूत्रम्-

**साधकतमं करणम् १ । ४ । ४२**

**क्रियासिद्धौ प्रकृष्टोपकारकं करणसंज्ञं स्यात् ।**

***सरलार्थः-*** *क्रियासिद्धौ = फलोत्पत्तौ, अतिशयम् उपकारकं (साधकं) वस्तु कारकसंज्ञं सत् करणसंज्ञकं भवति ।*

तृतीयाविभक्तिविधायकं विधिसूत्रम्-

**कर्तृकरणयोस्तृतीया २ । ३ । १८**

**अनभिहिते कर्तरि करणे च तृतीया स्यात् । रामेण बाणेन हतो बाली ।**

(कर्तृकरणयोः, प्रातिपदिकात्, तृतीया,अनभिहिते)

***सरलार्थः-*** *अनुक्ते कर्तरि अनुक्ते करणे च प्रातिपदिकात् तृतीया विभक्तिर्भवति ।*

*'रामेण बाणेन हतो बाली' इत्यत्र हननक्रियायां स्वतन्त्रतया विवक्षितस्य रामशब्दस्य "स्वतन्त्रः कर्ता" इति सूत्रेण कर्तृसंज्ञायां, रामकर्तृकहननक्रियाया अतिशयेन साधकवस्तुनः बाणस्य "साधकतमं करणम्" इति सूत्रेण करणसंज्ञायां, प्रकृतसूत्रेण अनुक्ते कर्तरि करणे च तृतीयाविभक्तौ, विभक्तिकार्ये 'रामेण बाणेन हतो बाली' इति साधुः । अत्र कर्मणि क्तप्रत्ययविधानात् कर्ता अनुक्तः, कर्म तूक्तम् । हननक्रियया आप्तुमिष्टतमस्य बालिन्-शब्दस्य तु "कर्तुरीप्सिततमं कर्म" इति कर्मसंज्ञायां तत उक्तकर्मणि पूर्ववत् प्रथमाविभक्तिर्भवति । अभिहिते तु कर्तरि प्रथमैव विभक्तिर्भवति । यथा - रामो बाणेन बालिनं जघान ।*

इति तृतीया

सम्प्रदानसंज्ञाविधायकं सूत्रम्-

**कर्मणा यमभिप्रैति स सम्प्रदानम् १ । ४ । ३२**

**दानस्य कर्मणा यमभिप्रैति स सम्प्रदानसंज्ञः स्यात् ।**

(कर्मणा, यम्, अभिप्रैति, सः, सम्प्रदानम्, कारके)

***सरलार्थः-*** *दानक्रियायाः कर्मणा करणभूतेन कर्ता यं सम्बद्धुमीप्सति तत् कारकं सम्प्रदानसंज्ञकं भवति ।*

चतुर्थीविभक्तिविधायकं विधिसूत्रम्-

**चतुर्थी सम्प्रदाने २ । ३ । १३**

**विप्राय गां ददाति ।**

(अनभिहिते, सम्प्रदाने, प्रातिपदिकात्, चतुर्थी)

***सरलार्थः-*** *अनभिहिते सम्प्रदाने कारके चतुर्थीविभक्तिर्भवति ।*

*'विप्राय गां ददाति' इत्यत्र दातुः (यजमानस्य) दानक्रियायाः कर्मणा करणभूतया गवा दाता (यजमानः) विप्रं सम्बद्धुमीप्सति । अत एव विप्रशब्दस्य "कर्मणा यमभिप्रैति स सम्प्रदानम्"*

*इति सम्प्रदानसंज्ञायां प्रकृतसूत्रेण चतुर्थीविभक्तौ, विभक्तिकार्ये 'विप्राय गां ददाति' इति प्रयोगः साधुः ।*

*अभिहिते तु सम्प्रदाने प्रथमैव भवति । यथा - दीयतेऽस्मै दानीयो विप्रः ।*

चतुर्थीविभक्तिविधायकं विधिसूत्रम्-

**नमस्स्वस्तिस्वाहास्वधालंवषड्योगाच्च २ । ३ । १६**

**एभिर्योगे चतुर्थी । हरये नमः । प्रजाभ्यः स्वस्ति । अग्नये स्वाहा । पितृभ्यः स्वधा । अलमिति पर्याप्त्यर्थग्रहणम् । तेन दैत्येभ्यो हरिरलं प्रभुः समर्थः शक्त इत्यादि ।**

(नमस्वस्तिस्वाहास्वधालम्वषड्योगाच्, च, प्रातिपदिकात्, चतुर्थी)

***सरलार्थः-*** *नमः, स्वस्ति, स्वाहा, स्वधा, अलम्, वषट् एभिर्योगे प्रातिपदिकाद् चतुर्थी विभक्तिर्भवति ।*

*'हरये नमः' इत्यत्र नमस्-शब्देन योगे प्रकृतसूत्रेण हरिशब्दाच्चतुर्थीविभक्तौ, विभक्तिकार्ये 'हरये नमः' इति । एवमन्यत्रापि । एवं 'प्रजाभ्यः स्वस्ति' इत्यत्र स्वस्तिशब्देन योगे प्रजाशब्दाच्चतुर्थी । एवमेव स्वधाशब्देन योगे - पितृभ्यः स्वधा । 'अलम्' इति शब्देन प्रभ्वादीनां सर्वेषां पर्याप्त्यर्थकानां शब्दानां ग्रहणं क्रियते । तेन - दैत्येभ्यो हरिरलम्, दानवेभ्यो हरिः प्रभुः, दैत्यैभ्यो हरिः समर्थः, असुरेभ्यो हरिः शक्त इत्यादि । कस्मै देव वषडस्तु तुभ्यम् । प्रदत्तेषु प्रयोगेषु सर्वत्र प्रकृतसूत्रेणैव चतुर्थी विधीयते ।*

इति चतुर्थी

अपादानसंज्ञाविधायकं सूत्रम्-

**ध्रुवमपायेऽपादानम् १ । ४ । ४२**

**अपायो विश्लेषस्तस्मिन्साध्ये यद् ध्रुवमवधिभूतं कारकं तदपादानं स्यात् ।**

(अपाये, ध्रुवम्, कारके, अपादानम्)

***सरलार्थः-*** *यस्मात् विभागक्रिया भवति, तस्यां यद् ध्रुवम्(स्थिरम्) अवधिभूतं कारकं तद् अपादानसंज्ञं भवति ।*

पञ्चमीविभक्तिविधायकं विधिसूत्रम्-

**अपादाने पञ्चमी २ । ३ । २८**

**ग्रामादायाति । धावतोऽश्वात्पततीत्यादि ।**

***सरलार्थः-*** *अनभिहिते अपादाने प्रातिपदिकात् पञ्चमी विभक्तिर्भवति ।*

*'ग्रामाद् आयाति' इत्यत्र ग्रामस्य आगमकस्य च विभागक्रियायां ध्रुवतया अवधिभूतस्य ग्रामस्य "ध्रुवमपायेऽपादानम्" इति सूत्रेण अपादानसंज्ञायां, तादृशाद् ग्रामशब्दात् प्रकृतसूत्रेण पञ्चमी विभक्तिर्भवति । एवं 'धावतोऽश्वात् पतति' इत्यत्रापि । अत्र धावतोऽश्वस्य स्थिराऽभावेऽपि अवधित्वेन विवक्षितत्वात् तस्याऽप्यपादनत्वं बोध्यम् । एवमन्यत्रापि ।*

इति पञ्चमी

षष्ठीविभक्तिविधायकं विधिसूत्रम्-

**षष्ठी शेषे २ । ३ । २८**

**कारकप्रातिपदिकार्थव्यतिरिक्तः स्वस्वामिभावादिः सम्बन्धः शेषस्तत्र षष्ठी । राज्ञः पुरुषः । कर्मादीनामपि सम्बन्धमात्रविवक्षायां षष्ठ्येव । सतां गतम् । सर्पिषो जानीते । मातुः स्मरति । एधो दकस्योपस्कुरुते । भजे शम्भोश्चरणयोः ।**

(शेषे, षष्ठी)

***सरलार्थः-*** *उक्तकर्तृकर्मादिकारकप्रातिपदिकार्थादिव्यतिरिक्ते स्वस्वामिभावादिसम्बन्धे वाच्ये प्रतियोगिवाचकात् शब्दात् षष्ठी विभक्तिर्भवति ।*

*(जन्यजनकभावादिसम्बन्धरूपेऽर्थे षष्ठी विभक्तिर्भवतीत्यर्थः) यस्यान्वयः स प्रतियोगी, यस्मिन् अन्वयः सोऽनुयोगी । यस्य सम्बन्धः स प्रतियोगी, यस्मिन् सम्बन्धः स अनुयोगी वा ।*

*'राज्ञः पुरुषः' इत्यत्र राज्ञः पुरुषेण सह स्वस्वामिभावसम्बन्धोऽस्ति । अत एव प्रतियोगिवाचकाद् राजन्शब्दात् प्रकृतसूत्रेण षष्ठीविभक्तौ, विभक्तिकार्ये 'राज्ञः पुरुषः' इति । (अत्र राजन्शब्दस्य पुरुषशब्देऽन्वयो भवति । तेन राजन्शब्दः प्रतियोगी, पुरुषशब्दस्त्वनुयोगी ।)*

इति षष्ठी

अधिकरणसंज्ञाविधायकं सूत्रम्-

**आधारोऽधिकरणम् २ । ३ । ३६**

**कर्तृकर्मद्वारा तन्निष्ठक्रियाया आधारः कारकमधिकरणं स्यात् ।**

(आधारः, कारके, अधिकरणम्)

***सरलार्थः-*** *कर्तरि कर्मणि च स्थिता या क्रिया तस्याः क्रियायाः आधारः कारकसंज्ञकःसन् अधिकरणसंज्ञको भवति ।*

सप्तमीविभक्तिविधायकं विधिसूत्रम्-

**सप्तम्यधिकरणे च २ । ३ । ३६**

**अधिकरणे सप्तमी स्यात्, चकाराद् दूरान्तिकार्थेभ्यः । औपश्लेषिको वैषयिकोऽभिव्यापकश्चेत्याधारस्त्रिधा । कटे आस्ते । स्थाल्यां पचति । मोक्षे इच्छास्ति । सर्वस्मिन्नात्मास्ति । वनस्य दूरे अन्तिके वा ।**

(अनभिहिते, अधिकरणे, प्रातिपदिकात्, सप्तमी, च)

***सरलार्थः–*** *अनभिहितेऽधिकरणे कारके अधिकरणार्थबोधकात् प्रातिपदिकात् सप्तमीविभक्तिर्भवति, चकारग्रहणाद् दूरार्थेभ्य अन्तिकार्थेभ्यश्च शब्देभ्योऽपि सप्तमीविभक्तिर्भवति ।*

*उपश्लेषेण कृतः- औपश्लेषिकः । यस्मिन्नाधारे कर्तुः कर्मणो वा संयोगो भवति स औपश्लेषिकः । यथा - कटे आस्ते । अत्र आसनक्रियायाः कर्तुः आधारो कटो वर्तते, तयोः संयोगसम्बन्धश्च । अत एव आसनक्रियायाः कर्तुराधारस्य कटस्य "आधारोऽधिकरणम्" इत्यधिकरणसंज्ञायां, तस्मात् प्रकृतसूत्रेण सप्तमीविभक्तौ 'कटे आस्ते' इति । एवमेव -* ***स्थाल्यां*** *पचति ।*

*विषयेण कृतः- वैषयिकः । यथा - मोक्षे इच्छास्ति । अत्र एषणक्रियाया विषयो मोक्षो वैशेषिक आधारः । तस्य वैशेषिकाधारस्य मोक्षशब्दस्य अधिकरणसंज्ञायां तस्मात् सप्तमीविभक्तौ 'मोक्षे इच्छास्ति' इति प्रयोगः साधुः ।*

*अभिव्याप्नोतीति - अभिव्यापकः । यथा - सर्वस्मिन् आत्माऽस्ति । अत्र आत्मकर्तृकसत्ताक्रियाया आधारः सर्वो वर्तते, आत्मनः सर्वत्र व्याप्तत्वात् सर्व इति अभिव्यापकाधारः । तस्य अभिव्यापकाधारस्य "आधारोऽधिकरणम्" इत्यधिकरणसंज्ञायां, तस्मात् सप्तमीविभक्तौ 'सर्वस्मिन्नात्मास्ति' इति ।*

*'वनस्य दूरे अन्तिके वा' इत्यत्र दूरार्थवाचकाद् दूरशब्दात् अन्तिकार्थवाचकाद् अन्तिकशब्दाच्च प्रकृतसूत्रेण सप्तमीविभक्तितिर्भवति ।*

इति सप्तमी

## प्रयोगसिद्धिप्रकारः

### माता तण्डुलान् ओदनं पचति

'माता तण्डुलान् ओदनं पचति' इत्यत्र करणबोधकस्य तण्डुलशब्दस्य करणत्वाविवक्षायां "अकथितं च" इति सूत्रेण तस्य कर्मसंज्ञायां मातृकर्तृकपचनक्रिययाऽऽप्तुमिष्टतमस्य ओदनशब्दस्य च "कर्तुरीप्सिततमं कर्म" इति सूत्रेण कर्मसंज्ञायां, गौणकर्मणि तण्डुले मुख्यकर्मणि ओदने च "कर्मणि द्वितीया" इति सूत्रेण द्वितीयाविभक्तौ 'तण्डुलान् ओदनं पचति' इति प्रयोगः साधुः । (तत्र तण्डुलशब्दे करणत्वविवक्षायां तु तृतीयाविभक्तौ - तण्डुलैरोदनं पचतीति भवति ।)

## रामेण बाणेन हतो बाली

'रामेण बाणेन हतो बाली' इत्यत्र हननक्रियायां स्वतन्त्रतया विवक्षितस्य रामशब्दस्य "स्वतन्त्रः कर्ता" इति सूत्रेण कर्तृसंज्ञायां, रामकर्तृकहननक्रियाया अतिशयेन साधकवस्तुनो बाणस्य "साधकतमं करणम्" इति सूत्रेण करणसंज्ञायां, "कर्तृकरणयोस्तृतीया" इति सूत्रेण अनुक्ते कर्तरि करणे च तृतीयाविभक्तौ, विभक्तिकार्ये 'रामेण बाणेन हतो बाली' इति साधुः । अत्र हन्धातोः कर्मणि क्तप्रत्ययस्य विहितत्वाद् उक्तकर्मणि बालिन्शब्दात् प्रातिपदिकार्थमात्रे प्रथमाविभक्तिर्भवति ।

## धावतोऽश्वात् पतति

'धावतोऽश्वात् पतति' इत्यत्र अश्वधावकयोर्विभागक्रियायां धावतोऽश्वस्य अचलताया अभावेऽपि अवधित्वेन विवक्षितत्वाद् अश्वशब्दस्य "ध्रुवमपायेऽपादानम्" इति सूत्रेण अपादानसंज्ञायां, तादृशाद् अश्वशब्दात् "अपादाने पञ्चमी" इति पञ्चमी विभक्तौ, तस्य विशेषणत्वात् शतृप्रत्ययान्ताद् धावत्-शब्दादपि पञ्चमीविभक्तौ 'धावतोऽश्वात् पतति' इति सिद्ध्यति ।

## राज्ञः पुरुषः

'राज्ञः पुरुषः' इत्यत्र राज्ञः पुरुषेण सह स्वस्वामिभावसम्बन्धे ज्ञायमाने प्रतियोगिवाचकाद् राजन्शब्दात् "षष्ठी शेषे" इति सूत्रेण षष्ठीविभक्तौ, विभक्तिकार्ये 'राज्ञः पुरुषः' इति ।

## स्थाल्यां ओदनं पचति

'स्थाल्याम् ओदनं पचति' इत्यत्र पाचनक्रियाया कर्मण ओदनस्य औपश्लेषिकाधारस्य स्थालीशब्दस्य "आधारोऽधिकरणम्" इत्यधिकरणसंज्ञायां, तस्मात् "सप्तम्यधिकरणे च" इति सूत्रेण सम्तमीविभक्तौ 'स्थाल्याम् ओदनं पचति' इति सिद्ध्यति ।

### अभ्यासार्थाः प्रश्नाः

१. **सूत्राणि तेषामर्थं च लिखत**

(क) कर्मणि द्वितीया (ख) कर्तृकरणयोस्तृतीया (ग) साधकतमं करणम्

(घ) षष्ठी शेषे (ङ) अपादाने पञ्चमी (च) चतुर्थी सम्प्रदाने

२. **प्रश्नानामुत्तराणि देयानि**

(क) कारकस्य सामान्यलक्षणं लिखत ।

(ख) कारकाणि कति ? के च ते ?

(ग) का विभक्तयः ?

(घ) किं नाम कर्म ?

(ङ) 'करणम्' इति पदेन किं ज्ञायते ?

(च) सम्प्रदानसंज्ञाविधायकं सूत्रं किम् ?

(छ) सम्प्रदानकारकस्य सोदाहरणं परिचयं दत्त ।

(ज) कर्ता इति किमुच्यते ? कर्तृसंज्ञा केन सूत्रेण भवति ?

(झ) अधिकरणं कतिविधम् ? सोदाहरणं तेषां नामानि लिखत ।

(ञ) अनभिहिते कर्तरि केन सूत्रेण का विभक्तिर्भवति ?

(ट) "सप्तम्यधिकरणे च" इति सूत्रस्यार्थं सोदाहरणं लिखत ।

(ठ) अपादानकारकं प्रयुज्य पञ्च वाक्यानि रचयत ।

(ड) सम्बोधनं किम् ? तत्र का विभक्तिर्भवति ?

(ढ) कः सम्बन्धः ? सम्बन्धसूचने केन सूत्रेण का विभक्तिर्भवति ?

(ण) गौणकर्मणः त्रीणि उदाहरणानि लिखित्वा वाक्ये प्रयोगं कुरुत ।

(त) कारकोपपदविभक्त्योः पार्थक्यं दर्शयत ।

३. **"प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा" इति सूत्रस्यार्थं सोदाहरणं लिखत ।**

४. **अभिधानं केन भवतीति सोदाहरणं प्रतिपादयत ।**

५. **"अकथितं च" इति सूत्रस्यार्थं सोदाहरणं लिखत ।**

६. **सोदाहरणं कारकस्य परिचयं दत्त ।**

७. **"दुह्याच्................" इति कारिकां पूरयित्वा द्विकर्मकाणां धातूनां सूचीं निर्मात ।**

८. **निम्नपदानि प्रयुज्य वाक्यानि रचयत**

नमः, दोग्धि, स्वस्ति, स्वाहा, पृच्छति, स्वधा, शास्ति, दण्डयति, मुष्णाति, नयति, अलम्, वषट्, वहति, याचते, ब्रूते, जयति, भिक्षते, अवरुणद्धि, चिनोति ।

९. **समुचितपदं चित्वा रिक्तस्थानं पूरयत**

(क) अभिहिते कर्मणि ........................ विभक्तिर्भवति । (प्रथमा, द्वितीया)

(ख) अनुक्ते कर्तरि ........................ विभक्तिर्भवति । (प्रथमा, तृतीया)

(ग) स्वाहा शब्देन योगे ........................ विभक्तिर्भवति । (द्वितीया, चतुर्थी)

(घ) अपादानादिविशेषैः .................... कारकं कर्मसंज्ञं भवति । (विवक्षितम्, अविवक्षितम्)

(ङ) अलिङ्गात् ................ प्रथमाविभक्तिर्भवति । (प्रातिपदिकार्थमात्रे, लिङ्गमात्राधिक्ये)

१०. **समीचीनेषु कथनेषु (√) चिह्नमसमीचीनेषु च (×) चिह्नं दर्शयत**

(क) अनियतलिङ्गा लिङ्गमात्राधिक्यस्योदाहरणम् ।

(ख) अभिहिते कर्मणि द्वितीयाविभक्तिर्भवति ।

(ग) पराभिमुखस्य स्वाभिमुखीकरणमेव सम्बोधनम् ।

(घ) दूरान्तिकार्थेभ्यः शब्देभ्यः पञ्चमीविभक्तिर्भवति ।

(ङ) 'द्रोणो व्रीहिः' इत्यस्य 'द्रोणाभिन्नो व्रीहिः' इत्यर्थो भवति ।

११. **कुत्र का विभक्तिर्भवतीति लिखत**

| | |
|---|---|
| यथा - अभिहिते कर्तरि | प्रथमा |
| अनभिहिते कर्तरि | .................... |
| अभिहिते कर्मणि | .................... |
| अनभिहिते कर्मणि | .................... |
| अनभिहिते करणे | .................... |
| अनभिहिते सम्प्रदाने | .................... |
| अनभिहिते अपादाने | .................... |
| अनभिहिते अधिकरणे | .................... |
| सम्बन्धे | .................... |
| अकथितकर्मणि | .................... |
| नमस्-शब्दयोगे | .................... |

१२. **वाक्यानि संशोधयत**

(क) **बालकः** पाठः पठ्यते ।

(ख) यजमानो **विप्रं** दक्षिणां ददाति ।

(ग) अर्जुनो **बाणात्** कर्णं जघान ।

(घ) **त्वां** पितुर्नाम किम् ?

(ङ) **सर्वस्माद्** आत्मा अस्ति ।

(च) बालिका **फलाय** खादति ।

(छ) **कविना** कवितां लिखति ।

(ज) **विष्णुं** नमः ।

(झ) **वृक्षः** पत्राणि पतन्ति ।

(ञ) जनाः वनस्य **दूरं** निवसन्ति ।

(ट) रामेण **बालिनं** हतः ।

१३. **स्थुलाक्षरयुक्तानां पदानां कारकाणि निर्दिशत**

**यथा – शिशुः** शेते । शिशुः → कर्तृकारकम् ।

(क) पिता **पुत्राय** धनं यच्छति ।

(ख) बहवः छात्रा **विद्यालये** पठन्ति ।

(ग) माता **हरिं** भजति ।

(घ) छात्राः **कन्दुकेन** क्रीडन्ति ।

(ङ) साधवो **मोक्षे** इच्छां कुर्वन्ति ।

(च) **आकाशा**ज्जलं पतति ।

(छ) विद्यार्थिना **कथा** पठ्यते ।

(ज) **मया** आनन्दोऽनुभूयते ।

१४. **निम्नप्रयोगेषु कारकप्रक्रियां दर्शयत**

तटः, तटी, तटम् । द्रोणो व्रीहिः । माता **हरिं** भजति । **माणवकं पन्थानं** पृच्छति । **बालिकया लेखन्या** कविता लिखिता । भ्राता **भगिन्यै** पुस्तकं ददाति । **ग्रामादा**याति । **मोक्षे** इच्छास्ति ।

## अनुप्रयोगः

१. **अधो लिखितानि वाक्यानि पठत**

(क) **वृकः** चतुरो भवति ।

(ख) **गुरुणा** वयं दृश्यामहे ।

(ग) वयम् **ईश्वरं** नमामः ।

(घ) आचार्यैः **भवान्** पाठितः ।

(ङ) दीपः **तैलेन** ज्वलति ।

(च) अहं **मनसा** शिवं स्मरामि ।

(छ) **भिक्षवे** भिक्षां देहि ।

(ज) धनिकः **दरिद्राय** वस्त्रं यच्छति ।

(झ) स **विद्यालयाद्** आयाति ।

(ञ) वानरा **वृक्षेभ्यः** पतन्ति ।

(ट) त्वं **कस्य** पुत्रोऽसि ?

(ठ) रघुवंशमहाकाव्यं **महाकवेः कलिदासस्य** कृतिर्वतते ।

(ड) **तिलेषु** तैलं वर्तते ।

(ढ) सिंहो **वने** वसति ।

(ण) भो **वत्स** ! अत्र आगच्छ ।

(ट) हे सरस्वति **मातः** ! मम हृदये सदैव वासं कुरु ।

२. **सर्वेषां कारकाणां सम्बन्धस्य च प्रयोगं कृत्वा स्वविद्यालयं वर्णयत ।**

३. **कोष्ठस्थनिर्देशनानुसारेण रिक्तस्थानं पूरयत**

(क) दरिद्रः .................. धनं दातुं न शक्नोति । (धनिक - सम्प्रदानकारके)

(ख) राजा .................. शतं दण्डयति । (चौर - कर्मकारके)

(ग) रोगी .................. इच्छति । (औषध - कर्मकारके)

(घ) कृष्ण .................. पुत्रो वभूव । (देवकी - षष्ठीविभक्तौ)

(ङ) सीतया .................. सेवितः । (राम - कर्मकारके)

(च) छात्राः .................. भ्रमणार्थं गच्छन्ति । (वसयान - करणकारके)

(छ) .................. भवनानि सन्ति । (नगर - अधिकरणकारके)

(ज) .................. कुत्र स्थीयते ? (युष्मद् - कर्तृकारके)

इति विभक्त्यर्थप्रकरणम् ।

# अथ समासप्रकरणम्

## समासपरिचयः

**तत्रादौ केवलसमासः । समासः पञ्चधा । तत्र समसनं समासः । स च विशेषसंज्ञाविनिर्मुक्तः केवलसमासः प्रथमः ।१। प्रायेण पूर्वपदार्थप्रधानोऽव्ययीभावो द्वितीयः ।२। प्रायेणोत्तरपदार्थप्रधान-स्तत्पुरुषस्तृतीयः । तत्पुरुषभेदः कर्मधारयः । कर्मधारयभेदो द्विगुः ।३। प्रायेणान्यपदार्थप्रधानो बहुव्रीहिश्चतुर्थः ।४। प्रायेणोभयपदार्थप्रधानो द्वन्द्वः पञ्चमः ।६।**

समसनं समासः । भिन्नार्थकयोर्द्वयोः पदयोर्बहूनां वा पदानामेकपदीभवनमेव समासः । समासाः पञ्चविधाः सन्ति । ते च यथा -

१. **केवलसमासः–** विशेषसंज्ञारहितः केवलसमासः प्रथमः समासो वर्तते । यथा - पूर्वं भूतः, भूतपूर्वः । वागर्थौ इव, वागर्थाविव ।

२. **अव्ययीभावसमासः–** अस्मिन् समासे अव्ययपदानां सुबन्तेन सह विभक्त्यादिष्वर्थेषु समासो भवति । अव्ययीभावसमासे प्रायेण पूर्वपदस्य अर्थः प्रधानो भवति । यथा - हरौ इति, अधिहरि । अत्र सप्तमीविभक्तेरर्थयुक्तस्य पूर्वस्थस्य 'अधि' इति पदस्य अर्थः प्रधानो वर्तते । परन्तु कुत्रचिदुत्तरपदार्थप्रधानोऽपि दृश्यते । यथा - शाकस्य लेशः, शाकप्रति । कुत्रचित्तु उभयपदार्थप्रधानोऽपि द्रष्टुं शक्यते । यथा - उन्मत्ता गङ्गा यस्मिन् तत्, उन्मत्तगङ्गम् । एवं लोहितगङ्गम् । अत एव प्रायेण इत्युक्तम् ।

३. **तत्पुरुषसमासः–** तत्पुरुषसमासे प्रायेण उत्तरपदार्थस्य प्राधान्यं भवति । यथा - राजपुरुषः । अत्र उत्तरस्थस्य'पुरुष' इति पदस्य अर्थस्य प्रधान्यं वर्तते । प्रायेणेति कथनात् कुत्रचित् पूर्वपदार्थस्य कुत्रचित्तु अन्यपदार्थस्य प्राधान्यमपि द्रष्टुं शक्यत इति बोध्यम् । यथा - पिप्पल्या अर्धम्, अर्धपिप्पली । अत्र पूर्वस्थस्य अर्धशब्दस्य प्राधान्यं वर्तते । तथा च'पञ्चानां तन्त्राणां समाहारः, पञ्चतन्त्रम्' अत्र अन्यपदार्थसमाहारस्य प्राधान्यम् । तत्पुरुष समासः पुनर्द्विविधः- व्यधिकरणः, समानाधिकरणश्च । यत्र विरुद्धविभक्तिकयोः पदयोः समासः स व्यधिकरणतत्पुरुषः । स च द्वितीयादिभेदेन अनेकविधः । समानविभक्तिकपदयोः पदानां वा विशेष्यविशेषणभावसम्बन्धे समासः समानाधिकरणतत्पुरुषः, स च 'कर्मधारयः' इति नाम्ना प्रसिद्धः । तद्यथा - नीलञ्च तदुत्पलम्, नीलोत्पलम् । सङ्ख्यापूर्वकसमाहारतत्पुरुषस्तु द्विगुसमासः । यथा - पञ्चानां पात्राणां समाहारः, पञ्चपात्रम् ।

४. **बहुव्रीहिसमासः–** यत्र अन्यस्य पदार्थस्य प्राधान्यं स बहुव्रीहिसमासः । अत्र अस्ययस्याद्यन्यपदार्थस्य प्राधान्यं भवति । यथा - पीतम् अम्बरं यस्य सः, पीताम्बरः ।

अत्र न च पूर्वपदार्थस्य न वोत्तरपदस्यार्थस्य प्राधान्यं वर्तते अपि तु अन्यपदार्थस्य प्राधान्यं वर्तते । पीताम्बरो विष्णुरिति । प्रायेणेति कथनात् कुत्रचिदुभयपदार्थप्रधानोऽपि भवतीति बोध्यम् । यथा - द्वौ वा त्रयो वा, द्वित्राः । बहुव्रीहिसमासश्च द्विपदानेकपदादिभेदेन अनेकविधः ।

५. **द्वन्द्वसमासः-** यत्र उभयपदार्थस्य प्राधान्यं भवति स द्वन्द्वसमासः । यथा - हरिश्च हरश्च, हरिहरौ । द्वन्द्वसमासश्च द्विविधः- इतरेतरयोगः, समाहारश्च । 'ईशश्च कृष्णश्च, ईशकृष्णौ' इतीतरेतरयोगद्वन्द्वः । समाहारद्वन्द्वस्तु 'मुखं च नासिका च, मुखनासिकम्' इति ।

## केवलसमासप्रकरणम्

पदविधौ सामर्थ्यनिरूपणपरिभाषासूत्रम्-

**समर्थः पदविधिः २ । १ । १**

**पदसम्बन्धी यो विधिः स समर्थाश्रितो बोध्यः ।**

(समर्थः, पदविधिः)

***सरलार्थः-*** *व्याकरणशास्त्रे पदविधयः समर्थाश्रिताः भवन्ति । तेन एकार्थीभावरूपसामर्थ्यो यत्र भवति, तत्रैव समासविधयः प्रवर्तन्ते ।*

अधिकारसूत्रम् -

**प्राक्कडारात्समासः २ । १ । ३**

**कडाराः कर्मधारय इत्यतः प्राक् समास इत्यधिक्रियते ।**

(कडारात्, प्राक्, समासः)

***सरलार्थः-*** *कडाराः कर्मधारयः इत्यतः प्राक् समासः इति पदमनुवर्तते इत्यर्थः ।*

समाससंज्ञाविधायकं सूत्रम्-

**सह सुपा २ । १ । ४**

**सुप् सुपा सह वा समस्यते । समासत्वात्प्रातिपदिकत्वेन सुपो लुक् । पदार्थाभिधानं वृत्तिः । कृत्तद्धितसमासैकशेषसनाद्यन्तधातुरूपाः पञ्च वृत्तयः । वृत्त्यर्थावबोधकं वाक्यं विग्रहः । स च लौकिकोऽलौकिकश्चेति द्विधा । तत्र पूर्वं भूत इति लौकिकः । 'पूर्व अम् भूत सु' इत्यलौकिकः । भूतपूर्वः । भूतपूर्वे चरडिति निर्देशाद् भूतेत्यस्य पूर्वनिपातः ।**

(समर्थः पदविधिः, सुप्, सुपा, सह, समासः)

***सरलार्थः***– *समर्थसुबन्तं समर्थसुबन्तेन सह समस्यते ।*

*व्याकरणशास्त्रे कृदन्त-तद्धितान्त-समास-एकशेष-सनाद्यन्तधातुरूपाणामर्थस्य बोधकं वाक्यं विग्रह इत्युच्यते । स च द्विधा - लौकिकः, अलौकिकश्च । लोके प्रयोगार्हः साधुर्लौकिकः । यथा - पूर्वं भूतः इति । लोके प्रयोगानर्हः प्रक्रियानिर्वाहाय एव प्रदर्शितोऽसाधुरलौकिकः । यथा - पूर्व+अम्+भूत+सु इति । समासानन्तरं "कृत्तद्धितसमासाश्च" इति प्रातिपदिकसंज्ञा भवति, ततः "सुपो धातुप्रातिपदिकयोः" इति सुपो लुग्भवति । "भूतपूर्वे चरट्" इति सूत्रनिर्देशात् (तत्र भूतशब्दस्य पूर्वप्रयोगात्) भूतशब्दस्य पूर्वप्रयोगो भवति । एकदेशविकृतमनन्यवदिति न्यायात् समस्तशब्दस्य प्रातिपदिकत्वात् तस्मात् स्वादय उत्पद्यन्ते ।*

**वा. इवेन समासो विभक्त्यलोपश्च । वागर्थौ इव वागर्थाविव ।**

***सरलार्थः***– *समर्थं सुबन्तम् 'इव' इति शब्देन सह विकल्पेन समस्यते, विभक्तेरलोपश्च भवतिः ।*

*'वाक् च अर्थश्च' इति विग्रहे द्वन्द्वसमासेन 'वागर्थौ' इति सिद्ध्यति । 'वागर्थौ इव' इति लौककविग्रहे 'वागर्थ+औ+इव' इत्यलौकिकविग्रहे प्रकृतवार्तिकेन समासे, समासत्वात् प्रातिपदिकसंज्ञायां सुब्लुकि प्राप्ते, प्रकृतवार्तिकेनैव तस्य निषेधे, तेन सुपोऽलुकि, वृद्धौ 'वागर्थौ इव' इत्यवस्थायाम् औकारस्य स्थाने आवादेशे 'वागर्थाविव' इति जाते, तस्य एकदेशविकृतन्यायेन प्रातिपदिकत्वेन सौ, अव्ययत्वात् विभक्तेर्लुकि 'वागर्थाविव' इति सिद्ध्यति ।*

## प्रयोगसिद्धिप्रकारः

### भूतपूर्वः

'पूर्वं भूतः' इति लौकिकविग्रहे 'पूर्व+अम्+भूत+सु' इत्यलौकिकविग्रहे "सह सुपा" इति सूत्रेण समासे, समासत्वात् "कृत्तद्धितसमासाश्च" इति सूत्रेण प्रातिपदिकसंज्ञायां "सुपो धातुप्रातिपदिकयोः" इति सूत्रेण सुपो लुकि 'पूर्व भूत' इति जाते "भूतपूर्वे चरट्" इति निर्देशाद् भूतशब्दस्य पूर्वनिपाते 'भूतपूर्व' इति जाते, एकदेशविकृतमनन्यवदिति न्यायात् तस्य एकदेशविकृतन्यायेन प्रातिपदिकत्वेन सौ, सकारस्य रुत्वे विसर्गे 'भूतपूर्वः' इति रूपं सिद्ध्यति ।

### अभ्यासार्थाः प्रश्नाः

१. **"समर्थः पदविधिः", "सह सुपा" इत्यनयोः सूत्रयोरर्थं लिखत ।**

२. **प्रश्नानामुत्तराणि देयानि**

(क) किं नाम समासत्वम् ?

(ख) समासः कतिविधः ? सोदाहरणं तस्य भेदान् लिखत ।

(ग) केवलसमासः कः ?

(घ) कस्मिन् समासे उभयपदार्थस्य प्राधान्यम् ?

(ङ) कर्मधारयसमासस्य एकमुदाहरणं लिखत ।

(च) 'राजपुरुषः' इत्यत्र कः समासः ?

(छ) कस्मिन् समासेऽन्यपदार्थस्य प्राधान्यं भवति ?

(ज) कीदृशस्य तत्पुरुषसमासस्य नाम द्विगुः ?

(झ) 'अधिहरि' इत्यत्र कस्य पदार्थस्य प्राधान्यं वर्तते ?

(ञ) कस्य केन सह समासो भवति ?

(ट) विग्रहस्य कति भेदाः सन्ति ? के च ते ?

(ठ) समासे जाते प्रातिपदिकसंज्ञाविधायकं सूत्रं लिखत ।

(ड) समासे जाते केन सूत्रेण सुपो लुग्भवति ?

(ढ) "इवेन वा०" इति वार्तिकं पूरयित्वा सोदाहरणं तस्यार्थं लिखत ।

(ण) 'भूतपूर्व' इत्यत्र भूतशब्दस्य पूर्वप्रयोगे कारणं किम् ?

**३. भूतपूर्वः, श्रुतपूर्वः, वागर्थाविव, इति त्रीणि पदानि प्रयुज्य प्रत्येकं त्रीणि वाक्यानि रचयत ।**

**४. श्रुतपूर्वः, दृष्टपूर्वम्, ज्ञातपूर्वा, इति समस्तपदानां विग्रहं प्रदर्शयत ।**

**५. विशेष्यपदेन सह विशेषणपदस्य मेलनं कुरुत**

| | |
|---|---|
| भूतपूर्वाः | स्वरः |
| श्रुतपूर्वः | कथा |
| कृतपूर्वम् | प्रधानमन्त्रिणः |
| दृष्टपूर्वम् | कार्यम् |
| गतपूर्वम् | चलचित्रम् |
| कथितपूर्वा | वनम् |

**६. अधस्तनप्रयोगाणां सिद्धिप्रक्रियां दर्शयत**

श्रुतपूर्वः, भूतपूर्वः, वागर्थाविव, कथितपूर्वः, दृष्टपूर्वः ।

७. **लौकिकालौकिकविग्रहयोः सोदाहरणं परिचयं देयम् ।**

८. **का वृत्तिः ? वृत्तयः कति सन्ति ? काश्च ताः ?**

## अनुप्रयोगः

१. **अधो लिखितानि वाक्यानि पठत**

(क) मया **श्रुतपूर्वा** कथा त्वां श्रावयामि ।

(ख) **वागर्थाविव** नित्यमिलितौ पार्वतीपरमेश्वरौ शब्दार्थज्ञानप्रदानसमर्थौ स्तः ।

(ग) अस्माकं विद्यालये **भूतपूर्व**शिक्षामन्त्रिणा महोत्सवः उद्घाटितः ।

(घ) अयं स्वरः **श्रुतपूर्व** इव अनुभूयते ।

२. **केवलसमासयुक्तानि पदानि प्रयुज्य एकमनुच्छेदं लिखित्वा शिक्षकं दर्शयत ।**

३. **समुचितं विशेष्यपदं योजयत**

| | | | |
|---|---|---|---|
| दृष्टपूर्वा | ................. | गतपूर्वम् | ................. |
| भूतपूर्वः | ................. | कथितपूर्वा | ................. |
| श्रुतपूर्वः | ................. | ज्ञातपूर्वम् | ................. |

इति केवलसमासः ।१।

# अथाव्ययीभावसमासः

अधिकारसूत्रम्-

**अव्ययीभावः २ । १ । ५**

**अधिकारोऽयं प्राक् तत्पुरुषात् ।**

***सरलार्थः***- *अस्मात् सूत्रादूर्ध्वं 'तत्पुरुषः २ । १ । २२ ' इति सूत्रात् प्राग् यानि समासविधायकानि सूत्राणि तेषु 'अव्ययीभावः' इति संज्ञापदमुपतिष्ठते ।*

अव्ययीभावसमासविधायकं संज्ञासूत्रम्-

**अव्ययं विभक्तिसमीपसमृद्धिव्यृद्ध्यर्थाभावात्ययासम्प्रतिशब्दप्रादुर्भावपश्चाद्यथानुपूर्व्ययौगपद्य-सादृश्य-सम्पत्तिसाकल्यान्तवचनेषु २ । १ । ६**

**विभक्त्यर्थादिषु वर्तमानमव्ययं सुबन्तेन सह नित्यं समस्यते सोऽव्ययीभावः । प्रायेणा विग्रहो नित्यसमासः । प्रायेणास्वपदविग्रहो वा । विभक्तौ हरि ङि अधि इति स्थिते ।**

(विभक्तिसमीपसमृद्धिव्यृद्ध्यर्थाभावात्ययासम्प्रतिशब्दप्रादुर्भावपश्चाद्यथानुपूर्व्ययौगपद्यसादृश्य-सम्पत्तिसाकल्यान्तवचनेषु, अव्ययम्, सुप्, सुपा सह, समासः)

***सरलार्थः***- *विभक्त्यर्थे, समीपार्थे, समृद्ध्यर्थे, व्यृद्ध्यर्थे, अर्थाभावार्थे, अत्ययार्थे, असम्प्रत्यर्थे, शब्दप्रादुर्भावार्थे, पश्चादर्थे, यथार्थे, आनुपूर्व्यार्थे, यौगपद्यार्थे, सादृश्यार्थे, सम्पत्त्यर्थे, साकल्यार्थे, समाप्त्यर्थे च वर्तमानमव्ययं सुबन्तसमर्थेन सह नित्यं समस्यते, सोऽव्ययीभावसंज्ञकश्च भवति ।*

*विभक्त्यर्थे वर्तमानस्य 'अधि' इत्यव्ययस्य हरिशब्देन सह समासे 'हरि ङि अधि' इति स्थिते-*

उपसर्जनसंज्ञाविधायकं सूत्रम्-

**प्रथमानिर्दिष्टं समास उपसर्जनम् २ । २ । ४३**

**समासशास्त्रे प्रथमानिर्दिष्टमुपसर्जनसंज्ञं स्यात् ।**
(समासे, प्रथमानिर्दिष्टम्, उपसर्जनम्)

***सरलार्थः***- *समासविधायकसूत्रे प्रथमान्तपदेन निर्दिष्टं अलौकिकविग्रहवाक्यस्थं सुबन्तमुपसर्जन-संज्ञं भवति ।*

*पूर्वपदनिर्धारकं परिभाषासूत्रम्*

**उपसर्जनं पूर्वम्** २ । २ । ३०

**समासे उपसर्जनं प्राक् प्रयोज्यम् । इत्यधः प्राक् प्रयोगः । सुपो लुक् । एकदेशविकृतस्यानन्यत्वात्प्रातिपदिकसंज्ञायां स्वाद्युत्पत्तिः । अव्ययीभावश्चेत्यव्ययत्वात्सुपो लुक् । अधिहरि ।**

(समासे, उपसर्जनम्, पूर्वम्)

***सरलार्थः-*** *समासे उपसर्जनसंज्ञकं पदं प्राक्प्रयोक्तव्यम् । अनेन सूत्रेण उपसर्जनसंज्ञकस्य अधिशब्दस्य पूर्वप्रयोगो भवति । समासत्वाद् 'हरि ङि अधि' इत्यस्य 'कृत्तद्धितसमासाश्च' इति प्रातिपदिकसंज्ञा भवति, ततः 'सुपो धातुप्रातिपदिकयोः' इति सुपो लुक् । 'एकदेशविकृतमनन्यवत्' इति नियमेन प्रातिपदिकत्वात् स्वादयः उत्पद्यन्ते । 'अव्ययीभावश्च' इति अव्ययत्वाद् 'अव्ययादाप्सुपः' इति सुपो लुक् ।*

*'हरौ' इति लौकिकविग्रहे, 'हरि+ङि+अधि' इत्यलौकिकविग्रहे 'अव्ययं विभक्ति०' इत्यादिना सूत्रेण सप्तमीविभक्त्यर्थे वर्तमानस्य 'अधि' इत्यव्ययस्य सप्तम्यन्तहरिशब्देन सह समासे, समासविधायके 'अव्ययं विभक्ति०' इति सूत्रे 'अव्ययम्' इति प्रथमान्तपदेन 'अधि' इत्यस्य निर्दिष्टत्वात् 'प्रथमानिर्दिष्टं समास उपसर्जनम्' इत्यनेन 'अधि' इत्यस्योपसर्जनसंज्ञायाम् 'उपसर्जनं पूर्वम्' इत्यनेन उपसर्जनसंज्ञकस्य 'अधि' शब्दस्य पूर्वप्रयोगे 'अधि हरि ङि' इति जाते, समासत्वात् 'कृत्तद्धितसमासाश्च' इति प्रातिपदिकसंज्ञायां, 'सुपो धातुप्रातिपदिकयोः' इति सुपो लुकि, 'अधिहरि' इत्यस्य 'एकदेशविकृतमनन्यवत्' इति परिभाषया प्रातिपदिकत्वात् ततः सौ, 'अव्ययीभावश्च' इति 'अधिहरि' इत्यस्याव्ययत्वाद् 'अव्ययादाप्सुपः' इति सोर्लुकि, 'अधिहरि' इति सिद्ध्यति । अव्ययत्वात् सर्वासु विभक्तिषु, सर्वेषु वचनेषु च 'अधिहरि' इत्येव रूपम् ।*

नपुंसकलिङ्गविधायकं विधिसूत्रम्-

**अव्ययीभावश्च** २ । ४ । १८

**अयं नपुंसकं स्यात् ।**

(अव्ययीभावः, च, नपुंसकम्)

***सरलार्थः-*** *अव्ययीभावसमाससंज्ञकः शब्दः नपुंसकलिङ्गभाग् भवति ।*

सुपो लुकं निषिध्य अमादेशविधायकं विधिसूत्रम् -

**नाव्ययीभावादतोऽम्त्वपञ्चम्याः** २ । ४ । ८३

**अदन्तादव्ययीभावात्सुपो न लुक्, तस्य पञ्चमीं विना अमादेशश्च स्यात् । गाः पातीति**

**गोपास्तस्मिन्नित्यधिगोपम् ।**

(अतः, अव्ययीभावाद्, सुपः, न, लुक्, अपञ्चम्याः तु अम्)

***सरलार्थः-*** *ह्रस्व-अकारान्ताद् अव्ययीभावसमासात् परस्य सुपो लुग् न भवति, परन्तु पञ्चमीविभक्तिं विना अन्येषां सुब्विभक्तीनां स्थाने अमादेशो भवति । गाः पातीत्यर्थे गोपाशब्दः । गोपाशब्दस्य ङिविभक्तौ-गोपि । 'गोपि' इति लौकिकविग्रहे, 'गोपा ङि अधि' इत्यत्र 'अव्ययं विभक्ति..' इत्यादिना विभक्त्यर्थे वर्तमानस्य 'अधि' इत्यव्ययस्य 'गोपा ङि' इत्यनेन सह समासे, उपसर्जनत्वाद् अधिशब्दस्य पूर्वप्रयोगे, समासत्वात् प्रातिपदिकसंज्ञायां सुपो लुकि, 'अधिगोपा' इत्यस्य 'अव्ययीभावश्च' इति नपुङ्सकत्वाद् 'ह्रस्वो नपुंसके प्रातिपदिकस्य' इति ह्रस्वे, 'अधिगोप', तस्मात् सौ, अव्ययत्वाद् 'अव्ययादाप्सुपः' इति सोर्लुकि प्राप्ते तं प्रबाध्य 'नाव्ययीभावात्०' इति सोरमि, पूर्वरूपे 'अधिगोपम्' इति ।*

सुपो लुकं निषिध्य विभाषया अमादेशविधायकं विधिसूत्रम्-

**तृतीयासप्तम्योर्बहुलम् २ । ४ । ८४**

**अदन्तादव्ययीभावात्तृतीयासम्तम्योर्बहुलमम्भावः स्यात् । अधिगोपम्, अधिगोपेन, अधिगोपे वा । कृष्णस्य समीपम् उपकृष्णम् । मद्राणां समृद्धिः सुमद्रम् । यवनानां व्यृद्धिर्दुर्यवनम् । मक्षिकाणामभावो निर्मक्षिकम् । हिमस्यात्ययोऽतिहिमम् । निद्रा सम्प्रति न युज्यत इत्यतिनिद्रम् । हरिशब्दस्य प्रकाश इतिहरि । विष्णोः पश्चादनुविष्णु । योग्यतावीप्सापदार्थानतिवृत्तिसादृश्यानि यथार्थः । रूपस्य योग्यमनुरूपम् । अर्थमर्थं प्रति प्रत्यर्थम् । शक्तिमनतिक्रम्य यथाशक्ति ।**

(अतः, अव्ययीभावाद्, सुपः, न, लुक्, तृतीयासप्तम्योः, तु बहुलम्, अम्)

***सरलार्थः-*** *ह्रस्व-अकारान्ताद् अव्ययीभावसमासात् परयोः तृतीयाविभक्तेः सप्तमीविभक्तेश्च लुक् न किन्तु तयोः स्थाने विकल्पेन अमादेशो भवति ।*

*पूर्वनिष्पन्नाद् अधिगोपशब्दात् तृतीयाया एकवचने टाप्रत्यये, लुकं बाधित्वा 'नाव्ययीभावात्० ' इति नित्यमेव अमादेशे प्राप्ते, तं प्रबाध्य 'तृतीयासप्तम्योर्बहुलम्' इति वैकल्पिके अमि, पूर्वरूपे 'अधिगोपम्' इति । अमभावपक्षे तु 'टा' इत्यस्येनादेशे, गुणे 'अधिगोपेन' इति । एवमेव सम्तम्यामपि । अधिगोपशब्दस्य रूपाणि -*

*तृतीयाविभक्तौ- अधिगोपम्/अधिगोपेन अधिगोपम्/अधिगोपाभ्याम् अधिगोपम्/अधिगोपैः*

*पञ्चमीविभक्तौ- अधिगोपात्-द् अधिगोपाभ्याम् अधिगोपेभ्यः*

*सम्तमीविभक्तौ- अधिगोपम्/अधिगोपे अधिगोपम्/अधिगोपयोः अधिगोपम्/अधिगोपेषु*

*अन्येषु विभक्तिषु तु 'अधिगोपम्' इत्येव ।*

***समीपार्थे*** *उपकृष्णम् । 'कृष्णस्य समीपम्' इति विग्रहे (कृष्ण ङस् उप) पूर्ववद् उपकृष्णम् । उपकृष्णम्, उपकृष्णेन, उपकृष्णे वा (अधिगोपम्वत्) । एवमेव -*

***समृद्ध्यर्थे*** *सुमद्रम् । 'मद्राणां समृद्धिः' इति विग्रहे (मद्र आम् सु) - सुमद्रम् ।*

***व्यृद्ध्यर्थे*** *दुर्यवनम् । 'यवनानां व्यृद्धिः' इति विग्रहे (यवन आम् दुर्) - दुर्यवनम् ।*

***अभावार्थे*** *निर्मक्षिकम् । 'मक्षिकाणाम् अभावः' इति विग्रहे (मक्षिका आम् निर्) - निर्मक्षिकम् ।*

***अत्ययार्थे*** *अतिहिमम् । 'हिमस्य अत्ययः' इति विग्रहे (हिम ङस् अति) - अतिहिमम् ।*

***असम्प्रत्यर्थे*** *अतिनिद्रम् । 'निद्रा सम्प्रति न युज्यते' इति विग्रहे (निद्रा सु अति) - अतिनिद्रम् ।*

***शब्दप्रादुर्भावार्थे*** *इतिहरि । 'हरिशब्दस्य प्रकाशः' इति विग्रहे (हरि ङस् इति) - इतिहरि ।*

***पश्चादर्थे*** *अनुविष्णु । 'विष्णो पश्चात्' इति विग्रहे (विष्णु ङस् अनु) - अनुविष्णु ।*

***यथा****शब्दस्य चत्वारः अर्था भवन्ति । ते यथा - योग्यता, वीप्सा, पदार्थानतिवृत्तिः, सादृश्यम् । अतः* ***यथार्थे*** *चत्वारि पृथगुदाहरणानि दीयन्ते -*

***योग्यतार्थे*** *अनुरूपम् । 'रूपस्य योग्यम्' इति विग्रहे (रूप ङस् अनु) - अनुरूपम् ।*

***वीप्सार्थे*** *प्रत्यर्थम् । 'अर्थम् अर्थम् प्रति' इति विग्रहे (अर्थ अम् प्रति) - प्रत्यर्थम् ।*

***पदार्थानतिवृत्त्यर्थे*** *यथाशक्ति । 'शक्तिम् अनतिक्रम्य' इति विग्रहे (शक्ति अम् यथा) - यथाशक्ति ।*

***सादृश्यार्थे*** *सहरि । 'हरेः सादृश्यम्' इति विग्रहे 'हरि टा सह' इत्यत्र सादृश्यार्थे वर्तमानस्य 'सह' इत्यव्ययस्य 'हरि टा' इत्यनेन सह समासे, उपसर्जनत्वात् सहशब्दस्य पूर्वप्रयोगे, समासत्वात् प्रातिपदिकत्वेन सुपो लुकि, 'सहहरि' इति जाते -*

सहस्य स- इत्यादेशविधायकं विधिसूत्रम्-

**अव्ययीभावे चाकाले ६ । ३ । ८१**

**सहस्य सः स्यादव्ययीभावे न तु काले । हरेः सादृश्यं सहरि । ज्येष्ठस्यानुपूर्व्येणेत्यनुज्येष्ठम् । चक्रेण युगपत् सचक्रम् । सदृशः सख्या ससखि । क्षत्राणां सम्पत्तिः सक्षत्रम् । तृणमप्यपरित्यज्य सतृणमत्ति । अग्निग्रन्थपर्यन्तमधीते साग्नि ।**

(अव्ययीभावे, सहस्य, स,:, च अकाले)

***सरलार्थः-*** *'सह' शब्दस्य स्थाने अव्ययीभावसमासे 'स' आदेशो भवति, कालार्थे तु न भवति ।*

*'सहहरि' इत्यस्य अव्ययीभावत्वात् प्रकृतसूत्रेण 'सह' इत्यस्य स्थाने 'स' आदेशे, स्वादिकार्ये, 'सहरि' इति रूपम् । एवमेव -*

***अनुपूर्व्यार्थे** अनुज्येष्ठम् । 'ज्येष्ठस्य आनुपूर्वेण' इति विग्रहे (ज्येष्ठ ङस् अनु) - अनुज्येष्ठम् ।*

***यौगपद्यार्थे** सचक्रम् । 'चक्रेण युगपत्' इति विग्रहे (चक्र टा सह) - सचक्रम् ।*

***सादृश्यार्थे** ससखि । 'सदृशः सख्या' इति विग्रहे (सखि टा सह) - ससखि ।*

***सम्पत्त्यर्थे** सक्षत्रम् । 'क्षत्राणां सम्पत्तिः' इति विग्रहे (क्षत्र भिस् सह) - सक्षत्रम् ।*

***साकल्यार्थे** सतृणम् । 'तृणमप्यपरित्यज्य' इति विग्रहे (तृण टा सह) - सतृणम् ।*

***समाप्त्यर्थे** साग्नि । 'अग्निग्रन्थपर्यन्तम् अधीते' इति विग्रहे (अग्नि टा सह) - साग्नि ।*

समाससंज्ञाविधायकं सूत्रम्-

**नदीभिश्च २ । १ । २०**

**नदीभिः सह सङ्ख्या समस्यते । (समाहारे चायमिष्यते ) । पञ्चगङ्गम् । द्वियमुनम् ।**

(नदीभिः,सुपा, च, सह, सङ्ख्या, सुप्, समासः, अव्ययीभावश्च)

***सरलार्थः–** सङ्ख्यावाचिसमर्थं सुबन्तं नद्यर्थकसमर्थसुबन्तैः सह समस्यते सोऽव्ययीभावः । अयं समासः समाहारे अर्थे गम्यमाने एव भवति ।*

***पञ्चगङ्गम्** – पञ्चानां गङ्गानां समाहारः इति लौकिकविग्रहे पञ्चन्+जस् गो+जस् इत्यलौकिकविग्रहे अनेन सूत्रेण समाससंज्ञायां सङ्ख्या इति प्रथमान्तपदेन निर्दिष्टत्वात् पञ्चन् इत्यस्य पूर्वपदप्रयोगे समासत्वेन प्रातिपदिकत्वात् सुपो लुकि पञ्चन्गङ्गा इति जाते प्रत्ययलक्षणेन पञ्चन्नित्यस्य पदत्वात् नस्य लोपे पञ्चगङ्गा इत्यस्य "अव्ययीभावश्च" इति नपुंसकत्वेन "ह्रस्वो नपुंसके प्रातिपदिकस्य"इति सूत्रेण ह्रस्वादेशे एकदेशविकृतस्य अनन्यत्वात् प्रातिपदिकत्वेन सुबुत्पत्तौ पञ्चगङ्ग +सु इति जाते अव्ययीभावसमासस्य अव्ययत्वात् सोर्लुकि प्राप्ते "नाव्ययीभावा.."इति लुकः निषेधे सोरमादेशे च पञ्चगङ्ग अम् इति जाते "अमि पूर्वः" इति सूत्रेण पूर्वरूपे पञ्चगङ्गम् इति रूपं सिद्ध्यति ।*

*एवमेव **द्वयोः यमुनयोः समाहारः** इत्यर्थे **द्वियमुनम्** इति च बोध्यम् ।*

अधिकारसूत्रम्-

**तद्धिताः ४ । १ । ७६**

**आपञ्चमसमाप्तेरधिकारोऽयम् ।**

***सरलार्थः–** पञ्चमाध्यायसमाप्तिपर्यन्तं तद्धिताः इति पदं प्रतिसूत्रमनुवर्तते ।*

टच्प्रत्ययविधायकं विधिसूत्रम्-

**अव्ययीभावे शरत्प्रभृतिभ्यः ५ । ४ । १०७**

**शरदादिभ्यष्टच् स्यात्समासान्तोऽव्ययीभावे । शरदः समीपमुपशरदम् । प्रतिविपाशम् ।**

(अव्ययीभावे शरत्प्रभृतिभ्यः, टच्, तद्धिताः, समासान्ताः,प्रत्ययः, परश्च)

***सरलार्थः-*** *शरदादिगणपठितेभ्यः प्रातिपदिकेभ्यः परः तद्धितसंज्ञकः समासान्तः टच्प्रत्ययो भवति । टकारचकारौ इतौ ।*

***उपशरदम्*** = *शरदः समीपमिति लौकिकविग्रहे "शरद् ङस् उप" इत्यलौकिकविग्रहे समीपार्थे विद्यमानस्य उप इत्यव्ययस्य शरत्शब्देन सह "अव्ययं विभक्ति..... " इत्यादिना समाससंज्ञायाम, उप इत्यस्य पूर्वप्रयोगे समासत्वात् प्रातिपदिकत्वेन सुपो लुकि उपशरद् इति जाते अनेन सूत्रेण समासान्ते टच्प्रत्ययेऽनुबन्धलोपे वर्णसम्मेलने एकदेशविकृतस्यानन्यत्वात् प्रातिपदिकत्वेन स्वाद्युत्पत्तौ अव्ययीभावसमासस्य अव्ययत्वाद् सोर्लुकि प्राप्ते "नाव्ययीभावात्..." इत्यादिना लुकः निषेधे सोरमादेशे च "अमि पूर्वः " इति पूर्वरूपे उपशरदम् इति रूपं सिद्ध्यति ।*

*एवमेव विपाशं विपाशं प्रति इति लौकिकविग्रहे "विपाश् अम् प्रति" इति अलौकिकविग्रहे वीप्सार्थे समासः शेषं पूर्ववद् ज्ञेयम् ।*

**(जराया जरश्च) । उपजरसमित्यादि**

***सरलार्थः-*** *जराशब्दान्ताद् अव्ययीभावात् तद्धितसंज्ञकः समासान्तः टच्प्रत्ययो भवति, सहैव जराशब्दस्य स्थाने जरस् इत्यादेशश्च भवति ।*

***उपजरसम्*** *- जरायाः समीपमिति लौकिकविग्रहे "जरा ङस् उप" इत्यलौकिकविग्रहे समीपार्थे "अव्ययं विभक्तिसमीप...." इत्यादिना सूत्रेण समाससंज्ञायां पूर्ववत्कार्येण उपजरा इति जाते अनेन वार्त्तिकेन समासान्ते टच्प्रत्यये जरायाः स्थाने जरसादेशे च कृते उपजरस इति जाते शेषं पूर्ववद् ज्ञेयम् ।*

टच्प्रत्ययविधायकं विधिसूत्रम्-

**अनश्च ५ । ४ । १०८**

**अन्नन्तादव्ययीभावाट्टच् स्यात् ।**

(अनः, अव्ययीभावे, टच्, तद्धिताः, समासान्ताः,प्रत्ययः, परश्च)

***सरलार्थः-*** *अन्नन्ताद् अव्ययीभावात् समासान्तः टच्प्रत्ययो भवति ।*

भस्य टेर्लोपविधायकं विधिसूत्रम्-

**नस्तद्धिते ६ । ४ । १४४**

**नान्तस्य भस्य टेर्लोपस्तद्धिते । उपराजम् । अध्यात्मम् ।**

(नः, भस्य, अङ्गस्य, टेः, लोपः, तद्धिते)

***सरलार्थः-*** *नान्तस्य भसंज्ञकस्याङ्गस्यावयवस्य टेः लोपो भवति तद्धितसंज्ञके प्रत्यये परतः ।*

***उपराजम्*** *= राज्ञः समीपम् इति लौकिकविग्रहे " राजन् ङस् उप" इत्यलौकिकविग्रहे "अव्ययं विभक्तिसमीप...." इत्यादिना सूत्रेण समाससंज्ञायां उप इत्यस्य उपसर्जनसंज्ञायां पूर्वप्रयोगे च समासत्वात् प्रातिपदिकत्वेन सुपो लुकि उपराजन् इति जाते "अनश्च" इति सूत्रेण समासान्ते टच्प्रत्ययेऽनुबन्धलोपे उपराजन् अ इति जाते "यचि भम्" इति सूत्रेण भसंज्ञायाम् "नस्तद्धिते" इति सूत्रेण टेर्लोपे वर्णसम्मेलने उपराज इत्यस्य एकदेशविकृतस्यानन्यत्वात् प्रातिपदिकंसंज्ञायां स्वाद्युत्पत्तौ पूर्ववत् कार्येषु उपराजम् इति रूपं सिद्धयति ।*

*एवमेव आत्मनि इति लौकिकविग्रहे "आत्मन् ङि अधि" अलौकिकविग्रहे पूर्ववत् प्रक्रियायां सत्याम् अधि आत्मन् इति जाते यणि अध्यात्मन् इति जाते "अनश्च" इति सूत्रेण समासान्ते टच्प्रत्ययेऽनुबन्धलोपे अध्यात्मन् अ इति जाते "यचि भम्" इति सूत्रेण भसंज्ञायाम् "नस्तद्धिते" इति सूत्रेण टेर्लोपे वर्णसम्मेलने अध्यात्म इत्यस्य एकदेशविकृतस्यानन्यत्वात् प्रातिपदिकंसंज्ञायां स्वाद्युत्पत्तौ पूर्ववत् शेषेषु कार्येषु अध्यामम् इति रूपं सिद्धयति ।*

विभाषया टच्प्रत्ययविधायकं विधिसूत्रम्-

**नपुंसकादन्यतरस्याम् ५ । ४ । १०९**

**अन्नतं यत् क्लीबं तदन्तादव्ययीभावाट्टज्वा स्यात् । उपचर्मम् । उपचर्म ।**

(नपुंसकाद्, अनः, अव्ययीभावे, अन्यतरस्याम्, टच्, तद्धिताः, समासान्ताः, प्रत्ययः, परश्च)

***सरलार्थः-*** *नपुंसकवाचकं यद् अन्नन्तं प्रादिपदिकं तदन्तादव्ययीभावात् समासान्तः टच्प्रत्ययो विभाषया भवति ।*

***उपचर्म/ उपचर्मम्*** *= चर्मणः समीपमिति लौकिकविग्रहे, "चर्मन् ङस् उप" इत्यलौकिकविग्रहे पूर्ववद् समासादिकार्येषु सत्सु उपचर्मन् अ इति जाते अनेन सूत्रेण विभाषया समासान्ते टच्प्रत्ययेऽनुबन्धलोपे "नस्तद्धिते" इति सूत्रेण टेर्लोपे वर्णसम्मेलने उपचर्म इति जाते एकदेशविकृतस्यानन्यत्वात् प्रातिपदिकत्वेन स्वाद्युत्पत्तौ अव्ययीभावसमासस्य अव्ययत्वाद् सोर्लुकि प्राप्ते "नाव्ययीभावात्..." इत्यादिना लुकः निषेधे सोरमादेशे च "अमि पूर्वः" इति पूर्वरूपे उपचर्मम् इति रूपं सिद्धयति । टचोऽभावपक्षे उपचर्मन् इत्यस्माद् स्वाद्युत्पत्तौ "अव्ययीभावश्च"*

*अव्ययत्वाद् "अव्ययादाप्सुपः" इति सूत्रेण सुपो लुकि "नलोपः प्रातिपदिकान्तस्य" इति नस्य लोपे उपचर्म इति रूपं ज्ञेयम् ।*

टच्प्रत्ययविधायकं विधिसूत्रम्-

**झयः ५ । ४ । ११९**

**झयन्तादव्ययीभावाट्टज्वा स्यात् । उपसमिधम् । उपसमित्**

(झयः, अव्ययीभावे, अन्यतरस्याम्, टच्, तद्धिताः, समासान्ताः, प्रत्ययः, परश्च)

***सरलार्थः-*** *झप्रत्याहारान्तं यद् प्रादिपदिकं तदन्तादव्ययीभावात् समासान्तः टच्प्रत्ययो विभाषया भवति ।*

*उपसमिधम्/उपसमित् = समिधः समीपमिति लौकिकविग्रहे **"समिध् ङस् उप"** इति अलौकिकविग्रहे समासादिकार्येषु सत्सु उपसमिध् इति जाते अनेन सूत्रेण विभाषया समासान्ते टच्प्रत्ययेऽनुबन्धलोपे वर्णसम्मेलने उपसमिध इति जाते एकदेशविकृतस्यानन्यत्वात् प्रातिपदिकत्वेन स्वाद्युत्पत्तौ अव्ययीभावसमासस्य अव्ययत्वाद् सोर्लुकि प्राप्ते "नाव्ययीभावात्..." इत्यादिना लुकः निषेधे सोरमादेशे च "अमि पूर्वः " इति पूर्वरूपे च उपसमिधम् इति रूपं सिद्धयति ।*

*टचः अभावपक्षे उपसमिध् इत्यस्मात् स्वाद्युत्पत्तौ "अव्ययीभावश्च" इति अव्ययत्वाद् "अव्ययादाप्सुपः" इति सूत्रेण सुपो लुकि "विरामोऽवसानम्" इति सूत्रेण अवसानसंज्ञायां "वाऽवसाने"इति सूत्रेण विभाषया चर्त्वे उपसमित्, चर्त्वाभावे "झलां जशोऽन्ते" इति सूत्रेण जश्त्वे उपसमिद् इति च रूपे सिद्धयतः ।*

। इत्यव्ययीभावः ।

## प्रयोगसिद्धिप्रकारः

### अधिहरि

'हरौ' इति लौकिकविग्रहे, 'हरि+ङि+अधि' इत्यलौकिकविग्रहे 'अव्ययं विभक्ति०' इत्यादिना सूत्रेण सप्तमीविभक्त्यर्थे वर्तमानस्य 'अधि' इत्यव्ययस्य सप्तम्यन्तहरिशब्देन सह समासे, समासविधायके 'अव्ययं विभक्ति०' इति सूत्रे 'अव्ययम्' इति प्रथमान्तपदेन 'अधि' इत्यस्य निर्दिष्टत्वात् 'प्रथमानिर्दिष्टं समास उपसर्जनम्' इत्यनेन 'अधि' इत्यस्योपसर्जनसंज्ञायाम् 'उपसर्जनं पूर्वम्' इत्यनेन उपसर्जनसंज्ञकस्य 'अधि' शब्दस्य पूर्वप्रयोगे 'अधि हरि ङि' इति जाते, समासत्वात् 'कृत्तद्धितसमासाश्च' इति प्रातिपदिकसंज्ञायां, 'सुपो धातुप्रातिपदिकयोः' इति सुपो लुकि, 'अधिहरि' इति जाते 'एकदेशविकृतमनन्यवत्' इति परिभाषाया नियमेन प्रातिपदिकत्वात् ततः सौ, 'अव्ययीभावश्च' इति 'अधिहरि' इत्यस्याव्ययत्वाद् 'अव्ययादाप्सुपः' इति सोर्लुकि, 'अधिहरि' इति रूपं सिद्धम् ।

## अधिगोपम्

'गोपि' इति लौकिकविग्रहे, 'गोपा ङि अधि' इत्यलौकिकविग्रहे 'अव्ययं विभक्ति०' इत्यादिना विभक्त्यर्थे वर्तमानस्य 'अधि' इत्यव्ययस्य 'गोपा ङि' इत्यनेन सह समासे, उपसर्जनत्वाद् अधिशब्दस्य पूर्वप्रयोगे, समासत्वात् प्रातिपदिकसंज्ञायां सुपो लुकि, 'अधिगोपा' इति जाते 'अव्ययीभावश्च' इति नपुंसकत्वाद् 'ह्रस्वो नपुंसके प्रातिपदिकस्य' इति ह्रस्वे, 'अधिगोप' इति जाते ततः सौ, अव्ययत्वाद् 'अव्ययादाप्सुपः' इति सोर्लुकि प्राप्ते तं प्रबाध्य 'नाव्ययीभावात्०' इति सोरमि, पूर्वरूपे 'अधिगोपम्' इति रूपं सिद्धम् ।

## निर्मक्षिकम्

'मक्षिकाणाम् अभावः' इति लौकिकविग्रहे 'मक्षिका आम् निर्' इत्यलौकिकविग्रहे 'अव्ययं विभक्ति०' इत्यादिना अभावार्थे वर्तमानस्य 'निर्' इत्यव्ययस्य 'गोपा ङि' इत्यनेन सह समासे, उपसर्जनत्वाद् 'निर्'शब्दस्य पूर्वप्रयोगे, समासत्वात् प्रातिपदिकसंज्ञायां सुपो लुकि, 'निर्मक्षिका' इति जाते 'अव्ययीभावश्च' इति नपुंसकत्वाद् 'ह्रस्वो नपुंसके प्रातिपदिकस्य' इति ह्रस्वे, 'निर्मक्षिक' इति जाते ततः सौ, अव्ययत्वाद् 'अव्ययादाप्सुपः' इति सोर्लुकि प्राप्ते तं प्रबाध्य 'नाव्ययीभावात्०' इति सोरमि, पूर्वरूपे 'निर्मक्षिकम्' इति रूपं सिद्धम् ।

### अभ्यासार्थाः प्रश्नाः

१. **अधस्तनसूत्राणामर्थं लिखत**

(क) अव्ययीभावश्च
(ख) उपसर्जनं पूर्वम्
(ग) अव्ययीभावे चाकाले
(घ) तृतीयासप्तम्योर्बहुलम्
(ङ) प्रथमानिर्दिष्टं समास उपसर्जनम्
(च) नदीभिश्च
(छ) नस्तद्धिते

२. **प्रश्नानामुत्तराणि देयानि**

(क) कस्य उपसर्जनसंज्ञा भवति ?
(ख) समासे किं प्राक्प्रयोज्यम् ?
(ग) 'अव्ययं विभक्ति०' इति सूत्रं पूरयत ।
(घ) 'नाव्ययीभावात्०' इति सूत्रं पूरयत ।
(ङ) अव्ययीभावसमासे अव्ययं केन सह समस्यते ?

३. **अधोलिखितानि पदानि प्रयुज्य वाक्यानि रचयत**

निर्मक्षिकम्, उपकृष्णम्, अतिहिमम्, अतिनिद्रम्, सचक्रम्, अनुरूपम्, यथाशक्ति, ससखि, सतृणम्, प्रत्यर्थम्, सहरि, अनुज्येष्ठम्, प्रत्यक्षम्, परोक्षम्, अधिहरि, उपजरसम्, अध्यात्मम् ।

४. **अधस्तनसमस्तपदानां विग्रहं प्रदर्शयत**

प्रतिगृहम्, प्रत्येकम्, सुमद्रम्, अनुगंगम्, निर्हिमम्, अतिनिद्रम्, सचक्रम्, अनुरूपम्, परोक्षम्, निर्मक्षिकम्, प्रत्यक्षम्, सक्षत्रम्, सुमद्रम्, उपकृष्णम्, उपमणिकम्, अधिगोपम्, सवल्कलम्, अनुविष्णु, प्रत्यर्थम्, अध्यात्मम्, पञ्चगङ्गम् ।

५. **अधस्तनविग्रहेषु समस्तपदानि लिखत**

यवनानां व्यृद्धिः, ज्येष्ठस्य आनुपूर्वेण, हरेः पश्चात्, रूपस्य योग्यम्, मद्राणां समृद्धिः, कृष्णस्य समीपम्, हरेः सादृश्यम्, हिमस्य अत्ययः, निद्रा सम्प्रति न युज्यते, हरिशब्दस्य प्रकाशः, सदृशः सख्या, प्रश्नं प्रश्नं प्रति, चक्रेण युगपत्, राज्ञः समीपम्, द्वयोः यमुनयोः समाहारः ।

६. **अधस्तनप्रयोगाणां सिद्धिप्रक्रियां दर्शयत**

अधिहरि, अधिगोपेन, उपकृष्णम्, सुमद्रम्, दुर्यवनम्, अतिहिमम्, प्रत्यर्थम्, सहरि, निर्मक्षिकम्, ससखि, सतृणम्, प्रतिविपाशम्, अध्यात्मम्, उपसमित् ।

७. **विग्रहेन सह समस्तपदानि मेलयत**

| **क** | **ख** |
|---|---|
| अध्यात्मम् | हरेः सादृश्यम |
| ससखि | निद्रा सम्प्रति न युज्यते |
| अतिनिद्रम् | कृष्णस्य समीपम् |
| साग्नि | सदृशः सख्या |
| उपकृष्णम् | ज्येष्ठस्य आनुपूर्वेण |
| अनुज्येष्ठम् | हिमस्य अत्ययः |
| दुर्यवनम् | आत्मनि |
| सहरि | यवनानां व्यृद्धिः |
| अतिहिमम् | अग्निग्रन्थपर्यन्तम् अधीते |

## अनुप्रयोगः

१. **अधो लिखितानि वाक्यानि पठत**

(क) अहम् **उपकृष्णं** तिष्ठामि । (ख) छात्रैः **यथाशक्ति** अध्ययनं कर्तव्यम् ।

(ग) **प्रत्येकं** छात्रो व्याकरणाध्ययनं करोतु । (घ) मम गृहे **निर्मक्षिकं** वर्तते ।

(ङ) त्वम् **अनुविष्णु** गच्छसि ।

२. **अव्ययीभावसमासेन निष्पन्नानि पदानि प्रयुज्य एकमनुच्छेदं विलिख्य शिक्षकं दर्शयत ।**

# अथ तत्पुरुषसमासः

अधिकारसूत्रम्-

**तत्पुरुषः २। १। २२**

**अधिकारोऽयं प्राग्बहुव्रीहेः ।**

***सरलार्थः-*** *इत ऊर्ध्वं "शेषो बहुव्रीहिः २ । २ । २३" इति सूत्रात् प्राक् यानि समासविधायकानि सूत्राणि सन्ति तेषु 'तत्पुरुषः' इति प्रथमान्तसंज्ञापदमुपतिष्ठत इत्यर्थः ।*

तत्पुरुषसंज्ञाविधायकं सूत्रम्-

**द्विगुश्च २। १। २३**

**द्विगुरपि तत्पुरुषसंज्ञकः स्यात् ।**

(द्विगुः, च, तत्पुरुषः)

***सरलार्थः-*** *द्विगुसंज्ञकः तपुरुषसंज्ञकोऽपि भवति ।*

समाससंज्ञाविधायकं सूत्रम्-

**द्वितीया श्रितातीतपतितगतात्यस्तप्राप्तापन्नैः २। १। २४**

**द्वितीयान्तं श्रितादिप्रकृतिकैः सुबन्तैः सह वा समस्यते स च तत्पुरुषः। कृष्णं श्रितः कृष्णश्रित इत्यादि ।**

(द्वितीया, सुप्, श्रितातीतपतितगतात्यस्तप्राप्तापन्नैः, सुपा, सह, समर्थः, पदविधिः)

***सरलार्थः-*** *द्वितीयान्तं समर्थं सुबन्तम्, श्रित, अतीत, पतित, गत, अत्यस्त, प्राप्त, आपन्न, इत्येतैः शब्दप्रकृतिकैः समर्थैः सुबन्तैः सह विभाषया समस्यते, स च तत्पुरुषसंज्ञको भवति ।*

*'कृष्णं श्रितः' इति लौकिकविग्रहे 'कृष्ण+अम्+श्रित+सु' इत्यलौकिकविग्रहे 'कृष्ण+अम्' इति द्वितीयान्तसमर्थस्य 'श्रित+सु' इति सुबन्तसमर्थेन सह प्रकृतसूत्रेण समासे "प्रथमानिर्दिष्टं समास उपसर्जनम्" इति सूत्रेण 'कृष्ण+अम्' इत्यस्योपसर्जनसंज्ञायाम् "उपसर्जनं पूर्वम्" इत्युपसर्जनस्य पूर्वप्रयोगे, समासत्वात् "कृत्तद्धितसमासाश्च" इति सूत्रेण प्रातिपदिकसंज्ञायां "सुपो धातुप्रातिपदिकयोः" इति सुपो लुकि 'कृष्णश्रित' इति जाते, प्रातिपदिकत्वात् तस्मात् सौ, सकारस्य रुत्वे विसर्गे 'कृष्णश्रितः' इति सिद्धयति । कृष्णश्रितौ, कृष्णश्रिताः, इति रामवद्रूपाणि भवन्ति ।*

*एवमेव - लोकम् अतीतः- लोकातीतः । नरकं पतितः- नरकपतितः । ग्रामं गतः- ग्रामगतः । तरङ्गान् अत्यस्तः- तरङ्गात्यस्तः । सुखं प्राप्तः- सुखप्राप्तः । दुःखम् आपन्नः- दुःखापन्नः ।*

समाससंज्ञाविधायकं सूत्रम्-

**तृतीया तत्कृतार्थेन गुणवचनेन २ । १ । ३०**

**तृतीयान्तं तृतीयान्तार्थकृतगुणवचनेनार्थेन च सह वा प्राग्वत् । शङ्कुलया खण्डः शङ्कुलाखण्डः । धान्येनार्थो धान्यार्थः । तत्कृतेति किम् ? अक्ष्णा काणः ।**

(तृतीया, सुप्, तत्कृतार्थेन, गुणवचनेन, सुपा सह, समासः, विभाषा, समर्थः पदविधिः)

***सरलार्थः-*** *तृतीयान्तं समर्थं सुबन्तम्, तृतीयान्तार्थकृतेन गुणवाचकशब्दप्रकृतिकेन समर्थसुबन्तेन सह वा समस्यते, स च तत्पुरुषसंज्ञको भवति ।*

*'शङ्कुलया खण्डः' इति लौकिकविग्रहे 'शङ्कुला+टा+खण्ड+सु' इत्यलौकिकविग्रहे प्रकृतसूत्रेण समासे, 'शङ्कुला+टा' इत्यस्योपसर्जनसंज्ञायां, तस्य पूर्वप्रयोगे, समासत्वात् प्रातिपदिकत्वेन सुब्लुकि 'शङ्कुलाखण्ड' इति जाते, तस्मात् प्रातिपदिकात् सौ, विभक्तिकार्ये 'शङ्कुलाखण्डः' इति सिद्ध्यति । एवमेव धान्येन अर्थः- धान्यार्थः । 'अक्ष्णा काणः' इत्यत्र तु काणार्थम् अक्ष्णः करणत्वाभावाद् अर्थात् अक्ष्णा अर्थेन अकृतकाणत्वात् समासो न भवति, 'अक्ष्णा काणः' इत्येव, अक्षिकाणस्तु नैव भवतीति बोध्यम् ।*

समाससंज्ञाविधायकं सूत्रम्-

**कर्तृकरणे कृता बहुलम् २ । १ । ३२**

**कर्तरि करणे च तृतीया कृदन्तेन बहुलं प्राग्वत् । हरिणा त्रातो हरित्रातः । नखैर्भिन्नो नखभिन्नः ।**

(कर्तृकरणे, च, तृतीया, सुप्, कृता, सुपा, सह, बहुलम्, समासः, समर्थः पदविधिः)

***सरलार्थः-*** *कर्तरि करणे च कारके वर्तमानं तृतीयान्तं सुबन्तं कृदन्तेन समर्थसुबन्तेन सह बहुलं समस्यते, स च तत्पुरुषसंज्ञको भवति ।*

*'हरिणा त्रातः' इति लौकिकविग्रहे 'हरि+टा+त्रात+सु' इत्यलौकिकविग्रहे प्रकृतसूत्रेण समासे, उपसर्जनसंज्ञकस्य 'हरि+टा' इत्यस्य पूर्वप्रयोगे, समासत्वात् प्रातिपदिकत्वेन सुब्लुकि 'हरित्रात' इति जाते, स्वादिकार्ये 'हरित्रातः' इति सिद्ध्यति । एवमेव नखैर्भिन्नः (नख+भिस्+भिन्न+सु) - नखभिन्नः ।*

**प. कृद्ग्रहणे गतिकारकपूर्वस्यापि ग्रहणम् । नखनिर्भिन्नः ।**

***सरलार्थः-*** *कर्तृकरणे कृता बहुलम् इति सूत्रस्थेन कृता इति पदेन गतिसंज्ञककारकसंज्ञकपूर्वस्य*

*कृदन्तस्यापि ग्रहणं भवति । तेन 'नखैर्निर्भिन्नः' इति लौकिकविग्रहे 'नख+भिस्+निर्भिन्न+सु' इत्यलौकिकविग्रहे प्रकृतपरिभाषया 'निर्' इति पूर्वस्य कृदन्तस्य 'निर्भिन्न' इत्यस्यापि कृदन्ते ग्रहणात् "कर्तृकरणे कृता बहुलम्" इति समासे पूर्ववत्प्रक्रियया 'नखनिर्भिन्नः' इति सिद्ध्यति ।*

समाससंज्ञाविधायकं सूत्रम्-

**चतुर्थी तदर्थार्थबलिहितसुखरक्षितैः २ । १ । ३६**

*चतुर्थ्यन्तार्थाय यत् तद्वाचिना अर्थादिभिश्च चतुर्थ्यन्तं वा प्राग्वत् । यूपाय दारु यूपदारु ।*

***सरलार्थः-*** *चतुर्थ्यन्तं सुबन्तं चतुर्थ्यन्तस्यार्थाय यद् यद्द्रव्यं तद्वाचकेन समर्थसुबन्तेन, अर्थ-बलि-हित-सुख-रक्षितशब्दप्रकृतिकैः समर्थसुबन्तैश्च सह वा समस्यते, स च तत्पुरुषसंज्ञको भवति ।*

*'यूपाय दारु' इति लौकिकविग्रहे 'यूप+ङे+दारु+सु' इत्यलौकिकविग्रहे प्रकृतसूत्रेण समासे, उपसर्जनसंज्ञकस्य 'यूप+ङे' इत्यस्य पूर्वप्रयोगे, विभक्तेर्लुकि 'यूपदारु' इति जाते, तस्मात् प्रातिपदिकत्वेन सौ, नपुंसकत्वात् 'स्वमोर्नपुंसकात्" इति सोर्लुकि 'यूपदारु' इति सिद्ध्यति ।*

**तदर्थेन प्रकृतिविकृतिभाव एवेष्टः तेनेह न – रन्धनाय स्थाली ।**

***सरलार्थ*** *– सूत्रे तदर्थशब्देन प्रकृतौ विकृतिः यत्र भवति स एव गृह्यते । प्रकृतेः विकृतिभावः यत्र भवति तत्रैव अनेन सूत्रेण समासः इत्याशयः । यथा रन्धनाय (पाचनाय) स्थाली । अत्र पाचनानन्तरं स्थाल्यां विकृतिः न भवति अतोऽत्र न समासः । यूपाय दारु इत्यत्र तु दारुणि विकारानन्तरमेव युपस्य सम्पादनमस्तीति समासो भवत्येव ।*

**वा. अर्थेन नित्यसमासो विशेष्यलिङ्गता चेति वक्तव्यम् । द्विजार्थः सूपः । द्विजार्था यवागूः । द्विजार्थं पयः । भूतबलिः । गोहितम् । गोसुखम् । गोरक्षितम् ।**

***सरलार्थः-*** *शब्देन सह नित्यं समासो भवति, तस्य विशेष्यवद् लिङ्गं च भवति ।*

*'द्विजाय अयम्' इति लौकिकविग्रहे 'द्विज+ङे+अर्थ+सु' इत्यलौकिकविग्रहे प्रकृतवार्तिकसहकारेण "चतुर्थी तदर्थार्थ०" इति नित्यसमासे, उपसर्जनस्य पूर्वप्रयोगे, विभक्तेर्लुकि 'द्विज अर्थ' इति जाते, सवर्णदीर्घे, अनेन वार्तिकेन विशेष्यनिघ्नलिङ्गत्वे च कृते, अस्य विशेष्यस्य 'सूपः' इत्यस्य पुंलिङ्गत्वादस्मादपि पुंलिङ्गे सौ 'द्विजार्थः सूपः' इति सिद्ध्यति । एवमेव - द्विजाय इयम् - द्विजार्था । द्विजार्था यवागूः । द्विजाय इदम् - द्विजार्थम् । द्विजार्थं पयः । एवमेव - भूतेभ्यो बलिः- भूतबलिः । गोभ्यः सुखम् - गोसुखम् । गोभ्यो हितम् - गोहितम् । गोभ्यो रक्षितम् - गोरक्षितम् ।*

पञ्चमीतत्पुरुषसंज्ञाविधायकं सूत्रम्-

**पञ्चमी भयेन २ । १ । ३७**

**चोराद्भयं चोरभयम् ।**

(पञ्चमी, सुप्, भयेन, सुपा, सह, समासः, तत्पुरुषः, विभाषा, समर्थः पदविधिः)

***सरलार्थः-*** *पञ्चम्यन्तं समर्थसुबन्तं भयशब्दप्रकृतिकेन समर्थसुबन्तेन सह वा समस्यते, स च तत्पुरुषसंज्ञको भवति ।*

*'चोराद् भयम्' इति लौकिकविग्रहे 'चोर+ङसि+भय+सु' इत्यलौकिकविग्रहे प्रकृतसूत्रेण समासे, पूर्ववत् प्रक्रियायां 'चोरभयम्' इति सिद्ध्यति । एवमेव चोराद् भीतिः- चोरभीतिः ।*

समाससंज्ञाविधायकं सूत्रम्-

**स्तोकान्तिकदूरार्थकृच्छ्राणि क्तेन** २ । १ । ३९

(स्तोकान्तिकदूरार्थकृच्छ्राणि, सुप्, क्तेन, सुपा, सह, समासः, तत्पुरुषः, विभाषा, समर्थः पदविधिः)

***सरलार्थः-*** *स्तोकः=अल्पः, स्तोकार्थ-समीपार्थ-दूरार्थ-दुःखार्थवाचकशब्दप्रकृतिकसमर्थसुबन्तानि क्तान्तशब्दप्रकतिकेन समर्थसुबन्तेन सह वा समस्यन्ते ते च तत्पुरुषाः ।*

पञ्चम्याः विभक्तेरलुक्विधायकं विधिसूत्रम्-

**पञ्चम्याः स्तोकादिभ्यः** ६ । ३ । २

**अलुगुत्तरपदे । स्तोकान्मुक्तः । अन्तिकादागतः । अभ्यासादागतः । दूरादागतः । कृच्छ्रादागतः ।**

(स्तोकादिभ्यः, पञ्चम्याः, अलुग्, उत्तरपदे)

***सरलार्थः-*** *स्तोकादिभ्यः शब्देभ्यः परस्याः पञ्चम्याः विभक्तेः लुक् न भवति उत्तरपदे परे सति ।*

*स्तोकान्मुक्तः- स्तोकाद् मुक्तः इति लौकिकविग्रहे, "स्तोक ङसि मुक्त सु" इत्यलौकिकविग्रहे "स्तोकान्तिकदूरार्थकृच्छ्राणि क्तेन" इति सूत्रेण समाससंज्ञायाम्, स्तोक ङसि इत्यस्य उपसर्जनसंज्ञायाम्, उपसर्जनं पूर्वमिति तस्य पूर्वप्रयोगे, समासत्वात् प्रातिपदिकेन ङसः लुकि प्राप्ते अनेन सूत्रेण लुकः निषेधे स्तोक+ङसि इत्यत्र विभक्तिकार्ये सोर्लुकि च, दकारस्यानुनासिकेन नकारे स्तोकान्मुक्त इत्यस्य एकदेशविकृतस्यानन्यत्वात् प्रातिपदिकसंज्ञायां सौ स्वादिकार्ये च स्तोकान्मुक्तः इति रूपं सिद्धम् ।*

*एवमेव "अन्तिक+ङसि आगत+सु" "अभ्यास+ङसि आगत+सु" "दूर+ङसि आगत+सु" "कृच्छ्र+ङसि आगत+सु" इत्यलौकिकविग्रहेषु क्रमेण पूर्ववद् समासादिकार्येषु पञ्चम्याः अलुकि च अन्तिकादागतः । अभ्यासादागतः । दूरादागतः । कृच्छ्रादागतः एतानि रूपाणि ज्ञेयानि ।*

षष्ठीतत्पुरुषसमाससंज्ञाविधायकं सूत्रम्

**षष्ठी २ । २ । ८**

**सुबन्तेन प्राग्वत् । राजपुरुषः ।**

(षष्ठी सुप्, सुपा, सह, समासः, तत्पुरुषः, विभाषा, समर्थः पदविधिः)

***सरलार्थः*-** *षष्ठ्यन्तं समर्थसुबन्तं समर्थसुबन्तेन सह विभाषया समस्यते, स च तत्पुरुषसंज्ञको भवति ।*

*'राज्ञः पुरुषः' इति लौकिकविग्रहे 'राजन्+ङस्+पुरुष+सु' इत्यलौकिकविग्रहे प्रकृतसूत्रेण समासे, विभक्तेर्लुकि 'राजन् पुरुष' इत्यवस्थायां प्रातिपदिकान्तस्य नकारस्य लोपे, स्वादिकार्ये 'राजपुरुषः' इति । एवमेव - तस्य पुरुषः- तत्पुरुषः । पितुः नाम - पितृनाम । मातुः सेवकः- मातृसेवकः ।*

समाससंज्ञाविधायकं सूत्रम्

**पूर्वापराधरोत्तरमेकदेशिनैकाधिकरणे २ । २ । १**

**अवयविना सह पूर्वादयः समस्यन्ते एकत्वसङ्ख्याविशिष्टश्चेदवयवी । षष्ठीसमासापवादः । पूर्वं कायस्य पूर्वकायः । अपरकायः । एकाधिकरणे किम् ? पूर्वश्छात्राणाम्**

(पूर्वापराधरोत्तरम्, सुप्, एकदेशिना, सुपा, सह, विभाषा, तत्पुरुषः, समासः, एकाधिकरणे, समर्थः पदविधिः)

***सरलार्थः*-** *पूर्व, अपर, अधर, उत्तर एतत्शब्दप्रकृतिकानि समर्थसुबन्तानि एकदेशवाचिना शब्दप्रकृतिकेन*

*समर्थसुबन्तेन सह विभाषया समाससंज्ञको भवति समानाधिकरणे वाच्ये, स च तत्पुरुषः । "षष्ठी" इति पूर्वसूत्रेण प्राप्तस्य समासस्य अपवादोऽयम् ।*

***पूर्वकायः*-** *पूर्वं कायस्य इति लौकिकविग्रहे "पूर्व सु काय ङस्" इत्यलौकिकविग्रहे "षष्ठी" इति सूत्रेण समासे प्राप्ते तं प्रबाध्य अनेन सूत्रेण समासे पूर्व सु इत्यस्योपसर्जनसंज्ञायां पूर्वप्रयोगे समासत्वात् प्रातिपदिकत्वेन सुपो लुकि विभक्तिकार्ये च पूर्वकायः इति रूपं सिद्ध्यति । अत्र यदि "षष्ठी" इति सूत्रेण समासः स्यात् तर्हि काय+ङस् इत्यस्य पूर्वप्रयोगः स्यात् । अत एव अस्य सूत्रस्य उपदेशो विहितः इति बोध्यम् । एवं रीत्या कायस्य अपरः इति विग्रहे अपरकायः पूर्ववद् बोध्यः ।*

*पूर्वाद्यवयवेन अवयविना च एकेनैव वस्तुना भाव्यम्, तेन अवयविना विभिन्नवस्तुषु बोधितेषु सत्सु अनेन सूत्रेण न समासः । यथा - पूर्वश्छात्राणाम् । अत्र अवयविनः छात्राश्बहवः अतो अवयविषु बहुषु सत्सु एकाधिकरणत्वाऽभावात् न समासः किन्तु वाक्यमेव ।*

समाससंज्ञाविधायकं सूत्रम्-

**अर्धं नपुंसकम् २ । २ । २ ।**

**समांशवाच्यर्धशब्दो नित्यं क्लीबे स प्राग्वत् । अर्धं पिप्पल्याः अर्धपिप्पली ।**

(नपुंसकम्, अर्धम्, सुप्, एकदेशिना, सुपा, सह, समासः, तत्पुरुषः)

***सरलार्थः-*** *समप्रविभागवाचि अर्धम् इत्येतद् शब्दो यत् नित्यं नपुंसके वर्तते स शब्दः एकदेशिना एकाधिकरणेन वा समस्यते, स च तत्पुरुषः ।*

*अर्धपिप्पली - पिप्पल्याः अर्धम् इति लौकिकविग्रहे अनेन समासे अर्धशब्दस्य पूर्वनिपातः । "षष्ठी" इति सूत्रेण समासे तु पिप्पलीशब्दस्य पूर्वप्रयोगः स्यात् ।*

सप्तमीतत्पुषसमासविधायकं संज्ञासूत्रम्-

**सप्तमी शौण्डैः २ । १ । ४०**

**सप्तम्यन्तं शौण्डादिभिः प्राग्वत् । अक्षेषु शौण्डः अक्षशौण्ड इत्यादि ।**

(सप्तमी, सुप्, शौण्डैः, सुपा, सह, समासः, तत्पुरुषः, विभाषा, समर्थः पदविधिः)

***सरलार्थः-*** *सप्तम्यन्तं सुबन्तं शौण्डादिगणपठितैः शब्दप्रकृतिकैः समर्थसुबन्तैः सह वा समस्यते, स च तत्पुरुषसंज्ञको भवति ।*

*'अक्षेषु शौण्डः' इति लौकिकविग्रहे 'अक्ष+सुप्+शौण्ड+सु' इत्यलौकिकविग्रहे प्रकृतसूत्रेण समासे, उपसर्जनस्य पूर्वनिपाते, सुब्लुकि, स्वादिकार्ये 'अक्षशौण्डः' इति सिद्ध्यति । एवमेव - शौण्डेषु धूर्तः- शौण्डधूर्तः । व्यवहारेषु कुशलः- व्यवहारकुशल । शिल्पेषु निपुणः- शिल्पनिपुणः । वाक्षु पटुः- वाक्पटुः ।*

"द्वितीया श्रितातीत...." इत्यादिसूत्रादारभ्य "सप्तमी शौण्डै" इति सूत्रं यावत् तत्तद्विभक्त्यन्तानां तत्तद्शब्दप्रकृतिकैः समर्थसुबन्तैः सह समासः प्रतिपादितः । इदानीमयं संशयः किं निर्धारितैः शब्दैस्सह एव तत्तद्विभक्त्यन्तानां समास उतो वा अन्यैः शब्दैः सहापि ? तत्र आह-

**द्वितीयातृतीयेत्यादियोगविभागादन्यत्रापि तृतीयादिविभक्तीनां प्रयोगवशात्समासो ज्ञेयः ।**

***सरलार्थः-*** *पूर्वोक्तसूत्रैः द्वितीयादिविभक्त्यन्तानां शब्दानां निर्धारितैस्शब्दैस्सह समासस्य विधानेन कुत्रचिद् यदि अन्यै समर्थसुबन्तैस्सह आप्तपुरुषैः समासः कृतो दृश्यते तर्हि तत्र तत्र सूत्रेषु योगविभागं कृत्वा समास सम्पादनीयः । यथा - "पञ्चमी भयेन" इति सूत्रे योग विभाग कर्तव्यः । पञ्चमी इत्येको योगः । भयेन इति अपरः । तत्र प्रथमस्य अर्थः- पञ्चम्यन्तं समर्थसुबन्तं समर्थसुबन्तेन सह समस्यते । भयेन इत्यस्य अर्थः पूर्ववत् । एवञ्च सति सर्वैः शब्दैस्सह पञ्चम्यन्तपदस्य समासः सम्भवति । एवंरीत्या सर्वत्र सूत्रेषु बोध्यमित्याशयः ।*

समासविधायकं संज्ञासूत्रम्-

**दिक्संख्ये संज्ञायाम्** २ । १ । ५०

**संज्ञायामेवेति नियमार्थं सूत्रम् । पूर्वेषुकामशमी । सप्तर्षयः । तेनेह न – उत्तरा वृक्षाः । पञ्च ब्राह्मणाः ।**

(दिक्संख्ये, सुप्, समानाधिकरणेन, सुपा, सह, समासः, संज्ञायाम्, तत्पुरुषः,समर्थः पदविधिः)

***सरलार्थः***– *दिशावाचि समर्थं सुबन्तम् अथ च सङ्ख्यावाचि समर्थसुबन्तं समाधिकरणेन समर्थसुबन्तेन सह समस्येते समुदायेन संज्ञा अवगम्यते चेत् । संज्ञायामर्थे समासस्य विधानाद् अयं समासो नित्यः, वाक्येन संज्ञायाः अनवगमात् ।*

**पुर्वेषुकामशमी** – "पूर्व सु इषुकामशमी सु" इत्यलौकिकविग्रहे अनेन सूत्रेण समासे, पूर्व सु इत्यस्य उपसर्जनसंज्ञायां तस्य पूर्वप्रयोगे, समासत्वात् प्रातिपदिकसंज्ञायां सुपो लुकि "पूर्व इषुकामशमी" इति जाते गुणे पूर्वेषुकामशमी इत्यस्य प्रातिपदिकत्वेन स्वादिकार्ये पूर्वेषुकामशमी इति सिद्ध्यति । कश्चिद् ग्रामविशेषः ।

**सप्तर्षयः**– सप्तन् जस् ऋषि जस् इति विग्रहे अनेन सूत्रेण समासे पूर्वप्रयोगे विभक्तिलुकि पदत्वाद् नलोपे गुणे सप्तर्षि शब्दस्य प्रातिपदिकत्वेन स्वादिकार्ये प्रथमायाः बहुवचने सप्तर्षयः । सप्त ऋषयः प्रसिद्धाः ।

समासविधायकं संज्ञासूत्रम्-

**तद्धितार्थोत्तरपदसमाहारे च** २ । १ । ५१

**तद्धितार्थे विषये उत्तरपदे च परतः समाहारे च वाच्ये दिक्संख्ये प्राग्वत् । पूर्वस्यां शालायां भवः– पूर्वा शाला इति समासे जाते ।**

(तद्धितार्थोत्तरपदसमाहारे, दिक्संख्ये, सुप्, समानाधिकरणेन, सुपा, सह, समासः,तत्पुरुषः,समर्थः पदविधिः)

***सरलार्थः***– *तद्धितार्थस्य विषये, उत्तरपदे परे सति, समाहारेऽर्थे गम्यमाने च दिशावाचिसङ्ख्यावाचिनी समर्थसुबन्ते समानाधिकरणेन समर्थसुबन्तेन सह समस्येते स च तत्पुरुषः ।*

*तद्धितार्थे विषये उदाहरणमाह- पूर्वस्यां शालायां भवः इति विग्रहे "पूर्वा ङि शाला ङि" इत्यलौकिकविग्रहे अनेन सूत्रेण समासे पूर्वा ङि इत्यस्य उपसर्जनसंज्ञायां पूर्वप्रयोगे समासत्वात् प्रातिपदिकसंज्ञायां सुपो लुकि "पूर्वा शाला" इति जाते आह-*

**सर्वनाम्नो वृत्तिमात्रे पुंवद्भावः**

***सरलार्थः***– *समासादिवृत्तौ सर्वनामसंज्ञकशब्दानां पुंवद्भावो भवति ।*

*अनेन वार्त्तिकेन पूर्वा इत्यस्य स्थाने पूर्व इति जाते पूर्वशाला इत्यवस्थायां भवार्थे तद्धितप्रत्ययम् आह-*

ञप्रत्ययविधायकं विधिसूत्रम्-

**दिक्पूर्वपदादसंज्ञायां ञः ४ । २ । १०७**

**अस्माद् भवाद्यर्थे ञः स्यादसंज्ञायाम् ।**

(दिक्पूर्वपदात्, असंज्ञायाम्, ञः, शेषे)

***सरलार्थः-*** *दिक्पूर्वपदात् प्रातिपदिकाद् भवादिषु अर्थेषु ञप्रत्ययो भवति असंज्ञायां गम्यमानायाम् । ञकारः इत् । अनेन पूर्वशालाशब्दात् ञप्रत्ययेऽनुबन्धलोपे पूर्वशाला+अ इति जाते आह-*

वृद्ध्यादेशविधायकं विधिसूत्रम्-

**तद्धितेष्वचामादेः ७ । २ । ११७**

**ञिति णिति च तद्धितेष्वचामादेरचो वृद्धिः स्यात् । यस्येति च । पौर्वशालः । पञ्च गावो धनं यस्येति त्रिपदे बहुव्रीहौ । - द्वन्द्वतत्पुरुषयोरुत्तरपदे नित्यसमासवचनम् ) ।**

(अचाम्, आदेः, वृद्धिः, तद्धितेषु, ञ्णिति)

***सरलार्थः-*** *ञिति णिति च तद्धितसंज्ञके प्रत्यये परे अङ्गस्य अचां मध्ये आदेरचः स्थाने वृद्ध्यादेशो भवति । अनेन पूर्वशाला इत्यस्य आदेः उकारस्य औकारे वृद्धौ पौर्वशाला +अ इति जाते "यस्येति च" इति सूत्रेण आकारस्य लोपे वर्णसम्मेलने पौर्वशाल इत्यस्य प्रातिपदिकसंज्ञायां स्वादिकार्ये च पौर्वशालः इति रूपं सिद्ध्यति ।*

*उत्तरपदे च परतः इत्यस्य उदाहरणमाह- पञ्च गावो धनं यस्य इति विग्रहे "पञ्चन् जस् गो जस् धन सु" इत्यलौकिकविग्रहे समुदायस्य वहुब्रीहिसमासे समासत्वात् प्रातिपदिकत्वेन सुपो लुकि, "पञ्चन् गो धन" इति जाते "पञ्चन् गो" एतावत्समुदायस्य धन इत्युत्तरपदे परतः "तद्धितार्थो..." इत्यादिना नित्यं तत्पुरुषसमासे पदत्वाद् नलोपे च कृते पञ्चगो इत्यतः समासान्तप्रत्ययमाह-*

टच्प्रत्ययविधायकं विधिसूत्रम् -

**गोरतद्धितलुकि ५ । ४ । ९२**

**गोऽन्तात्तत्पुरुषाट्टच् स्यात् समासान्तो न तु तद्धितलुकि । पञ्चगवधनः ।**

(गोः, तत्पुरुषाद्, अतद्धितलुकि, टच्, समासान्ताः, तद्धिताः)

***सरलार्थः-*** *गोशब्दान्तात् तत्पुरुषात् समासान्तः तद्धितसंज्ञकः टच्प्रत्ययो भवति तद्धितप्रत्ययस्य लुकि सति तु न भवति । अनेन टच्प्रत्ययेऽनुबन्धलोपे पञ्चगो अ धन इत्यवस्थायामोकारस्य "एचोऽयवायावः" इति सूत्रेण अवादेशे वर्णसम्मेलने पञ्चगवधन इत्यस्मात् सौ विभक्तिकार्ये पञ्चगवधनः इति बोध्यम् ।*

कर्मधारयसंमाससंज्ञाविधायकं सूत्रम्-

**तत्पुरुषः समानाधिकरणः कर्मधारयः** १ । २ । ४२

***सरलार्थः-*** *समानविभक्त्यन्तपदकः समानाभिधेयस्तत्पुरुषसमासः कर्मधारयसंज्ञो भवति ।*

द्विगुसंज्ञाविधायकं सूत्रम्-

**सङ्ख्यापूर्वो द्विगुः** २ । १ । ५२

**तद्धितार्थेत्यत्रोक्तस्त्रिविधः सङ्ख्यापूर्वो द्विगुसंज्ञः स्यात् ।**

(सङ्ख्यापूर्वः, द्विगुः)

***सरलार्थः-*** *"तद्धितार्थोत्तरपदसमाहारे च" इति सूत्रेण विहितः सङ्ख्यापूर्वकः समासः द्विगुसंज्ञको भवति ।*

एकवद्भावविधायकं विधिसूत्रम्-

**द्विगुरेकवचनम्** २ । ४ । १

**द्विग्वर्थः समाहार एकवत्स्यात् ।**

(समाहारे, द्विगुः, एकवचनम्)

***सरलार्थः-*** *समाहारेऽर्थे विहितो द्विगुसमासः एकवद्भवति । समाहारेऽर्थे द्विगुसमासे सदा एकवचनमेव कर्तव्यमित्यर्थः ।*

नपुंसकलिङ्गविधायकं विधिसूत्रम्-

**स नपुंसकम्** २ । ४ । १७

**समाहारे द्विगुर्द्वन्द्वश्च नपुंसकं स्यात् । पञ्चानां गवां समाहारः पञ्चगवम् ।**

(सः, नपुंसकम्)

***सरलार्थः-*** *समाहारेऽर्थे विहितौ द्विगुद्वन्द्वसमासौ नपुंसकलिङ्गे एव भवतः । "परवल्लिङ्गं द्वन्द्वतत्पुरुषयोः" इत्यस्य अपवादोऽयम् ।*

*पञ्चानां गवां समाहारः इति लौकिकविग्रहे "पञ्चन् जस् गो जस्"इत्यलौकिकविग्रहे अनेन "तद्धितार्थोत्तरपदसमाहारे" इति सूत्रेण समाहारेऽर्थे समासे "सङ्ख्यापूर्वो द्विगुः" इत्यनेन द्विगुसंज्ञायाञ्च समासत्वात् प्रातिपदिकत्वेन सुपो लुकि पदत्वाद् नकारस्य लोपे पञ्चगो इत्यस्मात् "गोरतद्धितलुकि" इति सूत्रेण समासान्तटच्प्रत्ययेऽनुबन्धलोपे अवादेशे पञ्चगव इत्यस्य समुदायत्वेन एकवचने प्राप्तेऽपि उद्भूतावयवभेदविवक्षायाम् बहुवचने प्राप्ते "द्विगुरेकवचनम्" इत्यनेन एकवचने सुप्रत्यये अनेन सूत्रेण नपुंसकत्वात् सोरमि पञ्चगवम् इति सिद्ध्यति ।*

समाससंज्ञाविधायकं सूत्रम्-

**विशेषणं विशेष्येण बहुलम् २ । १ । ५७**

**भेदकं भेद्येन समानाधिकरणेन बहुलं प्राग्वत् । नीलमुत्पलं नीलोत्पलम् । बहुलग्रहणात्क्वचिन्नित्यम्- कृष्णसर्पः । क्वचिन्न- रामो जामदग्न्यः ।**

(विशेषणम्, सुप्, विशेष्येण, समानाधिकरणेन, सुपा, बहुलम्, समासः, तत्पुरुषः, कर्मधारयः)

***सरलार्थः-*** *भेदकं (विशेषणं) सुबन्तं भेद्येन(विशेष्येन) समानाधिकरणेन सुबन्तेन सह बहुलं समस्यते, स च तत्पुरुषसंज्ञो भवति । समानाधिकरणत्वात् कर्मधारयसंज्ञकश्च भवति ।*

*'नीलं च तद् उत्पलम्' इति लौकिकविग्रहे 'नील+सु+उत्पल+सु' इत्यलौकिकविग्रहे प्रकृतसूत्रेण 'नील+सु' इति भेदकस्य सुबन्तस्य 'उत्पल+सु' इति भेद्येन समानाधिकरणेन सुबन्तेन सह समासे, विशेषणमिति प्रथमान्तपदेन निर्दिष्टस्य 'नील+सु' इत्यस्योपसर्जनसंज्ञायां पूर्वप्रयोगे, विभक्तेर्लुकि 'नील उत्पल' इति जाते, गुणे, स्वादिकार्ये 'नीलोत्पलम्' इति सिद्ध्यति । सूत्रे बहुलग्रहणात् क्वचिन्नित्यमेव समासो भवति । यथा - कृष्णश्चासौ सर्पः, कृष्णसर्पः । क्वचित्तु समासो नैव भवति । यथा - रामो जामदग्न्यः ।*

समाससंज्ञाविधायकं सूत्रम्-

**उपमानानि सामान्यवचनैः २ । १ । ५५**

**घन इव श्यामो घनश्यामः ।**

(उपमानानि सुप्, सामान्यवचनैः, समानाधिकरणेन, सुपा सह समासः, तत्पुरुषः)

***सरलार्थः-*** *उपमानवाचीनि सुबन्तानि सामान्यधर्मविशिष्टैरुपमेयवाचिभिः सुबन्तैः सह वा समस्यन्ते, स च तत्पुरुषसंज्ञो भवति । सामान्यधर्मत्वञ्च उपमानोपमेयोभयवृत्तित्वम् ।*

*'घन इव श्यामः' इति लौकिकविग्रहे 'घन+सु+श्याम+सु' इत्यलौकिविग्रहे प्रकृतसूत्रेण 'घन+सु' इति उपमानवाचकसुबन्तस्य 'श्याम+सु' इति सामान्यधर्मबोधकसुबन्तेन सह समासे, समानाधिकरणत्वात् तस्य कर्मधारयसंज्ञायां, उपमानानीति प्रथमान्तपदेन निर्दिष्टस्य*

*सुबन्तोपमानस्य पूर्वप्रयोगे, विभक्तेर्लुकि 'घनश्याम' इति जाते, स्वादिकार्ये 'घनश्यामः' इति सिद्ध्यति । एवमेव दुग्धमिव शुक्लम् - दुग्धशुक्लम् । विद्युदिव चलम् - विद्युच्चलम् । नवनीतमिव कोमलम् - नवनीतकोमलम् ।*

**(शाकपार्थिवादीनां सिद्धये उत्तरपदलोपस्योपसङ्ख्यानम् वा.) । शाकप्रियः पार्थिवः शाकपार्थिवः । देवपूजको ब्राह्मणो देवब्राह्मणः ।**

***सरलार्थः-*** *शाकपार्थिवादिशब्दानां सिद्धये पूर्वपदे विद्यमानस्य उत्तरपदस्य लोपः कर्तव्यः । यथा- शाकपार्थिवः इत्यत्र पूर्वं शाकः प्रियो यस्य सः इत्यर्थे बहुव्रीहिसमासः तदुत्तरं शाकप्रियशब्दस्य पार्थिवशब्देन सह शाकप्रियः पार्थिवः इति लौकिकविग्रहे शाकप्रिय सु पार्थिव सु इत्यलौकिकविग्रहे "विशेषणं विशेष्येण बहुलम्" इति सूत्रेण समासे पूर्वपदे स्थितस्य प्रिय इति उत्तरपदस्य अनेन वार्त्तिकेन लोपे शाकपार्थिव इत्यस्य प्रातिपदिकसंज्ञायां स्वादिकार्ये शाकपार्थिवः इति सिद्ध्यति । एवं रीत्या देवानां पूजकः देवपूजकः, देवपूजकश्चासौ ब्राह्मणः देवब्राह्मणः इति बोध्यम् ।*

नञ्समासविधायकं सूत्रम्-

**नञ् २ । २ । ६**

**नञ् सुपा सह समस्यते ।**

(नञ्, सुप्, सुपा, सह, विभाषा, समासः, तत्पुरुषः)

***सरलार्थः-*** *'नञ्' इत्यव्ययस्य सुबन्तसमर्थेन सह वा समासो भवति ।*

नस्य लोपविधायकं विधिसूत्रम्-

**नलोपो नञः ६ । ३ । ७३**

**नञो नस्य लोप उत्तरपदे । न ब्राह्मणः अब्राह्मणः ।**

(नञः, नलोपः,उत्तरपदे)

***सरलार्थः-*** *उत्तरपदे परे नञो नकारस्य लोपो भवति ।*

*'न ब्राह्मणः' इति लौकिकविग्रहे 'न+ब्राह्मण+सु' इत्यलौकिकविग्रहे "नञ्" इति सूत्रेण समासे, उपसर्जनसंज्ञकस्य पूर्वप्रयोगे, 'न' इत्यस्य नकारस्य प्रकृतसूत्रेण लोपे, विभक्तेर्लुकि 'अब्राह्मण' इति जाते, स्वादिकार्ये 'अब्राह्मणः' इति सिद्ध्यति । एवमेव न धर्मः- अधर्मः । न समर्थः- असमर्थः । न प्राप्तः- अप्राप्तः । न लुक् - अलुक् । न क्षमः- अक्षमः ।*

नुडागमविधायकं विधिसूत्रम्-

**तस्मान्नुडचि ६ । ३ । ७४**

**लुप्तनकारान्नञ उत्तरपदस्याजादेर्नुडागमः स्यात्। अनश्वः। नैकधेत्यादौ तु नशब्देन सह "सह सुपा" इति समासः।**
(तस्मात्, नञः, अचि, उत्तरपदे, नुट्)

***सरलार्थः-*** *नकारः लोपो यत्र तादृशाद् नञः परस्य अजादेः उत्तरपदस्य नुट्-आगमो भवति।*

*'न अश्वः' इति लौकिकविग्रहे 'न+अश्व+सु' इत्यलौकिकविग्रहे "नञ्" इति समासे, न-शब्दस्योपसर्जनत्वात् पूर्वप्रयोगे "नलोपो नञः" इति नकारलोपे, सुब्लुकि 'अ अश्व' इत्यवस्थायां प्रकृतसूत्रेण अजादेरुत्तरपदस्य अश्वशब्दस्य नुडागमेऽनुबन्धलोपे, टित्वादाद्यवयवत्वे 'अनश्व' इति जाते, तस्मात् प्रातिपदिकात् सौ 'अनश्वः' इति सिद्ध्यति। एवमेव न अद्यतनः- अनद्यतनः। न अवकाशः- अनवकाशः। न एकः- अनेकः। न आदिः- अनादिः। न अन्तः- अनन्तः।*

*नशब्दो द्विविधः नञ् इति पर्युदासप्रसज्यार्थकः, न इति अव्ययश्च। तत्र नञ् इत्यनेन सह यदा समासः तदैव नकारस्य लोपो भवति। अव्ययेन न इति शब्देन तु "सह सुपा" इति समासो बोध्यः। अत एव नैकधा, नैकविधम्, नान्यत्र इत्यादयः प्रयोगाः सिद्ध्यन्ति।*

समाससंज्ञाविधायकं सूत्रम्-

**कुगतिप्रादयः २। २। १८**
**एते समर्थेन नित्यं समस्यन्ते। कुत्सितः पुरुषः कुपुरुषः।**
(कुगतिप्रादयः, सुप्, सुपा, सह, समासः, तत्पुरुषः, समर्थः पदविधिः)

***सरलार्थः-*** *कुशब्दः, गतिसंज्ञकाः शब्दाः, प्रादयश्च सुबन्तेन सह नित्यं समस्यन्ते, स च तत्पुरुषसंज्ञो भवति। कुशब्दश्चात्र अव्ययं न तु पृथिवीवाचको गत्यादिसाहचर्यात्।*

*'कुत्सितः पुरुषः' इति लौकिकविग्रहे ' कु+पुरुष+सु' इत्यलौकिकविग्रहे प्रकृतसूत्रेण नित्यमेव समासे, प्रथमानिर्दिष्टस्य कुशब्दस्य पूर्वनिपाते, सुब्लुकि 'कुपुरुष' इति जाते, तस्मात् सौ 'कुपुरुषः' इति। एवमेव कुत्सितः पुत्रः- कुपुत्रः। शोभनः पुरुषः- सुपुरुषः।*

गतिसंज्ञाविधायकं सूत्रम्-

**ऊर्यादिच्विडाचश्च १। ४। ६१**
**ऊर्यादयश्च्व्यन्ता डाजन्ताश्च क्रियायोगे गतिसंज्ञाः स्युः।**
**ऊरीकृत्य। शुक्लीकृत्य। पटपटाकृत्य। सुपुरुषः।**
(ऊर्यादिच्विडाचः, च, क्रियायोगे, गतिः)

***सरलार्थः-*** *ऊरी-आदयः, च्विप्रत्ययान्ताः, डाच्प्रत्ययान्ताश्च शब्दाः क्रियायोगे सति गतिसंज्ञकाः भवन्ति।*

*ऊरी+कृत्वा अत्र ऊरीशब्दस्य अनेन सूत्रेण गतिसंज्ञायाम्, "कुगतिप्रादयः" इति सूत्रेण ऊरी इत्यस्य कृत्वा इत्यनेन अव्ययेन सह समासे समासत्वात् "समासेऽनञ्पूर्वे क्त्वो ल्यप्" इति सूत्रेण क्त्वाप्रत्ययस्य स्थाने ल्यप्-आदेशेऽनुबन्धलोपे "ह्रस्वस्य पिति कृति तुक्" इति सूत्रेण तुगागमेऽनुबन्धलोपे ऊरीकृत्य इति रूपम् ।*

*एवमेव शुक्ली इत्यस्य च्विप्रत्ययान्तत्वाद् गतिसंज्ञायां समासे समासत्वात् क्त्वो ल्यपि शुक्लीकृत्य इति बोध्यम् । पटपटा इत्यस्य डाजन्तत्वाद् अनेन गतिसंज्ञायां पूर्ववत् समासे समासत्वात् क्त्वो ल्यपि कृते पटपटाकृत्य इति च बोध्यम् ।*

***सुपुरुषः-*** *शोभनः पुरुषः इति लौकिकविग्रहे "सु पुरुष+सु" इति च अलौकिकविग्रहे कुगतिप्रादयः इति सूत्रेण समासे समासत्वात् प्रातिपदिकसंज्ञायां सुपो लुकि स्वादिकार्ये सुपुरुषः इति ज्ञेयम् ।*

**(प्रादयो गताद्यर्थे प्रथमया ) । प्रगत आचार्यः प्राचार्यः ।**

***सरलार्थः-*** *प्रादयः शब्दाः गतादिष्वर्थेषु प्रथमान्तेन समर्थसुबन्तेन सह नित्यं समस्यन्ते ।*

***प्राचार्यः*** *= प्रगतः आचार्यः इति लौकिकविग्रहे "प्र आचार्य सु" इत्यलौकिकविग्रहे अनेन वार्तिकेन नित्यसमासे प्र इत्यस्य उपसर्जनसंज्ञायां पूर्वप्रयोगे समासत्वात् प्रातिपदिकत्वेन सोर्लुकि सवर्णदीर्घे प्राचार्य इत्यस्य प्रातिपदिकसंज्ञायां स्वादिकार्ये च प्राचार्यः इति प्रयोगो बोध्यः ।*

**(अत्यादयः क्रान्ताद्यर्थे द्वितीयया ) । अतिक्रान्तो मालामिति विग्रहे -**

***सरलार्थः-*** *अत्यादयः शब्दाः क्रान्तादिषु अर्थेषु द्वितीयान्तेन समर्थसुबन्तेन सह समस्यन्ते ।*

*अतिक्रान्तो मालामिति विग्रहे "अति माला अम्" इत्यलौकिकविग्रहे च अनेन वार्तिकेन नित्यसमासे अति इत्यस्य उपसर्जनसंज्ञायां पूर्वप्रयोगे समासत्वात् प्रातिपदिकत्वेन सुपो लुकि आह-*

उपसर्जनसंज्ञाविधायकं सूत्रम्-

**एकविभक्ति चापूर्वनिपाते १ । २ । ४४**

**विग्रहे यन्नियतविभक्तिकं तदुपसर्जनसंज्ञं स्यान्न तु तस्य पूर्वनिपातः ।**

(समासे, एकविभक्तिः, च, उपसर्जनम्, अपूर्वनिपाते)

***सरलार्थः-*** *विग्रहे सदा यत् पदं नियतविभक्तिकमस्ति तत्पदमुपसर्जनसंज्ञकं भवति तस्य पूर्वनिपातस्तु न भवति । अनेन माला इत्यस्योपसर्जनसंज्ञायामाह-*

ह्रस्वादेशविधायकं विधिसूत्रम्-

**गोस्त्रियोरुपसर्जनस्य १ । २ । ४८**

**उपसर्जनं यो गोशब्दः स्त्रीप्रत्ययान्तं च तदन्तस्य प्रातिपदिकस्य ह्रस्वः स्यात् । अतिमालः ।**

(उपसर्जनस्य, गोस्त्रियोः, प्रातिपदिकस्य, ह्रस्वः)

***सरलार्थः-*** *उपसर्जनसंज्ञको गोशब्दः, उपसर्जनसंज्ञकं स्त्रीप्रत्ययान्तं यत्पदञ्च तदन्तस्य (उपसर्जनगोशब्दान्तस्य, उपसर्जनस्त्रीप्रत्यान्तस्य च) प्रातिपदिकस्य ह्रस्वादेशो भवति । अलोऽन्त्यस्य इति अन्त्यस्य ह्रस्वादेशः । अनेन उपसर्जनस्त्रीप्रत्ययान्तमालाशब्दान्तस्य प्रातिपदिकस्य अन्त्यस्य आकारस्य ह्रस्वादेशे अतिमाल इति जाते स्वादिकार्ये अतिमालः इति सिद्ध्यति ।*

**(अवादयः क्रुष्टाद्यर्थे तृतीयया ) । अवक्रुष्टः कोकिलया – अवकोकिलः ।**

***सरलार्थः-*** *अवादयः शब्दाः कुष्टादिष्वर्थेषु तृतीयान्तेन समर्थसुबन्तेन सह नित्यं समस्यन्ते ।*

***अवकोकिलः = अवकुष्टः कोकिलया*** *इति लौकिकविग्रहे अव कुष्ट टा" इत्यलौकिकविग्रहे अनेन वार्तिकेन नित्यसमासे अव इत्यस्य उपसर्जनसंज्ञायां पूर्वप्रयोगे समासत्वात् प्रातिपदिकत्वेन सुपो लुकि स्वादिकार्ये च अवकोकिलः इति सिद्धम् ।*

**(पर्यादयो ग्लानाद्यर्थे चतुर्थ्या) । परिग्लानोऽध्ययनाय पर्यध्ययनः ।**

***सरलार्थः-*** *पर्यादयः शब्दाः ग्लानादिष्वर्थेषु चतुर्थ्यन्तेन समर्थसुबन्तेन सह नित्यं समस्यन्ते ।*

***पर्यध्ययनः*** *= परितः अध्ययनाय इति लौकिकविग्रहे "परि अध्ययन ङे" इत्यलौकिकविग्रहे अनेन वार्तिकेन नित्यसमासे परि इत्यस्य उपसर्जनसंज्ञायां पूर्वप्रयोगे समासत्वात् प्रातिपदिकत्वेन सुपो लुकि यणि स्वादिकार्ये च पर्यध्ययनः इति सिद्धम् ।*

**(निरादयः क्रान्ताद्यर्थे पञ्चम्या ) । निष्क्रान्तः कौशाम्ब्याः– निष्कौशाम्बिः ।**

***सरलार्थः-*** *निरादयः शब्दाः क्रान्तादिष्वर्थेषु पञ्चम्यन्तेन समर्थसुबन्तेन सह नित्यं समस्यन्ते ।*

***निष्कौशाम्बिः*** *= कौशाम्ब्याः निष्क्रान्तः इति लौकिकविग्रहे "निर् कौशाम्बी ङसि" इत्यलौकिकविग्रहे च अनेन वार्तिकेन नित्यसमासे निर् इत्यस्य उपसर्जनसंज्ञायां पूर्वप्रयोगे समासत्वात् प्रातिपदिकत्वेन सुपो लुकि कौशाम्बीशब्दस्य "एकविभक्ति चापूर्वनिपाते" इति सूत्रेण उपसर्जनसंज्ञायां "गोस्त्रियोरुपसर्जनस्य इति ह्रस्वादेशे रेफस्य विसर्गे विसर्गस्य स्थाने षकारादेशे स्वादिकार्ये च निष्कौशाम्बिः इति रूपं सिद्धम् ।*

उपपदसंज्ञाविधायकं संज्ञासूत्रम्-

**तत्रोपपदं सम्तमीस्थम् ३ । १ । ९२**

**सप्तम्यन्ते पदे कर्मणीत्यादौ वाच्यत्वेन स्थितं यत्कुम्भादि तद्वाचकं पदमुपपदसंज्ञं स्यात् ।**

(तत्र, धातोः, सप्तमीस्थम्, उपपदम्)

***सरलार्थः-*** *सप्तम्यन्तैः कर्मणी इत्यादिभिः पदैर्बोधितानि कुम्भादिपदानि उपपदसंज्ञकानि भवन्ति ।*

समासविधायकं संज्ञासूत्रम्-

**उपपदमतिङ् २ । २ । १९**

**उपपदं सुबन्तं समर्थेन नित्यं समस्यते । अतिङन्तश्चायं समासः । कुम्भं करोतीति कुम्भकारः । अतिङ् किम् ? मा भवान् भूत् । माङि लुङिति सप्तमीनिर्देशान्माङुपपदम् ।**

***सरलार्थः-*** *उपपदं सुबन्तं तिङन्तभिन्नेन समर्थेन सह नित्यं समस्यते, स च तत्पुरुषसंज्ञको भवति ।*

*'कुम्भं करोती'ति लौकिकविग्रहे कर्मवाचकात् कुम्भशब्दात् कृत्प्रत्यययोगे विवक्षिते सति "कतृकर्मणोः कृति" इति षष्ठीविभक्तौ 'कुम्भ+ङस् +कृ' इत्यवस्थायां 'कुम्भ+ङस्' इत्यस्य "तत्रोपपदं सप्तमीस्थम्" इत्युपपदसंज्ञायां "कर्मण्यण्" इति सूत्रेण अण्-प्रत्ययेऽनुबन्धलोपे 'कुम्भ ङस् कृ अ' इति जाते, णित्वात् 'कृ' इत्यस्य ऋकारस्य "अचो ञ्णिति" इति वृद्धौ रपरत्वे 'कुम्भ ङस् कार' इत्यवस्थायां "गतिकारक०" इति परिभाषया "उपपदमतिङ्" इति सुबुत्पत्तेः प्रागेव समासे, समासत्वात् प्रातिपदिकसंज्ञायां सुब्लुकि 'कुम्भकार' इति जाते, स्वादिकार्ये 'कुम्भकारः' इति सिद्ध्यति । 'मा+भूत्' इत्यत्र तु 'माङ्' इत्युपपदस्य 'भूत्' इति तिङन्तेन सह समासो न भवति, समासविधायके सूत्रे 'अतिङ्' इति निर्देशात् । अत एव समासाभावात् 'मा भवान् भूत्' इति प्रयोगः ।*

**वा. गतिकारकोपपदानां कृद्भिः सह समासवचनं प्राक् सुबुत्पत्तेः । व्याघ्री । अश्वक्रीती । कच्छपीत्यादि ।**

***सरलार्थः-*** *गतिकारकोपपदानां कृदन्तसमर्थेन सह सुबुत्पत्तेः प्रागेव समासो भवति ।*

*विशेषेण आसमन्तात् जिघ्रतीति व्याघ्री = अत्र वि आङ् इत्युपसर्गयोः "कुगतिप्रादयः" इति सूत्रेण सुबुत्पत्तेः प्रागेव घ्रशब्देन सह समासे यणि व्याघ्रशब्दात् स्त्रीत्वविवक्षायां "जातेरस्त्रीविषयादयोपधात्" इत्यनेन ङीष् सिद्ध्यति । सुबुत्पत्तेरनन्तरं समासे तु समासात् प्राग् घ्रशब्दस्य जातिबोधकत्वाभावेन स्त्रीत्वविवक्षायां टाप् स्यात्, न तु ङीष् इति हेतोः अस्याः परिभाषायाः आरम्भो कृतः । एवमेव अश्वेन कृता इति विग्रहे "अश्व टा इत्यस्य क्रीत इत्यनेन सुबुत्पत्तेः प्रागेव समासः । तेन "क्रीतात्करणपूर्वाद्" इति ङीष् सिद्ध्यति । सुबन्तेन सह समासे तु स्त्रित्वविवक्षायां पूर्वं क्रीतशब्दात् टाप् स्यात् । व्याघ्रीवत् कच्छपीशब्देऽपि ज्ञेयम् ।*

अच्प्रत्ययविधायकं विधिसूत्रम्

**तत्पुरुषस्याङ्गुलेः सङ्ख्याव्ययादेः ५ । ४ । ८६**

**सङ्ख्याव्ययादेरङ्गुल्यन्तस्य समासान्तोऽच् स्यात् । द्वे अङ्गुली प्रमाणमस्य द्व्यङ्गुलम् । निर्गतमङ्गुल्यो निरङ्गुलम् ।**

(सङ्ख्याव्ययादेः, तत्पुरुषस्य, अङ्गुलेः, समासान्ताः, अच्, तद्धिताः)

***सरलार्थः-*** *यस्मिन् तत्पुरुषसमासे पूर्वपदं सङ्ख्यावाचकशब्द उत अव्ययवाचकः शब्दोऽस्ति, उत्तरपदञ्च अङ्गुली इति शब्दोऽस्ति, तस्मात् समासान्तः अच्प्रत्ययो भवति ।*

***द्व्यङ्गुलम् = द्वे अङ्गुली प्रमाणमस्य*** *इति लौकिकविग्रहे "द्वि औ अङ्गुली औ" इत्यलौकिकविग्रहे च मात्रच् इति तद्धितप्रत्ययस्य विवक्षायाम् "तद्धितार्थोत्तपद..." इत्यादिना समासे समासत्वात् प्रातिपदिकसंज्ञायां सुपो लुकि यणि द्व्यङ्गुली इति जाते अनेन सूत्रेण समासान्ते अच्प्रत्ययेऽनुबन्धलोपे "यस्येति च" इति इकारलोपे वर्णसम्मेलने द्व्यङ्गुल इति जाते तस्माद् मात्रच् प्रत्यये मात्रचः लुकि च स्वादिकार्ये च विहिते नुपंसकलिङ्गे द्व्यङ्गुलम् इति रूपं सिद्ध्यति । एवमेव निर्गतमङ्गुल्यो निरङ्गुलमिति बोध्यम् ।*

अच्प्रत्ययविधायकं विधिसूत्रम्-

**अहस्सर्वैकदेशसङ्ख्यातपुण्याच्च रात्रेः ५ । ४ । ८७**

**एभ्यो रात्रेरच् स्याच्चात्सङ्ख्याव्ययादेः । अहर्ग्रहणं द्वन्द्वार्थम् ।**

(सङ्ख्याव्ययादेः, तत्पुरुषस्य, अहस्सर्वैकदेशसङ्ख्यातपुण्यात्, च, रात्रेः, अच्, समासान्ताः, तद्धिताः)

***सरलार्थः-*** *अहन्-सर्व-एकदेश-सङ्ख्यात-पुण्यशब्देभ्यः परस्मात् रात्रिशब्दात् समासान्तः अच्प्रत्ययो भवति । चकारात् सङ्ख्याव्ययपूर्वकात् रात्रिशब्दान्तात् तत्पुरुषाच्च समासान्तः अच्प्रत्ययो भवति । अहन्शब्दस्य द्वन्द्वसमासाय अत्र ग्रहणम् ।*

पुंलिङ्गविधायकं विधिसूत्रम्-

**रात्राह्नाहाः पुंसि २ । ४ । २९**

**एतदन्तौ द्वन्द्वतत्पुरुषौ पुंस्येव । अहश्च रात्रिश्चाहोरात्रः । सर्वरात्रः । सङ्ख्यातरात्रः । सङ्ख्यापूर्वं रात्रं क्लीबम् । द्विरात्रम् । त्रिरात्रम् ।**

(रात्र-अह्न-अहाः,पुसि)

***सरलार्थः-*** *कृतसमासान्ताः रात्रः अह्नः अहः इत्यन्ताः शब्दाः पुंलिङ्गे प्रयोक्तव्याः ।*

*अहश्च रात्रिश्च इत्यनयोः समाहारः इति लौकिकविग्रहे अहन् सु रात्रि सु इत्यलौकिकविग्रहे च "चार्थे द्वन्द्वः" इति सूत्रेण समाहारेऽर्थे द्वन्द्वसमासे समासत्वात् प्रातिपदिकसंज्ञायां सुपो लुकि "अहन् रात्रि" इति जाते "अहःसर्वैकदेश...."इत्यादिना सूत्रेण अच्प्रत्यये "यस्येति च"*

*इति इकारलोपे वर्णसम्मेलने अहन्शब्दस्य नकारस्य "रूपरात्रिरथन्तरेषु रुत्वं वाच्यम्" इति वार्त्तिकेन रुत्वेऽनुबन्धलोपे "हशि च" इति उत्वे गुणे अहोरात्र शब्दस्य अनेन सूत्रेण पुंस्त्वे स्वादिकार्ये च अहोरात्रः इति रूपं सिद्ध्यति ।*

*एवमेव सर्वा च असौ रात्रिः, सङ्ख्याता असौ रात्रिः, द्वयोः रात्र्योः समाहारः, तिसृणां रात्रीणां समाहारः इति च विग्रहेषु क्रमेण तत्पुरुषे समासे विहिते सर्वरात्रः, सङ्ख्यातरात्रः, द्विरात्रम्, त्रिरात्रम् इति च ज्ञेयम् ।*

टच्प्रत्ययविधायकं विधिसूत्रम्-

**राजाहस्सखिभ्यष्टच् ५ । ४ । ९१**

**एतदन्तात्तत्पुरुषाट्टच् स्यात् । परमराजः ।**

(राजाहस्सखिभ्यः, टच्, तत्पुरुषस्य, समासान्ताः, तद्धिताः)

***सरलार्थः-*** *राजन् अहन् सखि इत्येतत्शब्दान्तात् तत्पुरुषात् तद्धितसंज्ञकः समासान्तः टच्प्रत्ययो भवति ।*

***परमराजः-*** *परमश्चासौ राजा इति लौकिकविग्रहे "परम सु राजन् सु" इति अलौकिकविग्रहे "विशेषणं विशेष्येण बहुलम्" इति सूत्रेण समासे पूर्वप्रयोगे समासत्वात् प्रातिपदिकसंज्ञायां विभक्तेर्लुकि परमराजन्शब्दाद् अनेन समासान्तटच्प्रत्ययेऽनुबन्धलोपे "नस्तद्धिते" इति टेर्लोपे वर्णसम्मेलने च परमराज इत्यस्मात्स्वादिकार्ये परमराजः इति रूपम् ।*

आकारान्तादेशविधायकं विधिसूत्रम्-

**आन्महतः समानाधिकरणजातीययोः ६ । ३ । ४६**

**महत आकारोऽन्तादेशः स्यात्समानाधिकरणे उत्तरपदे जातीये च परे । महाराजः । प्रकारवचने जातीयर् । महाप्रकारो महाजातीयः ।**

(महतः, आत्, समानाधिकरणजातीययोः, उत्तरपदे)

***सरलार्थः-*** *महतः आकारोन्तादेशो भवति समानाधिकरणे उत्तरपदे परतः, जातीयर्प्रत्यये परतश्च ।*

***महाराजः-*** *महाश्चासौ राजा इति विग्रहे कर्मधारयसमासे अनेन आकारादेशे सिद्धम् ।*

*महाप्रकारकः इत्यर्थे महत्शब्दात् "प्रकारवचने जातीयर्" इति सूत्रेण जातीयर्प्रत्यये अनेन सूत्रेण आत्वे च कृते महाजातीयः इति बोध्यम् ।*

आकारादेशविधायकं विधिसूत्रम्-

**द्व्यष्टनः सङ्ख्यायामबहुव्रीह्यशीत्योः ६ । ३ । ४७**

**आत्स्यात् । द्वौ च दश च द्वादश । अष्टाविंशतिः ।**

(द्व्यष्टनः, सङ्ख्यायाम्, अबहुव्रीह्यशीत्योः)

***सरलार्थः-*** *द्विशब्दस्य, अष्टन्शब्दस्य च स्थाने आकारादेशो भवति सङ्ख्यावाचकशब्दे परे सति बहुव्रीहिसमासे, अशीतिशब्दे परे च अयमादेशो न भवति ।*

*द्वादशः- द्वौ च दश च इति लौकिकविग्रहे "द्वि औ दशन् जस्" इत्यलौकिकविग्रहे द्वन्द्वसमासे समासत्वात् प्रातिपदिकसंज्ञायां सुपो लुकि द्विदशन् इति जाते द्विशब्दस्य इकारस्य स्थाने अनेन सूत्रेण आकारादेशः । एवमेव अष्टौ च विंशतिश्च इति विग्रहे अष्टाविंशतिः ।*

त्रयस्-आदेशविधायकं विधिसूत्रम्-

**त्रेस्त्रयः ६ । ३ । ४८**

**त्रयोदश । त्रयोविंशतिः । त्रयस्त्रिंशत् ।**

(त्रेः, त्रयः, सङ्ख्यायामबहुव्रीह्यशीत्योः)

***सरलार्थः-*** *त्रिशब्दस्य स्थाने त्रयस् इत्ययम् आदेशो भवति सङ्ख्यावाचकशब्दे परे सति बहुव्रीहिसमासे, अशीतिशब्दे परे च अयमादेशो न भवति ।*

*त्रीणि च दश च इति विग्रहे द्वन्द्वसमासे त्रिदशन् इत्यवस्थायाम् अनेन सूत्रेण त्रिशब्दस्य त्रयस् इत्यादेशे सस्य रूत्वे रेफस्य उत्वे गुणे च त्रयोदश इति रूपम् ।*

लिङ्गनिर्धारकं सूत्रम्-

**परवल्लिङ्गं द्वन्द्वतत्पुरुषयोः २ । ४ । २६**

**एतयोः परपदस्येव लिङ्गं स्यात् । कुक्कुटमयूर्याविमे । मयूरीकुक्कुटाविमौ ।**

(द्वन्द्वतत्पुरुषयोः परवल्लिङ्गम्)

***सरलार्थः-*** *द्वन्द्वतत्पुरुषसमासयोः समुदायाद् उत्तरपदस्य इव लिङ्गं भवति । यथा कुक्कुटमयूर्यौ अत्र मयुरी शब्दस्य उत्तरपदत्वेन समुदायात् स्त्रीलिङ्गः । मयुरीकुक्कुटौ अत्र कुक्कुटशब्दस्य उत्तरपदत्वेन समुदायात् पुंलिङ्गः ।*

**द्विगुप्राप्तापन्नालम्पूर्वगतिसमासेषु प्रतिषेधो वाच्यः (परिभाषा) । पञ्चसु कपालेषु संस्कृतः पञ्चकपालः पुरोडाशः ।**

***सरलार्थः***– *द्विगुसमासे, प्राप्तापन्नालंपूर्वके समासे, गतिसमासे च परवल्लिङ्गस्य प्रतिषेधो वाच्यः । तेन पञ्चकपालः इत्यत्र द्विगुसमासे पुरोडाशस्य विशेष्यस्य अनुसारेण पुंलिङ्गो जातः न तु उत्तरपदस्य कपालस्य अनुसारेण नपुंसकलिङ्गम् ।*

समासविधायकम्, अकारादेशविधायकञ्च सूत्रम्-

**प्राप्तापन्ने च द्वितीयया २ । २ । ४**

**समस्येते । अकारश्चानयोरन्तादेशः । प्राप्तो जीविकां प्राप्तजीविकः । आपन्नजीविकः । अलं कुमार्यै – अलंकुमारिः । अत एव ज्ञापकात्समासः । निष्कौशाम्बिः ।**

(प्राप्तापन्ने, द्वितीयया, अ, तत्पुरुषः)

***सरलार्थः***– *प्राप्त- आपन्न इत्येतद्प्रकृतिके समर्थसुबन्ते द्वितीयासमर्थसुबन्तेन सह समस्येते स च तत्पुरुषः, अ इत्यन्तादेशश्च भवति ।*

पुंलिङ्गनपुंसकलिङ्गयोर्विधायकं विधिसूत्रम्-

**अर्धर्चाः पुंसि च २ । ४ । ३१**

**अर्धर्चादयः शब्दाः पुंसि क्लीबे च स्युः । अर्धर्चः । अर्धर्चम् । एवं ध्वजतीर्थशरीरमण्डपयूपदेहाङ्कुशपात्रसूत्रादयः ।**

(अर्धचाः, पुंसि, नपुंसकम्, च )

***सरलार्थः***– *अर्धर्चः आदयः शब्दाः पुंसि नपुंसके च भवन्ति । अर्धर्चः, अर्धर्चम् । ध्वजः, ध्वजम् । तीर्थः, तीर्थम् । शरीरः, शरीरम् । मण्डपः, मण्डपम् । यूपः, यूपम् । देहः, देहम् । अङ्कुशः, अङ्कुशम् । पात्रः, पात्रम् । सूत्रः, सूत्रम् ।*

**सामान्ये नपुंसकम् । मृदु पचति । प्रातः कमनीयम्**

***सरलार्थः***– *अन्यलिङ्गानामनिर्णये शब्देभ्यः सामान्यतो नपुंसकं भवति । यथा - मृदु पचति अत्र मृदु नपुंसकम् । प्रातः कमनीयम् इत्यत्र कमनीयम् इति नपुंसकम् ।*

। इति तत्पुरुषः । ३ ।

## प्रयोगसिद्धिप्रकारः

### नरकपतितः

'नरकं पतितः' इति लौकिकविग्रहे 'नरक+अम्+पतित+सु' इत्यलौकिकविग्रहे 'नरक+अम्' इति द्वितीयान्तसमर्थस्य 'पतित+सु' इति सुबन्तसमर्थेन सह "द्वितीयाश्रितातीतपतितगतात्यस्तप्राप्तापन्नैः" इति सूत्रेण समासे "प्रथमानिर्दिष्टं समास

उपसर्जनम्” इति सूत्रेण प्रथमान्तेन निर्दिष्टस्य ‘नरक+अम्’ इत्यस्योपसर्जनसंज्ञायाम् “उपसर्जनं पूर्वम्” इत्युपसर्जनस्य पूर्वप्रयोगे, समासत्वात् “कृत्तद्धितसमासाश्च” इति सूत्रेण प्रातिपदिकसंज्ञायां “सुपो धातुप्रातिपदिकयोः” इति सुपो लुकि ‘नरकपतित’ इति जाते, प्रातिपदिकत्वात् तस्मात् सौ, सकारस्य रुत्वे विसर्गे ‘नरकपतितः’ इति रूपं सिद्ध्यति ।

## नीलोत्पलम्

‘नीलं च तद् उत्पलम्’ इति लौकिकविग्रहे ‘नील+सु+उत्पल+सु’ इत्यलौकिकविग्रहे “विशेषणं विशेष्येण बहुलम्” इति सूत्रेण ‘नील+सु’ इति भेदकस्य सुबन्तस्य ‘उत्पल+सु’ इति भेद्येन समानाधिकरणेन सुबन्तेन सह समासे, विशेषणमिति प्रथमान्तपदेन निर्दिष्टस्य ‘नील+सु’ इत्यस्योपसर्जनसंज्ञायां तस्य पूर्वप्रयोगे, समासत्वात् प्रातिपदिकसंज्ञायां विभक्तेर्लुकि ‘नील उत्पल’ इति जाते “आद् गुणः” इति गुणे, स्वादिकार्ये ‘नीलोत्पलम्’ इति सिद्ध्यति ।

## अनश्वः

‘न अश्वः’ इति लौकिकविग्रहे ‘न+अश्व+सु’ इत्यलौकिकविग्रहे “नञ्” इति सूत्रेण समासे, न-शब्दस्योपसर्जनत्वात् पूर्वप्रयोगे “नलोपो नञः” इति नकारलोपे, समासत्वात् प्रातिपदिकत्वेन सुब्लुकि ‘अ अश्व’ इत्यवस्थायां “तस्मान्नुडचि” इति सूत्रेण अजादेरुत्तरपदस्य अश्वशब्दस्य नुडागमेऽनुबन्धलोपे, टित्वादाद्यवयवत्वे ‘अनश्व’ इति जाते, तस्मात् प्रातिपदिकात् सौ, विभक्तिकार्ये ‘अनश्वः’ इति सिद्ध्यति ।

### अभ्यासार्थाः प्रश्नाः

१. **अधस्तनसूत्राणामर्थं सोदाहरणं लिखत**

(क) तत्पुरुषः
(ख) तृतीया तत्कृतार्थेन गुणवचनेन
(ग) कर्तृकरणे कृता बहुलम्
(घ) पञ्चमी भयेन
(ङ) उपमानानि सामान्यवचनैः
(च) कुगतिप्रादयः
(छ) तद्धितार्थोत्तरपदसमाहारे च
(ज) नञ्
(झ) गोस्त्रियोरुपसर्जनस्य
(ञ) द्व्यष्टनः सङ्ख्यायामबहुव्रीह्यशीत्योः

२. **प्रश्नानामुत्तराणि देयानि**

(क) तत्पुरुषसमासस्य सोदाहरणं परिचयं दत्त ।
(ख) ‘सुखप्राप्तः’ इत्यत्र कस्य पदार्थस्य प्राधान्यं वर्तते ?
(ग) ‘विद्यादानम्’ इति समस्तपदस्य विग्रहवाक्यं लिखत ।

(घ) 'दुःखम् आपन्नः' इति विग्रहे केन सूत्रेण समासो भवति ?

(ङ) 'अक्ष्णा काणः' इत्यत्र कथं समासो न भवति ?

(च) "कृद्ग्रहणे०" इति परिभाषां पूरयित्वा सोदाहरणं तस्या अर्थं लिखत ।

(छ) 'युपाय दारु' इति विग्रहे समासविधायकं सूत्रं लिखित्वा तस्यार्थं लिखत ।

(ज) "अर्थेन नित्यसमासो०" इति वार्तिकं पूर्णं विलिख्य तस्य त्रीणि उदाहरणानि च लिखत ।

(झ) "षष्ठी" इति सूत्रेण किं क्रियते ?

(ञ) "सप्तमी शौण्डैः" इति सूत्रस्य अर्थं लिखत ।

(ड) "तस्मान्नुडचि" इति सूत्रेण किं कार्यं क्रियते ?

(ढ) नञः सुपा सह समासविधायकं सूत्रं लिखत ।

(ड) कर्मधारयसंज्ञाविधायकं सूत्रं लिखत ।

(ढ) कर्मधारयपदेन इति कीदृशः समासो गृह्यते ?

(ण) 'शास्त्रप्रवीणः' इति समस्तपदस्य विग्रहं कृत्वा तत्र समासविधायकं सूत्रं लिखत ।

(त) उपपदसंज्ञाविधायकं सूत्रं लिखत ।

(थ) "गतिकारकोपपदानां०" इति पूरयत ।

३. **अधस्तनसमस्तपदानि प्रयुज्य वाक्यानि रचयत**

कष्टश्रितः, ज्ञानतृप्तः, धान्यार्थः, नखभिन्नः, द्विजार्थम्, भूतबलिः, चोरभयम्, मात्रनुमतिः, विद्यादानम्, शास्त्रनिपुणः, व्यवहारकुशलः, घनश्यामः, नीलोत्पलम्, अब्राह्मणः, अनद्यतनः, कुम्भकारः, कुपुरुषः, नवनीतकोमलम्, असत्यम्, राजप्रासादः, पितृकृतम् ।

४. **अधस्तनानां समस्तपदानां लौकिकालौकिकविग्रहवाक्यानि प्रदर्श्य प्रत्येकं समासविधायकानि सूत्राणि च लिखत**

ग्रामगतः, तरङ्गात्यस्तः, घटकारः, ब्राह्मणकम्बलः, गोहितम्, चोरभीतिः, अक्षशौण्डः, द्विजार्थम्, हरित्रातः, धान्यार्थः, रक्तोत्पलम्, घनश्यामः, राजगृहम्, कुपुरुषः ।

५. **अधस्तनविग्रहेषु निष्पन्नानि समस्तपदानि लिखत**

अङ्कुशेन उद्धृतः, पाणिनिना कृतम्, पित्रा दत्तम्, ज्ञानस्य दानम्, कालम् अतीतः, नीलं च तदुत्पलम्, न अधीतः, कुत्सितं कार्यम्, शोभनः पुरुषः, विद्युदिव चलम्, गुग्धमिव श्वेतम्,

न मानवः, अक्षेषु धूर्तः, चोराद् भयम्, पुत्राय अयम्, गोभ्यो रक्षितम् ।

६. **अधस्तनप्रयोगाणां सिद्धिप्रक्रियां दर्शयत**

कृष्णश्रितः, शङ्कुलाखण्डः, यूपदारु, चोरभयम्, राजपुरुषः, अक्षशौण्डः, घनश्यामः, कमलनयनम्, कुपुरुषः, अब्राह्मणः, कुम्भकारः, रक्तोत्पलम् ।

## अनुप्रयोगः

१. **अधो लिखितानि वाक्यानि पठत**

(क) **दुःखापन्नेषु** जनेषु अस्माभिः सर्वैः दया कर्तव्या ।

(ख) वयं **पाणिनिकृतं** व्याकरणं पठामः ।

(ग) **पितृकृतं** धनं **पुत्रार्थं** भवति ।

(घ) जना **भूतबलिमु**पहरन्ति ।

(ङ) माता **देवपूजनार्थं** पुष्पं चिनोति ।

(च) सम्प्रति सर्वत्र **चोरभयं** वर्धमानं वर्तते ।

(छ) **राजपुरुषो** राज्ञ आज्ञां पालयति ।

(ज) हे सरस्वति ! मह्यं **विद्यादानं** करोतु ।

(झ) **व्यवहारकुशलो** जनः सुखेन जीवनं यापयति ।

(ञ) पुष्करिण्यां **नीलोत्पलानि** विकसितानि सन्ति ।

(ट) **घनश्यामो** श्रीकृष्णोऽर्जुनं **गीतामृतं** पाययाञ्चकार ।

(ठ) **कुपुत्रः** सदैव **दुःखदायको** भवति ।

२. **तत्पुरुषसमासेन निष्पन्नानि पदानि प्रयुज्य एकमनुच्छेदं विलिख्य शिक्षकं दर्शयत ।**

सप्तदशः पाठः

# अथ बहुव्रीहिसमासः

अधिकारसूत्रम्-

**शेषो बहुव्रीहिः २ । २ । २३**

**अधिकारोऽयं प्राग्द्वन्द्वात् ।**

***सरलार्थः-*** *इत ऊर्ध्वं "चार्थे द्वन्द्वः २ । २ । २९" इति सूत्रात् प्राग् यानि समासविधायकानि सूत्राणि सन्ति तेषु 'बहुव्रीहिः' इति पदमुपतिष्ठते ।*

बहुव्रीहिसमासविधायकं सूत्रम्-

**अनेकमन्यपदार्थे २ । २ । २४**

**अनेकं प्रथमान्तमन्यस्य पदस्यार्थे वर्तमानं वा समस्यते स बहुव्रीहिः ।**

(अनेकम्, शेषः, अन्यपदार्थे,सुप्, सह सुपा, विभाषा, समासः, बहुव्रीहिः)

***सरलार्थः-*** *अन्यपदार्थबोधकम् अनेकं प्रथमान्तपदं सुपा सह विभाषया समस्यते, स च बहुव्रीहिसंज्ञको भवति ।*

पूर्वपदप्रयोगनियामकं सूत्रम्-

**सप्तमीविशेषणे बहुव्रीहौ २ । २ । ३५**

**सप्तम्यन्तं विशेषणं च बहुव्रीहौ पूर्वं स्यात् । अत एव ज्ञापकाद्व्यधिकरणपदो बहुव्रीहिः । प्राप्तमुदकं यं स प्राप्तोदको ग्रामः । ऊढरथोऽनड्वान् । उपहृतपशु रुद्रः । उद्धृतौदना स्थाली । पीताम्बरो हरिः । वीरपुरुषको ग्रामः ।**

(बहुव्रीहौ, सप्तमीविशेषणे, पूर्वम्)

***सरलार्थः-*** *बहुव्रीहिसमासे सप्तम्यन्तस्य सुबन्तस्य विशेषणस्य सुबन्तस्य च पूर्वप्रयोगो भवति । बहुव्रीहौ सप्तम्यन्तं पदम्, विशेषणवाचकञ्च पदं प्राक्प्रयुज्येते इत्याशयः)*

***प्राप्तोदको ग्रामः-*** *'प्राप्तम् उदकं यं सः' इति लौकिकविग्रहे 'प्राप्त+सु+उदक+सु' इत्यलौकिकविग्रहे "अनेकमन्यपदार्थे" इति सूत्रेण समासे, प्रकृतसूत्रेण 'प्राप्त+सु' इति विशेषणस्य पूर्वनिपाते, समासत्वात् प्रातिपदिकसंज्ञायां सुपो लुकि 'प्राप्त उदक' इति जाते "आद् गुणः" इति गुणे, ग्रामस्य विशेषणत्वात् तस्मात् पुंलिङ्गे सौ, विभक्तिकार्ये 'प्राप्तोदकः' इति सिद्ध्यति । एवमेव*

*- ऊढो रथो येन सः- ऊढरथः । ऊढरथोऽनड्वान् इति प्रयोगः । उपहृतः पशुर्यस्मै सः- **उपहृतपशुः** (रुद्रः) । उपहृतपशू रुद्रः, अत्र 'उपहृतपशुः+रुद्रः' इत्यवस्थायां विसर्गस्य सत्वे, रुत्वे, पूर्वरेफस्य लोपे, **ढ्रलोपे पूर्वस्येति** उकारस्य दीर्घः । उद्धृतम् ओदनम् यस्याः सा - **उद्धृतौदना** स्थाली, अत्र स्थाल्या विशेषणत्वाद् 'उद्धृतौदना' इत्यस्माट्टाप्प्रत्ययः । पीतम् अम्बरं यस्य सः- **पीताम्बरो** हरिः । वीराः पुरुषा यस्मिन् स - **वीरपुरुषको** ग्रामः ।*

सप्तम्या अलुग्विधायकं विधिसूत्रम्-

**हलदन्तात्सप्तम्याः संज्ञायाम् ६ । ३ । ९**

**हलन्ताददन्ताच्च सप्तम्या अलुक् । कण्ठेकालः । प्राप्तमुदकं यं स प्राप्तोदको ग्रामः । ऊढरथोऽनड्वान् । उपहृतपशू रुद्रः । उद्धृतौदना स्थाली । पीताम्बरो हरिः । वीरपुरुषको ग्रामः । प्रादिभ्यो धातुजस्य वाच्यो वा चोत्तरपदलोपः -वा.) । प्रपतितपर्णः, प्रपर्णः । नञोऽस्त्यर्थानां वाच्यो वा चोत्तरपदलोपः -वा.) । अविद्यमानपुत्रः, अपुत्रः ।**

(हलदन्तात्, सप्तम्याः, अलुक्, उत्तरपदे, संज्ञायाम्)

***सरलार्थः-*** *हलन्ताद् ह्रस्वाकारान्ताच्च शब्दात् उत्तरस्याः सप्तमीविभक्तेर्लुग् न भवति ।*

*'कण्ठे कालो यस्य सः' इति लौकिकविग्रहे 'कण्ठ+ङि+काल+सु' इत्यलौकिकविग्रहे "अनेकमन्यपदार्थे" इति समासे "सप्तमीविशेषणे बहुव्रीहौ" इति सूत्रेण सप्तम्यन्तस्य 'कण्ठ+ङि' इत्यस्य पूर्वप्रयोगे, समासत्वात् प्रातिपदिकसंज्ञायां सुब्लुकि प्राप्ते, प्रकृतसूत्रेण सप्तमीविभक्तेरलुकि, प्रथमायाः सोस्तु लुकि 'कण्ठ इ काल' इत्यवस्थायां गुणे, स्वादिकार्ये 'कण्ठेकालः' इति सिद्ध्यति । शिव इत्यर्थः ।*

***प्राप्तोदको ग्रामः-*** *प्राप्तमुदकं यं स इति लौकिकविग्रहे प्राप्त सु उदक सु इत्यलौकिकविग्रहे "अनेकमन्यपदार्थे" इति सूत्रेण द्वितीयार्थे समासे "सप्तमीविशेषणे बहुव्रीहौ" इति सूत्रेण प्राप्त+सु इत्यस्य पूर्वप्रयोगे, समासत्वात् प्रातिपदिकसंज्ञायां सुब्लुकि, गुणे, स्वादिकार्ये 'प्राप्तोदकः' इति सिद्ध्यति । ग्राम इत्यर्थः ।*

***ऊढरथः ।*** *ऊढो रथो येन इति लौकिकविग्रहे "ऊढ सु रथ सु" इत्यलौकिकविग्रहे "अनेकमन्यपदार्थे" इति सूत्रेण तृतीयायाः करणेऽर्थे गम्यमाने समासे "सप्तमीविशेषणे बहुव्रीहौ" इति सूत्रेण ऊढ+सु इत्यस्य पूर्वप्रयोगे, समासत्वात् प्रातिपदिकसंज्ञायां सुब्लुकि, स्वादिकार्ये 'ऊढरथः" इति सिद्ध्यति । अनड्वान् इत्यर्थः ।*

***उपहृतपशुः- उपहृतः पशुः यस्मै सः इति लौकिकविग्रहे, "उपहृत सु पशु सु"*** *इत्यलौकिकविग्रहे सम्प्रदाने चतुर्थ्यर्थे गम्यमाने "अनेकमन्यपदार्थे"इति सूत्रेण समासे "सप्तमीविशेषणे बहुव्रीहौ" इति सूत्रेण उपहृत+सु इत्यस्य पूर्वप्रयोगे, समासत्वात् प्रातिपदिकसंज्ञायां सुब्लुकि, स्वादिकार्ये 'उपहृतपशुः" इति सिद्ध्यति । रुद्र इत्यर्थः ।*

***उद्धृतौदना – उद्धृतम् ओदनं यस्माद् इति लौकिकविग्रहे, "उद्धृत सु ओदन सु"*** *इत्यलौकिकविग्रहे अपादाने पञ्चम्यर्थे गम्यमाने "अनेकमन्यपदार्थे"इति सूत्रेण समासे "सप्तमीविशेषणे बहुव्रीहौ" इति सूत्रेण उद्धृत+सु इत्यस्य पूर्वप्रयोगे, समासत्वात् प्रातिपदिकसंज्ञायां सुब्लुकि, "वृद्धिरेचि" इति वृद्धौ स्त्रीत्वविवक्षायां टापि स्वादिकार्ये च 'उद्धृतौदना" इति सिद्ध्यति । स्थाली इत्यर्थः ।*

***पीताम्बरः– पीतम् अम्बरं यस्य सः इति लौकिकविग्रहे, "पीत सु अम्बर सु"*** *इत्यलौकिकविग्रहे षष्ठ्यर्थे गम्यमाने "अनेकमन्यपदार्थे"इति सूत्रेण समासे "सप्तमीविशेषणे बहुव्रीहौ" इति सूत्रेण पीत+सु इत्यस्य पूर्वप्रयोगे, समासत्वात् प्रातिपदिकसंज्ञायां सुब्लुकि, सवर्णदीर्घे स्वादिकार्ये च 'पीताम्बरः" इति सिद्ध्यति । हरिः इत्यर्थः ।*

***वीरपुरुषकः– वीराः पुरुषाः सन्ति यस्मिन् इति लौकिकविग्रहे, "वीर जस् पुरुष जस्"*** *इत्यलौकिकविग्रहे अधिकरणे सप्तम्यर्थे गम्यमाने "अनेकमन्यपदार्थे"इति सूत्रेण समासे "सप्तमीविशेषणे बहुव्रीहौ" इति सूत्रेण वीर+जस् इत्यस्य पूर्वप्रयोगे, समासत्वात् प्रातिपदिकसंज्ञायां सुब्लुकि, वीरपुरुषशब्दात् "शेषाद्विभाषा" इति कप्प्रत्यये स्वादिकार्ये 'वीरपुरुषकः" इति सिद्ध्यति । ग्राम इत्यर्थः ।*

**प्रादिभ्यो धातुजस्य वाच्यो वा चोत्तरपदलोपः –वा.) । प्रपतितपर्णः, प्रपर्णः ।**

***सरलार्थः–*** *प्रादिभ्यः परे ये धातुजाः शब्दाः तदन्तं प्रथमान्तं समर्थसुबन्तम्, अन्यैः प्रथमान्तसमर्थसुबन्तैस्सह विभाषया समस्यन्ते, प्रादिभ्यः परे उत्तरपदभूता ये धातुजाः शब्दाः तेषां विभाषया लोपश्च भवति ।*

***प्रपतितपर्णः, प्रपर्णः–*** *प्रकृष्टं पतितं प्रपतितम् । अत्र पूर्वं "प्रादयो गताद्यर्थे प्रथमया " इति वार्तिकेन समासः ततः प्रपतितं पर्णं यस्माद् इति लौकिकविग्रहे "प्रपतित सु पर्ण सु" इत्यलौकिके विग्रहे च अनेन वार्तिकेन समासे समासत्वात् प्रातिपदिकसंज्ञायां सुपो लुकि "प्रपतित पर्ण" इति जाते विभाषया अनेनैव वार्तिकेन उत्तरपदभूतस्य पतितशब्दस्य च लोपे प्रपर्ण इत्यस्य प्रातिपदिकत्वेन स्वादिकार्ये प्रपर्णः इति सिद्ध्यति । धातुजोत्तरपदस्य लोपाऽभावे तु प्रपतितपर्णः इति सिद्ध्यति ।*

**नञोऽस्त्यर्थानां वाच्यो वा चोत्तरपदलोपः –वा.) । अविद्यमानपुत्रः, अपुत्रः ।**

***सरलार्थः–*** *नञः परे ये अस्त्यर्थकाः शब्दाः तदन्तं प्रथमान्तं समर्थसुबन्तम्, अन्यैः प्रथमान्तसमर्थसुबन्तैस्सह विभाषया समस्यन्ते, नञः परे उत्तरपदभूता ये अस्त्यर्थवाचकाः शब्दाः तेषां विभाषया लोपश्च भवति ।*

***अविद्यमानपुत्रः, अपुत्रः– न विद्यमानम् इति अविद्यमानम् ।*** *अत्र पूर्वं "नञः" इति सूत्रेण समासः ततः अविद्यमानः पुत्रो यस्य इति लौकिकविग्रहे "अविद्यमान सु पुत्र सु" इत्यलौकिके विग्रहे च अनेन वार्तिकेन समासे समासत्वात् प्रातिपदिकसंज्ञायां सुपो लुकि "अविद्यमान पुत्र" इति*

*जाते विभाषया अनेनैव वार्तिकेन उत्तरपदभूतस्य अस्त्यर्थवाचिनः विद्यमानपदस्य च लोपे अपुत्र इत्यस्य प्रातिपदिकत्वेन स्वादिकार्ये अपुत्र इति सिद्धयति । अस्त्यर्थवाचिनः उत्तरपदस्य लोपाऽभावे तु अविद्यमानपुत्र इति सिद्धयति ।*

पुंवद्भावविधायकमतिदेशसूत्रम्-

**स्त्रियाः पुंवद्भाषितपुंस्कादनूङ् समानाधिकरणे स्त्रियामपूरणीप्रियाऽऽदिषु ६ । ३ । ३४**

**उक्त पुंस्कादनूङ् ऊङोऽभावोऽस्यामिति बहुव्रीहिः । निपातनात्पञ्चम्या अलुक् षष्ठ्याश्च लुक् । तुल्ये प्रवृत्तिनिमित्ते यदुक्त पुंस्कं तस्मात्पर ऊङोऽभावो यत्र तथाभूतस्य स्त्रीवाचकशब्दस्य पुंवाचकस्येव रूपं स्यात् समानाधिकरणे स्त्रीलिङ्गे उत्तरपदे न तु पूरण्यां प्रियादौ च परतः । गोस्त्रियोरिति ह्रस्वः । चित्रगुः । रूपवद्भार्यः । अनूङ् किम् ? वामोरूभार्यः । पूरण्यां तु –**

(स्त्रियाः, पुंवद्, भाषितपुंस्कादनूङ्, समानाधिकरणे, स्त्रियाम्, अपूरणीप्रियाऽऽदिषु)

***सरलार्थः–*** *समानार्थवाचकः सन् यो शब्द पुंलिङ्गेऽपि वर्तते तादृशस्य ऊङन्तभिन्नस्य स्त्रीवाचकशब्दस्य पुंलिङ्गस्य इव रूपं भवति समानाधिकरणे स्त्रीलिङ्गे उत्तरपदे परतः, पूरणार्थकप्रत्ययान्ते शब्दे, प्रियादिशब्देषु च परे तु न भवति ।*

***चित्रगुः–*** *चित्राः गावः सन्ति यस्य इति लौकिकविग्रहे, "चित्रा जस् गो जस्" इत्यलौकिकविग्रहे च "अनेकमन्यपदार्थे"इति सूत्रेण समाससंज्ञायां "सप्तमीविशेषणे बहुव्रीहौ" इति सूत्रेण चित्रा+जस् इत्यस्य पूर्वप्रयोगे, "चित्रा गो" इति जाते चित्राशब्दस्य अनेन सूत्रेण पुंवद्भावे चित्र इति जाते समासत्वात् प्रातिपदिकसंज्ञायां सुब्लुकि, "एकविभक्तिचापूर्वनिपाते" इति सूत्रेण गोशब्दस्य उपसर्जनसंज्ञायाम्, "गोस्त्रियोरुपसर्जनस्य" इति सूत्रेण ह्रस्वादेशे चित्रगुशब्दस्य प्रातिपदिकत्वे सौ विभक्तिकार्ये च चित्रगुः इति सिद्धयति । चित्रगवां स्वामी इत्यर्थः ।*

***रूपवद्भार्यः–*** *रूपवती भार्या यस्य इति विग्रहे पूर्ववत् प्रक्रियया रूपवद्भार्यः इति प्रयोगो बोध्यः । ऊङ्प्रत्ययान्तस्य पुंवद्भावनिषेधाद् वामोरुः भार्या यस्य सः इति विग्रहे वामोरूभार्यः इत्यत्र न पुंवद्भावः । पूरणार्थकप्रत्ययान्ते समानाधिकरणे स्त्रीलिङ्गे परे आह–*

अप्-प्रत्ययविधायकं विधिसूत्रम्-

**अप्-पूरणीप्रमाण्योः ५ । ४ । ११६**

**पूरणार्थप्रत्ययान्तं यत्स्त्रीलिङ्गं तदन्तात्प्रमाण्यन्ताच्च बहुव्रीहेरप्स्यात् । कल्याणी पञ्चमी यासां रात्रीणां ताः कल्याणीपञ्चमा रात्रयः । स्त्री प्रमाणी यस्य स स्त्रीप्रमाणः । अप्रियादिषु किम् ? कल्याणीप्रिय इत्यादि ।**

(पूरणीप्रमाण्योः, अप्, बहुव्रीहौ)

***सरलार्थः-*** *पूरणार्थप्रत्ययान्तं यत्स्त्रीलिङ्गं तदन्तात्, प्रमाण्यन्ताच्च शब्दाद् अप्प्रत्ययो भवति बहुव्रीहौ ।*

***कल्याणीपञ्चमाः-*** *कल्याणी पञ्चमा यासां ताः इति लौकिकविग्रहे "कल्याणी सु पञ्चमी सु" इत्यलौकिकविग्रहे बहुव्रीहिसमासे सुपो लुकि "कल्याणीपञ्चमी" इत्यवस्थायां पूर्वसूत्रेण पूरणार्थकप्रत्ययान्ते स्त्रीलिङ्गे पञ्चमी इति उत्तरपदे परे न पुंवद्भावः किन्तु अनेन सूत्रेण समासान्ते अप् प्रत्ययेऽनुन्धलोपे कल्याणीपञ्चमी +अ इत्यवस्थायां "यस्येति च" इति इकारलोपे वर्णसम्मेलने कल्याणीपञ्चम इत्यस्य प्रातिपदिकत्वेन स्वादिकार्ये कल्याणीपञ्चमाः रात्रयः इति ।*

***अप्रियादिषु किम् ? कल्याणीप्रियः-*** *प्रियाद्युत्तरपदे परे न पुंवद्भावः इति कथनेन कल्याणी प्रिया यस्य सः इति विग्रहे कल्याणीप्रिय इत्येव न तु कल्याणप्रियः इति भवति ।*

समासान्तषच्प्रत्ययविधायकं विधिसूत्रम्-

**बहुव्रीहौ सक्थ्यक्ष्णोः स्वाङ्गात् षच् ५ । ४ । ११३**

**स्वाङ्गवाचिसक्थ्यक्ष्यन्ताद् बहुव्रीहेः षच् स्यात् । दीर्घसक्थः । जलजाक्षी । स्वाङ्गात्किम् ? दीर्घसक्थि शकटम् । स्थूलाक्षा वेणुयष्टिः । अक्ष्णोऽदर्शनादिति वक्ष्यमाणोऽच् ।**

(बहुव्रीहौ स्वाङ्गात्, सक्थ्यक्ष्णोः, षच्, समासान्ताः, तद्धिताः)

***सरलार्थः-*** *स्वाङ्गवाचिनः सक्थ्यन्ताद्, अक्ष्यन्ताच्च बहुव्रीहेः समासान्तः तद्धितसंज्ञकः षच् प्रत्ययो भवति । षकारचकारौ इतौ ।*

***दीर्घसक्थः-*** *दीर्घे सक्थिनी यस्य सः इति विग्रहे "दीर्घ औ सक्थि औ" इत्यलौकिकविग्रहे "अनेकमन्यपदार्थे" इति सूत्रेण समाससंज्ञायां समासत्वात् प्रातिपदिकसंज्ञायां विभक्तेर्लुकि दीर्घसक्थिशब्दात् अनेन सूत्रेण समासान्ते षच्प्रत्ययेऽनुबन्धलोपे दीर्घसक्थि+अ इत्यवस्थायां "यस्येति च" इति इकारलोपे वर्णसम्मेलने दीर्घसक्थ इत्यस्य प्रातिपदिकत्वेन स्वादिकार्ये दीर्घसक्थः इति सिद्ध्यति । पुरुष इत्यर्थः ।*

***जलजाक्षा -*** *जलजे इव अक्षिणी यस्याः सा इति लौकिकविग्रहे, "जलज औ अक्षिणी औ" इत्यलौकिकविग्रहे पूर्ववद् जलजाक्षा इति बोध्यम् । कमलनयिनी स्त्री इत्यर्थः ।*

समासान्तषप्रत्ययविधायकं विधिसूत्रम्-

**द्वित्रिभ्यां ष मर्ध्नः ५ । ४ । ११५**

**आभ्यां मूर्ध्नः षः स्याद्बहुव्रीहौ । द्विमूर्धः । त्रिमूर्धः**

(बहुव्रीहौ, द्वित्रिभ्यां षः मूर्ध्नः, समासान्ताः, तद्धिताः)

*सरलार्थः*- *द्वित्रिशब्दाभ्यां परो यो मूर्धन्-शब्दः तदन्ताद् बहुव्रीहेः षप्रत्ययो भवति ।*

*द्विमूर्धः- द्वौ मूर्धानौ यस्य सः इति लौकिकविग्रहे, "द्वि औ मूर्धन् औ" इत्यलौकिकविग्रहे "अनेकमन्यपदार्थे" इति सूत्रेण समाससंज्ञायां समासत्वात्प्रातिपदिकत्वेन सुपो लुकि द्विशब्दस्य पूर्वनिपाते "द्विमूर्धन्" इत्यवस्थायाम् अनेन सूत्रेण समासान्तषप्रत्ययेऽनुबन्धलोपे भसंज्ञाटिसंज्ञयोः "नस्तद्धिते" इति सूत्रेण टेर्लोपे वर्णसम्मेलने द्विमूर्धशब्दस्य प्रातिपदिकसंज्ञायां स्वादिकार्ये द्विमूर्धः इति रूपं सिद्ध्यति । एवं त्रिमूर्धः ।*

अप्-प्रत्ययविधायकं विधिसूत्रम्-

**अन्तर्बहिर्भ्यां च लोम्नः ५ । ४ । ११७**

**आभ्यां लोम्नोऽप्स्याद्बहुव्रीहौ । अन्तर्लोमः । बहिर्लोमः ।**

(बहुव्रीहौ, अन्तर्बहिर्भ्यां च लोम्नः, समासान्ताः, तद्धिताः)

*सरलार्थः*- *अन्तर्-बहिष्शब्दाभ्यां परो यो लोमन्-शब्दः तदन्ताद् बहुव्रीहेः अप्-प्रत्ययो भवति ।*

***अन्तर्लोमः***- *अन्तः लोमानि यस्य सः इति लौकिकविग्रहे, "अन्तर लोमन् जस्" इत्यलौकिकविग्रहे "अनेकमन्यपदार्थे" इति सूत्रेण समाससंज्ञायां समासत्वात्प्रातिपदिकत्वेन सुपो लुकि अन्तर्शब्दस्य पूर्वनिपाते "अन्तर्लोमन्" इत्यवस्थायाम् अनेन सूत्रेण समासान्ते अप्-प्रत्ययेऽनुबन्धलोपे भसंज्ञाटिसंज्ञयोः "नस्तद्धिते" इति सूत्रेण टेर्लोपे वर्णसम्मेलने अन्तर्लोमशब्दस्य प्रातिपदिकसंज्ञायां स्वादिकार्ये अन्तर्लोमः इति रूपं सिद्ध्यति । एवं बहिर्लोमः ।*

समासान्तलोपादेशविधायकं विधिसूत्रम्-

**पादस्य लोपोऽहस्त्यादिभ्यः ५ । ४ । १३८**

**हस्त्यादिवर्जितादुपमानात्परस्य पादशब्दस्य लोपः स्याद्बहुव्रीहौ । व्याघ्रस्येव पादावस्य व्याघ्रपात् । अहस्त्यादिभ्यः किम् ? हस्तिपादः । कुसूलपादः ।**

(बहुव्रीहौ, अहस्त्यादिभ्यः, उपमानात्, पादस्य, लोपः, समासान्ताः, तद्धिताः)

*सरलार्थः*- *हस्त्यादिभिन्नेभ्यः उपमानवाचकेभ्यः शब्देभ्यः परस्य पादशब्दस्य समासान्तलोपादेशो भवति बहुव्रीहौ समासे ।*

***व्याघ्रपात्*** - *व्याघ्रस्य पादौ व्याघ्रपादौ अत्र षष्ठीतत्पुरुषः समासः । व्याघ्रपादौ इव पादावस्य इति लौकिकविग्रहे व्याघ्रपाद औ पाद औ इत्यलौकिकविग्रहे च "सप्तम्युपमानपूर्वपदस्योत्तरपदलोपश्च" इति वार्तिकेन समासे पूर्वपदे स्थितस्य उत्तरपदस्य लोपे च, समासत्वात्प्रातिदिकत्वेन सुपो लुकि व्याघ्र इत्यस्य पूर्वप्रयोगे च कृते व्याघ्रपाद इत्यस्मात् अनेन सूत्रेण पादशब्दस्य अन्त्यस्य*

*लोपे प्रातिपदिकत्वेन स्वादिकार्ये च व्याघ्रपात् इति रूपं सिद्ध्यति ।*

*उपमानवाचकेषु हस्त्यादिशब्देषु पूर्वपदेषु सत्सु पादस्य शब्दस्य लोपो न भवति तेन हस्तिपादः, कुसूलपादः इत्येव ।*

समासान्तलोपादेशविधायकं विधिसूत्रम्-

**सङ्ख्यासुपूर्वस्य ५ । ४ । १४०**

**पादस्य लोपः स्यात्समासान्तो बहुव्रीहौ । द्विपात् । सुपात् ।**

(सङ्ख्यासुपूर्वस्य, पादस्य, लोपः, समासान्ताः, तद्धिताः)

***सरलार्थः-*** *सङ्ख्यावाचकशब्दपूर्वस्य, सु-पूर्वस्य च पादशब्दस्य स्थाने समासान्तलोपादेशो भवति बहुव्रीहौ ।*

***द्विपात्-*** *द्वौ पादौ यस्य स इति लौकिकविग्रहे, "द्वि औ पाद औ" इत्यलौकिकविग्रहे "अनेकमन्यपदार्थे" इति सूत्रेण समाससंज्ञायां समासत्वात्प्रातिपदिकत्वेन सुपो लुकि द्विशब्दस्य पूर्वनिपाते "द्विपाद" इत्यवस्थायाम् अनेन सूत्रेण समासान्ते पादशब्दस्य अन्त्यस्य लोपे द्विपात् शब्दस्य प्रातिपदिकत्वेन स्वादिकार्ये द्विपात् इति रूपं सिद्ध्यति । एवं सुशोभनौ पादौ यस्य स इति विग्रहे सुपात् इति बोध्यम् ।*

समासान्तलोपादेशविधायकं विधिसूत्रम्-

**उद्विभ्यां काकुदस्य ५ । ४ । १४८**

**लोपः स्यात् । उत्काकुत् । विकाकुत् ।**

(उद्विभ्याम्, काकुदस्य, लोपः, समासान्ताः, तद्धिताः)

***सरलार्थः-*** *उत्-विभ्यां परस्य काकुदशब्दस्य समासान्तलोपादेशो भवति बहुव्रीहौ समासे ।*

***उत्काकुत् -*** *उद्गतं काकुदं यस्य इति लौकिकविग्रहे "उद्गत सु काकुद सु" इत्यलौकिकविग्रहे "प्रादिभ्यो धातुजस्य वाच्यो वा चोत्तरपदलोपश्च" इति वार्तिकेन समासे उत्तरपदस्य गत इत्यस्य लोपे च समासत्वात् प्रातिपदिकसंज्ञायां सुपो लुकि उत् इत्यस्य पूर्वप्रयोगे उत्काकुद इत्यवस्थायाम् अनेन सूत्रेण काकुदशब्दस्य अकारस्य लोपे उत्काकुत् इति जाते प्रातिपदिकत्वेन स्वादिकार्ये "उत्काकुत् " इति रूपं सिद्ध्यति । विशिष्टं विकृतं वा काकुदं यस्य इति विग्रहे विकाकुद् इति बोध्यम् ।*

विभाषया समासान्तलोपादेशविधायकं विधिसूत्रम्-

**पूर्णाद्विभाषा ५ । ४ । १४९**

**पूर्णकाकुत् । पूर्णकाकुदः ।**

(पूर्णाद्, काकुदस्य, विभाषा, लोपः, समासान्ताः, तद्धिताः)

***सरलार्थः-*** *पूर्णशब्दात् परस्य काकुदशब्दस्य विभाषया समासान्तलोपादेशो भवति बहुव्रीहौ समासे ।*

***पूर्णकाकुत्/पूर्णकाकुदः-*** *पूर्णं काकुदं यस्य इति विग्रहे समासादिकार्येषु सत्सु पूर्णकाकुद इत्यवस्थायाम् अनेन सूत्रेण विभाषया काकुदस्य लोपः ।*

सुहृद्दुहृद्शब्दयोर्निपातकं सूत्रम्-

**सुहृद्दुर्हृदौ मित्रामित्रयोः ५ । ४ । १५०**

**सुदुर्भ्यां हृदयस्य हृद्भावो निपात्यते । सुहृन्मित्रम् । दुर्हृदमित्रः ।**

(मित्रामित्रयोः, सुहृद्दुहृदौ)

***सरलार्थः-*** *मित्रे शत्रौ चार्थे क्रमेण सुहृद् दुर्हृद् च शब्दौ निपात्येते ।*

*सुहृन्मित्रम् - सु शोभनं हृदयं यस्य इति इत्यर्थे सु हृदय+सु इत्यलौकिकविग्रहे "अनेकमन्यपदार्थे" इति सूत्रेण समाससंज्ञायाम् अनेन सूत्रेण हृदयशब्दस्य हृदादेशे सुहृद् शब्दः साधुः । मित्रमित्यर्थः ।*

*एवं दुर्दुष्टं हृदयं यस्य इत्यर्थे दुर्हृद् । अमित्रमित्यर्थः ।*

समासान्तकप्-प्रत्ययविधायकं विधिसूत्रम्-

**उरःप्रभृतिभ्यः कप् ५ ।४ । १५१**

(बहुव्रीहौ, उरःप्रभृतिभ्यः, कप्, समासान्ताः, तद्धिताः)

***सरलार्थः-*** *बहुव्रीहौ समासे उरःप्रभृतिभ्यः शब्देभ्यः समासान्तस्तद्धितसंज्ञकः कप्प्रत्ययो भवति ।*

विसर्गस्य सकारादेशविधायकं विधिसूत्रम्-

**सोऽपदादौ ८ । ३ । ३८**

**पाशकल्पककाम्येषु विसर्गस्य सः ।**

(पाशकल्पककाम्येषु, विसर्जनीयस्य, सः, अपदादौ)

***सरलार्थः-*** *पाशकल्पककाम्येषु प्रत्ययेषु परेषु विसर्गस्य स्थाने सकारादेशो भवति ।*

षकारादेशविधायकं विधिसूत्रम्-

**कस्कादिषु च ८ । ३ । ४८**

**एष्विण उत्तरस्य विसर्गस्य षोऽन्यस्य तु सः । इति सः । व्यूढोरस्कः ।**

(कस्कादिषु, इणः, विसर्जनीयस्य, षः)

***सरलार्थः-*** *कस्कादिषु परेषु यणः परस्य विसर्गस्य स्थाने षकारादेशो भवति, अन्यस्मादुत्तरस्य विसर्गस्य स्थाने तु सकारादेशो भवति ।*

***व्यूढोरस्कः-*** *व्यूढम् उरो यस्य सः इति लौकिकविग्रहे व्यूढ सु उरस् सु इत्यलौकिकविग्रहे "अनेकमन्यपदार्थे" इति सूत्रेण समाससंज्ञायां समासत्वात्प्रातिपदिकत्वेन सुपो लुकि व्यूढ इत्यस्य पूर्वप्रयोगे गुणे व्यूढोरस् इति जाते "उरः प्रभृतिभ्यः कप्" इति सूत्रेण समासान्ते कप्प्रत्ययेऽनुबन्धलोपे व्युढोरस् +क इत्यवस्थायां सस्य रुत्वे रेफस्य विसर्गे च व्युढोरः+क इत्यवस्थायां "सोऽपदादौ" इति सूत्रेण विसर्गस्य स्थाने सकारादेशे व्युढोरस्कः इति रूपं सिद्ध्यति ।*

षकारादेशविधायकं विधिसूत्रम्-

**इणः षः ८ । ३ । ३९**

**इण उत्तरस्य विसर्गस्य षः पाशकल्पककाम्येषु परेषु । प्रियसर्पिष्कः ।**

(इणः, विसर्जनीयस्य, षः, पाशकल्पककाम्येषु)

***सरलार्थः-*** *इणः उत्तरस्य विसर्गस्य स्थाने षकारादेशो भवति पाशप्, कल्पप्, क, काम्यच् एषु प्रत्ययेषु परेषु सत्सु ।*

***प्रियसर्पिष्कः-*** *प्रियं सर्पिः यस्मै सः इति विग्रहे बहव्रीहिसमासे समासान्ते कप्प्रत्यये च कृते प्रियसर्पिस् +क इति जाते सस्य रुत्वे रेफस्य विसर्गे विसर्गस्य स्थाने अनेन सूत्रेण षकारादेशे प्रियसर्पिष्क इति सिद्ध्यति ।*

पूर्वपदप्रयोगनियामकं सूत्रम्-

**निष्ठा २ । २ । ३६**

**निष्ठान्तं बहुव्रीहौ पूर्वं स्यात् । युक्तयोगः ।**

(बहुव्रीहौ, निष्ठा, पूर्वम्)

***सरलार्थः-*** *बहुव्रीहिसमासे निष्ठाप्रत्ययान्तं सुबन्तं प्राक्प्रयुज्यत इत्यर्थः । (क्तक्तवतू निष्ठा)*

*'युक्तो योगो येन' इति लौकिकविग्रहे 'युक्त+सु+योग+सु' इत्यलौकिकविग्रहे "अनेकमन्यपदार्थे" इति सूत्रेण समासे प्रकृतसूत्रेण क्तप्रत्ययान्तसमर्थस्य 'युक्त+सु' इत्यस्य पूर्वनिपाते, समासत्वात् प्रातिपदिकसंज्ञायां सुपो लुकि 'युक्तयोग' इति जाते, तस्मात् प्रातिपदिकात् सौ 'युक्तयोगः' इति सिद्धम् ।*

विभाषया समासान्तकप्प्रत्ययविधायकं सूत्रम्-

**शेषाद्विभाषा ५ । ४ । १५४**

**अनुक्तसमासान्ताद् बहुव्रीहेः कब्वा । महायशस्कः, महायशाः ।**

(वहुव्रीहौ, शेषाद्, विभाषा, कप्, समासान्ताः, तद्धिताः)

***सरलार्थः-*** *यत्र वहुव्रीहौ समासे कोऽपि समासान्तप्रत्ययो विहितो नास्ति तत्र विभाषया कप् प्रत्ययो भवति ।*

**महायशस्कः, महायशाः-** महद् यशो यस्य सः इति विग्रहे बहुव्रीहिसमासे महद्यशस् इति जाते "आन्महत समानाधिकरणजातीययोः" इति सूत्रेण महतः आत्वे अनेन सूत्रेण विभाषया कप् प्रत्यये महायशस्कः इति रूपम् । कप अभावे महायशाः ।

## प्रयोगसिद्धिप्रकारः

### पीताम्बरो विष्णुः

'पीतम् अम्बरं यस्य सः' इति लौकिकविग्रहे 'पीत+सु+अम्बर+सु' इत्यलौकिकविग्रहे "अनेकमन्यपदार्थे" इति सूत्रेण समासे "सप्तमीविशेषणे बहुव्रीहौ" इति सूत्रेण 'पीत+सु' इति विशेषणस्य पूर्वनिपाते, समासत्वात् प्रातिपदिकसंज्ञायां सुपो लुकि 'पीत अम्बर' इति जाते "अकः सवर्णे दीर्घः" इति दीर्घे 'पीताम्बर' इति जाते, विष्णोर्विशेषणत्वात् तस्मात् पुंलिङ्गे एकदेशविकृतन्यायेन सौ, विभक्तिकार्ये 'पीताम्बरः' इति सिद्ध्यति ।

### कण्ठेकालः शिवः

'कण्ठे कालो यस्य सः' इति लौकिकविग्रहे 'कण्ठ+ङि+काल+सु' इत्यलौकिकविग्रहे "अनेकमन्यपदार्थे" इति समासे "सप्तमीविशेषणे बहुव्रीहौ" इति सूत्रेण सप्तम्यन्तस्य 'कण्ठ+ङि' इत्यस्य पूर्वप्रयोगे, समासत्वात् प्रातिपदिकसंज्ञायां सुब्लुकि प्राप्ते, "हलदन्तात् सप्तम्याः संज्ञायाम्" इति सूत्रेण सप्तमीविभक्तेरलुकि, प्रथमायाः सोस्तु लुकि 'कण्ठ इ काल' इत्यवस्थायां गुणे, एकदेशविकृतन्यायेन स्वादिकार्ये 'कण्ठेकालः' इति सिद्ध्यति ।

### युक्तयोगः पुरुषः

'युक्तो योगो येन' इति लौकिकविग्रहे 'युक्त+सु+योग+सु' इत्यलौकिकविग्रहे "अनेकमन्यपदार्थे" इति सूत्रेण समासे "निष्ठा" इति सूत्रेण क्तप्रत्ययान्तसमर्थस्य 'युक्त+सु' इत्यस्य पूर्वनिपाते, समासत्वात् प्रातिपदिकसंज्ञायां सुपो लुकि 'युक्तयोग' इति जाते, एकदेशविकृतन्यायेन तस्य प्रातिपदिकसंज्ञायां सौ, विभक्तिकार्ये 'युक्तयोगः' इति सिद्धम् ।

## अभ्यासार्थाः प्रश्नाः

१. **निम्नसूत्राणामर्थं सोदाहरणं लिखत**

(क) शेषो बहुव्रीहिः

(ख) अनेकमन्यपदार्थे

(ग) निष्ठा

(घ) हलदन्तात् सप्तम्याः संज्ञायाम्

(ङ) सप्तमीविशेषणे बहुव्रीहौ

२. **प्रश्नानामुत्तराणि देयानि**

(क) बहुव्रीहिसमासस्य परिचयं दत्त ।

(ख) बहुव्रीहिसमासे कस्य पदार्थस्य प्राधान्यं भवति ?

(ग) बहुव्रीहिसमासे कस्य पूर्वप्रयोगो भवति ?

(घ) बहुव्रीहौ निष्ठाप्रत्ययान्तस्य सुबन्तस्य केन सूत्रेण पूर्वप्रयोगो भवति ?

(ङ) कुत्रपर्यन्तं बहुव्रीहेरधिकारो वर्तते ?

(च) कस्मात् परस्याः सप्तमीविभक्तेरलुक् ?

(छ) 'बहुपुत्रो मनुष्यः' इत्यत्र समस्तपदस्य विग्रहं प्रदर्श्य तत्र कस्या विभक्तेरर्थे समासो जातोऽस्तीति लिखत ।

(ज) चतुर्थ्या विभक्तेरर्थे जातस्य बहुव्रीहिसमासस्य त्रीणि उदाहरणानि लिखत ।

(झ) 'कृता विद्या येन स, कृतविद्यः' इत्यत्र कस्य पदार्थस्य प्राधान्यं वर्तते ?

(ञ) 'वीरपुरुषः' इति पदस्य त्रीणि विशेष्यपदानि लिखत ।

३. **अधस्तनसमस्तपदानि प्रयुज्य वाक्यानि रचयत**

गृहीतपादः, दत्तभोजनम्, युक्तयोगः, ऊढरथः, पीताम्बरः, कृतकटः, कृतनिश्चयः, कण्ठेकालः ।

४. **अधस्तनानां समस्तपदानां लौकिकालौकिकविग्रहवाक्यानि प्रदर्शयत**

गृहीतकरः, प्राप्तोदकः, कृतकृत्यः, वीरपुरुषकः, लम्बोदरः, श्वेताम्बरः, कृतसङ्कल्पः ।

५. **अधस्तनविग्रहेषु निष्पन्नानि समस्तपदानि लिखत**

नीलम् अम्बरं यस्य सः, दत्ता दक्षिणा यस्मै सः, उद्धृतम् ओदनं यस्याः, उपहृतः पशुर्यस्मै ।

६. **अधस्तनप्रयोगाणां सिद्धिप्रक्रियां दर्शयत**

प्राप्तोदकः, कृतकटः, उपहृतपशुः, वीरपुरुषकः, गृहीतपादः, कृतनिश्चयः, नीलाम्बरः ।

७. **"व्यधिकरणपदो बहुव्रीहिः" इत्यस्याशयं सोदाहरणं प्रकाशयत ।**

## अनुप्रयोगः

१. **अधो लिखितानि वाक्यानि पठत**

(क) **पीताम्बरो** विष्णुर्जगत्पालको वर्तते ।

(ख) **कण्ठेकालः** शिवो जगद्रक्षणाय कण्ठे विषं धृतवान् ।

(ग) नेपाले अद्यापि बहवोऽ**प्राप्तोदका** ग्रामा विद्यन्ते ।

(घ) **वीरपुरुषके** ग्रामे नार्यो बालकाश्च सुरक्षिता भवन्ति ।

(ङ) **दत्तदक्षिणा** ब्राह्मणाः स्वगृहं यान्ति ।

(च) **गृहीतविद्यो** गुरुर्माननीयो भवति ।

२. **बहुव्रीहिसमासेन निष्पन्नानि पदानि प्रयुज्य एकमनुच्छेदं विलिख्य शिक्षकं दर्शयत ।**

३. **बहुव्रीहिसमासस्य पञ्चदश उदाहरणानि सङ्कलय्य वाक्येषु योजयत ।**

**अष्टादशः पाठः**

# अथ द्वन्द्वसमासः

द्वन्द्वसमासविधायकं सूत्रम्-

**चार्थे द्वन्द्वः २ । २ । २९**

**अनेकं सुबन्तं चार्थे वर्तमानं वा समस्यते स द्वन्द्वः । समुच्चयान्वाचयेतरेतरयोगसमाहाराश्चार्थाः । तत्र 'ईश्वरं गुरुं च भजस्व' इति परस्परनिरपेक्षस्यानेकस्यैकस्मिन्नन्वयः समुच्चयः । 'भिक्षामट गां चानय' इत्यन्यतरस्यानुषङ्गिकत्वेनान्वयोऽन्वाचयः । अनयोरसामर्थ्यात्समासो न । 'धवखदिरौ छिन्धि' इति मिलितानामन्वय इतरेतरयोगः । 'संज्ञापरिभाषम्' इति समूहः समाहारः ।**

(चार्थे, अनेकम्, सुप्, सुपा, सह, वा, समासः, द्वन्द्वः)

***सरलार्थः-*** *इतरेतरयोगसमाहाररूपचार्थे विद्यमानानि अनेकानि सुबन्तानि वा समस्यन्ते स च द्वन्द्वसंज्ञको भवति ।*

*'च' इत्यस्य चत्वारोऽर्था भवन्ति - समुच्चयः, अन्वाचयः, इतरेतरयोगः, समाहारश्च । तेषामुदाहरणमुपरि एव प्रदत्तमस्ति । तेषु समुच्चयान्वाचयोरर्थयोः एकार्थीभावरूपसामर्थ्यस्याभावात् समासो न भवति । इतरेतरयोगसमाहारयोरर्थयोस्तु एकार्थीभावरूपसामर्थ्यात् समासः । अत एव द्वन्द्वसमासो द्विविधः- इतरेतरयोगः, समाहारश्च । (समाहारे चार्थे द्वन्द्वसमासे जाते समस्तपदं सदैव एकवचनान्तं भवति, नपुंसकत्वञ्च भवति । इतरेतरयोगे चार्थे द्वन्द्वसमासे जाते समस्तपदं परपदस्य यल्लिङ्गं तल्लिङ्गि द्विवचनान्तं बहुवचनान्तं वा भवति ।)*

परप्रयोगनियामकं सूत्रम्-

**राजदन्तादिषु परम् २ । २ । ३१**

**एषु पूर्वप्रयोगार्हं परं स्यात् । दन्तानां राजा राजदन्तः ।**

(राजदन्तादिषु, परम्)

***सरलार्थः-*** *राजदन्तादिगणपठितेषु शब्देषु पूर्वप्रयोगार्हस्य शब्दस्य परप्रयोगो भवति ।*

'दन्तानां राजा' इति लौकिकविग्रहे 'दन्त+आम्+राजन्+सु' इत्यलौकिकविग्रहे "षष्ठी" इति सूत्रेण तत्पुरुषसमासे, प्रथमानिर्दिष्टत्वाद् 'दन्त+आम्' इत्यस्य पूर्वप्रयोगे प्राप्ते तं बाधित्वा प्रकृतसूत्रेण तस्य परप्रयोगे, समासत्वात् प्रातिपदिकसंज्ञायां विभक्तेर्लुकि 'राजन् दन्त' इति जाते, प्रातिपदिकान्तस्य नकारस्य लोपे, स्वादिकार्ये'राजदन्तः' इति सिद्ध्यति ।

**वा. धर्मादिष्वनियमः । अर्थधर्मौ । धर्मार्थावित्यादि ।**

***सरलार्थः-*** *धर्मादिशब्देषु पूर्वप्रयोगस्य नियमो नास्ति, स्वेच्छया प्रयोक्तुं शक्यते इति भावः ।*

*'धर्मश्च अर्थश्च' इति लौकिकविग्रहे 'धर्म+सु+अर्थ+सु' इत्यलौकिकविग्रहे "चार्थे द्वन्द्वः" इति सूत्रेण इतरेतरयोगद्वन्द्वसमासे, प्रातिपदिकत्वाद् विभक्तेर्लुकि, "अजाद्यदन्तम्" इति सूत्रेण अजादेः अर्थशब्दस्यैव पूर्वप्रयोगे प्राप्ते तं बाधित्वा प्रकृतवार्तिकेन धर्मशब्दस्य पूर्वप्रयोगे, सवर्णदीर्घे 'धर्मार्थ' इति जाते, द्विवचनत्वात् तस्माद् औप्रत्यये 'धर्मार्थौ' इति सिद्ध्यति । अर्थशब्दस्य पूर्वप्रयोगे तु 'अर्थधर्मौ' इति ।*

पूर्वपूयोगनियामकं सूत्रम्-

**द्वन्द्वे घि २ । २ । ३२ ।**

**द्वन्द्वे घिसंज्ञं पूर्वं स्यात् । हरिश्च हरश्च हरिहरौ ।**

(द्वन्द्वे, घि, पूर्वम्)

***सरलार्थः-*** *द्वन्द्वसमासे घिसंज्ञकस्य शब्दस्य पूर्वप्रयोगो भवति । ("शेषो घ्यसखि" इति अनदीसंज्ञकानां सखिशब्दभिन्नानां ह्रस्व-इकारान्तानां ह्रस्व-उकारान्तानां च शब्दानां घिसंज्ञा भवति ।)*

*"हरिश्च हरश्च" इति लौकिकविग्रहे 'हरि+सु+हर+सु" इत्यलौकिकविग्रहे "चार्थे द्वन्द्वः" इति समासे, समासत्वात् प्रातिपदिकत्वेन सुब्लुकि, प्रकृतसूत्रेण घिसंज्ञकस्य हरिशब्दस्य पूर्वप्रयोगे 'हरिहर' इति जाते, तस्मात् औ 'हरिहरौ' इति सिद्ध्यति । एवमेव - कपिश्च काकश्च कपिकाकौ । भानुश्च चन्द्रश्च भानुचन्द्रौ । शिवश्च विष्णुश्च विष्णुशिवौ ।*

पूर्वप्रयोगनियामकं सूत्रम्-

**अजाद्यदन्तम् २ । २ । ३३**

**द्वन्द्वे पूर्वं स्यात् । ईशकृष्णौ ।**

(द्वन्द्वे, अजाद्यदन्तम्, पूर्वम्)

***सरलार्थः-*** *द्वन्द्वसमासे वर्तमानम् अजादिकम् अदन्तं च सुबन्तं प्राक् प्रयोज्यम् ।*

*'ईशश्च कृष्णश्च' इति लौकिकविग्रहे 'ईश+सु+कृष्ण+सु' इत्यलौकिकविग्रहे पूर्ववत् समासादिकार्ये, प्रकृतसूत्रेण अजादेरदन्तस्य ईशशब्दस्य पूर्वनिपाते 'ईशकृष्ण' इत्यस्माद् औप्रत्यये 'ईशकृष्णौ' इति ।*

पूर्वपदप्रयोगनियामकं सूत्रम्-

**अल्पाच्तरम् २ । २ । ३४**

**शिवकेशवौ ।**

(द्वन्द्वे, अल्पाच्तरम्, पूर्वम्)

***सरलार्थः-*** *द्वन्द्वसमासे द्वयोः पदयोर्मध्ये अल्पाच्कं सुबन्तं प्राक् प्रयुज्यते ।*

*'शिवश्च केशवश्च' इति विग्रहे 'शिव+सु+केशव+सु' इत्यस्य पूर्ववत् समासादिकार्ये, प्रकृतसूत्रेण अल्पाचः 'शिव' इत्यस्य पूर्वप्रयोगे 'शिवकृष्णौ' इति सिद्ध्यति । एवमेव - वटश्च पिप्पलश्च वटपिप्पलौ ।*

एकशेषविधायकं विधिसूत्रम्-

**पिता मात्रा १ । २ । ७०**

**मात्रा सहोक्तौ पिता वा शिष्यते । माता च पिता च पितरौ, मातापितरौ वा ।**

**सरलार्थः-** मातृशब्देन सह पितृशब्दस्य सहोक्तौ पितृशब्दो विकल्पेन शिष्यते, मातृशब्दस्तु लुप्यते ।

*'माता च पिता च' इति लौकिके विग्रहे 'मातृ+सु+पितृ+सु' इत्यलौकिके विग्रहे "चार्थे द्वन्द्वः" इति समासे, समासत्वात् प्रातिपदिकसंज्ञायां विभक्तेर्लुकि, प्रकृतसूत्रेण विकल्पेन 'पितृ' इत्यस्य एकशेषे 'पितृ' इति जाते "यः शिष्यते स लुप्यमानार्थाभिधायी" इति परिभाषया पितृशब्देनैव मातृशब्दस्यापि अर्थज्ञापनाद् द्विचनत्वे, औप्रत्यये 'पितरौ' इति सिद्ध्यति । मातृशब्दस्य लोपाभावपक्षे तु "अभ्यर्हितं च" इति वार्तिकेन मातृशब्दस्य पूर्वप्रयोगे, "आनङ् ऋतो द्वन्द्वे" इति सूत्रेण मातृशब्दस्य ऋकारस्य स्थाने आनङादेशेऽनुबन्धलोपे 'मातापितृ' इति जाते, तस्मात् प्रातिपदिकाद् औ, 'मातापितरौ' इति सिद्ध्यति ।*

एकवद्भावविधायकं विधिसूत्रम्-

**द्वन्द्वश्च प्राणितूर्यसेनाङ्गानाम् २ । ४ । २**

**एषां द्वन्द्व एकवत् । पाणिपादम् । मार्दङ्गिकवैणविकम् । रथिकाश्वारोहम्**

(प्राणितूर्यसेनाङ्गानाम्, द्वन्द्वः, च, एकवचनम्)

***सरलार्थः-*** *प्राण्याङ्गानाम्, तूर्याङ्गानाम्, सेनाङ्गानाञ्च द्वन्द्वः एकवद्भवति ।*

***पाणिपादम्-*** *पाणी च पादौ च एतेषां समाहारः इति लौकिकविग्रहे "पाणि औ पाद औ" इत्यलौकिकविग्रहे "चार्थे द्वन्द्वः" इति सूत्रेण समाससंज्ञायां समासत्वाद् विभक्तेर्लुकि*

*पाणिपादशब्दस्य अनेन एकवद्भावेन एकवचने "स नपुंसकम्" इति नपुंसकलिङ्गे पाणिपादम् इति सिद्ध्यति ।*

*एवमेव मृदङ्गं वादनं शीलमस्य मार्दङ्गिकः । वेणुवादनं शीलमस्य वैणविकः । मार्दङ्गिकाश्च वैणविकाश्च अनयोः समाहारः इत्यर्थे मार्दङ्गिकवैणविकम् । रथिकाश्च अश्वारोहश्च इति रथिकाश्वारोहमिति बोध्यम् ।*

समासान्तटच्प्रत्ययविधायकं विधिसूत्रम्

**द्वन्द्वाच्चुदषहान्तात् समाहारे ५ । ४ । १०६**

**चवर्गान्तादृषहान्ताच्च द्वन्द्वाट्टच् स्यात्समाहारे । वाक् च त्वक् च वाक्त्वचम् । त्वक्स्रजम् । शमीदृषदम् । वाक्त्विषम् । छत्रोपानहम् । समाहारे किम् ? प्रावृट्शरदौ ।**

(चुदषहान्तात्, द्वन्द्वात्, समाहारे, टच्, समासान्ताः, तद्धिताः)

***सरलार्थः-*** *चवर्गान्तात्, दकारान्तात्, षकारान्तात्, हकारान्ताच्च द्वन्द्वसमासात् समाहारे अर्थे तद्धितसंज्ञकः समासान्तटच्प्रत्ययो भवति ।*

***वाक्त्वचम्*** *- वाक् च त्वक् च अनयोः समाहार इति लौकिकविग्रहे वाच् सु त्वच् सु इत्यलौकिकविग्रहे "चार्थे द्वन्द्वः" इति सूत्रेण द्वन्द्वसमासे समासत्वात् प्रातिपदिकसंज्ञायां सुपो लुकि वाच्त्वच् इति जाते "चोः कुः" इति सूत्रेण वाचः चकारस्य कुत्वेन ककारे वाक्त्वच्शब्दाद् अनेन सूत्रेण समासान्ते टच्प्रत्ययेऽनुबन्धलोपे वर्णसम्मेलने नपुंसकलिङ्गे प्रातिपदिकत्वेन स्वादिकार्ये च वाक्त्वचम् इति रूपं सिद्ध्यति ।*

एवमेव त्वक् च स्रक् च इति विग्रहे त्वक्स्रजम् । शमी च दृषच्च इति विग्रहे शमीदृषदम् चेति प्रयोगौ बोध्यौ ।

अ-इति समासान्तप्रत्ययविधायकं विधिसूत्रम्-

**ऋक्पूरब्धूःपथामानक्षे ५ ।४ । ७४**

**अ अनक्षे इतिच्छेदः । ऋगाद्यन्तस्य समासस्य अप्रत्ययोऽन्तावयवोऽक्षे या धूस्तदन्तस्य तु न । अर्धर्चः । विष्णुपुरम् । विमलापं सरः । राजधुरा । अक्षे तु अक्षधूः । दृढधूरक्षः । सखिपथः । रम्यपथो देशः ।**

(ऋक्पूरब्धूः पथाम्, अ,अनक्षे, समासान्ताः, तद्धिताः)

***सरलार्थः-*** *ऋच्, पूर्, अप्, धूर् इत्येतदन्तादत् शब्दात् समासान्तः अप्रत्ययो भवति अक्षे या धूः तदन्तस्य शब्दस्य तु न ।*

***अर्धर्चः***- *ऋचः अर्धम् इति लौकिक विग्रहे "ऋच् ङस् अर्ध सु" इत्यलौकिकविग्रहे "अर्धं नपुंसकम्" इति सुत्रेण समासे समासत्वात् प्रातिपदिकत्वेन सुपो लुकि अर्धमित्यस्य पूर्वप्रयोगे अनेन सूत्रेण समासान्ते अप्रत्यये वर्णसम्मेलने अर्धर्च इत्यस्य प्रातिपदिकत्वेन सौ विभक्तिकार्ये "अर्धर्चाः पुंसि च" इत्यनेन पुंसि क्लीबे च अर्धर्चशब्दस्य विधानात् अर्धर्चः अर्धर्चम् इति रूपे सिद्धयतः ।*

*विष्णोः पुः इति विग्रहे षष्ठीतत्पुरुषसमासे विष्णपुरम् । विमला आपः यस्मिन् तत् इति विग्रहे वहुव्रीहि समासे विमलापं सरः । राज्ञः धूः इति विग्रहे षष्ठीतत्पुरुषसमासे राजधुरा । सख्युः पथः इति विग्रहे षष्ठीतत्पुरुषसमासे सखिपथः । रम्याः पन्थानो यस्मिन् देशे सः इति विग्रहे बहुव्रीहिसमासे रम्यपथो देशः इति च पूर्ववद् बोध्यम् ।*

अच्-प्रत्ययविधायकं विधिसूत्रम्-

**अक्ष्णोऽदर्शनात् ५ । ४ । ७६**

**अचक्षुः पर्यायादक्ष्णोऽच् स्यात्समासान्तः । गवामक्षीव गवाक्षः ।**

(अदर्शनात्, अक्षणः, अच्, समासान्ताः, तद्धिताः)

***सरलार्थः***- *अचक्षुवाचकात् अक्षिशब्दात् तद्धितसंज्ञकः समासान्तः अच्प्रत्ययो भवति ।*

***गवाक्षः***- *गवाम् अक्षीव इति लौकिकविग्रहे गो+आम् अक्षि+ सु इति विग्रहे "षष्ठी" इति सूत्रेण समासे समासत्वाद् सुपो लुकि गो + अक्षि इत्यवस्थायाम् "अवङ् स्फोटायनस्य" इति सूत्रेण गोः ओकारस्य स्थाने अवङादेशे वर्णसम्मेलने गव अक्षि इति जाते सवर्णदीर्घे गवाक्षिशब्दाद् अनेन सूत्रेण समासान्ते अच्प्रत्ययेऽनुबन्धलोपे यस्येति च इति इकारलोपे वर्णसम्मेलने गवाक्षशब्दात् स्वादिकार्ये गवाक्षः इति रूपं सिद्धयति ।*

अच्प्रत्ययविधायकं विधिसूत्रम्-

**उपसर्गादध्वनः ५ । ४ । ८५**

**प्रगतोऽध्वानं प्राध्वो रथः ।**

(अध्वनः, अच्, समासान्ताः, तद्धिताः)

***सरलार्थः***- *उपसर्गतः परस्माद् अध्वन्शब्दात् तद्धितसंज्ञकः समासान्तः अच्प्रत्ययो भवति ।*

***प्राध्वः***- *प्रगतः अध्वानम् इति लौकिकविग्रहे प्र अध्वन् अम् इत्यलौकिकविग्रहे "अत्यादय कान्ताद्यर्थे द्वितीयया" इति वार्तिकेन समासे समासत्वात् प्रातिपदिकत्वेन सुपो लुकि सर्वर्णदीर्घे प्राध्वन् शब्दादनेन सूत्रेण अच्प्रत्ययेऽनुबन्धलोपे "नस्तद्धिते" इति सूत्रेण टेर्लोपे प्राध्वप्रातिपदिकाद् स्वादिकार्ये च प्राध्वः इति रूपं सिद्धयति । देशः इत्यर्थः ।*

समासान्तप्रत्ययनिषेधविधायकं सूत्रम्-

**न पूजनात् ५ । ४ । ६९**

**पूजनार्थात्परेभ्यः समासान्ता न स्युः । सुराजा । अतिराजा ।**

(पूजनात्, उपसर्गात्, तद्धिताः, समासान्ताः, न)

***सरलार्थः-*** *पूजनार्थेभ्यः उपसर्गेभ्यः परस्मात् शब्दात् तद्धितसंज्ञकाः समासान्तप्रत्ययाः न भवन्ति ।*

***सुराजा*** *– सुशोभनो राजा इति लौकिकविग्रहे सु राजन् सु इत्यलौकिकविग्रहे "कुगतिप्रादयः" इति सूत्रेण समासे समासत्वात् प्रातिपदिकत्वेन सुपो लुकि सु इत्यस्य पूर्वप्रयोगे सुराजन्शब्दात् "राजाहस्सखिभ्यष्टच्" इति सूत्रेण समासान्ते टच्प्रत्यये प्राप्ते अनेन सूत्रेण तन्निषेधे सुराजन् इत्यस्य प्रातिपदिकत्वेन स्वादिकार्ये सुराजा इति रूपं सिद्ध्यति । एवमतिक्रान्तो राजानमिति विग्रहे अतिराजा इति बोध्यम् ।*

। इति समासान्ताः ।

## प्रयोगसिद्धिप्रकारः

### हरिहरौ

"हरिश्च हरश्च" इति लौकिकविग्रहे 'हरि+सु+हर+सु" इत्यलौकिकविग्रहे "चार्थे द्वन्द्वः" इति सूत्रेण समासे, समासत्वात् प्रातिपदिकत्वेन सुब्लुकि "द्वन्द्वे घि" इति सूत्रेण घिसंज्ञकस्य हरिशब्दस्य पूर्वप्रयोगे 'हरिहर' इति जाते, द्वित्वसङ्ख्याबोधकात् तस्माद् औप्रत्यये, विभक्तिकार्ये 'हरिहरौ' इति सिद्ध्यति ।

### ईशकृष्णौ

'ईशश्च कृष्णश्च' इति लौकिकविग्रहे 'ईश+सु+कृष्ण+सु' इत्यलौकिकविग्रहे "चार्थे द्वन्द्वः" इति सूत्रेण समासे, समासत्वात् प्रातिपदिकसंज्ञायां सुब्लुकि "अजाद्यदन्तम्" इति सूत्रेण अजादेरदन्तस्य ईशशब्दस्य पूर्वनिपाते 'ईशकृष्ण' इत्यस्माद् औप्रत्यये 'ईशकृष्णौ' इति ।

### शिवकेशवौ

'शिवश्च केशवश्च' इति लौकिकविग्रहे 'शिव+सु+केशव+सु' इत्यलौकिकविग्रहे "चार्थे द्वन्द्वः" इति सूत्रेण समासे, समासत्वात् प्रातिपदिकसंज्ञायां सुपो लुकि "अल्पाच्तरम्" इति सूत्रेण अल्पाचः 'शिव' इत्यस्य पूर्वप्रयोगे, स्वादिकार्ये 'शिवकृष्णौ' इति सिद्ध्यति ।

## अभ्यासार्थाः प्रश्नाः

१. **अधोऽङ्कितानां सूत्राणामर्थं सोदाहरणं लिखत**

(क) चार्थे द्वन्द्वः (ख) राजदन्तादिषु परम् (ग) द्वन्द्वे घिः

(घ) अजाद्यदन्तम् (ङ) अल्पाच्तरम् (च) पिता मात्रा

२. **प्रश्नानामुत्तराणि देयानि**

(क) द्वन्द्वसमासस्य परिचयं दत्त ।

(ख) द्वन्द्वसमासे कस्य पदार्थस्य प्राधान्यं भवति ? सोदाहरणं लिखत ।

(ग) द्वन्द्वसमासः कतिविधः ? सोदाहरणं लिखत ।

(घ) 'भिक्षामट गां चाऽऽनय' इत्येतादृशे चार्थे द्वन्द्वसमासो भवति न वा ? सकारणं लिखत ।

(ङ) कः समाहारः ? सोदाहरणं लिखत ।

(च) 'पितरं गुरुं च भजस्व' इत्यत्र चार्थः कः ?

(छ) राजदन्तादिगणपठितेषु शब्देषु पूर्वप्रयोगस्य को नियमो वर्तते ?

(ज) 'मातापितरौ' इति प्रयोगे केन कारणेन मातृशब्दस्य पूर्वप्रयोगः ?

(झ) धर्मादिशब्देषु पूर्वप्रयोगस्य को नियमः ?

(ञ) 'पितरौ' इति पदस्य कोऽर्थः ?

३. **अधस्तनसमस्तपदानि प्रयुज्य प्रत्येकं त्रीणि वाक्यानि रचयत**

धवखदिरौ, शिवकेशवौ, अर्थधर्मौ, अग्निमारुतौ, पाणिपादम्, आहारनिद्राभयम्, मुखनासिकम् ।

४. **अधस्तनानां समस्तपदानां लौकिकालौकिकविग्रहवाक्यानि प्रदर्श्य समाहारद्वन्द्वयुक्तानि पदानि पृथक्कुरुत**

अहिनकुलम्, रामलक्ष्मणौ, दंशमशकम्, अजाविकम्, इन्द्रवायू, हरिव्याघ्रौ, स्थानप्रयत्नौ, लक्षणोदाहरणे, मांसशोणितम् ।

५. **अधस्तनविग्रहेषु निष्पन्नानि समस्तपदानि विलिख्य तेषां द्वन्द्वप्रकारञ्च लिखत**

शिशिरश्च वसन्तश्च, पाणी च पादौ च, संज्ञा च परिभाषा च, अश्वश्च वृषश्च, माता च पिता च, विरञ्चिश्च नारायणश्च शङ्करश्च, कपिश्च काकश्च ।

६. **अधस्तनप्रयोगाणां सिद्धिप्रक्रियां दर्शयत**

राजदन्तः, विष्णुशिवौ, धर्मार्थौ, वटपिप्पलौ, इन्द्राग्नी, पितरौ, मातापितरौ ।

७. **कोष्ठकात् समुचितं पदं चित्वा रिक्तस्थानं पूरयत**

(क) चार्थाः .................. भवन्ति । (त्रयः, चत्वारः, पञ्च)

(ख) .................. चार्थे द्वन्द्वसमासो भवति । (अन्वाचये, समाहारे)

(ग) द्वन्द्वसमासः .......... भवति । (पूर्वपदार्थप्रधानः, उत्तरपदार्थप्रधानः, उभयपदार्थप्रधानः)

(घ) द्वन्द्वसमासे .................. पूर्वप्रयोगो भवति । (घिसंज्ञकस्य, प्रथमानिर्दिष्टस्य)

(ङ) .................. द्वन्द्वसमासो भवति । (द्वयोः पदयोरेव, द्वयोर्बहूनां वा पदानाम्)

८. **सोदाहरणं चार्थान् वर्णयत ।**

९. **समीचीनेषु वाक्येषु (√) इति चिह्नं दर्शयत, असमीचीनानि वाक्यानि च समीचीनानि कुरुत**

(क) समुच्चये चार्थे द्वन्द्वसमासो भवति ।

(ख) द्वन्द्वसमासेऽजादि अदन्तं सुबन्तं प्राक् प्रयुज्यते ।

(ग) राजदन्तादिषु प्रथमानिर्दिष्टस्य पदस्य पूर्वप्रयोगो भवति ।

(घ) इतरेतरयोगे समुच्चये च चार्थे द्वन्द्वसमासो भवति ।

(ङ) 'रामश्च कृष्णश्च रामकृष्णौ' इत्यत्र समाहारद्वन्द्वः ।

## अनुप्रयोगः

१. **अधो लिखितानि वाक्यानि पठत**

(क) **हरिहरौ** जगतो रक्षकौ स्तः ।

(ख) चराचरस्य जगतः पालनकर्तारौ **ईशकृष्णौ** वयं नमामः ।

(ग) **हरिव्याघ्रौ** परस्परं शत्रू भवतः ।

(घ) अहं **सिंहव्याघ्रगण्डकेभ्यो** बिभेमि ।

(ङ) जगतः **पितरौ पार्वतीपरमेश्वरौ** अहं वन्दे ।

(च) **उष्ट्रखरं** भारवहनाय उपयोगि भवति ।

(छ) चौरस्य **पाणिपादं** राजपुरुषेण बद्धमस्ति ।

(ज) **मातापितरौ** सदैव हितकर्तारौ भवतः ।

२. **युष्माकं संस्कृतभाषापाठ्यपुस्तकाद् द्वन्द्वसमासस्य दश उदाहरणानि सङ्कलय्य वाक्येषु योजयत ।**

३. **द्वन्द्वसमासयुक्तानि पदानि प्रयुज्य एकां लघुकथां विलिख्य कक्षायां श्रावयत ।**

## मिश्रिताभ्यासः

१. **अधोलिखितानां समस्तपदानां विग्रहं प्रदर्श्य प्रत्येकं समासनामानि समासविधायकानि सूत्राणि च लिखत ।**

| समस्तपदम् | लौकिकविग्रहः | अलौकिकविग्रहः | समासनाम | समासविधायकसूत्रम् |
|---|---|---|---|---|
| श्रुतपूर्वः | .................. | .................. | .................. | .................. |
| राजप्रासादः | .................. | .................. | .................. | .................. |
| कृतनिश्चयः | .................. | .................. | .................. | .................. |
| अनपेक्षितः | .................. | .................. | .................. | .................. |
| पार्वतीपरमेश्वरौ | .................. | .................. | .................. | .................. |
| युक्तयोगः | .................. | .................. | .................. | .................. |
| नीलाम्बरः | .................. | .................. | .................. | .................. |
| सतृणम् | .................. | .................. | .................. | .................. |
| प्रत्येकम् | .................. | .................. | .................. | .................. |
| वागर्थाविव | .................. | .................. | .................. | .................. |
| नीलोत्पलम् | .................. | .................. | .................. | .................. |
| कृष्णसर्पः | .................. | .................. | .................. | .................. |
| सवल्कम् | .................. | .................. | .................. | .................. |
| कण्ठेकालः | .................. | .................. | .................. | .................. |
| कुपुरुषः | .................. | .................. | .................. | .................. |
| वनगतः | .................. | .................. | .................. | .................. |

## तद्धितप्रकरणम्

# अथापत्याधिकारप्रकरणम्

(अण्, इञ्, ढक्)

**पाठपरिचयः**

पाठेऽस्मिन् साधारणतद्धितप्रत्ययाः, अपत्याधिकारस्थतद्धितप्रत्ययाश्च निरूपिताः वर्तन्ते ।

**ज्ञातव्यो विषयः**

- आतद्धितप्रकरणं "**तद्धिताः**" "**ङ्याप्प्रातिपदिकात्**", "**प्रत्ययः**", "**परश्च**", "**समर्थानां प्रथमाद्वा**" इत्येतेषां सूत्राणामधिकारो भवति । अतः सर्वेऽपि तद्धितप्रत्ययाः प्रातिपदिकेभ्यः परो विधीयन्ते । **समर्थानां प्रथमाद्वा** इत्यस्य हि सूत्रे उच्चारितेभ्यः समर्थेभ्यो विभक्त्यन्तेभ्यो विभाषया तद्धितप्रत्ययाः विधेयाः इत्यर्थः । एवञ्च तद्धितप्रत्यया यद्यपि प्रातिपदिकादेव भवन्ति परं प्रातिपदिकस्य सुबन्तत्वाऽभावेन सर्वत्र समर्थसुबन्ताद् प्रातिपदिकादित्यर्थो विधेयः । अत एव तद्धितविषये सुबन्तात् तद्धितोत्पत्तिः, प्रातिपदिकादेव तद्धितोत्पत्तिः इत्युभयो वादः प्रचलितः । परं सिद्धान्ते तु प्रातिपदिकादेव सुबुत्पत्तिः बोद्धव्या । अत एव वक्ष्यमाणसूत्राणामर्थप्रतिपादनावसरे समर्थप्रातिपदिकात् सुबन्तादित्युल्लिखितं वर्तते । कुत्रचिद् संक्षेपेण समर्थसुबन्ताद् इत्येव चास्तीति विषयोऽध्येतृभिरवगन्तव्यः ।
- अन्यच्च तद्धितप्रकरणे समर्थविभक्त्यन्तानाम्, अर्थस्य च निर्देशः "तस्यापत्यम्" "तत्र जातः" "तस्य समूहः" इत्यादिभिः सूत्रैर्विहितमस्ति । प्रत्ययानां विधानन्तु "प्राग्दिव्यतोऽण्" "प्राग्घिताद्यत्" इत्यादिभिः अधिकारसूत्रैः कृतमस्ति । अथ च "दित्यदित्यादित्यपत्युत्तरपदाण्ण्यः" "अग्नेर्ढक्" इत्यादिभिः सूत्रैः तत्तद्विशेषप्रकृतिभ्यः विशेषप्रत्ययाश्च विधीयन्ते इति च स्थितिः । अत्र एवं बोद्धव्यम् प्राग्दिव्यतोऽण्, तस्यापत्यम्, विनतायाः ढक् इत्यादिनां समेषामेकवाक्यतायाः अनन्तरं सर्वत्र महावाक्यं फलति अतः सर्वाण्यपि सूत्राणि महावाक्यानामुपकारकत्वेन विधिसूत्राणि एव अवगन्तव्यानि ।
- तद्धितप्रत्ययाः लघुसिद्धान्तकौमुद्यां षोडशप्रकरणेषु विभज्य निरूपिताः वर्तन्ते । अत्र पाठ्यग्रन्थे पञ्चसु पाठेषु तद्धितप्रकरणं प्रतिपादितमस्ति ।

अधिकारसूत्रम्

**समर्थानां प्रथमाद्वा** ४ । १ । ८२

**इदं पदत्रयमधिक्रियते प्राग्दिश इति यावत् ।**

***सरलार्थः-*** *इत ऊर्ध्वं "प्राग्दिशो विभक्तिः ५ । ३ । १" इति यावत् 'समर्थानाम्', 'प्रथमात्', 'वा' इति पदत्रयम् अधिक्रियते । निर्दिष्टसूत्रेषु उक्तानि त्रीणि पदानि उपतिष्ठन्ते ।*

अण्प्रत्ययविधायकं विधिसूत्रम्-

**अश्वपत्यादिभ्यश्च ४ । १ । ८४**

**एभ्योऽण् स्यात्प्राग्दीव्यतीयेष्वर्थेषु । अश्वपतेरपत्यादि आश्वपतम् । गाणपतम् ।**

(अश्वपत्यादिभ्यः, च, प्राग्दीव्यतोऽण्, तद्धिताः, प्रत्ययः, परश्च, समर्थानां प्रथमाद्वा)

***सरलार्थः-*** *अश्वपत्यादिगणपठितेभ्यः शब्देभ्यः प्राग्दीव्यतीयेषु अर्थेषु अण् प्रत्ययो भवति । णकारः इत् । णित्वात् "तद्धितेष्वचामादेः" इति आदिवद्धिः ।*

***आश्वपतम् –*** *अश्वपतेः अपत्यादिः इत्यर्थे अनेन सूत्रेण षष्ठ्यन्ताद् अश्वपतिशब्दाद् अण्प्रत्ययेऽनुबन्धलोपे अश्वपति ङस् अ इति जाते तद्धितान्तत्वात् "कृतद्धितसमासाश्च" इति सूत्रेण प्रातिपदिकसंज्ञायां "सुपो धातुप्रातिपदिकयोः" इति सूत्रेण सुपो लुकि अश्वपति अ इति जाते "यचि भम्" इति सूत्रेण भसंज्ञायां "यस्येति च" इति सूत्रेण इकारस्य लोपे "तद्धितेष्वचामादेः" इति सूत्रेणादिवृद्धौ वर्णसम्मेलने आश्वपत इति जाते स्वादिकार्ये आश्वपतम् इति रूपं सिद्ध्यति । एवमेव गणपतेः अपत्यं गाणपतम् इति बोध्यम् ।*

ण्यप्रत्ययविधायकं विधिसूत्रम्

**दित्यदित्यादित्यपत्युत्तरपदाण्ण्यः ४ । १ । ८५ ।**

**दित्यादिभ्यः पत्युत्तरपदाच्च प्राग्दीव्यतीयेष्वर्थेषु ण्यः स्यात् । अणोऽपवादः । दितेरपत्यं दैत्यः । अदितेरादित्यस्य वा –**

(दित्यदित्यादित्यपत्युत्तरपदात्, ण्यः, प्राग्दिव्यतः, तद्धिताः, प्रत्ययः, परश्च, समर्थानां प्रथमाद्वा)

***सरलार्थः-*** *दित्यादिभ्यः शब्देभ्यः, पत्युत्तरपदेभ्यः शब्देभ्यश्च ण्यप्रत्ययो भवति प्राग्दीव्यतीयेषु अर्थेषु । णकारः इत् । आदिवृद्ध्यर्थः । "प्राग्दीव्यतोऽण्" इति सूत्रेण प्राप्तस्य अणोऽपवादोऽयम् ।*

***दैत्यः-*** *दितेरपत्यमिति विग्रहे प्राग्दीव्यतोऽण्" सूत्रेण सामान्यत अण्प्रत्यये प्राप्ते तं प्रवाध्य षठ्यन्तात् दितिशब्दाद् अनेन सूत्रेण ण्यप्रत्ययेऽनुबन्धलोपे दिति ङस् य इति जाते तद्धितान्तत्वात् "कृतद्धितसमासाश्च" इति सूत्रेण प्रातिपदिकसंज्ञायां "सुपो धातुप्रातिपदिकयोः" इति सूत्रेण सुपो लुकि अश्वपति अ इति जाते "यचि भम्" इति सूत्रेण भसंज्ञायां "यस्येति च" इति सूत्रेण इकारस्य लोपे "तद्धितेष्वचामादेः" इति सूत्रेणादिवृद्धौ वर्णसम्मेलने दैत्य इति जाते स्वादिकार्ये दैत्यः इति रूपं सिद्ध्यति ।*

***आदित्यः-*** *अदितेः अपत्यं पुमान इति विग्रहे आदित्यः पूर्ववद् बोध्यः । आदित्यस्य अपत्यं पुमान् इति विग्रहे तु अनेन ण्यप्रत्यये "आदित्य+य" इति जाते "यस्येति च" इति अकारस्य लोपे आह-*

यमः लोपविधायकं विधिसूत्रम्-

**हलो यमां यमि लोपः ८ । ४ । ६४**

**हलः परस्य यमो लोपः स्याद् वा यमि । इति यलोपः । आदित्यः । प्राजापत्यः ।**

(हलः, यमाम्, यमि, अन्यतरस्याम्, लोपः)

***सरलार्थः-*** *हलः उत्तरस्य यम्प्रत्याहारस्य विभाषया लोपो भवति यम्प्रत्याहारे परे । अनेन यकारस्य लोपे स्वादिकार्ये आदित्यः इति रूपं सिद्ध्यति ।*

***प्राजापत्यः*** *-प्रजापतेरपत्यं पुमान् इति विग्रहे षष्ठ्यन्तात् प्रजापतिशब्दात् "दित्यदित्यादित्यपत्युत्तरपदाण्यः" इति सूत्रेण ण्यप्रत्ययेऽनुबन्धलोपे तद्धितान्तत्वात् प्रातिपदिकसंज्ञायां सुपो लुकि इकारस्य "यस्येति च" इति लोपे आदिवृद्धौ विभक्तिकार्ये प्राजापत्यः इति रूपं सिद्ध्यति ।*

**(देवाद्यञञौ -वा.) । दैव्यम् । दैवम् ।**

***सरलार्थः-*** *देवशब्दात् प्राग्दीव्यतीयेषु अर्थेषु यञ् अञ् इत्येतौ द्वौ प्रत्ययौ भवतः । ञकारः इत् ।*

***दैव्यम्-*** *देवस्य अपत्यं पुमान् इति विग्रहे षष्ठ्यन्ताद् देवशब्दाद् अनेन यञ्प्रत्ययेऽनुबन्धलोपे प्रातिपदिकसंज्ञायां सुपो लुकि आदिवृद्धौ, "यस्येति च" इति अकारलोपे वर्णसम्मेलने स्वादिकार्ये दैव्यम् इति सिद्धम् । अञ्प्रत्यये दैवम् इति ।*

**(बहिषष्टिलोपो यञ्च -वा.) । बाह्यः । ईकक्च -वा. ।**

***सरलार्थः*** *-बहिष्शब्दात् प्राग्दीव्यतीयेष्वर्थेषु यञ्प्रत्ययः, टेर्लोपश्च भवतः । ञकारः इत् । बहिर्भव इति विग्रहे बहिष्शब्दात् अनेन वार्तिकेन यञ् प्रत्ययेऽनुबन्धलोपे बहिष् +य इति जाते अनेनैव वार्तिकेन टेर्लोपे आदिवृद्धौ च बाह्य इत्यस्य प्रातिपदिकसंज्ञायां स्वादिकार्ये बाह्यः इति ।*

***ईकक्च-*** *बहिष्शब्दात् प्राग्दीव्यतीयेष्वर्थेषु ईकक्प्रत्ययः, बहिषः टिलोपश्च भवतः । ककारः इत् । तथा हि अनेन बहिष्शब्दात् ईकक्प्रत्यये अनुबन्धलोपे बहिष्+ इकक् इत्यवस्थायां पूर्वोक्तवार्तिकेन टेर्लोपे बह्+ईक इति जाते आह-*

वृद्ध्यादेशविधायकं विधिसूत्रम्-

**किति च ७ । २ । ११८**

**किति तद्धिते चाचामादेरचो वृद्धिः स्यात् । बाहीकः ।**

(किति, तद्धितेषु, च, अचामादेः, अङ्गस्य, वृद्धिः)

***सरलार्थः-*** *किति तद्धिते प्रत्यये परे अचाम् आदेः अचः स्थाने वृद्धिः आदेशः स्यात् । इति आदिवृद्धौ वर्णसम्मेलने स्वादिकार्ये बाहीकः इति रूपम् ।*

**गोरजादिप्रसङ्गे यत्** (वा.) **। गोरपत्यादि गव्यम् ।**

**सरलार्थः-** गोशब्दाद् अजादीनां तद्धितप्रत्ययानां प्रसङ्गे यत् प्रत्ययो भवति ।

***गव्यम्-*** *गोरपत्यादिः इत्यर्थे षष्ठ्यन्ताद् गोशब्दादनेन वार्तिकेन यत्प्रत्ययेऽनुबन्धलोपे तद्धितान्तत्वात् प्रातिपदिकसंज्ञायां सुपो लुकि गो+य इत्यवस्थायां "वान्तो यि प्रत्यये" इति सूत्रेण ओकारस्य अवादेशे वर्णसम्मेलने स्वादिकार्ये गव्यम् इति रूपं ज्ञेयम् ।*

अञ्प्रत्ययविधायकं विधिसूत्रम्-

**उत्सादिभ्योऽञ्** **४ । १ । ८६**

**औत्सः ।**

(उत्सादिभ्यः, अञ्, तद्धितः, प्राग्दीव्यतः)

***सरलार्थः-*** *उत्सादिगणठितेभ्यः शब्देभ्यः अञ्प्रत्ययो भवति, प्राग्दीव्यतीयेष्वर्थेषु । ञकारः इत् ।*

***औत्सः*** *-उत्से भवः इति विग्रहे अनेन सूत्रेण सप्तम्यन्तात् उत्सशब्दात् अञ्प्रत्ययेऽनुबन्धलोपे "यस्येति च" इति अकारलोपे आदिवृद्धौ स्वादिकार्ये औत्सः इति बोध्यम् ।*

। इत्यपत्यादिविकारान्तार्थसाधारणप्रत्ययाः ।

नञ्-स्नञ्प्रत्ययविधायकं सूत्रम्-

**स्त्रीपुंसाभ्यां नञ्स्नञौ भवनात्** **४ । १ । ८७**

**धान्यानां भवन इत्यतः प्रागर्थेषु स्त्रीपुंसाभ्यां क्रमान्नञ्स्नञौ स्तः । स्त्रैणः । पौंस्नः ।**

(भवनात्, स्त्रीपुंसाभ्याम्, नञ्स्नञौ)

***सरलार्थः-*** *"धान्यानां भवने क्षेत्रे खञ्" इति सूत्रात् प्रागर्थेषु स्त्रीशब्दात् पुंस्शब्दात् क्रमेण नञ् स्नञ् प्रत्ययौ भवतः ।*

***स्त्रैणः-*** *स्त्रियः अपत्यादिः इति विग्रहे अनेन सूत्रेण स्त्रीशब्दाद् नञ्प्रत्ययेऽनुबन्धलोपे स्त्री+न इति जाते आदिवृद्धौ णत्वे प्रातिपदिकसंज्ञायां स्वादिकार्ये च स्त्रैणः इति रूपम् । पुंसः अपत्यं पुमान् इति विग्रहे अनेन सूत्रेण स्नञ् प्रत्यये पौंस्नः इति बोध्यम् ।*

अणादिप्रत्ययविधायकं विधिसूत्रम्-

**तस्यापत्यम् ४ । १ । ९२**

**षष्ठ्यन्तात्कृतसन्धेः समर्थादपत्येऽर्थे उक्ता वक्ष्यमाणाश्च प्रत्यया वा स्युः ।**

अत्र "प्राग्दीव्यतोऽण् ४ । १ । ८३" इति सूत्रस्याधिकारः ।

***सरलार्थः***- *समर्थात् प्रथमानिर्दिष्टात् षष्ठ्यन्तात् प्रातिपदिकाद् अपत्येऽर्थे तद्धितोऽण् प्रत्ययो वा भवति । अणो णकार इत् । तस्यापत्यमित्यर्थनिर्देश उत्तरसूत्रेषु चोपतिष्ठते ।*

गुणादेशविधायकं विधिसूत्रम्-

**ओर्गुणः ६ । ४ । १४६**

**उवर्णान्तस्य भस्य गुणस्तद्धिते । उपगोरपत्यमौपगवः । आश्वपतः । दैत्यः । औत्सः । स्त्रैणः । पौंस्नः ।**

***सरलार्थः***- *उवर्णान्तस्य भस्याङ्गस्य गुणः तद्धिते प्रत्यये परे ।*

***औपगवः***- *'उपगोरपत्यं पुमान्' इति विग्रहे षष्ठ्यन्तात् प्रातिपदिकाद् उपगु-शब्दात् "तस्यापत्यम्" इति सूत्रेण अपत्येऽर्थे अण्प्रत्ययेऽनुबन्धलोपे 'उपगु+ङस् +अ' इति जाते, तद्धितान्तत्वात् "कृत्तद्धितसमासाश्च" इति सूत्रेण प्रातिपदिकसंज्ञायां सुपो लुकि 'उपगु अ' इत्यवस्थायां णित्वात् "तद्धितेष्वचामादेः" इति सूत्रेण आदेरच उकारस्य वृद्धौ 'औपगु अ' इति जाते "अचो ञ्णिति" इति प्राप्तां वृद्धिं बाधित्वा प्रकृतसूत्रेण उकारस्य गुणेऽवादेशे 'औपगव' इति जाते, तस्मात् प्रातिपदिकात् सौ, सकारस्य रुत्वे विसर्गे 'औपगवः' इति सिद्ध्यति ।*

गोत्रसंज्ञाविधायकं संज्ञासूत्रम्-

**अपत्यं पौत्रप्रभृति गोत्रम् ४ । १ । १६२**

**अपत्यत्वेन विवक्षितं पौत्रादि गोत्रसंज्ञं स्यात् ।**

(अपत्यम्, पौत्रपभृति, गोत्रम्)

***सरलार्थः***- *पौत्रादि अपत्यत्वेन विवक्षितं सद् गोत्रसंज्ञं भवति । पौत्रादयः यदि पौत्रादित्वेनैव विवक्ष्यन्ते तदा न यदा पौत्रादयः सन्ततयः अपत्यत्वेन विवक्ष्यन्ते तदा गोत्रसंज्ञकाः भवन्ति इत्याशयः ।*

नियमसूत्रम्-

**एको गोत्रे ४ । १ । ९३**

**गोत्रे एक एवापत्यप्रत्ययः स्यात् । उपगोर्गोत्रापत्यमौपगवः ।**

(तस्य, अपत्यम्, गोत्रे, एकः, प्रत्ययः)

***सरलार्थः-*** *गोत्रे एकः एवापत्यप्रत्ययो भवति । उपगोः अपत्यम् औपगवः, तस्यापि अपत्यम् औपगवः, तस्यापि अपत्यम् औपगवः एव भवतीत्याशयः ।*

***औपगवः*** *-उपगोः गोत्रापत्यमित्यर्थे "तस्यापत्यम्" इति सूत्रेण अण्प्रत्ययेऽनुबन्धलोपे तद्धितान्तत्वेन प्रातिपदिकसंज्ञायां षष्ठ्याः लुकि "ओर्गुणः"इति गुणे एचोऽयवायावः इत्यनेन अवादेशे स्वादिकार्ये च औपगवः इति रूपं ज्ञेयम् ।*

यञ्प्रत्ययविधायकं विधिसूत्रम्-

**गर्गादिभ्यो यञ्** ४ । १ । १०५

**गोत्रापत्ये । गर्गस्य गोत्रापत्यं गार्ग्यः । वात्स्यः ।**

(गर्गादिभ्यः, यञ्, तस्य, अपत्यम्, गोत्रे)

***सरलार्थः-*** *गर्गादिभ्यः शब्देभ्यो गोत्रापत्येऽर्थे यञ्प्रत्ययो भवति ।*

***गार्ग्यः-*** *गर्गस्य गोत्रापत्यमित्यर्थे गर्गशब्दादनेन सूत्रेण यञ् प्रत्ययेऽनुबन्धलोपे प्रातिपदिकसंज्ञायां सुपो लुकि, आदिवृद्धौ अकारलोपे गार्ग्यशब्दात् स्वादिकार्ये च गार्ग्यः इति रूपं बोध्यम् । एवं वत्सस्य गोत्रापत्यं पुमान् वात्स्यः ।*

यञञोः लुगादेशविधायकं विधिसूत्रम्-

**यञञोश्च** २ । ४ । ६४ ।

**गोत्रे यद्यञन्तमञन्तं च तदवयवयोरेतयोर्लुक् स्यात्तत्कृते बहुत्वे न तु स्त्रियाम् । गर्गाः । वत्साः ।**

(गोत्रे, यञञोः, च, लुक्, बहुषु, तेन, एव, अस्त्रियाम्)

***सरलार्थः-*** *गोत्रेऽर्थे विद्यमानं यञ्प्रत्ययान्तम्, अञ्प्रत्ययान्तञ्च यत् पदं तदवयवयोः यञ्-अञोः लुक् स्यात्, यञञ्कृते बहुत्वे द्योत्ये स्त्रीलिङ्गे तु न भवति ।*

***गर्गस्य गोत्रापत्यानि गर्गाः*** *"गर्गादिभ्यो यञ्" इति सूत्रेण यञ्प्रत्यये बहुवचने अनेन यञ्प्रत्ययस्य लोपः । तथैव वत्सस्य गोत्रापत्यानि वत्साः ।*

युवसंज्ञाविधायकं सूत्रम्-

**जीवति तु वंश्ये युवा** ४ । १ । १६३ ।

**वंश्ये पित्रादौ जीवति पौत्रादेर्यदपत्यं चतुर्थादि तद्युवसंज्ञमेव स्यात् ।**

(वंश्ये, पौत्रप्रभृति,अपत्यम्, तस्य, अपत्यम्, जीवति, तु, युवा)

***सरलार्थः***- *वंश्ये पौत्रप्रभृतेः यद् अपत्यम्, तस्य पित्रादौ जीवति सति गोत्रसंज्ञां बाधित्वा युवसंज्ञा भवति ।*

फक्प्रत्ययविधायकं विधिसूत्रम्-

**गोत्राद्यून्यस्त्रियाम् ४ । १ । १०१**

**गोत्रे यौ यञिञौ तदन्तात्फक् स्यात् ।**

(युनि, गोत्रात्, प्रत्ययः, अस्त्रियाम्)

***सरलार्थः***- *युन्यपत्ये गोत्रप्रत्ययान्तादेव भवति न तु मूलपुरुषवाचकात् शब्दात् न तु स्त्रियाम् ।*

आयनाद्यादेशविधायकं विधिसूत्रम्-

**आयनेयीनीयियः फढखछघां प्रत्ययादीनाम् ७ । १ । २**

**प्रत्ययादेः फस्य आयन्, ढस्य एय्, खस्य ईन्, छस्य ईय्, घस्य इय्, एते स्युः । गर्गस्य युवापत्यं गार्ग्यायणः । दाक्षायणः ।**

(प्रत्ययादीनाम्, फढखछघाम्, आयनेयीनीयियः)

***सरलार्थः***- *प्रत्ययादौ स्थितानां फ-ढ-ख-छ-घां क्रमेण आयन्, एय्, ईन्, ईय्, इय् एते आदेशाः भवन्ति ।*

***गार्ग्यायणः***- *गर्गस्य युवापत्यमित्यर्थे पूर्वं गर्गशब्दात् "गर्गादिभ्यो यञ्" इति सूत्रेण यञ्प्रत्यये तदन्ताद् गार्ग्यशब्दात् "गोत्राद्यून्यस्त्रियाम्" इति सूत्रेण फक्प्रत्ययेऽनुबन्धलोपे फस्य स्थाने अनेन सूत्रेण आयनादेशे अकारस्य "यस्येति च" इति लोपे वर्णसम्मेलने स्वादिकार्ये गार्ग्यायणः इति सिद्ध्यति ।*

इञ्प्रत्ययविधायकं विधिसूत्रम्-

**अत इञ् ४ । १ । ९५**

**अपत्येऽर्थे । दाक्षिः ।**

(अतः, ङ्याप्प्रातिपतिकात्, इञ्,प्रत्ययः, परश्च, तद्धिताः, अपत्यम्)

***सरलार्थः***- *अकारान्तात् प्रातिपदिकाद् अपत्येऽर्थे तद्धित इञ्प्रत्ययो वा भवति । इञो ञकार इत् ।*

*'दक्षस्यापत्यं पुमान्' इति विग्रहे षष्ठ्यन्ताद् दक्षशब्दात् प्रकृतसूत्रेण इञ्प्रत्ययेऽनुबन्धलोपे 'दक्ष+ङस् +इ' इति जाते, तद्धितान्तत्वात् प्रातिपदिकसंज्ञायां सुब्लुकि 'दक्ष इ' इत्यवस्थायां*

*ञित्वात् "तद्धितेष्वचामादेः" इति सूत्रेण आदिवृद्धौ, भत्वाद् "यस्येति च" इत्यकारलोपे 'दाक्षि' इति जाते, तस्मात् प्रातिपदिकात् सौ, विभक्तिकार्ये 'दाक्षिः' इति सिद्ध्यति । एवमेव गर्गस्यापत्यं पुमान्* ***गार्गिः*** *। दशरथस्यापत्यं* ***दाशरथिः*** *। द्रोणस्यापत्यं* ***द्रौणिः*** *।*

इञ्प्रत्ययविधायकं विधिसूत्रम्-

**बाह्वादिभ्यश्च ४ । १ । ९६**

**बाहविः । औडुलोमिः ।**

(बाह्वादिभ्यः, च, इञ्)

***सरलार्थः-*** *कृतसन्धिकार्येभ्यः बाह्वादिगणपठितेभ्यः शब्देभ्योऽपि अपत्येऽर्थे इञ्प्रत्ययो वा भवति । आकृतिगणोऽयम् ।*

*'बाहोरपत्यं पुमान्' इति विग्रहे 'बाहु+ङस्' इत्यस्मात् सुबन्तसमर्थात् प्रकृतसूत्रेण इञ्प्रत्यये, प्रातिपदिकत्वात् सुब्लुकि 'बाहु इ' इति जाते, आदिवृद्धौ, भत्वाद् "ओर्गुणः' इत्युकारस्य गुणे, अवादेशे 'बाहवि' इति जाते, तस्मात् सौ, विभक्तिकार्ये 'बाहविः' इति । तथा च 'उडुलोम्नोऽपत्यं पुमान्' इति विग्रहे 'उडुलोमन्+ङस्' इत्यस्मात् इञि, सुब्लुकि 'उडुलोमन् इ' इत्यवस्थायाम् आदिवृद्धौ, भत्वाद् "नस्तद्धिते" इति टिलोपे 'औडुलोमि' इति जाते, तस्मात् सौ 'औडुलोमिः' इति । तस्य बहुत्वविवक्षायां 'उडुलोम्नोऽपत्यानि पुमांसः' इति विग्रहे तु इञं बाधित्वा "लोम्नोऽपत्येषु बहुष्वकारो वक्तव्यः" इति वार्तिकेन अ-प्रत्यये 'औडुलोमाः' इति रूपं भवति ।*

अञ्प्रत्ययविधायकं विधिसूत्रम्-

**अनृष्यानन्तर्ये विदादिभ्योऽञ् ४ । १ । १०४**

**एभ्योऽञ् गोत्रे । येत्वत्रानृषयस्तेभ्योऽपत्येऽन्यत्र तु गोत्रे । बिदस्य गोत्रं बैदः । बैदौ । बिदाः । पुत्रस्यापत्यं पौत्रः । पौत्रौ । पौत्राः । एवं दौहित्रादयः ।**

(अनृषि, आनन्तर्ये, विदादिभ्यः, अञ्, तस्य, अपत्यम्, गोत्रे)

***सरलार्थः-*** *विदादिगणपठितेभ्यः शब्देभ्यः अञ् प्रत्ययो भवति, तत्र आगतेभ्यः ऋषिवाचकेभ्यः शब्देभ्यः गोत्रे प्रत्ययः, ऋषिभिन्नार्थेभ्यः शब्देभ्यस्तु अपत्यार्थे अञ्प्रत्यय इति ज्ञेयम् । तेन विदशब्दाद् गोत्रापत्ये अञ्प्रत्ययः । पुत्रशब्दात् तु अपत्यार्थे अञ्प्रत्ययः ।*

अण्प्रत्ययविधायकं विधिसूत्रम्-

**शिवादिभ्योऽण् ४ । १ । ११२**

**अपत्ये । शैवः । गाङ्गः ।**

(शिवादिभ्यः, अण्, तस्यापत्यम्)

***सरलार्थः***- *शिवादिगणपठितेभ्यः शब्देभ्योऽपत्येऽर्थ अण्प्रत्ययो वा भवति ।*

*'शिवस्यापत्यं पुमान्' इति विग्रहे षष्ठ्यन्तात् समर्थात् शिवशब्दात् प्रकृतसूत्रेण अण्यनुबन्धलोपे 'शिव+ङस् +अ' इति जाते, तद्धितान्तत्वात् प्रातिपदिकसंज्ञायां सुपो लुकि 'शिव+अ' इत्यवस्थायां णित्वादादिवृद्धौ, भत्वादलोपे 'शैव' इति जाते, तस्मात् प्रातिपदिकात् सौ, विभक्तिकार्ये 'शैवः' इति । शैवः कुमारो गणेशश्च । एवमेव 'गङ्गाया अपत्यं पुमान्' इति विग्रहे पूर्ववद् गाङ्गः । गाङ्गो भीष्मः ।*

अण्प्रत्ययविधायकं विधिसूत्रम्-

**ऋष्यन्धकवृष्णिकुरुभ्यश्च** ४ । १ । ११३

**ऋषिभ्यः- वासिष्ठः । वैश्वामित्रः । अन्धकेभ्यः- श्वाफल्कः । वृष्णिभ्यः-वासुदेवः । कुरुभ्यः- नाकुलः । साहदेवः ।**

(ऋष्यन्धकवृष्णिकुरुभ्यः, च, अण्, तस्यापत्यम्)

***सरलार्थः***- *ऋषिवाचकशब्देभ्योऽन्धकवंश- वृष्णिवंश-कुरुवंशवाचकेभ्यः शब्देभ्यश्च अपत्येऽर्थ अण्प्रत्ययो वा भवति ।*

***ऋषिभ्यः*** *'वसिष्ठस्यापत्यं पुमान्' इति विग्रहे 'वसिष्ठ+ङस्' इत्यस्मात् समर्थसुबन्तात् प्रकृतसूत्रेण अणि, विभक्तेर्लुकि 'वसिष्ठ अ' इति जाते, आदिवृद्धौ, भत्वादलोपे 'वासिष्ठ' इत्यस्मात् प्रातिपदिकात् सौ 'वासिष्ठः' इति । एवमेव विश्वामित्रस्यापत्यं पुमान् - वैश्वामित्रः ।*

***अन्धकेभ्यः*** *'श्वफल्कस्यापत्यं पुमान्' इति विग्रह अन्धकवंशवाचकात् 'श्वफल्क+ङस्' इति सुबन्तसमर्थादणि, पूर्ववत् प्रक्रियया 'श्वाफल्कः' इति सिद्ध्यति ।*

***वृष्णिभ्यः*** *'वसुदेवस्यापत्यं पुमान्' इति विग्रहे वृष्णिवंशवाचकात् षष्ठ्यन्ताद् वसुदेवशब्दादणि, पूर्ववत्प्रक्रियया 'वासुदेवः' इति सिद्ध्यति । वासुदेवो कृष्णः ।*

***कुरुभ्यः*** *'नकुलस्यापत्यं पुमान्' इति विग्रहे कुरुवंशवाचकात् षष्ठ्यन्तान् नकुलशब्दादणि, पूर्ववत् 'नाकुलः' इति । एवमेव 'सहदेवस्यापत्यं पुमान्' इति विग्रहे 'साहदेवः' इत्यपि सिद्ध्यति ।*

अण्प्रत्ययविधायकम्, उत्-आदेशविधायकञ्च सूत्रम्-

**मातुरुत्सङ्ख्यासम्भद्रपूर्वायाः** ४ । १ । ११५

**सङ्ख्यादिपूर्वस्य मातृशब्दस्योदादेशः स्यादण् प्रत्ययश्च ।**

**द्वैमातुरः । षाण्मातुरः । साम्मातुरः । भाद्रमातुरः ।**

(संङ्ख्यासम्भद्रपूर्वायाः, मातुः, उत्)

***सरलार्थः-*** *सङ्ख्यावाचकशब्दपूर्वस्य सम्-शब्दपूर्वस्य भद्र-शब्दपूर्वस्य च मातृ-शब्दस्य अन्त्यस्यालः स्थाने ह्रस्व-उकारादेशो भवति, तादृशान् मातृ-शब्दादण्प्रत्ययोऽपि भवतीत्यर्थः ।*

*'द्वयोर्मात्रोरपत्यं पुमान्' इति विग्रहे 'द्वि+ओस्+मातृ+ओस्' इत्यवस्थायां "तद्धितार्थोत्तरपदसमाहारे च" इति सूत्रेण तद्धितार्थे विषये समासे, समासत्वात् प्रातिपदिकसंज्ञायां सुपो लुकि 'द्विमातृ' इति जाते, प्रकृतसूत्रेण सङ्ख्यावाचकाद् द्विशब्दपूर्वकान् मातृशब्दादणि, 'मातृ' इत्यस्य ऋकारस्य च उत्वे रपरत्वे 'द्विमातुर् अ' इत्यवस्थायाम् आदिवृद्धौ, स्वादिकार्ये 'द्वैमातुरः' इति सिद्ध्यति । द्वैमातुरो गणेशः । एवमेव 'षण्णां मातृणामपत्यं पुमान्' इति विग्रहे - षाण्मातुरः । षाण्मातुरः कुमारः । सँमातुरपत्यं पुमान् - साम्मातुरः । भद्रमातुरपत्यं पुमान् - भाद्रमातुरः ।*

ढक्प्रत्ययविधायकं विधिसूत्रम्-

**स्त्रीभ्यो ढक्** ४ । १ । १२०

**स्त्रीप्रत्ययान्तेभ्यो ढक् । वैनतेयः ।**

(स्त्रीभ्यः, तस्यापत्यम्, ढक्)

***सरलार्थः-*** *स्त्रीप्रत्ययान्तेभ्यः शब्देभ्योऽपत्येऽर्थे तद्धितो ढक्प्रत्ययो वा भवति । ढकः ककार इत् ।*

*विनताया अपत्यमिति विग्रहे टाप्प्रत्ययान्तत्वाद् 'विनता+ङस्' इत्यस्मात् समर्थसुबन्तात् प्रकृतसूत्रेण ढक्प्रत्ययेऽनुबन्धलोपे 'विनता ढ' इत्यवस्थायाम्,* ***आयनेयीनीयियः फढखछघां प्रत्ययादीनाम्*** *अनेन सूत्रेण ढस्य स्थाने एयादेशे 'विनता एय' इति जाते, एयः स्थानिवद्भावेन कित्वे जाते* ***किति च*** *इति सूत्रेण आदिवृद्धौ 'वैनता एय' इति जाते, भत्वाद् आकारलोपे, स्वादिकार्ये 'वैनतेयः' इति सिद्ध्यति । एवमेव - गङ्गाया अपत्यं पुमान्* ***गाङ्गेयः*** *। राधाया अपत्यं पुमान्* ***राधेयः*** *। कुन्त्या अपत्यं पुमान्* ***कौन्तेयः*** *।*

कनीनादेशविधायकम्, अणप्रत्ययविधायकञ्च सूत्रम्-

**कन्यायाः कनीन च** ४ । १ । ११६

**चादण् । कानीनो व्यासः कर्णश्च ।**

***सरलार्थः-*** *अपत्येऽर्थे 'कन्या' इति शब्दस्य स्थाने 'कनीन' इत्यादेशो भवति, चकारग्रहणादण्प्रत्ययोऽपि भवति ।*

*कन्याया अपत्यमिति विग्रहे 'कन्या+ङस्' इत्यस्मात् प्रकृतसूत्रेण अणि, अणा सहैव 'कन्या' इत्यस्य 'कनीन' इत्यादेशे च कृते 'कनीन अ' इति जाते, णित्वादादिवृद्धौ, भत्वादलोपे, स्वादिकार्ये 'कानीनः' इति सिद्ध्यति । व्यासकर्णौ कानीनौ बभुवतुः ।*

यत्प्रत्ययविधायकं विधिसूत्रम्-

**राजश्वशुराद्यत् ४ । १ । १३७**

**राज्ञो जातावेवेति वाच्यम् (वा.) ।**

(राजश्वशुराद्, यत् तस्यापत्यम्)

***सरलार्थः***- *राजन्शब्दात्, श्वशुरशब्दाच्च तस्यापत्यमित्यर्थे यत् प्रत्ययो भवति । तत्र राजन् शब्दात् क्षत्रियजातौ गम्यमानायामेव यत् प्रत्ययो भवति ।*

प्रकृतिभावविधायकं सूत्रम्-

**ये चाभावकर्मणोः ६ । ४ । १६८।**

**यादौ तद्धिते परेऽन् प्रकृत्या स्यान्न तु भावकर्मणोः । राजन्यः । जातावेवेति किम् ? -**

(ये, च, अन्, प्रकृत्या, अभावकर्मणोः)

***सरलार्थः***- *यकारादौ तद्धिते प्रत्यये परे अन् प्रकृतिभावो भवति न तु भावकर्मणोः ।*

***राजन्यः*** *-राज्ञः अपत्यं जातिः इत्यर्थे "राजश्वशुराद्यत्" इति सूत्रेण राजन्शब्दाद् यत्प्रत्ययेऽनुबन्धलोपे राजन् +य इत्यवस्थायां "नस्तद्धिते" इति सूत्रेण टेर्लोपे प्राप्ते अनेन सूत्रेण अनः प्रकृतिभावे राजन्य इत्यस्य प्रातिपदिकसंज्ञायां स्वादिकार्ये राजन्यः इति रूपं बोध्यम् । अजातौ तु राज्ञः अपत्यमित्यर्थे "तस्यापत्यम्" इति अणि राजन्+ अ इत्यवस्थायां "नस्तद्धिते" इति सूत्रेण टेर्लोपे प्राप्ते आह-*

अनः प्रकृतिभावविधायकं सूत्रम्-

**अन् ६ । ४ । १६७**

**अन् प्रकृत्या स्यादणि परे । राजनः । श्वशुर्यः ।**

(अन्, प्रकृत्या, अणि)

***सरलार्थः***- *अनः प्रकृतिभावो भवति अणि परे । अनेन सूत्रेण अनः प्रकृतिभावे वर्णसम्मेलने स्वादिकार्ये च राजन इति सिद्ध्यति । श्वशुर्रस्य अपत्यं पुमान् श्वशुर्यः ।*

घप्रत्ययविधायकं विधिसूत्रम्-

**क्षत्राद्घः४ । १ । १३८**

**क्षत्त्रियः । जातावित्येव । क्षात्त्रिरन्यत्र ।**

(क्षत्राद्, तस्यापत्यम्, घः)

***सरलार्थः***- *क्षत्रशब्दाद् अपत्यर्थे घप्रत्ययो भवति । क्षत्रस्य अपत्यं पुमान् इत्यर्थे क्षत्रशब्दाद् अनेन घप्रत्यये घस्य इयादेशे क्षत्रियः इति रूपम् । घस्याभावे "अत इञ्" इति इञि क्षात्रिः ।*

ठक्प्रत्ययविधायकं विधिसूत्रम्-

**रेवत्यादिभ्यष्ठक्** ४ । १ । १४६
(रेवत्यादिभ्यः, तस्यापत्यम्, ठक्)

***सरलार्थः***- *रेवत्यादिभ्यः शब्देभ्यः तस्यापत्यमित्यर्थे ठक्प्रत्ययो भवति ।*

ठस्य इकादेशविधायकं विधिसूत्रम्-

**ठस्येकः** ७ । ३ । ५०
**अङ्गात्परस्य ठस्येकादेशः स्यात् । रैवतिकः ।**

(अङ्गस्य, ठस्य, इकः)

***सरलार्थः***- *अङ्गात् परस्य ठस्य स्थाने इकादेशो भवति ।*

अञ्प्रत्ययविधायकं विधिसूत्रम्-

**जनपदशब्दात् क्षत्रियादञ्** ४ । १ । १६८

**जनपदक्षत्रियवाचकाच्छब्दादञ् स्यादपत्ये । पाञ्चालः ।**

(जनपदशब्दात्, क्षत्रियाद्, अञ्)

***सरलार्थः*** *-जनपदवाचकः सन् क्षत्रियवाचकः यः शब्दः तस्माद् अपत्येऽर्थे अञ्प्रत्ययो भवति । पञ्चालशब्दो जनपदवाचकः क्षत्रियवाचकश्च तस्माद् अपत्यर्थेऽञि पाञ्चालः इति रूपम् ।*

**(क्षत्रियसमानशब्दाज्जनपदात्तस्य राजन्यपत्यवत्** (वा.) **। पञ्चालानां राजा पाञ्चालः ।**

**सरलार्थः**- क्षत्रियवाचकः सन् यः शब्दः जनपदवाचकश्चास्ति तस्मात् तस्य राजनि इत्यर्थे अपत्यवत् कार्याणि भवन्ति । तेन पञ्चालानां राजेत्यर्थे अपत्यवत् प्रकृतसूत्रेण अञ् ।

**पूरोरण् वक्तव्यः -वा.) । पौरवः ।**

***सरलार्थः***- *पुरुशब्दाद् अण् प्रत्ययो भवति अपत्यर्थे । पुरोः अपत्यं पुमान् पौरवः "ओर्गुणः" इति उकारस्य गुणः ।*

**पाण्डोर्ड्यण्** (वा.) **। पाण्ड्यः ।**

***सरलार्थः***- *पाण्डुशब्दाद् ड्यण्प्रत्ययो भवति अपत्येऽर्थे । पाण्डुशब्दाद् ड्यण्प्रत्ययेऽनुबन्धलोपे डित्वात् टेर्लोपे पाण्ड्यः इति रूपम् ।*

ण्यप्रत्ययविधायकं विधिसूत्रम्-

**कुरुनादिभ्यो ण्यः ४ । १ । १७२**

**कौरव्यः । नैषध्यः ।**
(कुरुनादिभ्यः, ण्यः, तस्यापत्यम्)

***सरलार्थः*-** *जनपदक्षत्रियवाचकेभ्यः कुरुशब्दाद् नकारादिशब्देभ्यश्च अपत्येऽर्थे ण्यप्रत्ययो भवति ।*

**कौरव्यः ।** कुरोः अपत्यं पुमान् इति विग्रहे अनेन सूत्रेण ण्यप्रत्ययः ।

तद्राजसंज्ञाविधायकं सूत्रम्-

**ते तद्राजाः ४ । १ । १७४**

**अञादयस्तद्राजसंज्ञाः स्युः ।**
(ते, तद्राजाः)

***सरलार्थः*-** *अञादयः प्रत्ययाः तद्राजसंज्ञकाः भवन्ति ।*

तद्राजसंज्ञकप्रत्ययानां लुग्विधायकं सूत्रम्-

**तद्राजस्य बहुषु तेनैवास्त्रियाम् २ । ४ । ६२**

**बहुष्वर्थेषु तद्राजस्य लुक् तदर्थकृते बहुत्वे न तु स्त्रियाम् । इक्ष्वाकवः । पञ्चालाः इत्यादि ।**

(तद्राजस्य, लुक्, बहुषु, तेनैव, अस्त्रियाम्)

***सरलार्थः*-** *बहुवचने परे तद्राजस्य लुक् तद्राजार्थकृते बहुत्वे स्त्रियां तु न । इक्ष्वाकोरपत्यांनि, इक्ष्वाकूनां जनपदानां राजानो वेति विग्रहे "जनपदशब्दात्...." इति सूत्रेण अञ्प्रत्यये तस्य "ते तद्राजाः" इति सूत्रेण तद्राजसंज्ञायां अनेन सूत्रेण तस्य लुकि बहुवचने इक्ष्वाकवः इति सिद्धम् । पञ्चालस्य अपत्यानि, पञ्चालानां जनपदानां राजानो वेति पञ्चालाः ।*

तद्राजसंज्ञकप्रत्ययस्य लुक्विधायकं सूत्रम्-

**कम्बोजाल्लुक्४ । १ । १७५**

**अस्मात्तद्राजस्य लुक् । कम्बोजः । कम्बोजौ । कम्बोजादिभ्य इति वक्तव्यम्** (वा.) **। चोलः । शकः । केरलः । यवनः ।**

(कम्बोजाद्, तद्राजस्य, लुक्)

***सरलार्थः***- *कम्बोजशब्दाद् विहितस्य तद्राजसंज्ञकप्रत्ययस्य लुग्भवति । पूर्वेण बहुवचने एव तद्राजस्य लुग् अनेन तु एकवचनद्विवचनयोश्च लुग् शेषं पूर्ववत् ।*

। इत्यपत्याधिकारः । २ ।

## प्रयोगसिद्धिप्रकारः

### दाशरथिः

'दशरथस्यापत्यं पुमान्' इति विग्रहे षष्ठ्यन्ताद् दशरथशब्दात् "अत इञ्" इति सूत्रेण इञ्प्रत्ययेऽनुबन्धलोपे 'दशरथ+ङस् +इ' इति जाते, तद्धितान्तत्वात् "कृत्तद्धितसमासाश्च" इति सूत्रेण प्रातिपदिकसंज्ञायां सुब्लुकि 'दशरथ इ' इत्यवस्थायां ञित्वात् "तद्धितेष्वचामादेः" इति सूत्रेण आदिवृद्धौ, 'दाशरथ इ' इति जाते, भत्वाद् "यस्येति च" इत्यकारलोपे 'दाशरथि' इति जाते, तस्मात् प्रातिपदिकात् सौ, विभक्तिकार्ये 'दाशरथिः' इति रूपं सिद्धयति । (दाशरथी रामः)

### शैवः

'शिवस्यापत्यं पुमान्' इति विग्रहे षष्ठ्यन्तात् समर्थात् शिवशब्दात् "शिवादिभ्योऽण्" इति सूत्रेण अण्यनुबन्धलोपे 'शिव+ङस् +अ' इति जाते, तद्धितान्तत्वात् प्रातिपदिकसंज्ञायां सुपो लुकि 'शिव+अ' इत्यवस्थायां णित्वात् "तद्धितेष्वचामादेः" इति सूत्रेण आदिवृद्धौ 'शैव अ' इति जाते, भत्वादलोपे 'शैव' इति जाते, तस्मात् प्रातिपदिकात् सौ, विभक्तिकार्ये 'शैवः' इति सिद्धयति ।

### वैनतेयः

विनताया अपत्यमिति विग्रहे स्त्रीप्रत्ययान्तत्वाद् 'विनता+ङस्' इत्यस्मात् समर्थसुबन्तात् "स्त्रीभ्यो ढक्" इति सूत्रेण ढक्प्रत्ययेऽनुबन्धलोपे 'विनता+ङस्+ढ' इति जाते, तद्धितान्तत्वात् प्रातिपदिकसंज्ञायां विभक्तेर्लुकि 'विनता ढ' इत्यवस्थायाम् "आयनेयीनीयियः फढखछघां प्रत्ययादीनाम्" इति सूत्रेण ढस्य स्थाने एयादेशे 'विनता एय' इति जाते, एयः स्थानिवद्भावेन कित्वात् "किति च" इति सूत्रेण आदिवृद्धौ 'वैनता एय' इति जाते, भत्वाद् आकारलोपे, स्वादिकार्ये 'वैनतेयः' इति सिद्धयति ।

### अभ्यासार्थाः प्रश्नाः

१. **अधस्तनसूत्राणामर्थं लिखत**

(क) समर्थानां प्रथमाद्वा (ख) तद्धितेष्वचामादेः (ग) अत इञ्

(घ) ओर्गुणः (ङ) शिवादिभ्योऽण् (च) स्त्रीभ्यो ढक्

२. **प्रश्नानामुत्तराणि देयानि**

(क) तद्धितप्रत्ययाः केभ्यो भवन्ति ?

(ख) ञिति णिति च तद्धितेषु केन सूत्रेण कस्य वृद्धिर्भवति ?

(ग) स्त्रीप्रत्ययान्तेभ्यः प्रातिपदिकेभ्योऽपत्येऽर्थे केन सूत्रेण कः प्रत्ययो विधीयते ?

(घ) 'किति च' सूत्रं किं करोति ?

(ङ) बाह्वादिगणपठितेभ्यः शब्देभ्योऽपत्येऽर्थे केन सूत्रेण कः प्रत्ययो भवति ?

(च) 'वसुदेवस्यापत्यं पुमान्' इति विग्रहे किं रूपं सिद्ध्यति ?

(छ) ऋषिवाचकशब्देभ्योऽपत्येऽर्थे कः प्रत्ययो भवति ?

(ज) अपत्यं किमस्ति ?

(झ) 'षाण्मातुरः' इति पदस्यार्थं लिखत ।

(ञ) "आयनेय्०" इति सूत्रं पूरयत ।

(ट) तद्धितप्रत्ययान्तशब्दानां केन सूत्रेण प्रातिपदिकसंज्ञा भवति ?

३. **अधोलिखितानि पदानि प्रयुज्य वाक्यानि रचयत**

गाङ्गेयः, साम्मातुरः, राधेयः, साहदेवः, कानीनः, दाशरथिः, उडुलोमाः, वैष्णवः, शैवः ।

४. **प्रकृतिभ्यः प्रत्ययान् विश्लेषयत**

औपगवः, गाङ्गः, गार्गिः, श्वाफल्कः, नाकुलः, द्रौणिः, कानीनः, आश्वपतः, बाहविः, कौन्तेयः ।

५. **प्रत्ययान् संयुज्य निष्पन्नरूपाणि लिखत**

गणपति+अण्, पशुपति+अण्, भगिनी+ढक्, दक्ष+इञ्, नकुल+अण्, रमा+ढक्, आर्या+ढक् ।

६. **अधस्तनप्रयोगाणां सिद्धिप्रक्रियां प्रदर्शयत**

औपगवः, दाक्षिः, बाहविः, राधेयः, कनीनः, द्वैमातुरः, वासिष्ठः, वासुदेवः, नाकुलः ।

७. **"तस्यापत्यम्" इति सूत्रस्यार्थं स्पष्टतया लिखत ।**

८. **समुचितपदं चित्वा रिक्तस्थानं पूरयत**

(क) तद्धिते उवर्णान्तस्य भस्य .................. इति सूत्रेण गुणो भवति ।

(सार्वधातुकार्धधातुकयोः, ओर्गुणः, आद् गुणः)

(ख) तद्धितप्रत्ययाः .................. भवन्ति । (धातुभ्यः, प्रातिपदिकेभ्यः)

(ग) तद्धिते ञित्प्रत्यये परे ................. इति सूत्रेण आदिवृद्धिर्भवति । (तद्धितेष्वचामादेः, किति च, वृद्धिरेचि)

(घ) 'शिवाया अपत्यं पुमान्' इति विग्रहे ................. इति रूपं भवति । (शैवेयः, शैवः)

(ङ) अकारान्तात् प्रातिपदिकादपत्येऽर्थे ................. प्रत्ययो भवति । (ढक्, अण्, इञ्)

## अनुप्रयोगः

**१. अधो लिखितानि वाक्यानि पठत**

(क) **दाशरथी** रामो **जानक्या** सह विवाहं चक्रे ।

(ख) **वासुदेवः** कृष्णः स्वमातुलं कंसं जघान ।

(ग) **गाङ्गेयो** भीष्म आजीवनं ब्रह्मचर्ये तस्थौ ।

(घ) **कानीनो** व्यासोऽष्टादशपुराणानि व्यरचयत् ।

(ङ) भगिनी **भागिनेयं** स्नापयति ।

(च) **शैवो** गणेशो विघ्ननाशं करोति ।

(छ) **कार्तिकेयः** कुमार एव **षाण्मातुरो** वर्तते ।

(ज) **द्वैमातुरस्य** गणेशस्योदरं लम्बं वर्तते ।

(झ) **वैनतेयो** गरुडो विष्णोर्वाहनं वर्तते ।

(ञ) युधिष्ठिरो ज्येष्ठः **पाण्डवो** बभूव ।

(ट) **वासुदेवः** **कौन्तेयाय** अर्जुनाय ज्ञानं ददौ ।

**२. निम्नाङ्कितानां पदानां विग्रहं प्रदर्शयत**

**यथा** - शैवाः → शिवस्यापत्यं पुमांसः ।

भागिनेयः, पाण्डवाः, कौन्तेयः, भार्गवः, गार्गिः, सौपर्णेयः, शार्वेयः, शैवेयौ, कानीनौ ।

# अथ रक्ताद्यर्थकप्रकरणम्

(रक्ताद्यर्थकाः, चातुरर्थिकाश्च)

## पाठपरिचयः

पाठेऽस्मिन् रक्ताद्यर्थकाः, चातुरर्थिकाः, शैषिकाश्च प्रत्ययाः समाविष्टाः सन्ति ।

अणप्रत्ययविधायकं विधिसूत्रम्

**तेन रक्तं रागात् ४ । २ । १ ।**

**अण् स्यात् । रज्यतेऽनेनेति रागः । कषायेण रक्तं वस्त्रं काषायम् ।**

(तेन, रक्तम्, रागात्, अण्)

***सरलार्थः-*** *तृतीयान्तसमर्थाद् रञ्जकद्रव्यवाचकात् प्रातिपदिकात् 'रक्तम्' इत्येतस्मिन्नर्थे तद्धितोऽण् प्रत्ययो वा भवति । रञ्ज्-धातोघञि, नकारलोपे 'रागः' इति निष्पद्यते ।*

*'कषायेण रक्तं वस्त्रम्' इति विग्रहे तृतीयान्तसमर्थात् कषाय-शब्दात् प्रकृतसूत्रेण अणप्रत्ययेऽनुबन्धलोपे 'कषाय+टा+अ' इति जाते, तद्धितान्तत्वात् प्रातिपदिकसंज्ञायां सुपो लुकि 'कषाय अ' इत्यवस्थायां णित्वादादिवृद्धौ, भसंज्ञकस्य अकारस्य लोपे 'काषाय' इति जाते, तस्मात् प्रातिपदिकात् सौ, नपुंसकत्वात् सोरमि, पूर्वरूपे 'काषायम्' इति सिद्ध्यति ।*

अणप्रत्ययविधायकं विधिसूत्रम्-

**नक्षत्रेण युक्तः कालः ४ । २ । ३**

**अण् स्यात् ।**

(नक्षत्रेण, युक्त, कालः, अण्, वा)

***सरलार्थः-*** *तृतीयान्तात् समर्थान् नक्षत्रवाचकशब्दात् 'युक्तः कालः' इत्येतस्मिन्नर्थे अणप्रत्ययो वा भवति ।*

**वा. तिष्यपुष्ययोर्नक्षत्राणि यलोप इति वाच्यम् । पुष्येण युक्तं पौषमहः ।**

***सरलार्थः-*** *"नक्षत्रेण युक्तः कालः" इति सूत्रेण विहितेऽणि परे तिष्य-पुष्य-शब्दयोर्यकारस्य लोपो भवति ।*

*'पुष्येण युक्तम् अहः' इत्यर्थे 'पुष्य+टा' इत्यस्मात् तृतीयान्तसमर्थाद् "नक्षत्रेण युक्तः कालः" इत्यणि, विभक्तेर्लुकि, आदिवृद्धौ 'पौष्य अ' इत्यवस्थायाम् अनेन वार्तिकेन यकारस्य लोपे 'पौष' इति जाते, तस्मात् प्रातिपदिकाद् अहन्-शब्दस्य विशेषणत्वान्नपुंसकलिङ्गे सौ, विभक्तिकार्ये 'पौषम्' इति । (पौषमहः । पौषो दिवसः ।)*

लुग्विधायकं विधिसूत्रम्-

**लुबविशेषे ४ । २ । ४**

**पूर्वेण विहितस्य लुप् स्यात् षष्टिदण्डात्मकस्य कालस्यावान्तरविशेषश्चेन्न गम्यते । अद्य पुष्यः ।**

(अविशेषे, नक्षत्रेण, युक्तः, कालः, लुप्)

***सरलार्थः-*** *"नक्षत्रेण युक्तः कालः" इति सूत्रेण विहितस्य अण्प्रत्ययस्य लुप् भवति विशेषकालस्य निर्देशे असति ।*

अण्प्रत्ययविधायकं विधिसूत्रम्-

**दृष्टं साम ४ । २ । ७**

**तेनेत्येव । वसिष्ठेन दृष्टं वासिष्ठं साम ।**

(तेन, दृष्टम्, साम, अण्)

***सरलार्थः-*** *तृतीयान्तात् समर्थाद् 'दृष्टं साम' इत्येतस्मिन्नर्थे अण्प्रत्ययो वा भवति ।*

*'वसिष्ठेन दृष्टं साम' इत्यर्थे 'वसिष्ठ+टा' इत्यस्मात् समर्थात् प्रकृतसूत्रेण अणि, सुब्लुकि 'वसिष्ठ अ' इति जाते, आदिवृद्धौ, भसंज्ञकाकारलोपे, 'वासिष्ठ' इत्यस्मात् साम-शब्दस्य विशेषणत्वान्नपुंसकलिङ्गे सौ, विभक्तिकार्ये 'वासिष्ठम्' इति सिद्ध्यति ।*

ड्यड्ड्ययोः प्रत्यययोः विधायकं विधिसूत्रम्-

**वामदेवाड्ड्यड्ड्यौ ४ । २ । ९**

**वामदेवेन दृष्टं साम वामदेव्यम् ।**

(तेन, वामदेवाद्, ड्यड्ड्यौ)

***सरलार्थः-*** *तृतीयान्तात् समर्थाद् वामदेवशब्दात् दृष्टं साम इत्यर्थे ड्यत्, ड्य एतौ द्वौ प्रत्ययौ भवतः । डकारतकारौ इतौ ।*

अण्प्रत्ययविधायकं विधिसूत्रम्

**परिवृतो रथः ४ । २ । १६**

**अस्मिन्नर्थेऽण् प्रत्ययो भवति । वस्त्रेण परिवृतो वास्त्रो रथः ।**

(तेन, परिवृतः, रथः, अण्)

***सरलार्थः-*** *तृतीयान्तात् समर्थात् 'परिवृतो रथः' इत्यर्थे अण्प्रत्ययो वा भवति ।*

*'वस्त्रेण परिवृतो रथः' इत्यर्थे 'वस्त्र+टा' इति समर्थात् प्रकृतसूत्रेणाणि, विभक्तेर्लुकि, आदिवृद्धौ, भत्वादलोपे 'वास्त्र' इति जाते, रथस्य विशेषणत्वात् तस्मात् पुंलिङ्गे सौ, विभक्तिकार्ये 'वास्त्रः' इति ।*

अण्प्रत्ययविधायकं विधिसूत्रम्-

**तत्रोद्धृतममत्रेभ्यः ४ । २ । १६**

**शराबे उद्धृतः शाराब ओदनः ।**

(तत्र, उद्धृतम्, अमत्रेभ्यः, अण्)

***सरलार्थः-*** *सप्तम्यन्तात् समर्थात् पात्रवाचकात् शब्दाद् 'उद्धृतम्' इत्यर्थेऽण् प्रत्ययो वा भवति ।*

*'शराबे उद्धृतः' इत्यर्थे 'शराब+ङि' इति समर्थात् प्रकृतसूत्रेण अणि, सुब्लुकि 'शराब अ' इति जाते, आदिवृद्धौ, भत्वादलोपे, ओदनस्य विशेषणत्वात् 'शाराब' इत्यस्मात् पुंलिङ्गे सौ 'शाराबः' इति ।*

अण्प्रत्ययविधायकं विधिसूत्रम्-

**संस्कृतं भक्षाः ४ । २ । १६**

**सप्तम्यन्तादण् स्यात्संस्कृतेऽर्थे यत्संकृतं भक्षाश्चेत्ते स्युः । भ्राष्ट्रेषु संस्कृता भ्राष्ट्रा यवाः ।**

(तत्र, संस्कृतम्, अण्, भक्षाः)

***सरलार्थः-*** *सप्तम्यन्तात् समर्थसुबन्तात् संस्कृते इत्यर्थे अण् प्रत्ययो भवति संस्कृतेषु पदार्थेषु भक्षणीयपदार्थेषु सत्सु ।*

*'भ्राष्ट्रेषु संस्कृताः' इत्यर्थे 'भ्राष्ट्र+सुप्' इत्यस्मात् समर्थात् प्रकृतसूत्रेण अणि, विभक्तेर्लुकि, आदिवृद्धौ, भत्वादलोपे 'भ्राष्ट्र' इति जाते, 'यवाः' इत्यस्य विशेषणत्वात् पुंलिङ्गे प्रथमाया बहुवचने जसि, विभक्तिकार्ये 'भ्राष्ट्राः' इति सिद्ध्यति ।*

अण्प्रत्ययविधायकं विधिसूत्रम्-

**साऽस्य देवता ४ । २ । २४**

**इन्द्रो देवताऽस्येति ऐन्द्रं हविः । पाशुपतम् । बार्हस्पत्यम्**

(सा, अस्य, देवता, अण्)

***सरलार्थः***- *प्रथमान्तात् समर्थाद् देवतावाचकात् शब्दाद् 'अस्य देवता' इत्यर्थेऽण्-प्रत्ययो वा भवति ।*

*'इन्द्रो देवता अस्य' इत्यर्थे 'इन्द्र+सु' इत्यस्मात् समर्थात् प्रकृतसूत्रेण अणि, विभक्तेर्लुकि 'इन्द्र अ' इति जाते, आदिवृद्धौ, भसंज्ञकस्य अकारस्य लोपे 'ऐन्द्र' इति जाते, 'हविः' इत्यस्य विशेषणत्वात् तस्मान्नपुंसकलिङ्गे सौ, विभक्तिकार्ये 'ऐन्द्रम्' इति । तथा च - 'पशुपतिर्देवता अस्य' इति विग्रहे 'पशुपति+सु' इत्यस्मात् प्राप्तमणं बाधित्वा* ***दित्यदित्येति*** *ण्यप्रत्यये प्राप्ते तमपि बाधित्वा अश्वपत्यादिगणपाठे पठितत्वाद् "अश्वपत्यादिभ्यश्च ४ । १ । ८४" इत्यणि, पूर्ववत् प्रक्रियया 'पाशुपतम्' इति सिद्ध्यति । 'बृहस्पतिर्देवता अस्य' इति विग्रहे तु 'बृहस्पति+सु' इत्यस्मात् प्राप्तमणं बाधित्वा "दित्यदित्यादित्यपत्युत्तरपदाण्ण्यः ४ । १ । ८५" इति सूत्रेण ण्यप्रत्यये णकारस्य इत्संज्ञायां लोपे 'बृहस्पति य' इति जाते, आदिवृद्धौ, भसंज्ञस्य इकारस्य लोपे, स्वादिकार्ये 'बार्हस्पत्यम्' इति ।*

घन्प्रत्ययविधायकं विधिसूत्रम्

**शुक्राद् घन्** ४ । २ । २६

**शुक्रियम्**

(शुक्राद्, घन्, सास्य, देवता)

***सरलार्थः***- *प्रथमान्तसमर्थाद् शुक्रशब्दात् सास्य देवता इत्यर्थे घन्प्रत्ययो भवति । शुक्रो देवता अस्य इति शुक्रियं हविः ।*

ट्यण्प्रत्ययविधायकं विधिसूत्रम्

**सोमाट्ट्यण्** ४ । २ । ३०

**सौम्यम् ।**

(सोमात्, ट्यण्, सास्य देवता)

***सरलार्थः***- *सास्यदेवता इत्यर्थे प्रथमान्तसमर्थसुबन्तात् सोमशब्दात् ट्यण् प्रत्ययो भवति । टकारणकारौ इतौ । सोमो देवता अस्य इत्यर्थे प्रथमान्तात् सोमशब्दात् ट्यणि सौम्यम् इति ज्ञेयम् ।*

यत्प्रत्ययविधायकं विधिसूत्रम्-

**वाय्वृतुपित्रुषसो यत्** ४ । २ । । ३१

**वायव्यम् । ऋतव्यम् ।**

(वायु-ऋतु-पितृ-उषसः, यत्, सास्य देवता)

***सरलार्थः***- *वायु, ऋतु, पितृ, उषस् इत्येतत्प्रकृतिकेभ्यः प्रथमान्तसमर्थसुबन्तेभ्यः सास्य देवता इत्यर्थे यत्प्रत्ययो भवति ।*

रीङादेशविधायकं विधिसूत्रम्-

**रीङ् ऋतः** ७ । ४ । २७

**अकृद्यकारे असार्वधातुके यकारे च्वौ च परे ऋदन्ताङ्गस्य रीङादेशः । यस्येति च । पित्र्यम् । उषस्यम् ।**

(अकृत्सार्वधातुके, यि, च्वौ, ऋतः, रीङ्)

***सरलार्थः***- *कृद्भिन्ने यकारे, सार्वधातुकभिन्ने यकारे, च्विप्रत्यये च परे ऋदन्ताङ्गस्य रीङादेशो भवति । **यस्येति चे**ति इकारलोपे पित्र्यम् ।*

पितृव्यादिशब्दानां निपातकं विधिसूत्रम्-

**पितृव्यमातुलमातामहपितामहाः** ७ । ४ । ३६

**एते निपात्यन्ते । पितुर्भ्राता पितृव्यः । मातुर्भ्राता मातुलः । मातुः पिता मातामहः । पितुः पिता पितामहः ।**

***सरलार्थः***- *पितृव्यः, मातुलः, मातामहः, पितामहः एते शब्दाः निपात्यन्ते । एषु शब्देषु सूत्राणि विनैव कतिचित् कार्याणि भवन्ति ।*

अणप्रत्ययविधायकं विधिसूत्रम्-

**तस्य समूहः** ४ । २ । ३७

**काकानां समूहः काकम् ।**

***सरलार्थः***- *षष्ठ्यन्तात् समर्थात् 'समूहः' इत्यर्थेऽण् प्रत्ययो वा भवति ।*

*'काकानां समूहः' इत्यर्थे 'काक+आम्' इत्यस्मात् समर्थात् प्रकृतसूत्रेण अणि, विभक्तेर्लुकि, आदिवृद्धौ 'काक अ' इति जाते, भसंज्ञकस्याकारस्य लोपे, स्वादिकार्ये 'काकम्' इति ।*

अण्प्रत्ययविधायकं विधिसूत्रम्-

**भिक्षादिभ्योऽण् ४ । २ । ३८**

**भिक्षाणां समूहो भैक्षम् । गर्भिणीनां समूहो गार्भिणम् ।**

(भिक्षादिभ्यः, अण्, तस्य समूहः)

***सरलार्थः-*** *षष्ठ्यन्तसमर्थाद् भिक्षादिगणपठितात् शब्दात् समूहेऽर्थेऽण्प्रत्ययो वा भवति ।*

*'भिक्षाणां समूहः' इत्यर्थे 'भिक्षा+आम्' इत्यस्मात् प्रकृतसूत्रेण अणि, पूर्ववत् प्रक्रियायां 'भैक्षम्' इति सिद्ध्यति ।*

*'गर्भिणीनां समूहः' इत्यर्थे 'गर्भिणी+आम्' इत्यस्मात् प्रकृतसूत्रेण अणि, विभक्तेर्लुकि 'गर्भिणी अ' इत्यवस्थायाम् -*

**वा. भस्याढे तद्धिते । इति पुंवद्भावे कृते-**

***सरलार्थः-*** *ढ-प्रत्ययभिन्ने तद्धितसंज्ञके प्रत्यये परे भस्याङ्गस्य पुंवद्भावो भवति ।*

*इति पुंवद्भावे कृते 'गर्भिन् अ' इति जाते "नस्तद्धिते" इति सूत्रेण टिलोपे प्राप्ते तं प्रबाध्य -*

इनः प्रकृतिभावविधायकं सूत्रम्-

**इनण्यनपत्ये ६ । ४ । १६४**

**अनपत्यार्थेऽणि परे इन् प्रकृत्या स्यात् । तेन नस्तद्धित इति टिलोपो न । युवतीनां समूहो यौवनम् ।**

(अनपत्ये, इन्, प्रकृत्या, अनणि)

***सरलार्थः-*** *अपत्यभिन्नेऽर्थे विहिते अण्प्रत्यये परे इन् इत्यस्य प्रकृतिभावो भवति ।*

*अनेन सूत्रेण 'गर्भिन्' इत्यस्य इन्-भागस्य प्रकृतिभावे, आदिवृद्धौ, नकारस्य णत्वे, स्वादिकार्ये 'गार्भिणम्' इति सिद्ध्यति ।*

***युवतीनां समूहो यौवनम्*** *–'युवतीनां समूहः' इति विग्रहे 'युवति+आम्' इत्यस्माद् "भिक्षादिभ्योऽण्" इत्यणि, विभक्तेर्लुकि, पूर्ववत् पुंवद्भावे, आदिवृद्धौ 'यौवन् अ' इत्यवस्थायां प्राप्तं टिलोपं बाधित्वा प्रकृतसूत्रेण 'अन्' इत्यस्य प्रकृतिभावे, स्वादिकार्ये 'यौवनम्' इति सिद्ध्यति ।*

तल्प्रत्ययविधायकं विधिसूत्रम्-

**ग्रामजनबन्धुभ्यस्तल् ४ । २ । ४३**

**तलन्तं स्त्रियाम् । ग्रामता । जनता । बन्धुता ।**

(ग्रामजनबन्धुभ्यः, तल्, तस्य, समूहः)

***सरलार्थः-*** *षष्ठ्यन्तसमर्थेभ्यो ग्राम-जन-बन्धु-शब्देभ्यः समूहेऽर्थे तल्प्रत्ययो वा भवति। तल्प्रत्ययान्ताः शब्दाः स्त्रीलिङ्गे प्रयुज्यन्ते। तलो लकार इत्।*

*'ग्रामाणां समूहः' इत्यर्थे 'ग्राम+आम्' इत्यस्मात् प्रकृतसूत्रेण तल्प्रत्ययेऽनुबन्धलोपे, विभक्तेर्लुकि 'ग्रामत' इति जाते, तलन्तस्य स्त्रीत्वात् टापि, सवर्णदीर्घे 'ग्रामता' इति जाते, तस्मात् सौ, हल्ङ्यादिलोपे 'ग्रामता' इति रूपं सिद्ध्यति। एवमेव जनानां समूहो जनता। बन्धूनां समूहो बन्धुता।*

**वा. गजसहायाभ्यां चेति वक्तव्यम्। गजता। सहायता। (अह्नः खः क्रतौ) अहीनः।**

***सरलार्थः-*** *षष्ठ्यन्तसमर्थाभ्यां गज-सहाय-शब्दाभ्यां च समूहेऽर्थे तल्प्रत्ययो वा भवति।*

*'गजानां समूहः' इत्यर्थे 'गज+आम्' इत्यस्मात् प्रकृतवार्तिकेन तलि, पूर्ववत् प्रक्रियायां 'गजता' इति सिद्ध्यति। एवमेव 'सहायानां समूहः' इत्यर्थे - सहायता।*

*अहन्शब्दात् खप्रत्ययो भवति यज्ञेऽर्थे गम्यमाने। खस्य ईनादेशे अहीनः।*

ठक्प्रत्ययविधायकं विधिसूत्रम्-

**अचित्तहस्तिधेनोष्ठक्** ४। २। ४७

(अचित्तहस्तिधेनोः, ठक्, तस्य समूहः)

***सरलार्थः-*** *षष्ठ्यन्तसमर्थेभ्यः चित्तहीनेभ्यः हस्तिधेनुशब्दाभ्याञ्च समूहेऽर्थे ठक्प्रत्ययो वा भवति। ककारः इत्।*

ककारादेशविधायकं विधिसूत्रम्-

**इसुसुक्तान्तात्कः** ७। ३। ५१

**इस्-उस्-उक्-तान्तात्परस्य ठस्य कः। साक्तुकम्। हास्तिकम्। धैनुकम्।**

(इस्-उस्-उक्-तान्तात्, अङ्गस्य, ठस्य, कः)

***सरलार्थः-*** *इस्-उस्-उक्-त-अन्ताद् अङ्गात् परस्य ठस्य स्थाने ककारादेशो भवति। अनेन ठस्य स्थाने ककारादेशः।*

अण्प्रत्ययविधायकं विधिसूत्रम्-

**तदधीते तद्वेद** ४। २। ५९

*सरलार्थः -द्वितीयान्तात् समर्थात् प्रातिपदिकाद् 'अधीते' इत्यर्थे 'वेद' इत्यर्थे च अण्प्रत्ययो वा भवति।*

ऐजागमविधायकं विधिसूत्रम्-

**न य्वाभ्यां पदान्ताभ्यां पूर्वौ तु ताभ्यामैच् ७ । ३ । ३**

**पदान्ताभ्यां यकारवकाराभ्यां परस्य न वृद्धिः, किं तु ताभ्यां पूर्वौ क्रमादैचावागमौ स्तः । व्याकरणमधीते वेद वा वैयाकरणः ।**

(पदान्ताभ्याम्, य्वाभ्याम्, अचः, न, वृद्धिः, ताभ्याम्, पूर्वौ, तु, ऐच्)

***सरलार्थः***– *पदान्ते स्थिताभ्यां यकारवकाराभ्यां परस्य अचः स्थाने वृद्ध्यादेशो न भवति, किन्तु यकारवकाराभ्यां पूर्वौ क्रमेण ऐच् (ऐ, औ) आगमौ कर्तव्यौ ।*

*अनेन यकारात् पूर्वम् ऐकार आगमो वकारात् पूर्वम् औकार आगमश्च भवतः ।*

*'व्याकरणमधीते वेद वा' इति विग्रहे 'व्याकरण+अम्' इत्यस्मात् द्वितीयान्तसमर्थात् "तदधीते तद्वेद" इत्यणि, विभक्तेर्लुकि 'व्याकरण अ' इत्यवस्थायाम् आदिवृद्धौ प्राप्तायां प्रकृतसूत्रेण तां निषिध्य यकारात्पूर्वम् ऐकारागमे 'वैयाकरण अ' इति जाते, भत्वादलोपे, स्वादिकार्ये 'वैयाकरणः' इति ।*

वुन्प्रत्ययविधायकं विधिसूत्रम्-

**क्रमादिभ्यो वुन् ४ । २ । ६१**

**क्रमकः । पदकः । शिक्षकः । मीमांसकः ।**

(क्रमादिभ्यः, वुन्, तदधीते तद्वेद)

***सरलार्थः*** *–'क्रम' इत्यादिभ्यः द्वितीयान्तसमर्थेभ्यः प्रातिपदिकेभ्यः 'तदधीते', 'तद्वेद' इत्यनयोरर्थयोस्तद्धितो वुन्-प्रत्ययो वा भवति । अणोऽपवादः । वुनो नकार इत् । युवोरिति वोरकादेशो भवति ।*

*'क्रममधीते वेद वा' इति विग्रहे 'क्रम+अम्' इति द्वितीयान्तसमर्थात् प्राप्तमणं बाधित्वा प्रकृतसूत्रेण वुन्प्रत्ययेऽनुबन्धलोपे, विभक्तेर्लुकि 'क्रम वु' इति जाते "युवोरनाकौ" इति वोरकादेशे, भसंज्ञकस्य अकारस्य लोपे 'क्रमक' इति जाते, तस्मात् प्रातिपदिकात् सौ, विभक्तिकार्ये 'क्रमकः' इति सिद्ध्यति । एवमेव - पदमधीते वेद वा पदकः । शिक्षामधीते वेद वा शिक्षकः । मीमांसामधीते वेद वा मीमांसकः इति ।*

## अथ चातुरर्थिकाः

अण्प्रत्ययविधायकं विधिसूत्रम्-

**तदस्मिन्नस्तीति देशे तन्नाम्नि ४ । २ । ६७**

**उदुम्बराः सन्त्यस्मिन्देशे औदुम्बरो देशः ।**

(तदस्मिन्नस्तीति देशे तन्नाम्नि, अण्)

***सरलार्थः-*** *प्रथमान्तसमर्थात् प्रातिपदिकाद् "अस्मिन्नस्ति" इत्यर्थेऽण् प्रत्ययो भवति देशे अर्थे गम्यमाने । औदुम्बरो देशः- उदुम्वरशब्दादनेन अण्प्रत्ययः ।*

अण्प्रत्ययविधायकं विधिसूत्रम्-

**तेन निर्वृत्तम्** ४ । २ । ६८

**कुशाम्बेन निर्वत्ता नगरी कौशाम्बी ।**

(तेन, निर्वृत्तम्, अण्)

***सरलार्थः-*** *तृतीयान्तसमर्थात् प्रातिपदिकाद् निर्वृत्तमित्यर्थे अण्प्रत्ययो भवति । कौशाम्बी- कुशाम्बशब्दात् अनेन सूत्रेण अण् प्रत्यये ङीपि ।*

अण्प्रत्ययविधायकं विधिसूत्रम्-

**तस्य निवासः** ४। २ । ६९

**शिबीनां निवासो देशः शैबः ।**

(तस्य निवास, अण्)

***सरलार्थः-*** *षष्ठ्यन्तसमर्थात् प्रातिपदिकाद् निवासः इत्यर्थे अण्प्रत्ययो भवति । शिबिशब्दाद् अनेन अणि शैबः इति ज्ञेयम् ।*

अण्प्रत्ययविधायकं विधिसूत्रम्-

**अदूरभवश्च** ४ । २ । ७०

**विदिशाया अदूरभवं नगरं वैदिशम् ।**

(तस्य, अदूरभवः, च, अण्)

***सरलार्थः-*** *षष्ठ्यन्तसमर्थात् प्रातिपदिकाद् अदूरभव इत्यर्थे अण्प्रत्ययो भवति । अनेन विदिशाशब्दाद् अण्प्रत्ययः ।*

चातुरर्थिकप्रत्ययस्य लुब्विधायकं सूत्रम्-

**जनपदे लुप्** ४ । २ । ८१

**जनपदे वाच्ये चातुरर्थिकस्य लुप् ।**

(जनपदे, अण्, लुप्)

***सरलार्थः-*** *जनपदे वाच्ये चातुरर्थिकप्रत्ययस्य लुप् भवति ।*

अतिदेशसूत्रम्-

**लुपि युक्तवद्व्यक्तिवचने १ । २ । ५१**

**लुपि सति प्रकृतिवल्लिङ्गवचने स्तः । पञ्चालानां निवासो जनपदः पञ्चालाः । कुरवः । अङ्गाः । वङ्गाः । कलिङ्गाः ।**

(लुपि, युक्तवद्, व्यक्तिवचने)

***सरलार्थः-*** *चातुरर्थिकस्य प्रत्ययस्य लुपि सति प्रकृतिवद् लिङ्गवचने भवतः । युक्तम्=प्रकृतिः, व्यक्तिः=लिङ्गवचने ।*

अण्प्रत्ययविधायकं विधिसूत्रम्-

**वरणादिभ्यश्च ४ । २ । ८२**

**अजनपदार्थ आरम्भः । वरणानामदूरभवं नगरं वरणाः**

(वरणादिभ्यः, च, अण्, लुप्)

***सरलार्थः-*** *वरणादिप्रातिपदिकेभ्यो विहितस्य चातुरर्थिकप्रत्ययस्य लुप् भवति ।*

ड्मतुप्प्रत्ययविधायकं विधिसूत्रम्-

**कुमुदनडवेतसेभ्यो ड्मतुप् ४ । २ । ८७**

(कुमुदनडवेतसेभ्यः, ड्मतुप्)

***सरलार्थः-*** *कुमुद-नड-वेतस्शब्देभ्यः समर्थप्रातिपदिकेभ्य चातुरर्थिकः ड्मतुप्प्रत्ययो भवति ।*

मस्य वकारादेशविधायकं विधिसूत्रम्-

**झयः ८ । २ । १०**

**झयन्तान्मतोर्मस्य वः । कुमुद्वान् । नड्वान् ।**

(झयः, मतोः, व)

***सरलार्थः-*** *झयन्तात् प्रातिपदिकाद् विहितस्य मतुप्प्रत्ययावयवस्य मस्य स्थाने वकारादेशो भवति ।*

मतोर्मस्य वकारादेशविधायकं विधिसूत्रम्-

**मादुपधायाश्च मतोर्वोऽयवादिभ्यः८ । २ । ९**

**मवर्णावर्णान्तान्मवर्णावर्णोपधाच्च यवादिवर्जितात्परस्य मतोर्मस्य वः । वेतस्वान् ।**

(माद्, उपधायाः, च, मतोः, वः, अयवादिभ्यः)

***सरलार्थः***- *मवर्णान्ताद्, अवर्णान्ताद्, मवर्णोपधाद्, अवर्णोपधाच्च प्रातिपदिकात् परस्य मतुप्-प्रत्ययावयवस्य मस्य स्थाने वकारादेशो भवति, यवादिगणपठितेषु शब्देष्वयमादेशो न प्रवर्तते ।*

ड्वलच्प्रत्ययविधायकं विधिसूत्रम्-

**नडशादाड्ड्वलच् ४ । २ । ८८**

**नड्वलः । शाद्वलः ।**

***सरलार्थः***- *नड-शादशब्दाभ्याम् समर्थप्रातिपदिकाभ्यां चातुरर्थिकः ड्वलच्प्रत्ययो भवति ।*

वलच्प्रत्ययविधायकं विधिसूत्रम्-

**शिखाया वलच् ४ । २ । ८९**

**शिखावलः ।**

(शिखायाः, वलच्)

***सरलार्थः***- *शिखाशब्दात् समर्थप्रातिपदिकाद् चातुरर्थिकः वलच्प्रत्ययो भवति ।*

। इति चातुरर्थिकाः ।

## प्रयोगसिद्धिप्रकारः

### जनता

'जनानां समूहः' इत्यर्थे षष्ठ्यन्तसमर्थाज्जनशब्दाद् "ग्रामजनबन्धुभ्यस्तल्" इति सूत्रेण तल्प्रत्ययेऽनुबन्धलोपे 'जन+आम्+त' इति जाते, तद्धितान्तत्वात् प्रातिपदिकसंज्ञायां सुपो लुकि 'जनत' इति जाते, तलन्तस्य स्त्रीत्वाद् "अजाद्यतष्टाप्" इति टाप्यनुबन्धलोपे, सवर्णदीर्घे 'जनता' इति जाते, तस्मात् प्रातिपदिकात् सौ, हल्ङ्यादिलोपे 'जनता' इति रूपं सिद्ध्यति ।

### वैयाकरणः

'व्याकरणमधीते वेद वा' इति विग्रहे द्वितीयान्तसमर्थाद् व्याकरणशब्दाद् "तदधीते तद्वेद" इत्यणि अनुबन्धलोपे 'व्याकरण+अम्+अ' इति जाते, तद्धितान्तत्वेन प्रातिपदिकत्वाद् विभक्तेर्लुकि

'व्याकरण अ' इत्यवस्थायाम् णित्वात् "तद्धितेष्वचामादेः" इत्यादिवृद्धौ प्राप्तायां तां निषिध्य "न य्वाभ्यां पदान्ताभ्यां पूर्वौ तु ताभ्यामैच्" इति सूत्रेण यकारात्पूर्वम् ऐकारागमे 'वैयाकरण अ' इति जाते, भत्वादलोपे, स्वादिकार्ये 'वैयाकरणः' इति रूपं सिद्ध्यति ।

## शिक्षकः

'शिक्षामधीते वेद वा' इति विग्रहे 'शिक्षा+अम्' इति द्वितीयान्तसमर्थात् प्राप्तमणं बाधित्वा "क्रमादिभ्यो वुन्" इति सूत्रेण वुन्प्रत्ययेऽनुबन्धलोपे, तद्धितान्तत्वेन प्रातिपदिकत्वाद् विभक्तेर्लुकि 'शिक्षा वु' इति जाते "युवोरनाकौ" इति वोरकादेशे, भसंज्ञकस्य आकारस्य लोपे 'शिक्षक' इति जाते, तस्मात् प्रातिपदिकात् सौ, विभक्तिकार्ये 'शिक्षकः' इति रूपं सिद्ध्यति ।

## अभ्यासार्थाः प्रश्नाः

१. **प्रदत्तानि सूत्राणि पठत**

(क) तेन रक्तं रागात् (ख) साऽस्य देवता (ग) ग्रामजनबन्धुभ्यस्तल्

(घ) क्रमादिभ्यो वुन् (ङ) तदधीते तद्वेद (च) संस्कृतं भक्षाः

२. **प्रश्नानामुत्तराणि देयानि**

(क) क्रमादिगणपठितान् पञ्चशब्दान् लिखत ।

(ख) 'गार्भिणम्' इति प्रयोगे "नस्तद्धिते" इति टिलोपो कथं न भवति ?

(ग) 'जनता' इति पदस्य कोऽर्थः ?

(घ) 'गजसहायानां चेति वक्तव्यम्' इति वार्तिकस्यार्थं सोदाहरणं लिखत ।

(ङ) षष्ठ्यन्तसमर्थात् समूहेऽर्थे केन सूत्रेण कः प्रत्ययो भवति ?

(च) 'तत्रोद्धृतममत्रेभ्यः' इति सूत्रं किं करोति ?

(छ) "तिष्यपुष्ययोः०" इति वार्तिकं पूरयित्वा सोदाहरणं तदर्थञ्च लिखत ।

(ज) "अन्" इति सूत्रस्यार्थं लिखत ।

(झ) "भस्याढे तद्धिते" इति वार्तिकेन किं क्रियते ?

(ञ) "न य्वाभ्यां०" इति सूत्रं पूरयत ।

३. **अधोलिखितानि पदानि प्रयुज्य वाक्यानि रचयत**

पदकः, वैयाकरणः, सहायता, यौवनम्, बन्धुता, पाशुपतम्, वास्त्रः, शाराबः, भ्राष्ट्राः ।

४. **प्रकृतिभ्यः प्रत्ययान् विश्लेषयत**

क्रमकः, ग्रामता, यौवनम्, गार्भिणम्, काकम्, बार्हस्पतम्, वासिष्ठम्, पौषमहः, पदकः ।

५. **प्रत्ययान् संयुज्य निष्पन्नरूपाणि लिखत**

जन+तल्, शिक्षा+वुन्, गज+तल्, बक+अण्, भिक्षा+अण्, इन्द्र+अण्, वस्त्र+अण् ।

६. **अधस्तनप्रयोगाणां सिद्धिप्रक्रियां प्रदर्शयत**

काषायम्, पौषमहः, वासिष्ठम्, वास्त्रः, शाराबः, भ्राष्ट्रः, पाशुपतम्, काकम्, गार्भिणम्, यौवनम्, ग्रामता, सहायता, मीमांसकः ।

७. **"भिक्षादिभ्योऽण्" इति सूत्रस्यार्थं सोदाहरणं लिखत ।**

## अनुप्रयोगः

१. **अधो लिखितानि वाक्यानि पठत**

(क) **शिक्षकाः** छात्रेभ्यो विद्यादानं कुर्वन्ति ।

(ख) सन्यासिनः **काषायं** वस्त्रं धारयन्ति ।

(ग) पाणिनिर्विश्वस्य सर्वश्रेष्ठो **वैयाकरणो**ऽस्ति ।

(घ) राष्ट्रसेवकैः **जनतायाः** सेवा कर्तव्या ।

(ङ) **पाशुपत**क्षेत्रं समस्तानां हिन्दूधर्मावलम्बिनां पवित्रं तीर्थस्थलं वर्तते ।

(च) बालकः **भ्राष्ट्रं** मर्कटान्नं खादति ।

(छ) जनाः **वास्त्रं** रथं पश्यन्ति ।

(ज) सहायहीनैर्जनैः **सहायता** अपेक्ष्यते ।

२. **निम्नाङ्कितानां पदानां विग्रहं प्रदर्शयत**

**यथा** – बाकम् → बकानां समूहः ।

गजता, भ्राष्ट्राः, वैयाकरणः, शिक्षकः, काषायम्, शाराबः, यौवनम्, गार्भिणम् ।

३. **वुन्प्रत्ययान्तानि पञ्च पदानि अन्विष्य प्रत्येकं त्रीणि वाक्यानि रचयत ।**

# अथ तद्धितेषु

## (शैषिकाः, विकारार्थकाश्च)

अधिकारसूत्रम्, विधिसूत्रञ्च

**शेषे ४ । २ । ९२**

**अपत्यादिचतुरर्थ्यन्तादन्योऽर्थः शेषस्तत्राणादयः स्युः । चक्षुषा गृह्यते चाक्षुषं रूपम् । श्रावणः शब्दः । औपनिषदः पुरुषः । दृषदि पिष्टा दार्षदाः सक्तवः । चतुर्भिरुह्यं चातुरं शकटम् । चतुर्दश्यां दृश्यते चातुर्दशं रक्षः । 'तस्य विकारः' इत्यतः प्राक् शेषाधिकारः ।**

(शेषे, अण्)

***सरलार्थः-*** *अपत्यादिभ्यः चतुर्थ्यन्तेभ्योऽर्थेभ्योऽन्योऽर्थः शेषः, तत्र अणादयो घादयश्च प्रत्यया भवन्ति । तस्य विकारः ४ । ३ । १३४ । इत्यतः प्रागेव शेषाधिकारः । एषोऽधिकारः स्वतन्त्रविधिश्च । शेषाधिकारे सूत्रैरप्रतिपादितेष्वप्यर्थेषु अनेन सूत्रेण अणादयः प्रत्यया विधीयन्ते ।*

*'चक्षुषा गृह्यते' इति विग्रहे 'चक्षुष् + टा' इति समर्थसुबन्तात् 'शेषे' इति अण्-प्रत्ययेऽनुबन्धलोपे 'चक्षुष् टा अ' इत्यवस्थायां, तद्धितान्तत्वात् प्रातिपदिकसंज्ञायां सुपो लुकि, 'तद्धितेष्वचामादेः' इति आदिवृद्धौ, 'चाक्षुष' इति जाते, प्रातिपदिकत्वात् ततः नपुंसकलिङ्गे सौ, सोरमि, पूर्वरूपे 'चाक्षुषम्' इति रूपं सिद्धम् । (चाक्षुषं रूपम् ।) 'श्रवणेन गृह्यते' इति विग्रहे तृतीयान्तात् श्रवणशब्दाद् अणि, सुपो लुकि, आदिवृद्धौ, भत्वादकारलोपे, विभक्तिकार्ये, 'श्रावणः' इति । (श्रावणः शब्दः) 'चतुर्भिरुह्यते' इति विग्रहे 'चतुर् + भिस्' इत्यस्मादणि, आदिवृद्धौ, नपुंसके सौ 'चातुरम्' इति । (चातुरं शकटम्) 'चतुर्दश्यां दृश्यते' इति विग्रहे 'चतुर्दशी + ङि' इत्यस्मादणि, आदिवृद्धौ, भत्वाद् ईकारलोपे, 'रक्षः' इत्यस्य विशेषणत्वाद् नपुंसके सौ 'चातुर्दशं रक्षः' इति । प्रायेण एवमेव उपनिषदि दृष्टः, औपनिषदः पुरुषः, दृषदि पिष्टा, दार्षदाः सक्तवः ।*

घ-खप्रत्यययोः विधायकं विधिसूत्रम्-

**राष्ट्रावारपाराद् घखौ ४ । २ । ९३**

**आभ्यां क्रमाद् घखौ स्तः शेषे । राष्ट्रे जातादिः राष्ट्रियः । अवारपारीणः । वा. (अवारपाराद्विगृहीतादपि विपरीताच्चेति वक्तव्यम्) । अवारीणः । पारीणः । पारावारीणः । इह प्रकृतिविशेषाद् घादयष्टयुटयुलन्ताः प्रत्यया उच्यन्ते तेषां जातादयोऽर्थविशेषाः समर्थविभक्तयश्च वक्ष्यन्ते ।**

(राष्ट्रावारपाराद्, घखौ, शेषे)

***सरलार्थः***- *राष्ट्र-अवारपार-शब्दाभ्यां सुबन्तसमर्थाभ्यां शेषेऽर्थे क्रमाद् घखौ प्रत्ययौ वा भवतः । 'आयनेयीनीयियः फढखछघां प्रत्ययादीनाम्' इति घस्य इय्, खस्य ईन् ।*

*'राष्ट्रे जातः, राष्ट्रे भवः' इति विग्रहे सप्तम्यन्तसमर्थाद् राष्ट्रशब्दात् 'शेषे' इति अणि प्राप्ते तं प्रबाध्य 'राष्ट्रावारपाराद् घखौ' इत्यनेन घप्रत्यये 'राष्ट्र ङि घ' इत्यवस्थायां तद्धितान्तत्वात् प्रातिपदिकसंज्ञायां सुपो लुकि 'राष्ट्र घ' इति जाते, 'आयनेयी०' इत्यादिना 'घ' इत्यस्य स्थाने इयादेशे, भत्वाद् 'यस्येति च' इति अकारलोपे, 'राष्ट्रिय' तस्मात् प्रातिपदिकसंज्ञायां, पुंलिङ्गे सौ, रुत्वादिकार्ये 'राष्ट्रियः' इति रूपम् । (राष्ट्रियः पुरुषः, राष्ट्रिया संस्कृतिः, राष्ट्रियं धनम्)*

*'अवारपारे भवः वा' इति विग्रहे 'अवारपार + ङि' इत्यस्मात् खप्रत्यये, सुपो लुकि, खकारस्य ईनादेशे, अकारलोपे, णत्वे च कृते, 'अवारपारीण' इत्यस्मात् सौ 'अवारपारीणः' इति । (गङ्गाया अवारपारीणो देशः)*

य-खञ्-प्रत्यययोः विधायकं विधिसूत्रम्-

**ग्रामाद्यखञौ** ४ । २ । ९४

**ग्राम्यः । ग्रामीणः ।**

(ग्रामाद्, यखञौ, शेषे)

***सरलार्थः***- *ग्राम-शब्दप्रकृतिकसमर्थसुबन्तात् शेषेऽर्थे यखञौ तद्धितप्रत्ययौ वा भवतः ।*

*'ग्रामे जातः' इति विग्रहे सप्तम्यन्ताद् ग्रामशब्दाद् अनेन सूत्रेण यप्रत्यये, प्रातिपदिकत्वात् सुपो लुकि, 'यस्येति चे'ति अकारलोपे 'ग्राम्य' ततः सौ 'ग्राम्यः' इति सिद्धम् । खञ्प्रत्यये तु खकारस्य ईनादेशे, अकारलोपे, णत्वे, विभक्तिकार्ये 'ग्रामीणः' इति ।*

त्यक्प्रत्ययविधायकं विधिसूत्रम्-

**दक्षिणापश्चात्पुरसस्त्यक्** ४ । २ । ९७ ।

**दाक्षिणात्यः । पाश्चात्त्यः । पौरस्त्यः ।**

(दक्षिणापश्चात्पुरसः, त्यक्, शेषे)

***सरलार्थः***- *दक्षिणा-पश्चात्-पुरस्-शब्देभ्यः शेषेऽर्थे त्यक्प्रत्ययो भवति । त्यकः ककार इत् ।*

*'दक्षिणस्यां भवः' इति विग्रहे 'दक्षिणा' इत्यव्ययशब्दात् अनेन त्यक्प्रत्ययेऽनुबन्धलोपे, कित्वात् 'किति च' इति आदिवृद्धौ 'दाक्षिणात्य', ततः सौ 'दाक्षिणात्यः' इति सिद्ध्यति । एवमेव 'पश्चात् भवः' इति विग्रहे पश्चात्-शब्दात् त्यकि, पूर्ववत् कार्ये 'पाश्चात्त्यः' । एवमेव 'पुरोः भवः' इति विग्रहे पुरस्-शब्दात् 'पौरस्त्यः' इत्यपि ।*

यत्प्रत्ययविधायकं विधिसूत्रम्-

**द्युप्रागपागुदक्प्रतीचो यत्** ४ । २ । १०१

**दिव्यम् । प्राच्यम् । अपाच्यम् । उदीच्यम् । प्रतीच्यम् ।**

(द्युप्रागपागुदक्प्रतीचः, यत्, शेषे)

***सरलार्थः***– *दिव्-प्राच्-अपाच्-उदीच्-प्रतीच्-शब्देभ्यः शेषेऽर्थे यत्प्रत्ययो भवति ।*

त्यप्प्रत्ययविधायकं विधिसूत्रम्-

**अव्ययात्त्यप्** ४ । २ । १०४

**(अमेहक्वतसित्रेभ्य एव) अमात्यः । इहत्यः । क्वत्यः । ततस्त्यः । तत्रत्यः । (त्यब्नेर्ध्रुव इति वक्तव्यम् ।) नित्यः ।**

(अव्ययात्, त्यप्, शेषे)

***सरलार्थः***– *अव्ययेभ्यः त्यप्प्रत्ययो भवति शेषे । अमा, इह इत्येताभ्यामव्ययाभ्याम्, क्वप्रत्ययान्तेभ्यः, तसिप्रत्ययान्तेभ्यः, त्रल्प्रत्ययान्तेभ्यो ऽव्ययेभ्यश्चैवायं त्यप्प्रत्ययो भवति ।*

*'नि' इति अव्ययाद् त्यप्प्रत्ययो ध्रुवेऽर्थे भवति ।*

वृद्धसंज्ञाविधायकं सूत्रम्-

**वृद्धिर्यस्याचामादिस्तद्वृद्धम्** १ । १ । ७३

**यस्य समुदायस्याचां मध्ये आदिर्वृद्धिस्तद्वृद्धसंज्ञं स्यात् ।**

(यस्य, अचाम्, आदिः, वृद्धि, तद्, वृद्धम्)

***सरलार्थः***– *यस्य समुदायस्य अचां मध्ये आदिरच् वृद्धिसंज्ञको भवति स शब्दसमुदायो वृद्धसंज्ञको भवति ।*

वृद्धसंज्ञाविधायकं सूत्रम्-

**त्यदादीनि च** १ । १ । ७४

**वृद्धसंज्ञानि स्युः ।**

(त्यदादीनि, च, वृद्धम्)

***सरलार्थः***– *त्यदादिगणपठिताः शब्दा अपि वृद्धसंज्ञका भवन्ति । त्यदादिशब्दाः- त्यद्, तद्, यद्, एतद्, इदम्, अदस्, एक, द्वि, युष्मद्, अस्मद्, भवतु (भवत्), किम् ।*

छप्रत्ययविधायकं विधिसूत्रम्-

**वृद्धाच्छः ४ । २ । ११४**

**शालीयः । मालीयः । तदीयः ।**

(वृद्धात्, छः, शेषे)

***सरलार्थः-*** *वृद्धसंज्ञकात् सुबन्तसमर्थात् शेषेऽर्थे छ-प्रत्ययो भवति । 'छ' इत्यस्य 'आयनेयी०' इति ईयादेशः ।*

*शाला-शब्दस्य वृद्धसंज्ञायां 'शालायां जातः' इति विग्रहे 'शाला + ङि' इत्यस्मात् छप्रत्यये, सुपो लुकि, छकारस्य ईयादेशे, भत्वाद् आकारलोपे, विभक्तिकार्ये 'शालीयः' इति । एवमेव 'मालायां भवः' इति मालीयः । तद्-शब्दस्य 'त्यदादीनि च' इति वृद्धसंज्ञायां, 'तस्य अयम्' इति विग्रहे पूर्ववत् छप्रत्यये, ईयादेशे, स्वादिकार्ये 'तदीयः' ।*

**वा. (वा नामधेयस्य वृद्धसंज्ञा वक्तव्या) । देवदत्तीयः, दैवदत्तः ।**

***सरलार्थः-*** *नामवाचकशब्दस्य यथा प्राप्तं वृद्धसंज्ञा विकल्पेन भवति ।*

*देवदत्तशब्दस्य वृद्धसंज्ञायां 'देवदत्तस्यायम्' इत्यर्थे छप्रत्यये पूर्ववत्कार्ये 'देवदत्तीयः' इति, वृद्धसंज्ञाभावे तु अणि, आदिवृद्धौ, दैवदत्तः ।*

छप्रत्ययविधायकं विधिसूत्रम्-

**गहादिभ्यश्च ४ । २ । १३८**

**गहीयः**

(गहादिभ्यः, च, छः, शेषे)

***सरलार्थः-*** *गहादिगणपठितेभ्यः शब्देभ्योऽपि शेषेऽर्थे छप्रत्ययो भवति ।*

*'गहे जातः' इत्यर्थे सम्तम्यन्ताद् गहशब्दात् छप्रत्यये, ईयादेशे पूर्ववत् कार्ये 'गहीयः' इति ।*

खञ्-छ-प्रत्ययविधायकं विधिसूत्रम्-

**युष्मदस्मदोरन्यतरस्यां खञ् च ४ । ३ । १**

**चाच्छः । पक्षेऽण् । युवयोर्युष्माकं वायं युष्मदीयः, अस्मदीयः ।**

(युष्मदस्मदोः, अन्यतरस्याम्, खञ्, च, शेषे)

***सरलार्थः-*** *युष्मदस्मद्भ्यां शब्दाभ्यां शेषेऽर्थे विकल्पेन खञ्-प्रत्ययो भवति, छ-प्रत्ययश्च वा भवति, यथाप्राप्तम् अण्-प्रत्ययोऽपि भवति ।*

*'युवयोर्युष्माकं वा अयम्' इति विग्रहे वृद्धसंज्ञकात् षष्ठ्यन्तसमर्थाद् (युष्मद् ओस्, युष्मद् आम्) युष्मद्-शब्दात् छ-प्रत्यये, ईयादेशे, विभक्तिकार्ये 'युष्मदीयः' इति । एवमेव 'आवयोरस्माकं वा अयम्' इति विग्रहे 'अस्मदीयः' ।*

युष्माक-अस्माकादेशविधायकं विधिसूत्रम्-

**तस्मिन्नणि च युष्माकास्माकौ ४ । ३ । २**

**युष्मदस्मदोरेतावादेशौ स्तः खञ्यणि च । यौष्माकीणः । आस्माकीनः । यौष्माकः । आस्माकः ।**

(तस्मिन्, अणि, च, युष्मदस्मदोः, युष्माकास्माकौ)

***सरलार्थः–*** *युष्मदस्मदोः क्रमाद् 'युष्माक', 'अस्माक' इत्यादेशौ भवतः, खञि अणि च परे ।*

*पूर्ववद् विग्रहे युष्मद्-शब्दाद् 'युष्मदस्मदो'रिति खञि, प्रकृतसूत्रेण युष्मदः युष्माकादेशे, खस्य ईनादेशे, आदिवृद्धौ, भत्वादलोपे, नकारस्य णत्वे, विभक्तिकार्ये 'यौष्माकीणः' इति सिद्ध्यति । एवमेव आस्माकीनोऽपि । खञभावे तु पूर्वोक्तविग्रहे अणि, पूर्ववत्कार्ये - यौष्माकः, आस्माकश्च ।*

तवकममकादेशविधायकं विधिसूत्रम्-

**तवकममकावेकवचने ४ । ३ । ३**

**एकार्थवाचिनोर्युष्मदस्मदोस्तवकममकौ स्तः खञि अणि च । तावकीनः । तावकः । मामकीनः । मामकः । छे तु–**

(तवकममकौ, एकवचने, युष्मदस्मदोः, खञि, अणि)

***सरलार्थः–*** *एकत्वसङ्ख्यावाचिनोः युष्मदस्मदोः स्थाने तवकममकौ आदेशौ भवतः खञि अणि च परे ।*

*'तव अयम्' इति विग्रहे 'युष्मद् + ङस्' इत्यस्माद् 'युष्मदस्मदो'रिति वा खञि, प्राप्तं युष्माकादेशं बाधित्वा अनेन तावकादेशे, खस्य ईनादेशे, आदिवृद्धौ, अकारलोपे, विभक्तिकार्ये 'तावकीनः' इति । अणि तु पूर्ववत् 'तावकः' । एवमेव 'मम अयम्' इत्यर्थे अस्मद्-शब्दात् खञि 'मामकीनः', अणि तु 'मामकः' । छ-प्रत्यये परे तु–*

त्व-म-आदेशविधायकं विधिसूत्रम्-

**प्रत्ययोत्तरपदयोश्च ७ । २ । ९८**

**मपर्यन्तयोरेतयोरेकार्थवाचिनोस्त्वमौ स्तः प्रत्यये उत्तरपदे च परतः । त्वदीयः । मदीयः । त्वत्पुत्रः । मत्पुत्रः ।**

(युष्मदस्मदोः, मपर्यन्तस्य, एकवचने, त्वमौ, प्रत्ययोत्तरपदयोः, च)

***सरलार्थः***- *युष्मदस्मदोः एकार्थवाचिनोः मपर्यन्तस्य स्थाने क्रमेण त्व, म एतावादेशौ भवतः प्रत्यये परे, उत्तरपदे च परतः ।*

*पूर्वोक्त एव विग्रहे 'युष्मद् + ङस्' इति षष्ठ्यन्तसमर्थाद् 'युष्मदस्मदो'रिति छ-प्रत्यये, अनेन सूत्रेण 'युष्मद्' इत्यस्य मपर्यन्तभागस्य स्थाने 'त्व' इत्यादेशे, छस्य ईयादेशे 'त्व अद् ईय' इति जाते 'अतो गुणे'ति पररूपे, विभक्तिकार्ये 'त्वदीयः' इति सिद्ध्यति । एवम् 'अस्मद् + ङस्' इत्यस्मादपि पूर्ववत् छ-प्रत्यये, मपर्यन्तस्य स्थाने 'म' आदेशे, पररूपादिकार्ये 'मदीयः' । उत्तरपदे तु-*

*'तव पुत्रः' इति विग्रहे 'युष्मद्+ङस्+पुत्र+सु' इत्यवस्थायां षष्ठीसमासे, सुपो लुकि, उत्तरपदत्वाद् युष्मदो मपर्यन्तस्य त्वादेशे, पररूपे, चर्त्वे, विभक्तिकार्ये 'त्वत्पुत्रः' । एवं मम पुत्रः- मत्पुत्रः ।*

मप्रत्ययविधायकं विधिसूत्रम्-

**मध्यान्मः ४ । ३ । ८**

**मध्यमः ।**

(मध्यात्, मः, शेषे)

***सरलार्थः***- *मध्यशब्दात् समर्थप्रातिपदिकात् शेषेऽर्थे मप्रत्ययो भवति ।*

*मध्ये भवः- मध्य+ङि+म - मध्यम - मध्यमः ।*

ठञ्प्रत्ययविधायकं विधिसूत्रम्-

**कालाट्ठञ् ४ । ३ । ११**

**कालवाचिभ्यष्ठञ् स्यात् । कालिकम् । मासिकम् । सांवत्सरिकम् ।** (**अव्ययानां भमात्रे टिलोपः**) **सायम्प्रतिकः । पौनःपुनिकः ।**

(कालात्, ठञ्, शेषे)

***सरलार्थः***- *कालशब्दात् कालवाचिभ्यश्च शेषेऽर्थे ठञ्-प्रत्ययो भवति ।*

*'काले भवम्' इति विग्रहे सप्तम्यन्तात् काल-शब्दात् ठञ्यनुबन्धलोपे, ठस्य इकादेशे 'काल इक' इति जाते, आदिवृद्धौ, भसंज्ञायामाकारस्य लोपे, विभक्तिकार्ये 'कालिकम्' इति । एवमेव - मासे भवम् - मासिकम्, संवत्सरे क्रियते - सांवत्सरिकम् इत्यपि ।*

एण्यप्रत्ययविधायकं विधिसूत्रम्-

**प्रावृष एण्यः ४ । ३ । १७**

**प्रावृषेण्यः ।**

(प्रावृषः, एण्यः, शेषे)

***सरलार्थः***- *प्रावृषशब्दात् समर्थप्रातिपदिकाद् एण्यप्रत्ययो भवति शेषे ।*

तुगागमसन्नियोगशिष्ट-ट्यु-ट्युल्-प्रत्ययविधायकं विधिसूत्रम्-

**सायञ्चिरम्प्राह्णेप्रगेऽव्ययेभ्यष्ट्युट्युलौ तुट् च ४ । ३ । २३**

**सायमित्यादिभ्यश्चतुर्भ्योऽव्ययेभ्यश्च कालवाचिभ्यष्ट्युट्युलौ स्तस्तयोस्तुट् च । सायन्तनम् । चिरन्तनम् । प्राह्णेप्रगे अनयोरेदन्तत्वं निपात्यते । प्राह्णेतनम् । प्रगेतनम् । दोषातनम् ।**

(सायञ्चिरम्प्राह्णेप्रगेऽव्ययेभ्यः, कालात्, ट्युट्युलौ, तुट् च)

***सरलार्थः-*** *सायम्, चिरम्, प्राह्णे, प्रगे इति चतुर्भ्योऽव्ययेभ्यश्च कालवाचिभ्यः शब्देभ्यः शेषेऽर्थे ट्युट्युलौ प्रत्ययौ भवतः, एतयोः तुट्-आगमश्च भवति ।*

अण्घादिप्रत्ययविधायकं विधिसूत्रम्-

**तत्र जातः ४ । ३ । २५**

**सप्तमीसमर्थाज्जात इत्यर्थेऽणादयो घादयश्च स्युः । स्रुघ्ने जातः स्रौघ्नः । उत्से जातः औत्सः । राष्ट्रे जातो राष्ट्रियः । अवारपारे जातः- अवारपारीणः, इत्यादिः ।**

(तत्र जात, अण्)

***सरलार्थः-*** *सप्तम्यन्तात् समर्थप्रातिपदिकाद् 'जातः' इत्यर्थे पूर्वोक्ता अणादयः, वक्ष्यमाणा घादयश्च प्रत्ययाः स्युः ।*

*'स्रुघ्ने जातः' इति विग्रहे सप्तम्यन्तात् स्रुघ्नशब्दादणि, आदिवृद्धौ, अकारलोपे, स्वादिकार्ये, 'स्रौघ्नः' । 'उत्से जातः' इति विग्रहे 'तत्र जातः' इत्यर्थे 'उत्सादिभ्योऽञ्' इति अञि, पूर्ववत् प्रक्रियायाम् 'औत्सः' । 'राष्ट्रियः' 'अवारपारीणः' इति द्वौ प्रयोगौ 'राष्ट्रावारपाराद् घखौ' इत्यत्रैव निष्पन्नौ । अत्रापि 'तत्र जातः' इत्यर्थे पूर्ववत् सिद्धचतः ।*

ठप्प्रत्ययविधायकं विधिसूत्रम्-

**प्रावृषष्ठप् ४ । ३ । २६**

**एण्यापवादः । प्रावृषिकः ।**

(प्रावृष, ठप्, तत्र जातः)

***सरलार्थः-*** *सप्तम्यन्तात् प्रावृष्शब्दाद् जात इत्यर्थे ठप्प्रत्ययो भवति ।*

अणादिप्रत्ययविधायकं विधिसूत्रम्-

**प्रायभवः ४ । ३ । ३९**

**तत्रेत्येव । स्रुग्घ्ने प्रायेण बाहुल्येन भवति स्रौग्घ्नः ।**

(तत्र प्रायभवः)

***सरलार्थः***– *सप्तम्यन्तात् समर्थप्रातिपदिकात् 'प्रायभवः' इत्यर्थेऽणादयो घादयश्च प्रत्यया भवन्ति । 'स्रुघ्ने प्रायेण बाहुल्येन भवती'ति विग्रहे सप्तम्यन्तात् स्रुघ्नशब्दादणि, आदिवृद्धौ, अकारलोपे, ततः सौ 'स्रुघ्नः' ।*

अण्प्रत्ययविधायकं विधिसूत्रम्-

**सम्भूते ४ । ३ । ४२**

**स्रुग्घ्ने सम्भवति स्रौग्घ्नः ।**
(तत्र सम्भूते)

***सरलार्थः***– *सप्तम्यन्तात् समर्थप्रातिपदिकात् 'सम्भूतः' इत्यर्थेऽणादयो घादयश्च प्रत्यया भवन्ति ।*

*'स्रुघ्ने सम्भवति (सम्भूतः)' इति विग्रहे पूर्ववत् 'स्रौघ्नः' ।*

ढञ्प्रत्ययविधायकं विधिसूत्रम्-

**कोशाड्ढञ् ४ । ३ । ४२**
**कौशेयं वस्त्रम् ।**

(तत्र, कोशात्, ढञ्, सम्भूते)

***सरलार्थः***– *सप्तम्यन्तात् कोशशब्दात् सम्भवतीत्यर्थे ढञ् प्रत्ययो भवति ।*

अणादिप्रत्ययविधायकं विधिसूत्रम्-

**तत्र भवः ४ । ३ । ५३**

**स्रुग्घ्ने भवः स्रौग्घ्नः ।**

(तत्र, भवः, अण्)

***सरलार्थः***– *सप्तम्यन्तसमर्थाद् 'भवः' इत्यर्थेऽणादयो घादयश्च प्रत्यया भवन्ति ।*

*'स्रुघ्ने भवः' इति विग्रहे पूर्ववत् 'स्रौघ्नः' ।*

यत्प्रत्ययविधायकं विधिसूत्रम्-

**दिगादिभ्यो यत् ४ । ३ । ५४**

**दिश्यम् । वर्ग्यम् ।**

(दिगादिभ्यः, यत्, तत्र, भवः)

***सरलार्थः***– *सप्तम्यन्तसमर्थाद् दिगादिशब्दाद् भव इत्यर्थे यत् प्रत्ययो भवति ।*

यत्प्रत्ययविधायकं विधिसूत्रम्-

**शरीरावयवाच्च ४ । ३ । ५५**

**दन्त्यम् । कण्ठ्यम् । (अध्यात्मादेष्ठञिष्यते) । अध्यात्मं भवमाध्यात्मिकम् ।**

(शरीरावयवात्, च, तत्र, भवः)

***सरलार्थः-*** *सप्तम्यन्तात् शरीरावयववाचकात् शब्दात् भव इत्यर्थे यत्-प्रत्ययो भवति ।*

वृद्ध्यादेशविधायकं विधिसूत्रम्-

**अनुशतिकादीनाञ्च ७ । ३ । २०**

**एषामुभयपदवृद्धिर्ञिति णिति किति च । आधिदैविकम् । आधिभौतिकम् । ऐहलौकिकम् । पारलौकिकम् । आकृतिगणोऽयम् ।**

(अनुशतिकादीनाम्, च, पूर्वपदस्य, उत्तरपदस्य, अचाम्, आदेः, अचः, वृद्धिः, ञ्णिति, किति)

***सरलार्थः-*** *अनुशतिकादिगणपठितशब्दानां विषये पूर्वपदस्य उत्तरपदस्य च अचाम् आदेः अचः वृद्धिर्भवति, ञिति, णिति, किति च तद्धितप्रत्यये परे ।*

छप्रत्ययविधायकं विधिसूत्रम्-

**जिह्वामूलाङ्गुलेश्छः ४ । ३ । ६२**

**जिह्वामूलीयम् । अङ्गुलीयम् ।**

(जिह्वामूलाङ्गुलेः, छः, तत्र भवः)

***सरलार्थः-*** *सप्तमीसमर्थाभ्यां 'जिह्वामूल', 'अङ्गुलि' इति शब्दाभ्यां 'भवः' इत्यर्थे छप्रत्ययो भवति ।*

*'जिह्वामूले भवम्' इत्यर्थे सप्तमीसमर्थाद् जिह्वामूल-शब्दाच्छप्रत्यये, छस्य ईयादेशे, अकारलोपे, विभक्तिकार्ये 'जिह्वामूलीयम्' इति । एवमेव 'अङ्गुल्यां भवम्' इत्यर्थे पूर्ववद् 'अङ्गुलीयम्' ।*

छप्रत्ययविधायकं विधिसूत्रम्-

**वर्गान्ताच्च ४ । ३ । ६३**

**कवर्गीयम् ।**

(वर्गान्तात्, च, छः, तत्र भवः)

***सरलार्थः-*** *सम्तम्यन्ताद् वर्ग-शब्दान्तात् समर्थप्रातिपदिकाद् भवार्थे छ-प्रत्ययो भवति ।*

अणादिप्रत्ययविधायकं विधिसूत्रम्-

**तत आगतः ४ । ३ । ७४**

**स्रुग्घ्नादागतः स्रौग्घ्नः ।**

(ततः, आगतः, अण्)

***सरलार्थः-*** *पञ्चमीसमर्थाद् 'आगतः' इत्यर्थेऽणादयो घादयश्च प्रत्यया भवन्ति ।*

*'स्रुघ्नादागतः' इति विग्रहे पञ्चम्यन्तात् स्रुघ्नशब्दादणि, पूर्ववत् 'स्रौघ्नः' ।*

ठक्प्रत्ययविधायकं विधिसूत्रम्-

**ठगायस्थानेभ्यः ४ । ३ । ७५**

**शुल्कशालाया आगतः शौल्कशालिकः ।**

(आयस्थानेभ्यः, आगतः, ठक्)

***सरलार्थः-*** *आयस्थानवाचकेभ्यः पञ्चम्यन्तसमर्थप्रातिपदिकेभ्यः 'आगतः' इत्यर्थे ठक्प्रत्ययो भवति ।*

वुञ्प्रत्ययविधायकं विधिसूत्रम्-

**विद्यायोनिसंबन्धेभ्यो वुञ् ४ । ३ । ७७**

**औपाध्यायकः । पैतामहकः ।**

(विद्यायोनिसम्बन्धेभ्यः, ततः, आगतः, वुञ्)

***सरलार्थः-*** *विद्यासम्बन्धेभ्यः, योनिसम्बन्धेभ्यश्च पञ्चम्यन्तेभ्यः समर्थप्रातिपदिकेभ्यः आगत इत्यर्थे वुञ्प्रत्ययो भवति ।*

रूप्यप्रत्ययविधायकं विधिसूत्रम्-

**हेतुमनुष्येभ्योऽन्यतरस्यां रूप्यः ४ । ३ । ८१**

**समादागतं समरूप्यम् । पक्षे- गहादित्वाच्छः । समीयम् । विषमीयम् । देवदत्तरूप्यम् । दैवदत्तम् ।**

(हेतुमनुष्येभ्यः, ततः, आगतः, अन्यतरस्याम्, रूप्यः)

***सरलार्थः-*** *हेतुवाचकेभ्यः, मनुष्यवाचकेभ्यश्च पञ्चम्यन्तेभ्यः समर्थप्रातिपदिकेभ्यः 'ततः आगतः' इत्यर्थे विभाषया रूप्यप्रत्ययो भवति ।*

मयट्प्रत्ययविधायकं विधिसूत्रम्-

**मयट् च ४ । ३ । ८२**

**सममयम् । देवदत्तमयम् ।**

(हेतुमनुष्येभ्यः, ततः, आगतः, अन्यतरस्याम्, मयट्, च)

***सरलार्थः-*** *हेतुवाचकेभ्यः, मनुष्यवाचकेभ्यश्च पञ्चम्यन्तेभ्यः समर्थप्रातिपदिकेभ्यः ततः आगतः इत्यर्थे विभाषया मयट्प्रत्ययो भवति ।*

अणादिप्रत्ययविधायकं विधिसूत्रम-

**प्रभवति ४ । ३ । ८३**

**हिमवतः प्रभवति हैमवती गङ्गा ।**

(ततः, प्रभवति, अण्)

***सरलार्थः-*** *पञ्चमीसमर्थात् 'प्रभवति' इत्यर्थेऽणादयो घादयश्च प्रत्यया भवन्ति ।*

*'हिमवतः प्रभवति' इत्यर्थे 'हिमवत् + ङस्' इत्यस्माद् अणि, सुपो लुकि, आदिवृद्धौ 'हैमवत' इति जाते, स्त्रीत्वान्ङीपि, अकारलोपे, विभक्तिकार्ये 'हैमवती' इति । (हैमवती गङ्गा)*

अण्प्रत्ययविधायकं विधिसूत्रम्-

**तद्गच्छति पथिदूतयोः ४ । ३ । ८५**

**स्रुघ्नं गच्छति स्रौघ्नं पन्था दूतो वा ।**

(तद्गच्छति, पथिदूतयोः, अण्)

***सरलार्थः-*** *द्वितीयान्तात् प्रातिपदिकाद् 'गच्छति' इत्यर्थे अण्प्रत्ययो भवति पथिदूतयोः गम्यमानयोः ।*

अण्प्रत्ययविधायकं विधिसूत्रम्-

**अभिनिष्क्रामति द्वारम् ४ । ३ । ८६**

**स्रुघ्नमभिनिष्क्रामति स्रौघ्नं कान्यकुब्जद्वारम् ।**

(तद्, अभिनिष्क्रामति, अण्, द्वारम्)

***सरलार्थः-*** *द्वितीयान्तात् समर्थप्रातिपदिकाद् 'अभिनिष्क्रामति' इत्यर्थे अण्-प्रत्ययो भवति ।*

अणादिप्रत्ययविधायकं विधिसूत्रम्-

**अधिकृत्य कृते ग्रन्थे ४ । ३ । ८७**

**शारीरकमधिकृत्य कृतो ग्रन्थः शारीरकीयः ।**

(तद्, अधिकृत्य, कृते, ग्रन्थे, अण्)

***सरलार्थः***– *द्वितीयान्तात् समर्थप्रातिपदिकाद् 'अधिकृत्य कृतो ग्रन्थः' इत्यर्थे अणादयो प्रत्यया भवन्ति । 'शारीरकीयः' इत्यत्र वृद्धाच्छः इति छः ।*

अण्प्रत्ययविधायकं विधिसूत्रम्-

**सोऽस्य निवासः ४ । ३ । ८९**

**स्रुघ्नो निवासोऽस्य स्रौघ्नः ।**

(सः, अस्य, निवासः)

***सरलार्थः***– *प्रथमान्तसमर्थाद् 'अस्य निवासः' इत्यर्थेऽणादयो घादयश्च प्रत्यया भवन्ति ।*

*'स्रुघ्नो निवासोऽस्य' इति विग्रहे प्रथमान्तात् स्रुघ्नशब्दादणि, पूर्ववत् 'स्रौघ्नः' ।*

अणादिप्रत्ययविधायकं विधिसूत्रम्-

**तेन प्रोक्तम् ४ । ३ । १०१**

**पाणिनिना प्रोक्तं पाणिनीयम् ।**

(तेन, प्रोक्तम्, अण् )

***सरलार्थः***– *तृतीयान्तसमर्थात् 'प्रोक्तम्' इत्यर्थेऽणादयः प्रत्यया भवन्ति ।*

*'पाणिनिना प्रोक्तम्' इत्यर्थे तृतीयान्ताद् वृद्धसंज्ञकात् पाणिनिशब्दात् 'तेन प्रोक्तम्' इत्यर्थे 'वृद्धाच्छः' इत्यनेन छप्रत्यये, छकारस्य ईयादेशे, इकारलोपे, स्वादिकार्ये 'पाणिनीयम्' इति । (पाणिनीयं व्याकरणम्)*

अणादिप्रत्ययविधायकं विधिसूत्रम्-

**तस्येदम् ४ । ३ । १२०**

**उपगोरिदम् औपगवम् ।**

(तस्य, इदम्, अण्)

***सरलार्थः***– *षष्ठ्यन्तसमर्थाद् 'इदम्' इत्यर्थेऽणादयः प्रत्यया भवन्ति ।*

*'उपगोरिदम्' इति विग्रहे 'उपगु + ङस्' इति षष्ठ्यन्तसमर्थाद् अणि, सुपो लुकि, आदिवृद्धौ 'औपगु अ' इत्यवस्थायाम् 'ओर्गुणः' इति गुणे, अवादेशे 'औपगव', ततः सौ 'औपगवः' इति सिद्ध्यति ।*

## अथ विकारार्थकाः

अण्प्रत्ययविधायकं विधिसूत्रम्-

**तस्य विकारः ४ । ३ । १३४**

(तस्य, विकारः, अण्)

***सरलार्थः-*** *षष्ठ्यन्तसमर्थप्रातिपदिकाद् विकारेऽर्थे अण्प्रत्ययो भवति ।*

**(अश्मनो विकारे टिलोपो वक्तव्यः) अश्मनो विकारः आश्मः । भास्मनः । मार्त्तिकः ।**

***सरलार्थः-*** *षठ्यन्तसमर्थादश्मन्शब्दाद् विकारार्थप्रत्यये परे टिलोपो भवति ।*

अण्प्रत्ययविधायकं विधिसूत्रम्-

**अवयवे च प्राण्योषधिवृक्षेभ्यः ४ । ३ । १३५।**

**चाद्विकारे । मयूरस्यावयवो विकारो वा मायूरः । मौर्वं काण्डं भस्म वा । पैप्पलम् ।**

(प्राण्योषधिवृक्षेभ्यः, तस्य विकार, अवयवे, च अण्)

***सरलार्थः-*** *प्राणिवाचकात्, ओषधिवाचकात्, वृक्षवाचकाच्च षष्ठ्यन्तसमर्थप्रातिपदिकाद् विकारेऽवयवे च अर्थे अण् प्रत्ययो भवति ।*

मयट्प्रत्ययविधायकं विधिसूत्रम्-

**मयड्वैतयोर्भाषायामभक्ष्याच्छादनयोः ४ । ३ । १४३**

**प्रकृतिमात्रान्मयड् वा स्याद् विकारावयवयोः । अश्ममयम्, आश्मनम् । अभक्ष्येत्यादि किम् ? मौद्गः सूपः । कार्पासमाच्छादनम् ।**

(मयड्, वा, एतयोः, भाषायाम्, अभक्ष्याच्छादनयोः)

***सरलार्थः-*** *विकारावयवयोः अर्थयोः सर्वप्रातिपदिकेभ्यो विभाषया मयट्प्रत्ययो भवति, भक्ष्ये आच्छादने च अर्थयोस्तु न ।*

मयट्प्रत्ययविधायकं विधिसूत्रम्-

**नित्यं वृद्धशरादिभ्यः ४ । ३ । १४४**

**आम्रमयम् । शरमयम् ।**

***सरलार्थः-*** *वृद्धसंज्ञकेभ्यः, शरादिभ्यश्च नित्यं मयट् प्रत्ययो भवति ।*

मयट्प्रत्ययविधायकं विधिसूत्रम्-

**गोश्च पुरीषे** ४ । ३ । १४५

**गोः पुरीषं गोमयम् ।**

(गोः, च, पुरीषे, मयट्)

***सरलार्थः***- *षष्ठ्यन्तसमर्थाद् गोशब्दात् पुरीषेऽर्थे नित्यं मयट्प्रत्ययो भवति ।*

यत्प्रत्ययविधायकं विधिसूत्रम्-

**गोपयसोर्यत्** ४ । ३ । १६०

**गव्यम् । पयस्यम् ।**

(गोपयसोः, यत्, तस्य विकारः, अवयवे च)

***सरलार्थः***- *षष्ठ्यन्तसमर्थाभ्याम् गो-पयस्-शब्दाभ्यां विकारेऽवयवे चार्थयोः यत्-प्रत्ययो भवति ।*

## प्रयोगसिद्धिप्रकारः

### राष्ट्रियः

'राष्ट्रे जातः, राष्ट्रे भवः' इति विग्रहे सप्तम्यन्तसमर्थाद् राष्ट्रशब्दात् 'शेष' इति अणि प्राप्ते तं प्रबाध्य 'राष्ट्रावारपाराद् घखौ' इत्यनेन घप्रत्यये 'राष्ट्र ङि घ' इत्यवस्थायां तद्धितान्तत्वात् प्रातिपदिकसंज्ञायां सुपो लुकि 'राष्ट्र घ' इति जाते, 'आयनेयी०' इत्यदिना सूत्रेण 'घ' इत्यस्य स्थाने इयादेशे, भत्वाद् 'यस्येति च' इति अकारलोपे, 'राष्ट्रिय' इति जाते, प्रातिपदिकसंज्ञायां, पुंलिङ्गे सौ, रुत्वादिकार्ये 'राष्ट्रियः' इति रूपं सिद्धम् ।

### शालीयः

शाला-शब्दस्य 'वृद्धिर्यस्याचामादिस्तद्वृद्धम्' इति सूत्रेण वृद्धसंज्ञायां 'शालायां जातः' इति विग्रहे 'शाला +ङि' इत्यस्मात् 'वृद्धाच्छः' इति सूत्रेण छप्रत्यये, तद्धितान्तत्वात् प्रातिपदिकसंज्ञायां सुपो लुकि, छकारस्य ईयादेशे 'शाला ईय' इति जाते, भत्वाद् आकारलोपे, विभक्तिकार्ये 'शालीयः' इति रूपं सिद्धम् ।

### कालिकम्

'काले भवम्' इति विग्रहे सप्तम्यन्तात् काल-शब्दात् 'कालाट्ठञ्' इति सूत्रेण ठञ्यनुबन्धलोपे, 'ठस्येकः' इति सूत्रेण ठस्य इकादेशे 'काल इक' इति जाते, आदिवृद्धौ, भसंज्ञकस्य अकारस्य लोपे, विभक्तिकार्ये 'कालिकम्' इति रूपं सिद्धम् ।

## अभ्यासार्थाः प्रश्नाः

**१. अधस्तनसूत्राणामर्थं लिखत**

(क) तत्र जातः (ख) तेन प्रोक्तम् (ग) त्यदादीनि च

(घ) ग्रामाद्यखञौ (ङ) तस्येदम् (च) वृद्धाच्छः

**२. प्रश्नानामुत्तराणि देयानि**

(क) वृद्धसंज्ञाविधायके सूत्रे के ?

(ख) 'कालाट्ठञ्' इति सूत्रं किं करोति ?

(ग) 'तावकः' इत्यत्र तवकादेशविधायकं सूत्रं किम् ?

(घ) 'ग्राम्यः' इत्यत्र कः प्रत्ययः ?

(ङ) 'हैमवती' इति रूपं कथं सिद्ध्यति ?

(च) 'युष्मदस्मदो०' इति सूत्रं पूरयत ।

(छ) 'तस्मिन्नणि०' इति सूत्रं पूरयत ।

**३. अधो लिखितानि पदानि प्रयुज्य वाक्यानि रचयत**

त्वदीयः, मामकीनः, यौष्माकः, तावकः, अस्मदीयः, राष्ट्रियः, अवारपारीणः, श्रावणः, चाक्षुषः, ग्रामीणः, पौरस्त्यः, पाश्चात्यः, त्वत्पुत्रः, स्रौघ्नः, अङ्गुलीयम्, हैमवती, गोमयम्, पयस्यम् ।

**४. प्रकृतिभ्यः प्रत्ययान् विश्लेषयत**

तावकीनः, तावकः, मदीयः, औपगवम्, जिह्वामूलीयम्, स्रौघ्नः, अस्मदीयः, राष्ट्रियः, ग्राम्यः, कालिकम्, मासिकम्, आस्माकः, मालीयः, पाश्चात्यः, ग्रामीणः, चातुरम्, गव्यम् ।

**५. प्रत्ययान् संयोज्य निष्पन्नरूपाणि लिखत**

श्रवण+अण्, राष्ट्र+घ, ग्राम+खञ्, शाला+छ, पुरस्+त्यक्, तद्+छ, युष्मद्+खञ्, अस्मद्+छ, युष्मद्+अण्, मास+ठञ्, उत्स+अञ्, स्रुघ्न+अण्, हिमवत्+अण्, पाणिनि+छ, उपगु+अण्, चक्षुष्+अण्, ग्राम+य ।

**६. अधस्तनप्रयोगाणां सिद्धिप्रक्रियां दर्शयत**

ग्राम्यः, ग्रामीणः, कालिकम्, राष्ट्रियः, स्रौघ्नः, चातुर्दशम्, दाक्षिणात्यः, शालीयः, तदीयः, युष्मदीयः, आस्माकीनः, तावकः, मामकीनः, मदीयः, औत्सः, औपगवम्, पाणिनीयम्, आश्मः ।

७. **समुचितपदं चित्वा रिक्तस्थानं पूरयत**

(क) कालवाचिभ्यः ........................ प्रत्ययो भवति । (खञ्, ठञ्)

(ख) एकार्थवाचियुष्मदः खञि अणि च .................. आदेशो भवति । (तावक, युष्माक)

(ग) ग्रामशब्दात् शेषेऽर्थे .................. प्रत्ययौ भवतः । (यखञौ, घखौ)

(घ) 'अस्य निवासः' इत्यर्थे ................ समर्थादणादयः घादयश्च भवन्ति । (प्रथमान्तात्, सप्तम्यन्तात्)

(ङ) सप्तम्यन्ताद् जिह्वामूलशब्दाद् 'भवः' इत्यर्थे .............. प्रत्ययो भवति । (ख, छ)

**अनुप्रयोगः**

१. **अधो लिखितानि वाक्यानि पठत**

(क) **त्वदीयः** मातुः नाम किम् ?

(ख) **ग्रामीणः** जनः नगरे आगच्छति ।

(ग) वयं **पाणिनीयं** व्याकरणं पठामः ।

(घ) अस्माकं **राष्ट्रिया** संस्कृतिः संस्कृताश्रिता अस्ति ।

(ङ) **हैमवती** गङ्गा पवित्रा वर्तते ।

२. **प्रदत्तानि पदानि प्रयुज्य एकमनुच्छेदं रचयत**

ग्रामीणः, मदीयः, राष्ट्रियः, तदीयः, मामकः, मासिकम्, श्रावणम् ।

**द्वाविंशः पाठः**

# तद्धितेषु

## ठगधिकाराः यदधिकाराः छ्यतोधिकाराः ठञधिकाराः त्वतलोधिकाराः भवनाद्यर्थकाः

अधिकारसूत्रम्-

**प्राग्वहतेष्ठक्** ४ । ४ । १

**तद्वहतीत्यतः प्राक् ठगधिक्रियते ।**

**सरलार्थः–** "तद्वहतिरथयुगप्रासङ्गम् ४ । ४ । ७६" इति सूत्रात् प्राक् ठक्-प्रत्ययोऽधिक्रियते ।

ठक्प्रत्ययविधायकं विधिसूत्रम्-

**तेन दीव्यति खनति जयति जितम्** ४ । ४ । २

**अक्षैर्दीव्यति खनति जयति जितो वा आक्षिकः ।**

(तेन, दीव्यति, खनति, जयति, जितम्, ठक्)

***सरलार्थः–*** *तृतीयान्तात् समर्थाद् 'दीव्यति', 'खनति', 'जयति', 'जितम्', इत्येतेषु चतुर्ष्वर्थेषु ठक्प्रत्ययो वा भवति । ककार इत् । "ठस्येकः" ।*

*'अक्षैर्दीव्यति, खनति, जयति, जितो वा' इत्यर्थे विवक्षिते 'अक्ष+भिस्' इत्यस्मात् तृतीयान्तसमर्थात् प्रकृतसूत्रेण ठक्प्रत्ययेऽनुबन्धलोपे, तद्धितान्तत्वात् प्रातिपदिकसंज्ञायां सुब्लुकि 'अक्ष ठ' इति जाते, "ठस्येकः" इति सूत्रेण ठस्य इकादेशे 'अक्ष इक' इति जाते, कित्वात् "किति च" इति सूत्रेण आदिवृद्धौ, भसंज्ञकस्य अकारस्य लोपे 'आक्षिक' इति प्रातिपदिकात् सौ, विभक्तिकार्ये 'आक्षिकः' इति । (अक्षैर्दीव्यति आक्षिकः, अक्षैः खनति आक्षिकः, अक्षैर्जयति आक्षिकः, अक्षैर्जित आक्षिक इति ।)*

ठक्प्रत्ययविधायकं विधिसूत्रम्-

**संस्कृतम्** ४ । ४ । ३

**दध्ना संस्कृतं दाधिकम् । मारीचिकम् ।**

(तेन, संस्कृतम्, ठक्)

***सरलार्थः–*** *तृतीयान्तात् समर्थात् 'संस्कृतम्' इत्यर्थे ठक्प्रत्ययो वा भवति ।*

*'दध्ना संस्कृतम्' इत्यर्थे 'दधि+टा' इत्यस्मात् प्रकृतसूत्रेण ठक्प्रत्यये, ठस्येकादेशे, विभक्तेर्लुकि, भसंज्ञकस्येकारस्य लोपे, स्वादिकार्ये 'दाधिकम्' इति । एवमेव मरीचेन संस्कृतं मारीचिकम् ।*

ठक्प्रत्ययविधायकं विधिसूत्रम्-

**तरति ४ । ४ । ५**

**तेनेत्येव । उडुपेन तरति औडुपिकः ।**

(तेन, तरति, ठक्)

***सरलार्थः***- *तृतीयान्तात् समर्थात् तरतीत्यर्थे ठक्प्रत्ययो वा भवति ।*

*'उडुपेन तरति' इत्यर्थे 'उडुप+टा' इत्यस्मात् प्रकृतसूत्रेण ठकि, पूर्ववत्प्रक्रियायां 'औडुपिकः' इति ।*

ठक्प्रत्ययविधायकं विधिसूत्रम्-

**चरति ४ । ४ । ८**

**तृतीयान्ताद् गच्छति, भक्षयतीत्यर्थयोष्ठक् स्यात् । हस्तिना चरति हास्तिकः । दध्ना चरति दाधिकः ।**

(तेन, चरति, ठक्)

***सरलार्थः***- *तृतीयान्तात् समर्थात् चरतीत्यर्थे ठक्प्रत्ययो वा भवति ।*

*'हस्तिना चरति' इत्यर्थे 'हस्तिन्+टा' इत्यस्मात् प्रकृतसूत्रेण ठकि, पूर्ववत् प्रक्रियायां 'हास्तिन् इक' इति जाते "नस्तद्धिते" इति टिलोपे, स्वादिकार्ये 'हास्तिकः' इति । एवं 'दध्ना चरति' इत्यर्थे 'दधि+टा' इत्यस्मात् प्रकृतसूत्रेण ठकि, पूर्ववत् - दाधिकः ।*

ठक्प्रत्ययविधायकं विधिसूत्रम्-

**संसृष्टे ४ । ४ । २२**

**दध्ना संसृष्टं दाधिकम् ।**

(तेन, संसृष्टे, ठक्)

***सरलार्थः***- *तृतीयान्तात् समर्थात् संसृष्टेऽर्थे ठक्प्रत्ययो वा भवति ।*

ठक्प्रत्ययविधायकं विधिसूत्रम्-

**उञ्छति ४ । ४ । ३२**

**बदराण्युञ्छति बादरिकः ।**

(तत्, उञ्छति, ठक्)

***सरलार्थः***- *द्वितीयान्तात् समर्थाद् उञ्छतीत्यर्थे ठक्प्रत्ययो वा भवति ।*

*'बदराणि उञ्छति' इत्यर्थे 'बदर+शस्' इत्यस्मात् प्रकृतसूत्रेण ठकि, पूर्ववत् - बादरिकः ।*

ठक्प्रत्ययविधायकं विधिसूत्रम्-

**रक्षति** ४ । ४ । ३३

**समाजं रक्षति सामाजिकः ।**

(तद्, रक्षति, ठक्)

***सरलार्थः***- *द्वितीयान्तात् समर्थाद् रक्षतीत्यर्थे ठक्प्रत्ययो वा भवति ।*

*समाजं रक्षतीत्यर्थे 'समाज+अम्' इत्यस्मात् प्रकृतसूत्रेण ठकि, पूर्ववत् - सामाजिक इति ।*

ठक्प्रत्ययविधायकं विधिसूत्रम्-

**शब्ददर्दुरं करोति** ४ । ४ । ३४

**शब्दं करोति शाब्दिकः । दर्दुरं करोति दार्दुरिकः ।**

(शब्ददर्दुरम्, करोति, ठक्)

***सरलार्थः***- *द्वितीयान्तसमर्थाभ्यां शब्द-दर्दुर-प्रातिपदिकाभ्यां करोतीत्यर्थे ठक्प्रत्ययो वा भवति ।*

*शब्दं करोतीत्यर्थे 'शब्द+अम्' इत्यस्मात् प्रकृतसूत्रेण ठकि, पूर्ववत् प्रक्रियायां 'शाब्दिकः' इति सिद्ध्यति । एवमेव दर्दुरं करोतीति विग्रहे पूर्ववत् - दार्दुरिकः ।*

ठक्प्रत्ययविधायकं विधिसूत्रम्-

**धर्मं चरति** ४ । ४ । ४१

**धार्मिकः ।**

(धर्मम्, चरति, ठक्)

***सरलार्थः***- *द्वितीयान्तसमर्थाद् धर्मप्रातिपदिकाच्चरतीत्यर्थे ठक्प्रत्ययो वा भवति ।*

*धर्मं चरतीत्यर्थे 'धर्म+अम्' इत्यस्मात् प्रकृतसूत्रेण ठकि, पूर्ववत् प्रक्रियायां 'धार्मिकः' इति सिद्ध्यति ।*

**वा. अधर्माच्चेति वक्तव्यम् । आधर्मिकः ।**

***सरलार्थः***– *द्वितीयान्तसमर्थात् अधर्मप्रातिपदिकाच्च चरतीत्यर्थे ठक्प्रत्ययो वा भवति ।*

*अधर्मं चरतीत्यर्थे 'अधर्म+अम्' इत्यस्मादनेन वार्तिकेन ठकि, पूर्ववत् - आधर्मिकः ।*

ठक्प्रत्ययविधायकं विधिसूत्रम्-

**शिल्पम्** ४ । ४ । ५७

**मृदङ्गवादनं शिल्पमस्य मार्दङ्गिकः ।**

(तदस्य शिल्पम्, ठक्)

***सरलार्थः***– *प्रथमान्तात् समर्थात् 'अस्य शिल्पम्' इत्यर्थे ठक्प्रत्ययो वा भवति ।*

*'मृदङ्गवादनं शिल्पमस्य' इत्यर्थे 'मृदङ्ग+सु' इत्यस्मात् प्रकृतसूत्रेण ठकि, पूर्ववत् - मार्दङ्गिकः । अत्र मृदङ्गशब्दस्य लक्षणया मृदङ्गवादनमित्यर्थः । एवमेव वेणुवादनं शिल्पमस्येत्यर्थे 'वेणु+अम्' इत्यस्मात् ठकि, पूर्ववत्प्रक्रियायां 'वैणु इक' इत्यवस्थायाम् "ओर्गुणः" इति गुणे अवादेशे, स्वादिकार्ये 'वैणविकः' इत्यपि सिद्ध्यति ।*

ठक्प्रत्ययविधायकं विधिसूत्रम्-

**प्रहरणम्** ४ । ४ । ५७ ।

**तदस्येत्येव । असिः प्रहरणमस्य आसिकः । धानुष्कः ।**

(तदस्य, प्रहरणम्, ठक्)

***सरलार्थः***– *प्रथमान्तात् समर्थात् 'प्रहरणमस्य' इत्यर्थे ठक्प्रत्ययो वा भवति ।*

*'असिः प्रहरणम् अस्य' इत्यर्थे 'असि+सु' इत्यस्माट्ठकि, पूर्ववत्प्रक्रियायाम् 'आसिकः' इति । 'धनुः प्रहरणम् अस्य' इत्यर्थे 'धनुष्+सु' इत्यस्मात् प्रकृतसूत्रेण ठक्यनुबन्धलोपे, विभक्तेर्लुकि 'धनुष् ठ' इति जाते, ठस्य इकादेशे प्राप्ते तं बाधित्वा 'इसुसुक्तान्तात्कः' इति सूत्रेण ठकारस्य स्थाने ककारादेशे, आदिवृद्धौ, स्वादिकार्ये 'धानुष्कः' इति सिद्ध्यति । अत्र षत्वस्यासिद्धत्वाद् उसः परस्य ठस्य कादेशः ।*

ठक्प्रत्ययविधायकं विधिसूत्रम्-

**शीलम्** ४ । ४ । ६१

**अपूपभक्षणं शीलमस्य आपूपिकः ।**

(तदस्य, शीलम्, ठक्)

***सरलार्थः***– *प्रथमान्तात् समर्थात् शीलमित्यर्थे ठक्प्रत्ययो वा भवति ।*

*'अपूपभक्षणं शीलमस्य' इत्यर्थे 'अपूप+सु' इत्यस्मात् प्रकृतसूत्रेण ठकि, पूर्ववत् 'आपूपिकः' इति । लक्षणया अपूपभक्षणमित्यर्थम् । 'अपूपाः पण्यम् अस्य' इत्यर्थे तु "तदस्य पण्यम्" इति ठकि 'आपूपिकः' इति रूपं भवति । (आपूपिकः कान्दविको भक्ष्यकार इमे त्रिषु - अमरकोशः)*

ठक्प्रत्ययविधायकं विधिसूत्रम्-

**निकटे वसति** ४ । ४ । ३७

**नैकटिको भिक्षुकः ।**

(तत्र, निकटे, वसति, ठक्)

***सरलार्थः***– *सप्तम्यन्तसमर्थान् निकटप्रातिपदिकाद् वसतीत्यर्थे ठक्प्रत्ययो वा भवति ।*

*निकटे वसतीत्यर्थे 'निकट+ङि' इत्यस्मात् प्रकृतसूत्रेण ठकि, पूर्ववत् 'नैकटिकः' इति सिद्ध्यति । ग्रामनैकटिको भिक्षुरिति प्रयोगः*

## अथ यदधिकारः ।

अधिकारसूत्रम्-

**प्राग्घिताद्यत्** ४ । ४ । ७५

**तस्मै हितमित्यतः प्राग् यदधिक्रियते ।**

***सरलार्थः***– *इतः ऊध्वं "तस्मै हितम्" इत्यतः प्राग् यत्प्रत्ययस्य अधिकारः । सर्वत्र यत्प्रत्ययो भवतीत्याशयः ।*

यत्प्रत्ययविधायकं विधिसूत्रम्-

**तद्वहति रथयुगप्रासङ्गम्** ४ । ४ । ७६

**रथं वहति रथ्यः । युग्यः । प्रासङ्ग्यः ।**

(रथयुगप्रासङ्गम्, तद्, वहति, यत्, तद्धिताः)

***सरलार्थः***– *द्वितीयान्तसमर्थसुबन्तेभ्यो रथ-युग-प्रासङ्गशब्देभ्यो वहतीत्यर्थे तद्धितसंज्ञको यत्प्रत्ययो भवति ।*

यत्-ढक्-प्रत्ययविधायकं विधिसूत्रम्-

**धुरो यड्ढकौ ४ । ४ । ७७**

(तद्वहति, धुरो, यड्ढकौ)

***सरलार्थः***- *द्वितीयान्तसमर्थसुबन्ताद् धुर्शब्दात् वहतीत्यर्थे तद्धितसंज्ञकौ यत्-ढकौ प्रत्ययौ भवतः ।*

**हलि चेति दीर्घे प्राप्ते -**

दीर्घनिषेधविधायकं विधिसूत्रम्-

**न भकुर्छुराम् ८ । २ । ८९ ।**

**भस्य कुर्छुरोश्चोपधाया इको दीर्घो न स्यात् । धुर्यः । धौरेयः ।**

***सरलार्थः***- *भसंज्ञकस्य कुर्छुरोश्चोपधावर्तिन इकः स्थाने दीर्घादेशो न भवति ।*

यत्प्रत्ययविधायकं विधिसूत्रम्-

**नौवयोधर्मविषमूलमूलसीतातुलाभ्यस्तार्यतुल्यप्राप्यवध्यानाम्यसमसमितसम्मितेषु ४ । ४ । ९१ ।**

**नावा तार्यं नाव्यं जलम् । वयसा तुल्यो वयस्यः । धर्मेण प्राप्यं धर्म्यम् । विषेण वध्यो विष्यः । मूलेन आनाम्यं मूल्यम् । मूलेन समो मूल्यः । सीतया समितं सीत्यं क्षेत्रम् । तुलया संमितं तुल्यम् ।**

(तार्यतुल्यप्राप्यवध्यानाम्यसमसमितसम्मितेषु, नौवयोधर्मविषमूलमूलसीतातुलाभ्यः, यत्, तद्धिताः)

***सरलार्थः***- *तार्य-तुल्य-प्राप्य-आनाम्य-सम-समित-सम्मितेषु अर्थेषु क्रमेण नौ-वयस्-धर्म-विष-मूल-मूल-सीता-तुलाभ्यः तृतीयान्तेभ्यः समर्थसुबन्तेभ्यः तद्धितसंज्ञको यत्-प्रत्ययो भवति ।*

यत्प्रत्ययविधायकं विधिसूत्रम्-

**तत्र साधुः ४ । ४ । ९८ ।**

**अग्रे साधुः- अग्र्यः । सामसु साधुः सामन्यः । ये चाभावकर्मणोरिति प्रकृतिभावः । कर्मण्यः । शरण्यः ।**

(तत्र,साधु, यत्, तद्धिताः)

***सरलार्थः***- *सप्तम्यन्तसमर्थसुबन्तात् साधु इत्यर्थे तद्धितसंज्ञको यत्प्रत्ययो भवति ।*

यप्रत्ययविधायकं विधिसूत्रम्-

**सभाया यः ४ । ४ । १०५ ।**

**सभ्यः ।**

(तत्र, साधुः, सभायाः, यः)

***सरलार्थः-*** *सप्तम्यन्तसमर्थात् 'सभा' इति प्रातिपदिकात् साधुरित्यर्थे य-प्रत्ययो भवति । यतोऽपवादः ।*

*सभायां साधुरित्यर्थे 'सभा+ङि' इत्यस्मात् प्रकृतसूत्रेण यप्रत्यये, सुब्लुकि 'सभा य' इत्यवस्थायां भसंज्ञकस्य आकारस्य लोपे, स्वादिकार्ये 'सभ्यः' इति सिद्ध्यति ।*

## । अथ छयतोऽधिकारः ।

अधिकारसूत्रम्-

**प्राक् क्रीताच्छः ५ । १ । १ ।**

**तेन क्रीतमित्यतः प्राक् छोऽधिक्रियते ।**

*सरलार्थ - "तेन क्रीतम्" इत्यतः प्राक् छप्रत्ययस्य अधिकारो वर्तते । सर्वत्र उत्सर्गेण छप्रत्ययो भवति ।*

अधिकारसूत्रम्-

**उगवादिभ्यो यत् ५ । १ । २ ।**

**प्राक् क्रीतादित्येव । उवर्णान्ताद्गवादिभ्यश्च यत् स्यात् । छस्यापवादः । शङ्कवे हितं शङ्कव्यं दारु । गव्यम् । नाभि नभं च (वा.) । नभ्योऽक्षः । नभ्यमञ्जनम् ।**

***सरलार्थः-*** *"तेन क्रीतम्" इत्यतः प्राक् उवर्णान्ताद् गवादिभ्यश्च प्रातिपदिकेभ्य यत्-प्रत्ययो भवति, न तु छ-प्रत्ययः । छस्यापवादोऽयं यत् ।*

छप्रत्ययविधायकं विधिसूत्रम्-

**तस्मै हितम् ५ । १ । ५ ।**

**वत्सेभ्यो हितो वत्सीयो गोधुक् ।**

(तस्मै, हितम्, छः)

***सरलार्थः-*** *चतुर्थ्यन्तसमर्थसुबन्तेभ्यो हितमित्यर्थे छ प्रत्ययो भवति ।*

यत्प्रत्ययविधायकं विधिसूत्रम्-

**शरीरावयवाद्यत् ५ । १ । ६ ।**

**दन्त्यम् । कण्ठ्यम् । नस्यम् ।**

(शरीरावयवात्, तस्मै हितम्, यत्)

***सरलार्थः-*** *शरीरावयववाचकेभ्यः समर्थसुबन्तेभ्यः चतुर्थ्यन्तेभ्यः हितमित्यर्थे तद्धितसंज्ञको यत् प्रत्ययो भवति ।*

*दन्ते भवम्/दन्ताय हितम् - दन्त+ङि+यत् (य) - दन्त य - दन्त् य - दन्त्य -दन्त्यम् । एवं कण्ठे भवम् - कण्ठ्यम् । नासिकायै हितम् - नासिका+ङे+यत् (य) - नासिका य - नस् य (पद्दन्नोमास ...) - नस्य - नस्यम्*

खप्रत्ययविधायकं विधिसूत्रम्-

**आत्मन्विश्वजनभोगोत्तरपदात् खः ५ । १ । ९ ।**

**(आत्मन्विश्वजनभोगोत्तरपदात्, खः, तस्मै हितम्)**

***सरलार्थः-*** *आत्मन्-विश्वजन-भोगोत्तरपदप्रकृतिकेभ्यः चतुर्थ्यन्तसमर्थसुबन्तेभ्यो हितमित्यर्थे तद्धितसंज्ञकः खप्रत्ययो भवति ।*

प्रकृतिभावविधायकं सूत्रम्-

**आत्माध्वानौ खे ६ । ४ । १६९ ।**

**एतौ खे प्रकृत्या स्तः । आत्मने हितम् आत्मनीनम् । विश्वजनीनम् । मातृभोगीणः ।**

(आत्माध्वानौ, खे, प्रकृत्या)

***सरलार्थः-*** *आत्माध्वानौ प्रकृतिभावौ भवतः खप्रत्यये परे ।*

## । ठञधिकारः ।

अधिकारसूत्रम्-

**प्राग्वतेष्ठञ् ५ । १ । १८ ।**

**तेन तुल्यमिति वतिं वक्ष्यति, ततः प्राक् ठञधिक्रियते ।**

***सरलार्थः-*** *"तेन तुल्यं क्रियाचेद्वतिः" इति सूत्रात् प्राग् ठञ्-प्रत्ययस्याधिकारो भवति । असति बाधके उत्सर्गतया ठञ्प्रत्ययो भवतीति ज्ञेयम् ।*

ठञ्प्रत्ययविधायकं विधिसूत्रम्-

**तेन क्रीतम् ५ । १ । ३७ ।**

**सप्तत्या क्रीतं साप्ततिकम् । प्रास्थिकम् ।**

(तेन क्रीतम्, ठञ्)

***सरलार्थः-*** *तृतीयान्तात् समर्थसुबन्तात् क्रीतमित्यर्थे ठञ्प्रत्ययो भवति ।*

अण्-अञ्-प्रत्ययविधायकं विधिसूत्रम्-

**सर्वभूमिपृथिवीभ्यामणञौ ५ । १ । ४१ ।**

(सर्वभूमिपृथिवीभ्याम्, अणञौ)

**तस्येश्वरः ५ । १ । ४२ ।**

**सर्वभूमिपृथिवीभ्यामणञौ स्तः । अनुशतिकादीनां च । सर्वभूमेरीश्वरः सार्वभौमः । पार्थिवः ।**

(तस्य, ईश्वरः)

***सरलार्थः-*** *षष्ठ्यन्तसमर्थसुबन्ताभ्यां सर्वभूमिपृथिवीशब्दाभ्यामीश्वर इत्यर्थे क्रमेण अण्-अञौ प्रत्ययौ भवतः । तत्र सर्वभूमिशब्दाद् अण्प्रत्ययः, पृथिवीशब्दाद् अञ्प्रत्ययश्च भवतः ।*

*सर्वभूमेरीश्वरः- सर्वभूमि+ङस्+अण्(अ) - सर्वभूमि अ - सर्वभूम् अ - (यस्यति च) - सार्वभौम् अ (अनुशतिकादीनां च) - सार्वभौम - सार्वभौमः ।*

पङ्क्तिविंशत्यादिशब्दानां निपातकं सूत्रम्-

**पङ्क्तिविंशतित्रिंशत्चत्वारिंशत्पञ्चाशत्षष्टिसप्तत्यशीतिनवतिशतम् ५ । १ । ५९ ।**

**एते रूढिशब्दा निपात्यन्ते ।**

पङ्क्तिः, विंशतिः, त्रिंशत्, चत्वारिंशत्, पञ्चाशत्, षष्टिः, सप्ततिः, अशीतिः, नवतिः शतम् एते शब्दाः निपात्यन्ते इत्यर्थः ।

**ठञादिप्रत्ययविधायकं विधिसूत्रम्-**

**तदर्हति ५ । १ । ६३ ।**

**लब्धुं योग्यो भवतीत्यर्थे द्वितीयान्ताट्ठञादयः स्युः । श्वेतच्छत्रमर्हति श्वैतच्छत्रिकः ।**

(तद्, अर्हति, ठञ्)

***सरलार्थः-*** *द्वितीयान्तसमर्थसुबन्तेभ्यः प्रातिपदिकेभ्योऽर्हतीत्यर्थे ठञादयः प्रत्यया भवन्ति ।*

यत्प्रत्ययविधायकं विधिसूत्रम्-

**दण्डादिभ्यः ५ । १ । ६६ ।**

**एभ्यो यत् स्यात् । दण्डमर्हति दण्ड्यः । अर्घ्यः । वध्यः ।**

(तद्, अर्हति, दण्डादिभ्यः, यत्)

***सरलार्थः-*** *दण्डादिभ्यो द्वितीयान्तसमर्थप्रातिपदिकेभ्योऽर्हतीत्यर्थे यत्प्रत्ययो भवति ।*

ठञ्प्रत्ययविधायकं विधिसूत्रम्-

**तेन निर्वृत्तम् ५ । १ । ७९ ।**

**अह्ना निर्वृत्तम् आह्निकम् ।**

(तेन, निर्वृत्तम्, कालात्, ठञ्)

***सरलार्थः-*** *तृतीयान्तकालवाचिनः समर्थसुबन्तात् प्रातिपदिकाद् निवृत्तमित्यर्थे ठञ्प्रत्ययो भवति ।*

## । त्वतलोधिकारः ।

वतिप्रत्ययविधायकं विधिसूत्रम्-

**तेन तुल्यं क्रिया चेद्वतिः ५ । १ । ११५ ।**

**ब्राह्मणेन तुल्यं ब्राह्मणवत् अधीते । क्रिया चेदिति किम् ? गुणतुल्ये मा भूत् । पुत्रेण तुल्यः स्थूलः ।**

(तेन, तुल्यम्, क्रिया, चेत्, वतिः)

***सरलार्थः-*** *तृतीयान्तसमर्थात् प्रातिपदिकात् तुल्यमित्यस्मिन्नर्थे यदि तुल्यक्रिया भवति चेद् तर्हि वतिप्रत्ययो भवति । वतेरिकार इत् । वतिप्रत्ययान्ताः शब्दा अव्ययसंज्ञका भवन्ति ।*

*'ब्राह्मणेन तुल्यमधीते' इत्यर्थे 'ब्राह्मण+टा' इत्यस्मात् प्रकृतसूत्रेण वतिप्रत्यये इकारस्य इत्संज्ञायां लोपे, विभक्तेर्लुकि 'ब्राह्मणवत्' इति जाते 'वत्' इत्यस्य स्वरादिगणे पाठात् 'ब्राह्मणवत्' इत्यस्य "स्वरादिनिपातमव्ययम्" इत्यव्ययसंज्ञायां तस्मात् सौ, सुब्लुकि 'ब्राह्मणवत्' इति सिद्ध्यति । गुणतुल्ये तु अनेन वतिप्रत्ययो न भवति । यथा 'पुत्रेण तुल्यः स्थूलः' अत्र तुल्यक्रियाया अभावाद् वतिप्रत्ययो न ।*

वतिप्रत्ययविधायकं विधिसूत्रम्-

**तत्र तस्येव ५ । १ । ११६ ।**

**मथुरायामिव मथुरावत् स्रुघ्ने प्राकारः । चैत्रस्येव चैत्रवन्मैत्रस्य गावः ।**

(तत्र, तस्येव, वतिः)

***सरलार्थः-*** *षष्ठीसप्तमीसमर्थाभ्याम् इवेत्यर्थे(तुल्येऽर्थे) वतिप्रत्ययो भवति ।*

*'मथुरायामिव' इत्यर्थे 'मथुरा+ङि' इत्यस्मात् प्रकृतसूत्रेण वतिप्रत्यये, विभक्तेर्लुकि 'मथुरावत्' इत्यस्मात् सौ, वत्यन्तत्वेन अव्ययत्वात् सुब्लुकि 'मथुरावत्' इति । मथुरावत् स्रुघ्ने प्राकार इति प्रयोगः । एवमेव चैत्रस्येव - चैत्रवत् । चैत्रवन्मैत्रस्य गाव इति प्रयोगः ।*

त्व-तल्-प्रत्ययविधायकं विधिसूत्रम्-

**तस्य भावस्त्वतलौ ५ । १ । ११९ ।**

**प्रकृतिजन्यबोधे प्रकारो भावः । (लि.सू.) त्वान्तं क्लीबम् । (लि.सू.) तलन्तं स्त्रियाम् । गोर्भावो गोत्वम् । गोता ।**

(तस्य, भावः, त्वतलौ)

***सरलार्थः-*** *षष्ठ्यन्तात् समर्थात् प्रातिपदिकाद् भाव इत्यर्थे त्व-तलौ प्रत्ययौ वा भवतः ।*

*त्वप्रत्ययान्ताः शब्दा नपुंसकलिङ्गे प्रयुज्यन्ते । तल्प्रत्ययान्तास्तु स्त्रियां भवन्ति ।*

*'गोर्भावः' इत्यर्थे 'गो+ङस्' इत्यस्मात् प्रकृतसूत्रेण त्वप्रत्यये, सुब्लुकि 'गोत्व' इति जाते, तस्मात् प्रातिपदिकात् सौ "त्वन्तं क्लीबम्" इति लिङ्गानुशासनान्नपुंसकत्वे, सोरमि, पूर्वरूपे 'गोत्वम्' इति सिद्ध्यति । तथा च उक्त एव विग्रहे प्रकृतसूत्रेणैव तल्प्रत्यये विहिते तु पूर्ववत् प्रक्रियायां 'गोत' इति जाते, तस्य "तलन्तं स्त्रियाम्" इति लिङ्गानुशासनात् स्त्रीत्वे, स्त्रीत्वाट्टापि 'गोता' इति जाते, तस्मात् प्रातिपदिकात् सौ, हल्ङ्यादिलोपे 'गोता' इति सिद्ध्यति ।*

अधिकारसूत्रम्-

**आ च त्वात् ५ । १ । १२० ।**

**ब्रह्मणस्त्व इत्यतः प्राक् त्वतलावधिक्रियेते । अपवादैः सह समावेशार्थमिदम् । चकारो नञ्स्नञ्भ्यामपि समावेशार्थः । स्त्रिया भावः- स्त्रैणम् । स्त्रीत्वम् । स्त्रीता । पौंस्नम् । पुंस्त्वम् । पुंस्ता ।**

***सरलार्थः-*** *"ब्रह्मणस्त्व" इत्यतः प्राक् त्वतलोः प्रत्यययोः अधिकारो भवति ।*

इमनिज्-प्रत्ययविधायकं विधिसूत्रम्-

**पृथ्वादिभ्य इमनिज्वा ५ । १ । १२२ ।**

**वावचनमणादिसमावेशार्थम् ।**

(पृथ्वादिभ्यः, इमनिज्, वा, तस्य भावः त्वतलौ)

***सरलार्थः***- *षष्ठ्यन्तसमर्थसुबन्तेभ्यः पृथ्वादिभ्यः प्रातिपदिकेभ्यः विभाषया इमनिज् प्रत्ययो भवति, इमनिज्प्रत्ययाभावे त्वतलौ प्रत्ययावपि भवतः ।*

रेफादेशविधायकं विधिसूत्रम्-

**र ऋतो हलादेर्लघोः ६ । ४ । १६१ ।**

**हलादेर्लघोर्ऋकारस्य रः स्यादिष्ठेयस्सु परतः । पृथुमृदुभृशकृशदृढपरिवृढानामेव रत्वम् ।**

(हलादेः, लघोः, ऋतः, रः, इष्ठेमेयस्सु)

***सरलार्थः***- *हलादेः लघोः ऋकारस्य स्थाने रेफादेशो भवति इष्ठन्, इमनिच्, इयसुन् एतेषु प्रत्ययेषु परतः । पृथु-मृदु-भृश-कृश-दृढ-परिवृढानामेव शब्दानामृकारस्य स्थानेऽनेन सूत्रेण रेफादेशो भवति ।*

भसंज्ञकटेर्लोपविधायकं विधिसूत्रम्-

**टेः ६ । ४ । १५५ ।**

**भस्य टेर्लोप इष्ठेमेयस्सु । पृथोर्भावः प्रथिमा ।**

(भस्य, टेः, लोप, इष्ठेमेयस्सु)

***सरलार्थः***- *भसंज्ञकस्य टेः लोपादेशो भवति इष्ठन्, इमनिच्, ईयसुन् एतेषु प्रत्ययेषु परतः ।*

अण्प्रत्ययविधायकं विधिसूत्रम्-

**इगन्ताच्च लघुपूर्वात् ५ । १ । १३१ ।**

**इगन्ताल्लघुपूर्वात् प्रातिपदिकाद्भावेऽण् प्रत्ययः । पार्थवम् । म्रदिमा, मार्दिवम् ।**

(इगन्तात्, च, लघुपूर्वात्, प्रातिपदिकात्, भावे, अण्)

***सरलार्थः***- *इगन्ताद् लघुपूर्वात् प्रातिपदिकाद् भावे अण्प्रत्ययो भवति ।*

ष्यञ्प्रत्ययविधायकं विधिसूत्रम्-

**वर्णदृढादिभ्यः ष्यञ्च ५ । १ । १२३ ।**

**चादिमनिच् । शौक्ल्यम् । शक्लिमा । दाढर्यम् । द्रढिमा ।**

(वर्णदृढादिभ्यः, तस्य, भावः, ष्यञ्, इमनिच् च)

***सरलार्थः***– *षष्ठ्यन्तेभ्यः समर्थेभ्यो वर्णविशेषवाचिभ्यो दृढादिभ्यश्च प्रातिपदिकेभ्यो भाव इत्यस्मिन्नर्थे ष्यञ्प्रत्ययो भवति, चकारग्रहणाद् इमनिच्प्रत्ययश्च वा भवति । त्वतलौ च वा भवतः । (अत्र इमनिचो निरूपणं न क्रियते) ष्यञो षकारञकारौ इतौ । ञित्वादादिवृद्धिः ।*

*'शुक्लस्य भावः' इति विग्रहे 'शुक्ल+ङस्' इत्यस्मात् प्रकृतसूत्रेण ष्यञ्प्रत्ययेऽनुबन्धलोपे, सुब्लुकि 'शुक्ल य' इति जाते, ञित्वादादिवृद्धौ, भसंज्ञकस्य अकारस्य लोपे 'शौक्ल्य' इति जाते, तस्मात् सौ, विभक्तिकार्ये 'शौक्ल्यम्' इति सिद्ध्यति । (इमनिच्प्रत्यये तु टिलोपादिकार्ये 'शुक्लिमा' इति रूपं भवति) त्व-तलोस्तु पूर्ववत्प्रक्रियायां क्रमात् 'शुक्लत्वम्', 'शुक्लता' इति सिद्ध्यतः । एवमेव - दृढस्य भाव इति विग्रहे पूर्ववत् - दाढर्चम्, दृढत्वम्, दृढता च । (इमिनिचि - द्रढिमा)*

ष्यञ्प्रत्ययविधायकं विधिसूत्रम्-

**गुणवचनब्राह्मणादिभ्यः कर्मणि च ५ । १ । १२४ ।**

**चाद्भावे । जडस्य भावः कर्म वा जाडचम् । मूढस्य भावः कर्म वा मौढचम् । ब्राह्मण्यम् । आकृतिगणोऽयम् ।**

(गुणवचनब्राह्मणादिभ्यः, भावे, कर्मणि, च, ष्यञ्)

***सरलार्थः***– *षष्ठ्यन्तेभ्यः समर्थेभ्यो गुणवाचकेभ्यो ब्राह्मणादिभ्यश्च प्रातिपदिकेभ्यः कर्मणि (चकारग्रहणात्) भावे चाऽर्थे ष्यञ्प्रत्ययो वा भवति । पक्षे त्व-तलौ च वा भवतः ।*

*'जडस्य भावः कर्म वा' इत्यर्थे 'जड+ङस्' इत्यस्मात् समर्थात् प्रकृतसूत्रेण ष्यञ्प्रत्यये, विभक्तेर्लुकि, आदिवृद्धौ, भत्वादलोपे, स्वादिकार्ये 'जाडचम्' इति । त्व-तलोस्तु क्रमाद् जडत्वम्, जडता । एवमेव - मूढस्य भावः कर्म वेति मौढचम्, मूढत्वम्, मूढता । ब्राह्मणस्य भावः कर्म वेति ब्राह्मण्यम्, ब्राह्मणत्वम्, ब्राह्मणता । ब्राह्मणादिराकृतिगणो वर्तते ।*

यप्रत्ययविधायकं विधिसूत्रम्-

**सख्युर्यः ५ । १ । १२६ ।**

**सख्युर्भावः कर्म वा सख्यम् ।**

(सख्युः, भावे, कर्मणि, च, यः)

***सरलार्थः***– *षष्ठ्यन्तात् समर्थात् सखि-शब्दात् कर्मणि भावे चाऽर्थे य-प्रत्ययो वा भवति ।*

*'सख्युर्भावः कर्म वा' इत्यर्थे 'सखि+ङस्' इत्यस्मात् प्रकृतसूत्रेण य-प्रत्यये, विभक्तेर्लुकि 'सखि य' इति जाते, भसंज्ञकस्य इकारस्य लोपे, स्वादिकार्ये 'सख्यम्' इति । त्वतलोस्तु क्रमात् सखित्वम्, सखिता ।*

ढक्प्रत्ययविधायकं विधिसूत्रम्-

**कपिज्ञात्योर्ढक् ५ । १ । १२७ ।**

**कापेयम् । ज्ञातेयम् ।**

(कपिज्ञात्योः, तस्य, भावः, कर्मणि, च, ढक्)

***सरलार्थः-*** *षष्ठ्यन्तसमर्थाभ्यां कपिज्ञातिशब्दाभ्यां भावे कर्मणि च अर्थे ढक्प्रत्ययो भवति ।*

यक्प्रत्ययविधायकं विधिसूत्रम्-

**पत्यन्तपुरोहितादिभ्यो यक् ५ । १ । १२८ ।**

**सैनापत्यम् । पौरोहित्यम् ।**

(पत्यन्तपुरोहितादिभ्यः, तस्य, भाव, कर्मणि, च यक्)

***सरलार्थः-*** *षष्ठ्यन्तसमर्थाभ्यां पति-शब्दान्तशब्देभ्यः पुरोहित-शब्दाच्च भावे कर्मणि च अर्थे ढक्प्रत्ययो भवति ।*

। इति त्वतलोधिकारः ।

## अथ भवनाद्यर्थकाः

खञ्प्रत्ययविधायकं विधिसूत्रम्-

**धान्यानां भवने क्षेत्रे खञ् ५ । २ । १ ।**

**भवत्यस्मिन्निति भवनम् । मुद्गानां भवनं क्षेत्रं मौद्गीनम् ।**

(धान्यानाम्, भवने, क्षेत्रे, खञ्)

***सरलार्थः-*** *धान्यानि यत्र भवन्ति तस्मिन् क्षेत्रे गम्यमाने धान्यवाचकात् प्रथमान्तात् समर्थसुबन्तात् प्रातिपदिकात् खञ्प्रत्ययो भवति ।*

ढक्प्रत्ययविधायकं विधिसूत्रम्-

**व्रीहिशाल्योर्ढक् ५ । २ । २ ।**

**व्रैहेयम् । शालेयम् ।**

(वीहिशाल्योः, भवने, क्षेत्रे, ढक्)

***सरलार्थः-*** *प्रथमान्ताभ्यां व्रीहि-शालीशब्दाभ्यां भवने क्षेत्रे गम्यमाने ढक्प्रत्ययो भवति ।*

हैयङ्गवीनशब्दस्य निपातकं विधिसूत्रम्-

**हैयङ्गवीनं संज्ञायाम् ५ । २ । २३ ।**

**ह्योगोदोहशब्दस्य हियङ्गुरादेशः विकारार्थे खञ्च निपात्यते । दुह्यत इति दोहः क्षीरम् । ह्योगोदोहस्य विकारः- हैयङ्गवीनं नवनीतम् ।**

(संज्ञायाम्, हैयङ्गवीनम्)

***सरलार्थः-*** *संज्ञायामर्थे हैयङ्गवीनं शब्दो निपात्यते । नवनीतमित्यर्थः ।*

इतच्प्रत्ययविधायकं विधिसूत्रम्-

**तदस्य सञ्जातं तारकादिभ्य इतच् ५ । २ । ३६ ।**

**तारकाः सञ्जाता अस्य तारकितं नभः । पण्डितः । आकृतिगणोऽयम् ।**

(तदस्य, सञ्जातम्, तारकादिभ्यः, इतच्)

***सरलार्थः-*** *प्रथमान्तेभ्यः समर्थेभ्यस्तारकादिगणपठितेभ्यः शब्देभ्यः 'अस्य सञ्जातम्' इत्यस्मिन्नर्थे तद्धित इतच्प्रत्ययो वा भवति । इतचश्चकार इत् ।*

*'तारकाः सञ्जाता अस्य' इत्यर्थे 'तारका+जस्' इत्यस्मात् समर्थात् प्रकृतसूत्रेण इतच्प्रत्यये, चकारस्य इत्संज्ञायां लोपे, सुब्लुकि 'तारका इत' इति जाते, भसंज्ञकस्य आकारस्य लोपे, स्वादिकार्ये 'तारकितम्' इति सिद्ध्यति । तारकितं नभः । तथा च - 'पण्डा सञ्जाता अस्य' इत्यर्थे 'पण्डा+सु' इत्यस्मादितचि पूर्ववत् प्रक्रियायां 'पण्डितः' इति । एवमेव - पुष्पाणि सञ्जातानि अस्येति पुष्पितः वृक्षः । फलानि सञ्जातानि अस्येति फलितः वृक्षः । पल्लवाः सञ्जाता अस्येति पल्लवितस्तरुरित्यादीनि । तारकादिराकृतिगणो वर्तते ।*

द्वयसच्-दघ्नच्-मात्रच्प्रत्ययविधायकं विधिसूत्रम्-

**प्रमाणे द्वयसज्दघ्नञ्मात्रचः ५ । २ । ३७ ।**

**तदस्येत्यनुवर्तते । ऊरू प्रमाणमस्य - ऊरुद्वयसम् । ऊरुदघ्नम् । ऊरुमात्रम् ।**

(तदस्य, प्रमाणे द्वयसज्दघ्नञ्मात्रचः)

***सरलार्थः-*** *प्रथमान्तसमर्थसुबन्तेभ्यः प्रातिपदिकेभ्यः तदस्य प्रमाणमित्यर्थे द्वयसच्, दघ्नच्, मानच् एते प्रत्ययाः भवन्ति ।*

वतुप्प्रत्ययविधायकं विधिसूत्रम्-

**यत्तदेतेभ्यः परिमाणे वतुप् ५ । २ । ३९ ।**

**यत्परिमाणमस्य यावान् । तावान् । एतावान् ।**

(यत्तदेतेभ्यः, तदस्य परिमाणे, वतुप्)

***सरलार्थः-*** *प्रथमान्तेभ्यः यद्-तद्-एतद्-शब्देभ्यः तदस्य परिमाणमित्यर्थे वतुप्-प्रत्ययो भवति ।*

वतुप्सन्नियोगशिष्टघादेशविधायकं विधिसूत्रम्-

**किमिदंभ्यां वो घः ५ । २ । ४० ।**

**आभ्यां वतुप् स्याद् वकारस्य घश्च ।**

(किमिदंभ्याम्, तदस्य परिमाणे, वतुप्, वः, घः)

***सरलार्थः-*** *प्रथमान्तसमर्थसुबन्तात् किम्शब्दाद्, इदम्शब्दाच्च तदस्य परिमाणेऽर्थे वतुप्प्रत्ययो भवति, वस्य घादेशश्च स्यात् ।*

इश्-की-आदेशविधायकं विधिसूत्रम्-

**इदङ्किमोरीश्की ६ । ३ । ९० ।**

**दृग्दृशवतुषु इदम ईश् किमः किः । कियान् । इयान् ।**

(इदङ्किमोः, ईश्की, दृग्दृशवतुषु)

***सरलार्थः-*** *इदम्शब्दस्य किम्शब्दस्य च स्थाने ईश् की एतौ आदेशौ क्रमेण भवतः दृग्-दृश-वतुषु परेषु ।*

*किं परिमाणस्य - किम्+सु+वतुप् (वत्) (किमिदंभ्यां वो घः) - किम् वत् - किम् घत् (किमिदंभ्यां वो घः) - किम् इयत् (आयने....) - की इयत् - क् इयत् (यस्येति च) - कियत् - कियान् । एवम् - इदं परिमाणस्य - इदम्+सु+वतुप् (वत्) - इदम् वत् - इदम् घत् - इदम् इयत् - ई(श्) इयत् - इयत् (यस्येति च) - इयान्*

तयप्प्रत्ययविधायकं विधिसूत्रम्-

**सङ्ख्याया अवयवे तयप् ५ । २ । ४२ ।**

**पञ्च अवयवा अस्य पञ्चतमम् ।**

(तदस्य, अवयवे, सङ्ख्यायाः, तयप्)

***सरलार्थः-*** *प्रथमान्तात् सङ्ख्यावाचकात् प्रातिपदिकाद् अवयवेऽर्थे तयप्प्रत्ययो भवति ।*

तयपः अयजादेशविधायकं विधिसूत्रम्-

**द्वित्रिभ्यां तयस्यायज्वा ५ । २ । ४३ ।**

**द्वयम् । द्वितयम् । त्रयम् । त्रितयम् ।**
(द्वित्रिभ्याम्, तयस्य, अयच्, वा)

***सरलार्थः-*** *द्वित्रिभ्यां प्रातिपदिकाभ्यां विहितस्य तयपः स्थाने अयच्-आदेशो भवति ।*

तयपोऽयजादेशविधायकं विधिसूत्रम्-

**उभादुदात्तो नित्यम् ५ । २ । ४४ ।**

**उभशब्दात्तयपोऽयच् स्यात् स चाद्युदात्तः । उभयम् ।**

(उभात्, तयपः, अयच्, नित्यम्, उदात्तः)

***सरलार्थः-*** *उभशब्दाद् विहितस्य तयप्प्रत्ययस्य स्थाने नित्यमयजादेशो भवति स आद्युदातश्च स्यात् ।*

डट्प्रत्ययविधायकं विधिसूत्रम्-

**तस्य पूरणे डट् ५ । २ । ४८ ।**

**एकादशानां पूरणः एकादशः ।**

(तस्य, सङ्ख्यायाः, पूरणे, डट्)

***सरलार्थः-*** *षष्ठ्यन्तसमर्थात् सङ्ख्यावाचकशब्दात् पूरणेऽर्थे डट्प्रत्ययो वा भवति । टकारडकारौ इतौ ।*

*'एकादशानां पूरणम्' इति विग्रहे 'एकादशन्+आम्' इत्यस्मात् समर्थात् प्रकृतसूत्रेण डट्यनुबन्धलोपे, सुब्लुकि 'एकादशन् अ' इति जाते, टिलोपे, स्वादिकार्ये 'एकादशः' इति सिद्ध्यति ।*

मट्-आगमविधायकं विधिसूत्रम्-

**नान्तादसङ्ख्यादेर्मट् ५ । २ । ४९ ।**

**डटो मडागमः । पञ्चानां पूरणः पञ्चमः । नान्तात्किम् ?**

(असङ्ख्यादेः, नान्तात्, डट्, मट्)

***सरलार्थः-*** *असङ्ख्यादेर्नकारान्तात् सङ्ख्यावाचकशब्दात् परस्य डटो मडागमो भवति ।*

*मटष्टकार इत्, अकार उच्चारणार्थः ।*

*'पञ्चानां पूरणः' इति विग्रहे 'पञ्चन्+आम्' इत्यस्मात् "तस्य पूरणे डट्" इत्यनेन डट्प्रत्ययेऽनुबन्धलोपे, सुब्लुकि 'पञ्चन् अ' इति जाते, प्रकृतसूत्रेण मडागमेऽनुबन्धलोपे टित्वाड्डट आद्यवयवत्वे 'पञ्चन् म् अ' इति जाते, "नलोपः प्रातिपदिकान्तस्य" इति नलोपे 'पञ्चम' इति प्रातिपदिकात् सौ 'पञ्चमः' इति । विंशत्यादिशब्देभ्यः परस्य डटो मड्वारणाय नान्तादिति निर्दिष्टम् ।*

'ति'लोपविधायकं विधिसूत्रम्-

**ति विंशतेर्डिति ६ । ४ । १४२ ।**

**विंशतेर्भस्य तिशब्दस्य लोपो डिति परे । विंशः । असङ्ख्यादेः किम् ? एकादशः ।**

(विंशतेः, भस्य, ति, लोपः, डिति)

**सरलार्थः-** भसंज्ञकस्य विंशतेः तिशब्दस्य लोपो भवति डित्प्रत्यये परे ।

*'विंशतेः पूरणः' इति विग्रहे 'विंशति+ङस्' इत्यस्मात् "तस्य पूरणे डट्" इति डटि, विभक्तेर्लुकि 'विंशति अ' इति जाते, प्रकृतसूत्रेण भसंज्ञकस्य विंशतिशब्दस्यावयवस्य 'ति' इत्यस्य लोपे 'विंश अ' इति जाते "अतो गुणे" इति पररूपे, स्वादिकार्ये 'विंशः' इति सिद्ध्यति ।*

थक्-आगमविधायकं विधिसूत्रम्-

**षट्कतिकतिपयचतुरां थुक् ५ । २ । ५१ ।**

**एषां थुगागमः स्याड्डटि । षण्णां षष्ठः । कतिथः । कतिपयशब्दस्यासङ्ख्यात्वेऽप्यत एव ज्ञापकाड्डट् । कतिपयथः । चतुर्थः ।**

(षट्-कति-कतिपय-चतुराम्, थुक्, डटि)

***सरलार्थः-*** *षष्-कति-कतिपय-चतुर्शब्दानां थुक्-आगमो भवति, डटि प्रत्यये परे ।*

*षण्णां पूरणः- षष्+आम्+डट् (अ) - षष्+थुक् (थ्) अ - षष् थ - षष्ठ (ष्टुना ष्टुः) - षष्ठः । एवमेव - कतीनां पूरणः- कतिथः । कतिपयानां पूरणः- कतिपयथः । चतुर्णां पूरणः- चतुर्थः ।*

तीयप्रत्ययविधायकं विधिसूत्रम्-

**द्वेस्तीयः ५ । २ । ५४ ।**

**डटोऽपवादः । द्वयोः पूरणो द्वितीयः ।**

***सरलार्थः-*** *षष्ठ्यन्तात् समर्थात् द्विशब्दात् पूरणेऽर्थे तीय-प्रत्ययो वा भवति ।*

*'द्वयोः पूरणः' इति विग्रहे 'द्वि+ओस्' इत्यस्मात् प्राप्तं डटं बाधित्वा प्रकृतसूत्रेण तीयप्रत्यये, सुब्लुकि 'द्वितीय' इति जाते, तस्मात् सौ 'द्वितीयः' इति सिद्ध्यति ।*

तीयप्रत्ययविधायकम्, सम्प्रसारणविधायकञ्च सूत्रम्-

**त्रेः सम्प्रसारणं च ५ । २ । ५५ ।**

**तृतीयः ।**

(त्रेः, पूरणे, तीयः, सम्प्रसारणम्, च)

***सरलार्थः***- *षष्ठ्यन्तात् समर्थात् त्रिशब्दात् पूरणेऽर्थे तीय-प्रत्ययो भवति, त्रेः सम्प्रसारणं च भवति ।*

*'त्रयाणां पूरणः' इति विग्रहे 'त्रि+आम्' इत्यस्मात् प्रकृतसूत्रेण तीयप्रत्यये त्रे रेफस्य सम्प्रसारणे च कृते, पूर्वरूपे, सुब्लुकि 'तृतीय' इत्यस्मात् सौ 'तृतीयः' इति सिद्ध्यति ।*

**श्रोत्रियंश्छन्दोऽधीते ५ । २ । ८४ ।**

**श्रोत्रियः । वेत्यनुवृत्तेश्छान्दसः ।**

***सरलार्थः***- *'छन्दः अधीते' इत्यर्थे 'श्रोत्रियम्' इति शब्दो विभाषया निपात्यते । अत्र सूत्रे वा इत्यस्य अनुवृत्तेः सामर्थ्यात् निपातनाऽभावपक्षे छन्दस्शब्दात् "तदधीते तद्वेद" यति अणि 'छान्दसः' इति रूपं बोध्यम् ।*

इनिप्रत्ययविधायकं विधिसूत्रम्-

**पूर्वादिनिः ५ । २ । ८६ ।**

**पूर्वं कृतमनेन पूर्वी ।**

(अनेन, पूर्वाद्, इनिः)

***सरलार्थः***- *क्रियाविशेषणवाचकात् पूर्वशब्दात् 'अनेन' इति कर्तर्यर्थे इनिप्रत्ययो भवति ।*

इनिप्रत्ययविधायकं विधिसूत्रम्-

**सपूर्वाच्च ५ । २ । ८७ ।**

**कृतपूर्वी ।**

(सपूर्वात्, च, पूर्वादिनि, अनेन)

***सरलार्थः***- *विद्यमानपूर्वादपि पूर्वशब्दाद् 'अनेन' इति कर्तर्यर्थे इनिप्रत्ययो भवति ।*

इनिप्रत्ययविधायकं विधिसूत्रम्-

**इष्टादिभ्यश्च ५ । २ । ८८ ।**

**इष्टमनेन इष्टी । अधीती ।**

***सरलार्थः***- *प्रथमान्तसमर्थसुबन्तेभ्यः इष्टादिभ्यः प्रातिपदिकेभ्यः 'अनेन' इति कर्तर्यर्थे इनिप्रत्ययो भवति ।*

। इति भवनाद्यर्थकाः ।

## प्रयोगसिद्धिप्रकारः

### धार्मिकः

'धर्मं चरती'ति विग्रहे द्वितीयान्तात् समर्थाद् धर्मशब्दात् "धर्मं चरति" इति सूत्रेण ठक्प्रत्यये ककारस्येत्संज्ञायां लोपे 'धर्म+अम्+ठ' इति जाते, तद्धितान्तत्वात् प्रातिपदिकसंज्ञायां सुपो लुकि 'धर्म ठ' इति जाते "ठस्येकः" इति सूत्रेण ठस्येकादेशे 'धर्म इक' इति जाते, स्थानिवद्भावेन कित्वात् "किति च" इति सूत्रेण आदिवृद्धौ 'धार्म इक' इति जाते, भसंज्ञायां "यस्येति च" इत्यकारलोपे 'धार्मिक' इति जाते, प्रातिपदिकत्वात् ततः सौ, सकारस्य रुत्वे विसर्गे च 'धार्मिकः' इति रूपं सिद्ध्यति ।

### ब्राह्मणवत्

'ब्राह्मणेन तुल्यमधीते' इत्यर्थे तृतीयान्तात् समर्थाद् ब्राह्मणशब्दात् "तेन तुल्यं क्रिया चेद्वति" इति सूत्रेण वतिप्रत्यये इकारस्य इत्संज्ञायां लोपे 'ब्राह्मण+टा+वत्' इति जाते प्रातिपदिकत्वाद् विभक्तेर्लुकि 'ब्राह्मणवत्' इति जाते 'वत्' इत्यस्य स्वरादिगणे पाठात् 'ब्राह्मणवत्' इत्यस्य "स्वरादिनिपातमव्ययम्" इत्यव्ययसंज्ञायां, तस्मात् सौ "अव्ययादाप्सुपः" इति सुब्लुकि 'ब्राह्मणवत्' इति सिद्ध्यति ।

### पञ्चमः

'पञ्चानां पूरणः' इति विग्रहे 'पञ्चन्+आम्' इत्यस्मात् सुबन्तसमर्थात् "तस्य पूरणे डट्" इत्यनेन डट्प्रत्ययेऽनुबन्धलोपे, प्रातिपदिकत्वात् सुब्लुकि 'पञ्चन् अ' इति जाते, "नान्तादसङ्ख्यादेर्मट्" इति सूत्रेण डटो मडागमेऽनुबन्धलोपे टित्वादाद्यवयवत्वे 'पञ्चन् म् अ' इति जाते "नलोपः प्रातिपदिकान्तस्य" इति नलोपे 'पञ्चम' इति जाते, तस्मात् सौ, विभक्तिकार्ये 'पञ्चमः' इति रूपं सिद्धम् ।

## अभ्यासार्थाः प्रश्नाः

१. **प्रदत्तानि सूत्राणि तेषां नेपालीभाषायामर्थं च लिखत**

(क) तस्य पूरणे डट्
(ख) तस्य भावस्त्वतलौ
(ग) सभाया यः
(घ) संस्कृतम्
(ङ) त्रेः सम्प्रसारणं च
(च) प्राग्वहतेष्ठक्

२. **प्रश्नानामुत्तराणि देयानि**

(क) 'भावः' इति पदेन किमुच्यते ?

(ख) "चरति" इति सूत्रस्यार्थं सोदाहरणं लिखत ।

(ग) उडुपेन तरतीति विग्रहे किं रूपं सिद्ध्यति ?

(घ) 'दाधिकः' इति प्रयोगनिर्माणे केन सूत्रेण ठग्विहितः ?

(ङ) 'सामाजिकः' इति पदस्य कोऽर्थः ?

(च) 'आधर्मिकः' इति प्रयोगः कथं सिद्ध्यति ?

(छ) त्वप्रत्ययान्तानि पदानि प्रयुज्य पञ्च वाक्यानि रचयत ।

(ज) वतिप्रत्ययान्तानां शब्दानामव्ययसंज्ञा केन सूत्रेण भवति ?

(झ) "तदस्य सञ्जातं०" इति सूत्रं पूरयित्वा तस्यार्थं च लिखत ।

(ञ) "गुणवचन०" इति सूत्रं पूरयत ।

(ट) कस्मात् परस्य डटो मडागमो भवति ?

(ठ) डिति परे केन सूत्रेण विंशतेर्भस्य तिशब्दस्य लोपो भवति ?

(ड) सम्प्रसारणादचि केन सूत्रेण पूर्वरूपं भवति ?

(ढ) 'शुक्लस्य भावः' इति विग्रहे षष्ठ्यन्तशुक्लशब्दात् ष्यञ्-त्व-तल्प्रत्ययेषु विहितेषु निष्पन्नानि रूपाणि विलिख्य प्रत्येकं वाक्येषु योजयत ।

३. **अधो लिखितानि पदानि प्रयुज्य वाक्यानि रचयत**

षष्ठः, तारकितम्, क्षत्रियवत्, गोता, मानवत्वम्, पुंस्त्वम्, सभ्यः, नैकटिकः, दाधिकम्, धानुष्कः, हास्तिकः, आक्षिकः, पूर्ववत्, एकादशः, औडुपिकः, सामाजिकः, पल्लवितः, सख्यम्, पूर्वी ।

४. **प्रकृतिभ्यः प्रत्ययान् विश्लेषयत**

पुष्पितः, मनुष्यवत्, पशुत्वम्, धार्मिकः, सामाजिकः, सभ्यः, द्रव्यत्वम्, मानवता, सुन्दरता, शौक्ल्यम्, दाढर्चम्, शुक्लता, दृढता, बन्धुता, द्रव्यवत्, देवत्वम्, आधर्मिकः, पञ्चमः, द्वितीयः ।

५. **प्रत्ययान् संयोज्य निष्पन्नरूपाणि लिखत**

उडुप+ठक्, कृष्ण+ष्यञ्, मित्र+तल्, अखि+य, फल+इतच्, पण्डा+इतच्, मातृ+त्वल्, ब्रह्मण+तल्, त्रि+तीयः, गो+तल्, इष्ट+इनि ।

६. **अधस्तनप्रयोगाणां सिद्धिप्रक्रियां प्रदर्शयत**

आक्षिकः, मारीचिकम्, औडुपिकः, हास्तिकः, दाधिकः, सामाजिकः, शाब्दिकः, धानुष्कः, सभ्यः, चैत्रवत्, गोत्वम्, पुंस्ता, शौक्ल्यम्, जाडचम्, ब्राह्मण्यम्, सख्यम्, पण्डितः, एकादशः, द्वितीयः, तृतीयः, अधीती, सार्वभौमः, पार्थिवः, दन्त्यम् ।

७. **"वर्णदृढादिभ्यः ष्यञ् च" इति सूत्रस्यार्थं सोदाहरणं लिखत ।**

८. **समुचितपदं चित्वा रिक्तस्थानं पूरयत**

(क) पूरणेऽर्थे .................. प्रत्ययौ भवतः । (त्वतलौ, डट्तीयौ)

(ख) त्वल्प्रत्ययान्ताः शब्दाः .................. प्रयुज्यन्ते ।(पुंलिङ्गे, स्त्रीलिङ्गे, नपुंसकलिङ्गे)

(ग) अपूपभक्षणं शीलमस्येति विग्रहे .................. इति सिद्धचति । (आपूपिकः, अपूपवत्, अपूपता)

(घ) अधर्मं चरतीत्यर्थे .................. इति रूपं भवति । (अधार्मिकः, आधर्मिकः)

(ङ) सम्प्रसारणे .................. भवति । (इकः स्थाने यण्, यणः स्थाने इक्)

९. **समीचीनेषु कथनेषु √ चिह्नमसमीचीनेषु च × चिह्नं दर्शयत**

(क) वतिप्रत्ययान्ताः शब्दा अव्ययसंज्ञका भवन्ति ।

(ख) तलन्ताः शब्दा नपुंसके प्रयुज्यन्ते ।

(ग) धनुः प्रहरणमस्येति विग्रहे 'धानुषिकः' इति रूपं भवति ।

(घ) पुष्पशब्दस्तारकादिगणे पठितोऽस्ति ।

(ङ) ष्यञ्प्रत्यये परे किति चेति आदिवृद्धिर्भवति ।

**१०. "तेन तुल्यं क्रिया चेद्वति" इति सूत्रस्यार्थं प्रकाशयत ।**

## अनुप्रयोगः

**१. अधो लिखितानि वाक्यानि पठत**

(क) **दाधिकं** व्यञ्जनं मह्यं रोचते ।

(ख) अस्माकं **सामाजिकी** परम्परा दीर्घतमा वर्तते ।

(ग) सर्वे जना **धार्मिका** भवन्तु ।

(घ) **धानुष्को**ऽर्जुनो **धानुष्कं** कर्णं जघान ।

(ङ) सम्प्रति संसारेऽस्मिन् **आधर्मिकाः** कार्यकलापा वर्धमाना दृश्यन्ते ।

(च) **नैकटिकाः** सखाय एव अहितकरा भवितुं शक्नुवन्ति ।

(छ) सम्प्रति मनुष्या अपि पशुवद् आचरन्तो दृश्यन्ते ।

(ज) मानवैः स्वकर्तव्ये सदैव **दृढता** प्रदर्शनीया ।

(झ) दुर्जनेषु **सख्यं** नोचितम् ।

(ञ) **सभ्याः** सभायां सदैव सत्यं वदन्तु ।

(ट) पूर्णिमायां चन्द्रस्य **शौक्ल्यम्** आकाशे शोभते ।

(ठ) सहदेवः **पञ्चमः** पाण्डवो वर्तते ।

(ड) त्वं कक्षायास्**तृतीय**श्छात्रोऽसि ।

**२. ठक्प्रत्ययान्तानि पदानि प्रयुज्य अनुच्छेदमेकं लिखित्वा शिक्षकं दर्शयत ।**

**३. वतिप्रत्ययान्तानि तल्प्रत्ययान्तानि च पदानि प्रयुज्य प्रत्येकं पञ्च वाक्यानि रचयत ।**

## त्रयोविंशः पाठः

# अथ तद्धितेषु

### मत्वर्थीयाः प्राग्दिशीयाः प्रागिवीयाः स्वार्थिकाश्च

(मतुप्, इनि, ठन्, तसिल्, त्रल्, दा, थाल्, तमप्, तरप्, इष्ठन्, ईयसुन्, च्विप्रत्ययाः)

मतुप्प्रत्ययविधायकं विधिसूत्रम्-

**तदस्यास्त्यस्मिन्निति मतुप् ५ । २ । ९४ ।**

**गावोऽस्यास्मिन्वा सन्ति गोमान् ।**

(तदस्य, अस्ति, अस्मिन्, इति, मतुप्)

***सरलार्थः-*** *प्रथमान्तात् समर्थात् प्रातिपदिकाद् 'अस्य अस्ति' इत्यर्थे 'अस्मिन् अस्ति' इत्यर्थे वा तद्धितो मतुप्-प्रत्ययो वा भवति । मतुप उकारपकारौ इतौ ।* ***(भूम-निन्दा-प्रशंसा-नित्ययोग-अतिशायन-सम्बन्धेषु विवक्षायां मतुबादयो भवन्ति । - म.भा.)***

*'गावः सन्ति अस्य अस्मिन् वा' इति विग्रहे प्रथमान्ताद् गोशब्दात् प्रकृतसूत्रेण मतुप्प्रत्यये, उकारपकारयोरित्संज्ञायां लोपे 'गो+जस्+मत्' इति जाते, तद्धितान्तत्वात् प्रातिपदिकसंज्ञायां विभक्तेर्लुकि 'गोमत्' इति जाते, तस्मात् प्रातिपदिकात् सौ, नुमादिकार्ये 'गोमान्' इति सिद्ध्यति । एवमेव - धीः अस्ति अस्येति धीमान् । श्रीः अस्ति अस्येति श्रीमान् । बुद्धिरस्ति अस्येति बुद्धिमान् ।*

भसंज्ञाविधायकं विधिसूत्रम्-

**तसौ मत्वर्थे १ । ४ । १९ ।**

**तान्तसान्तौ भसंज्ञौ स्तो मत्वर्थे प्रत्यये परे । गरुत्मान् । "वसोः सम्प्रसारणम्" । विदुष्मान् ।**

(मत्वर्थे, तसौ, भम्)

***सरलार्थः-*** *तकारान्तः सकारान्तश्च शब्दः भसंज्ञको भवति, मत्वर्थे प्रत्यये परे ।*

*'गरुतः सन्ति अस्य अस्मिन् वा' इति विग्रहे 'गरुत्+जस्' इत्यस्मात् "तदस्यास्तस्मिन्निति मतुप्" इति मतुप्प्रत्ययेऽनुबन्धलोपे 'गरुत् मत्' इत्यवस्थायां प्रकृतसूत्रेण भसंज्ञायां, भत्वात् पदसंज्ञाया अभावे जश्त्वानुनासिकयोरप्यभावे 'गरुत्मत्' इत्यवस्थायां स्वादिकार्ये 'गरुत्मान्' इति सिद्ध्यति ।*

*'विद्वांसः सन्ति अस्य अस्मिन् वा' इति विग्रहे 'विद्वस्+अस्' इत्यस्मान् मतुप्प्रत्यये, सुब्लुकि 'विद्वस् मत्' इत्यवस्थायां प्रकृतसूत्रेण भसंज्ञायां "वसोः सम्प्रसारणम्" इति वकारस्य सम्प्रसारणे, पूर्वरूपे, सकारस्य षत्वे 'विदुष्मत्' इति जाते, तस्मात् सौ, विभक्तिकार्ये 'विदुष्मान्' इति। अत्रापि भत्वाभावान्न जश्वादि।*

**वा. गुणवचनेभ्यो मतुपो लुगिष्टः। शुक्लो गुणोऽस्यास्तीति शुक्लः पटः। कृष्णः।**

***सरलार्थः-*** *गुणवाचकात् शब्दात् परस्य मतुप्प्रत्ययस्य लुग्भवति।*

*'शुक्लो गुणोऽस्य अस्ति' इति विग्रहे 'शुक्ल+सु' इत्यस्माद् मतुप्प्रत्ययेऽनुबन्धलोपे, विभक्तेर्लुकि 'शुक्ल मत्' इति जाते, प्रकृतवार्तिकेन मतुपो लुकि 'शुक्ल' इत्यस्मात् सौ 'शुक्लः' इति सिद्ध्यति। शुक्लः पट इति प्रयोगः। एवमेव - कृष्णो गुणोऽस्य अस्तीति - कृष्णः।*

लच्प्रत्ययविधायकं विधिसूत्रम्-

**प्राणिस्थादातो लजन्यतरस्याम् ५।२।९६।**

**चूडालः। चूडावान्। प्राणिस्थात्किम् ? शिखावान् दीपः। प्राण्यङ्गादेव। मेधावान्।**

(प्राणिस्थाद्, आतः, लच्, अन्यतरस्याम्, तदस्य, अस्ति, अस्मिन्, इति)

***सरलार्थः-*** *प्रथमान्तसमर्थसुबन्तेभ्य आदन्तप्राणिस्थाङ्गवाचिभ्यः प्रातिपदिकेभ्यः तदस्य अस्ति अस्मिन्नित्यर्थे विभाषया लच्प्रत्ययो भवति।*

श-न-इलच्प्रत्ययविधायकं विधिसूत्रम्-

**लोमादिपामादिपिच्छादिभ्यः शनेलचः ५।२।१००।**

**लोमादिभ्यः शः। लोमशः। लोमवान्। रोमशः। रोमवान्। पामादिभ्यो नः। पामनः। अङ्गात्कल्याणे (गणसू.)। अङ्गना। लक्ष्म्या अच्च (गणसू.)। लक्ष्मणः। पिच्छादिभ्य इलच्। पिच्छिलः। पिच्छवान्।**

(लोमादिपामादिपिच्छादिभ्यः, शनेलचः, तदस्य, अस्ति, अस्मिन्)

***सरलार्थः-*** *प्रथमान्तेभ्यः लोमादिभ्यः प्रातिपदिकेभ्यः शः, पामादिभ्यः प्रातिपदिकेभ्यः नः, पिच्छादिभ्यः प्रातिपदिकेभ्यः इतच् च प्रत्यया भवन्ति, अस्यास्ति, अस्मिन्नस्तीत्यर्थे च।*

उरच्प्रत्ययविधायकं विधिसूत्रम्-

**दन्त उन्नत उरच् ५।२।१०६।**

**उन्नता दन्ताः सन्त्यस्य दन्तुरः।**

(दन्ते, उन्नते, उरच्, तदस्य, अस्ति, अस्मिन्)

*सरलार्थः- प्रथमान्तसमर्थसुबन्ताद् दन्तशब्दाद् उन्नते दन्ते गम्ये अस्यास्ति, अस्मिन्नस्ति चार्थे उरच्-प्रत्ययो भवति ।*

वप्रत्ययविधायकं विधिसूत्रम्-

**केशाद्वोऽन्यतरस्याम् ५ । २ । १०९ ।**

**केशवः। केशी । केशिकः । केशवान् । अन्येभ्योऽपि दृश्यते (वा.) । मणिवः । अर्णसो लोपश्च (वा.) । अर्णवः ।**

(केशाद्, वः, अन्यतरस्याम्, तदस्यास्त्यस्मिन्निति)

*सरलार्थः- प्रथमान्तसमर्थात् केशशब्दाद् वप्रत्ययो भवति, अस्यास्ति, अस्मिन्नस्ति इति च अर्थयोः ।*

इनि-ठन्-प्रत्ययविधायकं विधिसूत्रम्-

**अत इनिठनौ ५ । २ । ११६ ।**

**दण्डी । दण्डिकः ।**

(अतः, प्रातिपदिकात्, तदस्यास्त्यस्मिन्निति, इनिठनौ)

*सरलार्थः- प्रथमान्तात् समर्थाद् अकारान्तशब्दान् मत्वर्थे इनि-ठनौ प्रत्ययौ वा भवतः । मतुप्प्रत्ययश्च भवति । इनेरन्त्येकारष्ठनो नकारश्चेतौ ।*

*'दण्डोऽस्यास्ति' विग्रहेऽस्मिन् 'दण्ड+सु' इत्यस्मात् प्रकृतसूत्रेण इनिप्रत्ययेऽनुबन्धलोपे, सुब्लुकि 'दण्ड इन्' इत्यवस्थायां भत्वादलोपे, स्वादिकार्ये 'दण्डी' इति सिद्ध्यति । ठन्-प्रत्यये तु 'दण्ड ठ' इत्यवस्थायां ठस्येकादेशे, अलोपे, स्वादिकार्ये 'दण्डिकः' इति । पक्षान्तरे मतुप्प्रत्यये 'दण्डमत्' इत्यवस्थायाम्-*

इनि-ठन्-प्रत्ययविधायकं विधिसूत्रम्-

**व्रीह्यादिभ्यश्च ५ । २ । ११५ ।**

**व्रीहि । व्रीहिकः ।**

(व्रीह्यादिभ्यः, च, प्रातिपदिकात्, तदस्यास्त्यस्मिन्निति, इनिठनौ)

*सरलार्थः- प्रथमान्तेभ्यः समर्थेभ्यो व्रीह्यादिगणपठितेभ्यः शब्देभ्यो मत्वर्थे इनिठनौ प्रत्ययौ भवतः ।*

*'व्रीहयः सन्ति अस्य' इति विग्रहे 'व्रीहि+जस्' इत्यस्मात् प्रकृतसूत्रेण इनिप्रत्यये, सुब्लुकि 'व्रीहि*

*इन्' इत्यवस्थायां भसंज्ञकस्य इकारस्य लोपे 'व्रीहिन्' इति प्रातिपदिकात् सौ, विभक्तिकार्ये 'व्रीही' इति । ठन्-प्रत्यये तु ठस्य इकादेशे, इकारलोपे, सौ - व्रीहिकः ।*

विनिप्रत्ययविधायकं विधिसूत्रम्-

**अस्मायामेधास्रजो विनिः ५ । २ । १२१ ।**

**यशस्वी । यशस्वान् । मायावी । मेधावी । स्रग्वी ।**

(अस्मायामेधास्रजः, प्रातिपदिकात्, तदस्यास्त्यस्मिन्निति, विनिः)

***सरलार्थः-*** *प्रथमान्तेभ्यः समर्थेभ्यः असन्तेभ्यः शब्देभ्यः, माया-मेधा-सृज्शब्देभ्यश्च मत्वर्थे विनिप्रत्ययो भवति ।*

ग्मिनिप्रत्ययविधायकं विधिसूत्रम्-

**वाचो ग्मिनिः ५ । २ । १२४ ।**
**वाग्ग्मी ।**

(वाचः, ग्मिनिः, तदस्य, अस्ति, अस्मिन्निति)

***सरलार्थः-*** *प्रथमान्तसमर्थसुबन्ताद् वाच्-शब्दाद् मत्वर्थे ग्मिनिप्रत्ययो भवति ।*

अच्प्रत्ययविधायकं विधिसूत्रम्-

**अर्शआदिभ्योऽच् ५ । २ । १२७ ।**
**अर्शोऽस्य विद्यते अर्शसः । आकृतिगणोऽयम् । ।**

**सरलार्थः-** प्रथमान्तसमर्थसुबन्तेभ्यः 'अर्शस्' इत्येवमादिभ्यः प्रातिपदिकेभ्यो मत्वर्थे अच्प्रत्ययो भवति ।

युस्प्रत्ययविधायकं विधिसूत्रम्-

**अहंशुभमोर्युस् ५ । २ । १४० ।**

**अहंयुः अहङ्कारवान् । शुभंयुस्तु शुभान्वितः ।**

***सरलार्थः-*** *'अहम्' इत्यव्ययपदम् अहङ्कारेऽर्थे वर्तते, 'शुभम्' इत्यव्ययं मङ्गलपर्यायोऽस्ति, ताभ्याम् अहम्-शुभम्-शब्दाभ्यां मत्वर्थे युस्-प्रत्ययो भवति । सित्वाद् अङ्गस्य पदसंज्ञा ज्ञेया ।*

*अहम्+युस् (यु) ( अहम् यु (सिति च - पदसंज्ञा) - अहंयु (मोऽनुस्वारः) - अहंयुः, अहङ्कारवान् इत्यर्थः । एवं शुभम् - शब्दाद् युसि - शुभंयुः, शुभान्वित इत्यर्थः ।*

। इति मत्वर्थीयाः । १३ ।

## । अथ प्रादिशीयाः ।

विभक्तिसंज्ञाविधायकं विधिसूत्रम्-

**प्राग्दिशो विभक्तिः ५ । ३ । १ ।**

**दिक्छब्देभ्य इत्यतः प्राग्वक्ष्यमाणाः प्रत्यया विभक्तिसंज्ञाः स्युः ।**

***सरलार्थः-*** *"दिक्शब्देभ्यः सप्तमीपञ्चमीप्रथमाभ्यो दिग्देशकालेष्वस्तातिः" इति सूत्रात् प्राक् वक्ष्यमाणाः प्रत्यया विभक्तिसंज्ञका भवन्ति ।*

अधिकारसूत्रम्-

**किंसर्वनामबहुभ्योऽद्व्यादिभ्यः ५ । ३ । २ ।**

**किमः सर्वनाम्नो बहुशब्दाच्चेति प्राग्दिशोऽधिक्रियते ।**

(किंसर्वनामबहुभ्यः, अद्व्यादिभ्यः, प्रादिशः, विभक्तिः)

***सरलार्थः-*** *किमः, अद्वयादिभ्यः सर्वनाम्नः, बहुशब्दाच्च इति प्राग्दिशीयप्रत्यया भवन्ति । अस्मिन् प्रकरणे प्रकृतित्वेन एते निर्धार्यन्ते इत्यर्थः ।*

विभाषया तसिल्प्रत्ययविधायकं विधिसूत्रम्-

**पञ्चम्यास्तसिल् ५ । ३ । ७ ।**

**पञ्चम्यन्तेभ्यः किमादिभ्यस्तसिल् वा स्यात् ।**

(किंसर्वनामबहुभ्योऽद्व्यादिभ्यः, पञ्चम्याः, तसिल्)

***सरलार्थः-*** *पञ्चम्यन्तसमर्थसुबन्तेभ्यो द्व्यादिभ्यः अतिरिक्तेभ्यः सर्वनामसंज्ञकेभ्यः, किंशब्दाद्, वहुशब्दाच्च विभक्तिसंज्ञकः तद्धितसंज्ञकश्च तसिल्प्रत्ययो विभाषया भवति । तसिल इकारलकारौ इतौ ।*

कु-आदेशविधायकं विधिसूत्रम्-

**कु तिहोः ७ । २ । १०४ ।**

**किमः कुः स्यात्तादौ हादौ च विभक्तौ परतः । कुतः, कस्मात् ।**

(किमः, कुः, तिहोः विभक्तौ)

***सरलार्थः-*** *किंशब्दस्य स्थाने 'कु' इत्यादेशो भवति तकारादौ हकारादौ च विभक्तिसंज्ञके प्रत्यये परे ।*

*'कस्मात्' इति विग्रहे 'किम्+ङसि' इत्यस्मात् "पञ्चम्यास्तसिल्" इति सूत्रेण तसिल्-प्रत्ययेऽनुबन्धलोपे 'किम्+ङसि+तस्' इति जाते, तद्धितान्तत्वात् प्रातिपदिकसंज्ञायां विभक्तेर्लुकि 'किम् तस्' इति जाते "प्राग्दिशो विभक्तिः" इति सूत्रेण तसिलो विभक्तित्वात् प्रकृतसूत्रेण किमः स्थाने 'कु' इत्यादेशे 'कुतस्' इति जाते "तद्धितश्चासर्वविभक्तिः" इत्यव्ययसंज्ञायां ततः सौ, सुपो लुकि, सकारस्य रुत्वे विसर्गे 'कुतः' इति सिद्ध्यति । तसिलोऽभावे तु 'कस्मात्' इति । एवमेव - सर्वतः, सर्वस्मात् । विश्वतः, विश्वस्मात् । बहुतः, बहुस्मादित्यादीनि च ।*

इश्-आदेशविधायकं विधिसूत्रम्-

**इदम इश् ५ । १ । ३ ।**

**प्राग्दिशीये परे । इतः ।**

(इदमः, इश्, प्राग्दिशः)

***सरलार्थः***- *प्राग्दिशीये प्रत्यये परे सति इदम्-शब्दस्य स्थाने 'इश्' इत्यादेशो भवति । इशश्शकार इत् ।*

*'अस्मात्' इति विग्रहे 'इदम्+ङसि' इत्यस्मात् "पञ्चम्यास्तसिल्" इति तसिल्प्रत्ययेऽनुबन्धलोपे, सुब्लुकि 'इदम् तस्' इत्यवस्थायां प्रकृतसूत्रेण इदमः स्थान इशादेशेऽनुबन्धलोपे 'इतस्' इति जाते, तस्मात् सौ, अव्ययत्वात् सुब्लुकि, सकारस्य रुत्वेविसर्गे 'इतः' इति सिद्ध्यति ।*

अन् इत्यादेशविधायकं विधिसूत्रम्-

**अन् ५ । ३ । ५ ।**

**एतदः प्राग्दिशीये । अनेकाल्त्वात्सर्वादेशः । अतः । अमुतः । यतः । ततः । बहुतः । द्व्यादेस्तु द्वाभ्याम् ।**

(एतदः, अन्, प्राग्दिशः)

***सरलार्थः***- *प्राग्दिशीये प्रत्यये परे 'एतद्' इति शब्दस्य स्थाने 'अन्' इत्यादेशो भवति ।*

*'एतस्मात्' इति विग्रहे 'एतद्+ङसि' इत्यस्मात् तसिल्प्रत्यये, सुब्लुकि 'एतद् तस्' इत्यवस्थायां प्रकृतसूत्रेण एतदः स्थाने अनादेशे, अनेकाल्त्वात् सर्वादेशे कृते 'अन् तस्' इति जाते "नलोपः प्रातिपदिकान्तस्य" इति सूत्रेण नलोपे, सौ, सुब्लुकि, सकारस्य रुत्वे विसर्गे 'अतः' इति । 'अमुष्मात्' इति विग्रहे 'अदस्+ङसि' इत्यस्मात् तसिलि, सुब्लुकि, विभक्तिसंज्ञायां "त्यदादीनामः" इत्यत्वे पररूपे 'अद तस्' इति जाते "अदसोऽसेर्दादुदो मः" इति उत्वे मत्वे 'अमुतस्' इति जाते, तस्मात् सौ, अव्ययत्वात् सुब्लुकि, रुत्वादिकार्ये 'अमुतः' इति सिद्ध्यति । 'यस्मात्' विग्रहेऽस्मिन्*

*‘यद्+ङसि’ इत्यस्मात् तसिलि, विभक्तेर्लुकि, अत्वे पररूपे, ‘यतस्’ इति जाते, पूर्ववद् ‘यतः’ इति । तथा च ‘बहुभ्यः’ इति विग्रहे ‘बहु+भ्यस्’ इत्यस्मात् तसिलि, पूर्ववत्प्रक्रियायां ‘बहुतः’ इति सिद्ध्यति ।*

*द्वि-आदिशब्दात् तु तसिल्प्रत्ययो नैव भवति, ‘द्वाभ्याम्’ इत्येव रूपम् ।*

तसिल्प्रत्ययविधायकं विधिसूत्रम्-

**पर्यभिभ्यां च ५ । ३ । ९ ।**

**आभ्यां तसिल् स्यात् । परितः । सर्वत इत्यर्थः । अभितः । उभयत इत्यर्थः ।**

(पर्यभिभ्याम्, च, तसिल्)

***सरलार्थः*-** *अव्ययसंज्ञकाभ्यां ‘परि’, ‘अभि’ एताभ्यां शब्दाभ्यामपि तसिल्प्रत्ययो भवति ।*

*परि इति अव्ययसंज्ञकात् शब्दात् प्रकृतसूत्रेण तसिल्प्रत्ययेऽनुबन्धलोपे ‘परितस्’ इति जाते, तस्मात् सौ, विभक्तिकार्ये ‘परितः’ इति सिद्ध्यति । ‘परितः’ इत्यस्य सर्वत इत्यर्थः । एवमेव ‘अभि’ इत्यस्माद् पूर्ववत् प्रक्रियायाम् ‘अभितः’ इति । ‘अभितः’ इत्यस्य उभयत इत्यर्थः ।*

त्रल्प्रत्ययविधायकं विधिसूत्रम्-

**सप्तम्यास्त्रल् ५ । ३ । १० ।**

**कुत्र । यत्र । तत्र । बहुत्र ।**

(किंसर्वनामबहुभ्योऽद्व्यादिभ्यः, सप्तम्याः, त्रल्)

***सरलार्थः*-** *सप्तम्यन्तेभ्यः किमादिशब्देभ्यस्त्रल् प्रत्ययो भवति । त्रलो लकार इत् ।*

*कस्मिन्निति विग्रहे ‘किम्+ङि’ इत्यस्मात् प्रकृतसूत्रेण त्रल्प्रत्ययेऽनुबन्धलोपे, सुब्लुकि ‘किम् त्र’ इत्यवस्थायां “कु तिहोः” इति किमः स्थाने ‘कु’ इत्यादेशे, स्वादिकार्ये ‘कुत्र’ इति । एवं यस्मिन्निति विग्रहे ‘यद्+ङि’ इत्यस्मात् त्रलि, सुब्लुकि, अत्वे, पररूपे, स्वादिकार्ये ‘यत्र’ इति । एवमेव तत्र । ‘बहुषु इति’ इति विग्रहे ‘बहु+सु’ इत्यस्मात् त्रलि, पूर्ववत् ‘बहुत्र’ इति सिद्ध्यति ।*

ह इत्यादेशविधायकं विधिसूत्रम्-

**इदमो हः ५ । ३ । ११ ।**

**त्रलोऽपवादः । इह ।**

(सप्तम्याः, इदमः, हः, त्रल्, विभक्तिः)

***सरलार्थः*-** *सप्तम्यन्ताद् इदम्-शब्दाद् विभक्तिसंज्ञको ह-प्रत्ययो भवति ।*

अत्प्रत्ययविधायकं विधिसूत्रम्-

**किमोऽत् ५ । ३ । १२ ।**

**वाग्रहणमपकृष्यते । सप्तम्यन्तात्किमोऽद्वा स्यात् पक्षे त्रल् ।**

***सरलार्थः-*** *सप्तम्यन्तात् किम्-शब्दाद् विभक्तिसंज्ञकः अत्प्रत्ययो विभाषया भवति । अत्प्रत्ययाभावे पक्षे त्रल्प्रत्ययो भवति ।*

क्व इत्यादेशविधायकं विधिसूत्रम्-

**क्वाति ७ । २ । १०५ ।**

**किमः क्वादेशः स्यादति । क्व । कुत्र ।**

(किमः, क्वः, अति)

***सरलार्थः-*** *किम्शब्दस्य स्थाने 'क्व' इत्यादेशो भवति अति प्रत्यये परे ।*

तसिलादिप्रत्ययविधायकं विधिसूत्रम्-

**इतराभ्योऽपि दृश्यन्ते ५ । ३ । १४ ।**

**पञ्चमीसप्तमीतरविभक्त्यन्तादपि तसिलादयो दृश्यन्ते । दृशिग्रहणाद्भवदादियोग एव । स भवान् । ततो भवान् । तत्र भवान् । तं भवन्तम् । ततो भवन्तम् । तत्र भवन्तम् । एवं दीर्घायुः, देवानाम्प्रियः, आयुष्मान् ।**

(इतराभ्यः, अपि, तसिलादयः, दृश्यन्ते )

***सरलार्थः-*** *पञ्चमीसप्तमीतरविभक्त्यन्तेभ्यः समर्थसुबन्तेभ्योऽपि तसिलादयः प्रत्ययाः दृश्यन्ते । दृश्यन्ते इति कथनेन भवदादियोगे एव अन्यविभक्त्यन्तेभ्यः शब्देभ्यः तसिलादयः प्रत्यया भवन्ति ।*

दाप्रत्ययविधायकं विधिसूत्रम्-

**सर्वैकान्यकिंयत्तदः काले दा ५ । ३ । १५ ।**

**सप्तम्यन्तेभ्यः कालार्थेभ्यः स्वार्थे दा स्यात् ।**

(सप्तम्याः, सर्वैकान्यकिंयत्तदः, काले, दा)

***सरलार्थः-*** *सप्तम्यन्तेभ्यः कालार्थेभ्यः सर्व, एक, अन्य, किम्, यद्, तद्, इत्येतेभ्यः शब्देभ्यः स्वार्थे दा-प्रत्ययो भवति ।*

स इत्यादेशविधायकं विधिसूत्रम्-

**सर्वस्य सोऽन्यतरस्यां दि ५ । ३ । ६ ।**

**दादौ प्राग्दिशीये सर्वस्य सो वा स्यात् । सर्वस्मिन् काले सदा । सर्वदा । एकदा । अन्यदा । कदा । यदा । तदा । काले किम् ? सर्वत्र देशे ।**

(सर्वस्य, सः, अन्यतरस्याम्, दि)

***सरलार्थः-*** *सर्वशब्दस्य स्थाने विभाषया 'स' इत्यादेशो भवति दकारादौ प्राग्दिशीये प्रत्यये परे ।*

*'सर्वस्मिन् काले' इति विग्रहे सप्तम्यन्तात् कालवाचकात् सर्वशब्दात् "सर्वैकान्यकिंयत्तदः काले दा" इति सूत्रेण स्वार्थे दाप्रत्यये, विभक्तेर्लुकि 'सर्व दा' इति जाते, प्रकृतसूत्रेण विकल्पेन 'सर्व' इत्यस्य 'स' इत्यादेशे, विभक्तिकार्ये 'सदा' इति । सादेशाभावे तु - सर्वदा । एवमेव - एकस्मिन्काल इत्यर्थे - एकदा । अन्यस्मिन् काले - अन्यदा । कस्मिन् काले - कदा । यस्मिन् काले - यदा । तस्मिन् काले - तदा । अत्र 'दा' इति विभक्तिसंज्ञकप्रत्ययपरत्वाद् अन्यदादौ अत्वपररूपम्, किमश्च कादेशः । कालभिन्नेऽर्थे वर्तमानेभ्यः सर्वैकादिशब्देभ्यस्तु दाप्रत्ययो न भवति । यथा - सर्वत्र देशे । अत्र देशवाचकात् सर्वशब्दात् त्रल्प्रत्यये उक्तं रूपं सिद्ध्यति ।*

र्हिल्प्रत्ययविधायकं विधिसूत्रम्-

**इदमो र्हिल् ५ । ३ । १६ ।**

**सप्तम्यन्तात् काल इत्येव ।**

(सप्तम्याः, इदमः, र्हिल्, काले)

***सरलार्थः-*** *सप्तम्यन्ताद् इदम्-शब्दात् कालेऽर्थे र्हिल् प्रत्ययो भवति ।*

एत इत् इत्यादेशविधायकं विधिसूत्रम्-

**एतेतौ रथोः ५ । ३ । ४ ।**

**इदम्शब्दस्य एत इत् इत्यादेशौ स्तो रेफादौ थकारादौ च प्राग्दिशीये परे । अस्मिन् काले एतर्हि । काले किम् ? इह देशे ।**

(इदमः, एतेतौ, रथोः, प्राग्दिशः)

*सरलार्थः -इदम्-शब्दस्य स्थाने एत इत् इत्यादेशौ भवतः, रेफादौ थकारादौ च प्राग्दिशीये प्रत्यये परे ।*

विभाषया र्हिल्प्रत्ययविधायकं विधिसूत्रम्-

**अनद्यतने र्हिलन्यतरस्याम् ५ । ३ । २१ ।**

**कर्हि, कदा । यर्हि, यदा । तर्हि तदा ।**

(सप्तम्याः, किंसर्वनामबहुभ्यः, अद्व्यादिभ्यः, अनद्यतने, काले, अन्यतरस्याम्, र्हिल्, विभक्तिः)

***सरलार्थः-*** *सप्तम्यन्तेभ्यः किमादिशब्देभ्यः अनद्यतने कोऽर्थे अन्यतरस्यां विभक्तिसंज्ञको र्हिल्प्रत्ययो भवति ।*

एत इत् इत्यादेशविधायकं विधिसूत्रम्-

**एतदः ५ । ३ । ५ ।**

**एत इत् एतौ स्तो रेफादौ थादौ च प्राग्दिशीये । एतस्मिन् काले एतर्हि ।**

(सप्तम्याः, एतदः, एतेतौ, रथोः, प्राग्दिशः)

***सरलार्थः-*** *एतद्-शब्दस्य स्थाने एत इत् इत्यादेशौ भवतः रेफादौ थकारादौ च प्राग्दिशीये प्रत्यये परे ।*

थाल्प्रत्ययविधायकं विधिसूत्रम्-

**प्रकारवचने थाल् ५ । ३ । २३ ।**

**प्रकारवृत्तिभ्यः किमादिभ्यस्थाल् स्यात् स्वार्थे । तेन प्रकारेण तथा । यथा ।**

(किंसर्वनामबहुभ्योऽद्व्यादिभ्यः, प्रकारवचने, थाल्, विभक्तिः, तद्धितः)

***सरलार्थः-*** *किमादिभ्यः शब्देभ्यः प्रकारवचने विभक्तिसंज्ञकः थाल्प्रत्ययो भवति स्वार्थे । थालो लकार इत् ।*

*'तेन प्रकारेण' इति विग्रहे 'तद्+टा' इत्यस्मात् प्रकृतसूत्रेण थाल्प्रत्ययेऽनुबन्धलोपे, विभक्तेर्लुकि 'तद् था' इति जाते, थालो विभक्तित्वात् तदो दकारस्य अत्वे पररूपे, स्वादिकार्ये 'तथा' इति सिद्धम् । एवमेव येन प्रकारेण - यथा । (थाल्प्रत्ययोऽप्रथमान्तेभ्यः द्वितीयान्तादिभ्यो सर्वेभ्यः प्रकारवाचकसुबन्तकिमादिभ्यो भवति, प्रथमान्तात्तु न ।)*

थमुप्रत्ययविधायकं विधिसूत्रम्-

**इदमस्थमुः ५ । ३ । २३ ।**

**थालोऽपवादः । (एतदोऽपि वाच्यः ।) एनेन एतेन वा प्रकारेण इत्थम् ।**

(इदमः, प्रकारवचने, थमुः, विभक्तिः, तद्धितः)

***सरलार्थः-*** *इदम्-शब्दात्, एतत्-शब्दाच्च थाल्विषये थमुप्रत्ययो भवति । थालोऽपवादः ।*

थमुप्रत्ययविधायकं विधिसूत्रम्-

**किमश्च ५ । ३ । २५ ।**

**केन प्रकारेण कथम् ।**

(किमः, प्रकारवचने, थमुः, विभक्तिः, तद्धितः)

***सरलार्थः-*** *किम्-शब्दाच्च थाल्विषये थमुप्रत्ययो भवति ।*

## अथ प्रागिवीयाः

तमप्-इष्ठन्-प्रत्ययविधायकं विधिसूत्रम्-

**अतिशायने तमबिष्ठनौ ५ । ३ । ५५ ।**

**अतिशयविशिष्टार्थवृत्तेः स्वार्थ एतौ स्तः । अयमेषामतिशयेनाढ्यः आढ्यतमः । लघुतमः, लघिष्ठः ।**

(प्रातिपदिकात्, अतिशायने, तमबिष्ठनौ, तद्धिताः)

***सरलार्थः-*** *अतिशयविशिटेऽर्थे वर्तमानात् समर्थप्रातिपदिकात् स्वार्थे तमप्, इष्ठन्, इत्येतौ प्रत्ययौ भवत । तमपो पकार इत्, इष्ठनश्च नकारः ।*

*'अयम् एषाम् अतिशयेन आढ्यः' इति विग्रह अतिशयविशिष्टेऽर्थे वर्तमानाद् 'आढ्य+सु' इति सुबन्तात् प्रकृतसूत्रेण तमप्प्रत्ययेऽनुबन्धलोपे, प्रातिपदिकत्वात् सुपो लुकि 'आढ्यतम' इति जाते, तस्मात् सौ 'आढ्यतमः' इति । इष्ठनीयसुनौ प्रत्ययौ गुणवाचकशब्देभ्य एव भवतः । (अजादी गुणवचनादेव ५ । ३ । ५८) अत एव 'धनी' इत्यर्थकाद् आढ्यशब्दाद् इष्ठन्प्रत्ययो नैव भवति, गुणवाचकत्वाभावात् ।*

*'अयम् एषाम् अतिशयेन लघुः' इति विग्रहे 'लघु+सु' इति सुबन्तात् प्रकृतसूत्रेण तमप्प्रत्यये पूर्ववत् 'लघुतमः' इति सिद्ध्यति । गुणवाचकात् प्रथमान्ताल्लघुशब्दाद् इष्ठन्प्रत्यये तु 'लघु इष्ठ' इत्यवस्थायां भसंज्ञायाम् 'टेः' इति सूत्रेण टिलोपे 'लघिष्ठ' इति जाते, स्वादिकार्ये 'लघिष्ठः' इति सिद्ध्यति ।*

तमप्प्रत्ययविधायकं विधिसूत्रम्-

**तिङश्च ५ । ३ । ५६ ।**

**तिङन्तादतिशये द्योत्ये तमप् स्यात् ।**

(अतिशयने, तिङः, च, तमप्)

***सरलार्थः***- *अतिशयविशिटेऽर्थे वर्तमानात् तिङन्तादपि स्वार्थे तमप्प्रत्ययो भवति ।*

घसंज्ञाविधायकं सूत्रम्-

**तरप्तमपौ घः १। १। २२ ।**

**एतौ घसंज्ञौ स्तः ।**

***सरलार्थः***- *तरप्, तमप्, इत्येतौ प्रत्ययौ घसंज्ञकौ भवतः ।*

आमुप्रत्ययविधायकं विधिसूत्रम्-

**किमेत्तिङव्ययघादाम्वद्रव्यप्रकर्षे ५ । ४ । ११ ।**

**किम एदन्तात्तिङोऽव्ययाच्च यो घस्तदन्तादामुः स्यान्न तु द्रव्यप्रकर्षे । किन्तमाम् । प्राह्णेतमाम् । पचतितमाम् । उच्चैस्तमाम् । द्रव्यप्रकर्षे तु उच्चैस्तमस्तरुः ।**

(किमेत्तिङव्ययघाद्, आमु, अद्रव्यप्रकर्षे)

***सरलार्थः***- *किम्-शब्दाद् एकारान्तशब्दात्, तिङन्ताद्, अव्ययशब्दाच्च परस्य यो घसंज्ञकप्रत्ययः, तदन्तशब्दाद् आमुप्रत्ययो भवति, द्रव्यस्य प्रकर्षेऽर्थे न बोधिते सति । आमोरुकार इत् ।*

*'अतिशयेन किम्' इति विग्रहे 'किम्+सु' इत्यस्मात् तमप्प्रत्यये, विभक्तेर्लुकि 'किन्तम' इति जाते "तरप्तमपौ घः" इति तमपो घसंज्ञायां प्रकृतसूत्रेण 'किन्तम' इत्यस्माद् आमुप्रत्ययेऽनुबन्धलोपे 'किन्तम आम्' इत्यवस्थायां भसंज्ञकस्याकारस्य लोपे 'किन्तमाम्' इत्यव्ययसंज्ञकात् प्रातिपदिकात् सौ, सोर्लुकि 'किन्तमाम्' इति सिद्धयति । तिङन्तात्तु - अतिशयेन पचतीति विग्रहे तिङन्तात् पचतेः "तिङश्च" इति सूत्रेण तमप्प्रत्यये 'पचतितम' इति जाते, तमपो घसंज्ञायां प्रकृतसूत्रेण आमुप्रत्ययेऽनुबन्धलोपे, भत्वादलोपे, स्वादिकार्ये 'पचतितमाम्' इति सिद्धयति । एवमेव 'अतिशयेन उच्चैः' इति विग्रहे 'उच्चैस्' इत्यव्ययशब्दात् तमपि, आम्वादिकार्ये पूर्ववत् 'उच्चैस्तमाम्' इति सिद्धयति । द्रव्यप्रकर्षे तु आमुप्रत्ययो न भवति । यथा - उच्चैस्तमस्तरुः । अत्र तरुशब्दस्य द्रव्यवाचकत्वान् नामुः ।*

तरप्-इयसुन्प्रत्ययविधायकं विधिसूत्रम्-

**द्विवचनविभज्योपपदे तरबीयसुनौ ५ । ३ । ५६ ।**

**द्वयोरेकस्यातिशये विभक्तव्ये चोपपदे सुप्तिङन्तादेतौ स्तः । पूर्वयोरपवादः । अयमनयोरतिशयेन लघुः, लघुतरो लघीयान् ।**

(द्विवचनविभज्योपपदे, प्रातिपदिकात्, तरबीयसुनौ, समर्थानां प्रथमाद्वा)

***सरलार्थः***- *द्वयोर्मध्य एकस्यातिशयबोधके पदे द्वयर्थे विभज्योपपदे च (अतिशयविशिष्टेऽर्थे*

*वर्तमानात्) तद्धर्मवाचकात् सुबन्तात् तत्क्रियावाचकात् तिङन्ताच्च तरप्, ईयसुन्, इत्येतौ प्रत्ययौ भवतः । तमबिष्ठनोरपवादः । तरपो पकार इत् ।*

*'अयम् अनयोरतिशयेन लघुः' इति विग्रहे 'लघु+सु' इत्यस्मात् प्राप्तौ तमबिष्ठनौ बाधित्वा प्रकृतसूत्रेण तरप्प्रत्ययेऽनुबन्धलोपे, विभक्तेर्लुकि, 'लघुत्तर' इति जाते, स्वादिकार्ये 'लघुत्तरः' इति । प्रकृतसूत्रेणैव ईयसुन्प्रत्यये उकारनकारयोरित्संज्ञायां लोपे 'लघु सु ईयस्' इत्यवस्थायां विभक्तेर्लुकि "टेः" इति टिलोपे 'लघीयस्' इति जाते, तस्मात् सौ 'लघीयान्' इति सिद्ध्यति । एवमेव 'उदीच्याः प्राच्येभ्यः पटवः' इति विग्रहे 'पटु+जस्' इत्यस्मात् तरबीयसुनोः क्रमात् 'पटुतराः', 'पटुयांसः' इति सिद्ध्यतः । तिङन्तात्तु ईयसुन्प्रत्ययो नैव भवति "अजादी गुणवचनादेव" इति निषेधात् । "अयमनयोरतिशयेन पचति' इति विग्रहे तिङन्तात् पचतेः प्रकृतसूत्रेण तरप्प्रत्यये 'पचतितर' इति जाते, तरपो घसंज्ञायां "किमेत्तिङ०" इत्यादिना सूत्रेण आमुप्रत्यये, भत्वादलोपे, स्वादिकार्ये 'पचतितराम्' इति सिद्ध्यति ।*

'श्र' इत्यादेशविधायकं विधिसूत्रम्-

**प्रशस्यस्य श्रः ५ । ३ । ६० ।**

**अस्य श्रादेशः स्यादजाद्योः परतः ।**

(प्रशस्यस्य, श्रः, अजाद्योः)

***सरलार्थः-*** *इष्ठन्-ईयसुन्प्रत्यययोः परयोः सतोः प्रशस्यशब्दस्य स्थाने श्र इत्यादेशो भवति ।*

प्रकृतिभावविधायकं सूत्रम्-

**प्रकृत्यैकाच् ६ । ४ । १६३ ।**

**इष्ठादिष्वेकाच् प्रकृत्या स्यात् । श्रेष्ठः, श्रेयान् ।**

(एकाच्, प्रकृत्या, इष्ठेमेयःसु )

***सरलार्थः-*** *इष्ठन्, इमनिच्, ईयसुन् इति प्रत्ययेषु परेषु एकाचो भसंज्ञकस्याङ्गस्य प्रकृतिभावो भवति ।*

ज्य इत्यादेशविधायकं विधिसूत्रम्-

**ज्य च ५ । ३ । ६१ ।**

**प्रशस्यस्य ज्यादेशः स्यादिष्ठेयसोः । ज्येष्ठः ।**

(प्रशस्यस्य, ज्यः, इष्ठमेयःसु)

***सरलार्थः***- *प्रशस्यस्य शब्दस्य स्थाने ज्यादेशोऽपि भवति, इष्ठादिषु प्रत्ययेषु परेषु ।*

आकारादेशविधायकं विधिसूत्रम्-

**ज्यादादीयसः ६ । ४ । १६० ।**

**आदेः परस्य । ज्यायान् ।**

(ज्याद्, आत्, ईयसः)

***सरलार्थः***- *ज्य इत्यमात् परस्य ईयसः प्रत्ययस्य स्थाने आकारादेशो भवति । "आदेः परस्य" इति सूत्रेण आदेः इकारस्य स्थाने आकारादेशः ।*

इममेयसोलोपविधायकम्, भू इत्यादेशविधायकञ्च सूत्रम्-

**बहोर्लोपो भू च बहोः ६ । ४ । १५८ ।**

**बहोः परयोरिमेयसोर्लोपः स्याद्बहोश्च भूरादेशः । भूमा । भूयान् ।**

(बहोः, इष्ठेमेयःसु, लोपः, भू, च, बहोः)

***सरलार्थः***- *बहुशब्दात् परयोः इमनिच्-ईयसुन्-प्रत्यययोः लोपो भवति, बहुशब्दस्य स्थाने भूरादेशश्च स्यात् ।*

इष्ठनो लोपादेशविधायकम्, यिडागमविधायकञ्च सूत्रम्-

**इष्ठस्य यिट् च ६ । ४ । १५९ ।**

**बहोः परस्य इष्ठस्य लोपः स्याद् यिडागमश्च । भूयिष्ठः ।**

(बहोः, इष्ठस्य, लोपः, यिट्, च)

***सरलार्थः***- *बहुशब्दात् परस्य इष्ठन्प्रत्ययस्य लोपो भवति, इष्ठनो यिट् इत्यागमश्च स्यात् । आदेः परस्येति इकारस्य लोपः ।*

विन्मतोर्लुग्विधायकं विधिसूत्रम्-

**विन्मतोर्लुक् ५ । ३ । ६५ ।**

**विनो मतुपश्च लुक् स्यादिष्ठेयसोः । अतिशयेन स्रग्वी स्रजिष्ठः । स्रजीयान् । अतिशयेन त्वग्वान् त्वचिष्ठः । त्वचीयान् ।**

(विन्मतोः, लुक्, इष्ठेमेयःसु)

***सरलार्थः-*** *विन्प्रत्ययस्य, मतुप्प्रत्ययस्य च लुग् भवति इष्ठन्-ईयसोः परयोः ।*

कल्पप्-देश्य-देशीयर्प्रत्ययविधायकं विधिसूत्रम्-

**ईषदसमाप्तौ कल्पब्देश्यदेशीयरः ५ । ३ । ६७ ।**

**ईषदूनो विद्वान् विद्वत्कल्पः । विद्वद्देश्यः । विद्वद्देशीयः । पचतिकल्पम् ।**

(ईषदसमाप्तौ, प्रातिपदिकात्, तिङश्च, कल्पब्देश्यदेशीयरः)

***सरलार्थः-*** *ईषदसमाप्तौ वर्तमानात् सुबन्ताद् तिङन्ताच्च तद्धितसंज्ञकाः कल्पप्-देश्य-देशीयर् प्रत्यया भवन्ति ।*

विभाषया बहुच्प्रत्ययविधायकं विधिसूत्रम्-

**विभाषा सुपो बहुच् पुरस्तात्तु ५ । ३ । ६८ ।**

**ईषदसमाप्तिविशिष्टेऽर्थे सुबन्ताद्बहुज्वा स्यात्स च प्रागेव न तु परतः । ईषदूनः पटुर्बहुपटुः । पटुकल्पः । सुपः किम् ? जयतिकल्पम् ।**

(प्रातिपदिकात्, ईषदसमाप्तौ, सुपः, पुरस्तात्, तु, विभाषया, बहुच्)

***सरलार्थः-*** *ईषदसमाप्तावर्थे सुबन्ताद् विभाषया बहुच्प्रत्ययो भवति, अयञ्च बहुच्प्रत्ययः सुपः प्राग् भवति ।*

अधिकारसूत्रम्-

**प्रागिवात्कः ५ । ३ । ७० ।**

**इवे प्रतिकृतावित्यतः प्राक्काधिकारः ।**

***सरलार्थः-*** *“इवे प्रतिकृतौ” इत्यतः प्राग् असति बाधके उत्सर्गेण कप्रत्ययो भवति । कप्रत्ययस्याधिकारो भवतीत्यर्थः ।*

अकच्प्रत्ययविधायकं विधिसूत्रम्-

**अव्ययसर्वनाम्नामकच् प्राक् टेः ५ । ३ । ७१ ।**

**कापवादः । तिङश्चेत्यनुवर्तते ।**

(अव्ययसर्वनाम्नाम्, तिङश्च, प्राक् टेः, अकच्)

***सरलार्थः-*** *अव्ययेभ्यः, सर्वनामसंज्ञकप्रातिपदिकेभ्यः, तिङन्तेभ्यश्च टेः प्राग् अकच्प्रत्ययो भवति ।*

क-अकच्-प्रत्ययविधायकं विधिसूत्रम्-

**अज्ञाते ५ । ३ । ७३ ।**

**कस्यायमश्वोऽश्वकः । उच्चकैः । नीचकैः । सर्वके ।**

(अज्ञाते, प्रातिपदिकात्, तिङश्च, कः, अकच्)

***सरलार्थः-*** *अज्ञातार्थे प्रातिपदिकात्, तिङन्ताच्च क, अकच् एतौ प्रत्ययौ भवतः ।*

**ओकारसकारभकारादौ सुपि सर्वनाम्नष्टेः प्रागकच्, अन्यत्र सुबन्तस्य** (वा.) **। युष्मकाभिः । युवकयोः । त्वयका ।**

***सरलार्थः-*** *ओकारसकारभकारादौ सुपि प्रत्यये परतः सर्वनाम्नः टेः प्राग् अकच्-प्रत्ययो भवति, अन्यत्र तु सुबन्तस्य टेः प्रागकच् भवति ।*

क-अकच्-विधायकं सूत्रम्

**कुत्सिते ५ । ३ । ७४ ।**

**कुत्सितोऽश्वोऽश्वकः ।**

(कुत्सिते, प्रातिपदिकात्, तिङश्च, कः, अकच्)

***सरलार्थः-*** *कुत्सितेऽर्थे प्रातिपदिकात्, तिङन्ताच्च क अकच् एतौ प्रत्ययौ भवतः ।*

डतरच्प्रत्ययविधायकं विधिसूत्रम्-

**किंयत्तदो निर्द्धारणे द्वयोरेकस्य डतरच् ५ । ३ । ९२ ।**

**अनयोः कतरो वैष्णवः । यतरः । ततरः ।**

(किंयत्तदोः, निर्धारणे, द्वयोरेकस्य, डतरच् )

***सरलार्थः-*** *किम्, यत्, तद् एतेभ्यः समर्थप्रातिपदिकेभ्यः द्वयोरेकस्य निर्धारणे डतरच्प्रत्ययो भवति । डकारचकारौ इतौ ।*

डतमच्प्रत्ययविधायकं विधिसूत्रम्-

**वा बहूनां जातिपरिप्रश्ने डतमच् ५ । ३ । ९३ ।**

**जातिपरिप्रश्न इति प्रत्याख्यातमाकरे । बहूनां मध्ये एकस्य निर्धारणे डतमज्वा स्यात् । कतमो भवतां कठः । यतमः । ततमः । वाग्रहणमकजर्थम् । यकः । सकः ।**

(किंयत्तदोः, निर्धारणे, बहूनाम्, एकस्य, वा, डतमच्)

***सरलार्थः***- *किम्, यत्, तद् एतेभ्यः समर्थप्रातिपदिकेभ्यः बहूनामेकस्य निर्धारणे विभाषया डतमच्प्रत्ययो भवति । डकारचकारौ इतौ ।*

। इति प्रागिवीयाः । १५ ।

## अथ स्वार्थिकाः

कन्प्रत्ययविधायकं विधिसूत्रम्-

**इवे प्रतिकृतौ ५ । ३ । ९६ ।**

**कन् स्यात् । अश्व इव प्रतिकृतिरश्वकः । सर्वप्रातिपदिकेभ्यः स्वार्थे कन्** (वा.) **। अश्वकः ।**

(इवे, प्रतिकृतौ, प्रातिपदिकात्, कन्)

***सरलार्थः***- *इवे प्रतिकृतौ च अर्थे समर्थप्रातिपदिकात् कन् प्रत्ययो भवति ।*

मयट्प्रत्ययविधायकं विधिसूत्रम्-

**तत्प्रकृतवचने मयट् ५ । ४ । २१ ।**

**प्राचुर्येण प्रस्तुतं प्रकृतम्, तस्य वचनं प्रतिपादनम् । भावे अधिकरणे वा ल्युट् । आद्ये प्रकृतमन्नमन्नमयम् । अपूपमयम् । द्वितीये तु अन्नमयो यज्ञः । अपूपमयं पर्व ।**

(तत्प्रकृतवचने, प्रातिपदिकात्, मयट्)

***सरलार्थः***- *समर्थप्रातिपदिकाद् मयट्प्रत्ययो भवति प्राचुर्येऽर्थे ।*

अण्प्रत्ययविधायकं विधिसूत्रम्-

**प्रज्ञादिभ्यश्च ५ ।.४ । ३८ ।**

**अण् स्यात् । प्रज्ञ एव प्राज्ञः । प्राज्ञी स्त्री । दैवतः । बान्धवः ।**

***सरलार्थः***- *प्रज्ञादिभ्यः समर्थप्रातिपदिकेभ्यः तद्धितसंज्ञकोऽण्प्रत्ययो भवति ।*

शस्प्रत्ययविधायकं विधिसूत्रम्-

**बह्वल्पार्थाच्छस्कारकादन्यतरस्याम् ५ । ४ । ४२ ।**

**बहूनि ददाति बहुशः । अल्पशः ।**

***सरलार्थः***- *बह्वर्थाद् अल्पार्थाच्च कारकाभिधायिनः प्रातिपदिकात् स्वार्थे शस्प्रत्ययो भवति ।*

**आद्यादिभ्यस्तसेरुपसंख्यानम्** (वा.) **। आदौ आदितः । मध्यतः । अन्ततः । पृष्ठतः । पार्श्वतः ।**

**आकृतिगणोऽयम् । स्वरेण, स्वरतः । वर्णतः ।**

***सरलार्थः-*** *आद्यादिभ्यः समर्थप्रातिपदिकेभ्यः तसिप्रत्ययो भवति । सर्वप्रातिपदिकेभ्योऽयं तसिः ।*

च्विप्रत्ययविधायकं विधिसूत्रम्-

**कृभ्वस्तियोगे सम्पद्यकर्तरि च्विः ५ । ४ । ५० ।**

**अभूततद्भाव इति वक्तव्यम् (वा.) । विकारात्मतां प्राप्नुवत्यां प्रकृतौ वर्तमानाद्विकारशब्दात् स्वार्थे च्विर्वा स्यात्करोत्यादिभिर्योगे ।**

(प्रातिपदिकात्, कृभ्वस्तियोगे, सम्पद्यकर्तरि, च्विः)

***सरलार्थः-*** *सम्पद्यते कर्ता सम्पद्यकर्ता, तस्मिन् सम्पद्यकर्तरि । सम्पद्यकर्तरि वर्तमानाद् विकारवाचकशब्दात् (अभूततद्भावे गम्यमाने) कृ, भू, अस् इत्येतैर्धातुभिर्योगे स्वार्थे च्विप्रत्ययो विभाषया भवति । च्विप्रत्ययस्य सर्वापहारिलोपो भवति । च्वेरिकारचकारौ इतौ, वकारस्य च "वेरपृक्तस्य ६ । १ । ६१" इति सूत्रेण लोपो भवति ।*

ईत्वादेशविधायकं विधिसूत्रम्-

**अस्य च्वौ ७ । ४ । ३२ ।**

**अवर्णस्य ईत्स्यात् च्वौ । वेर्लोपः । च्व्यन्तत्वादव्ययत्वम् । अकृष्णः कृष्णः सम्पद्यते तं करोति कृष्णीकरोति । ब्रह्मीभवति । गङ्गीस्यात् ।**

(अस्य, ईः, च्वौ)

***सरलार्थः-*** *अवर्णस्य स्थाने ईकारादेशो भवति च्विप्रत्यये परे ।*

*अकृष्णः कृष्णः सम्पद्यते तं करोति, अकृष्णः कृष्णो यथा सम्पद्यते तथा करोति वेति विग्रहे कृधातुयोगात् प्रथमान्तात् कृष्णशब्दात् "कृभ्वस्तियोगे सम्पद्यकर्तरि च्विः" इति सूत्रेण च्विप्रत्यये सर्वापहारिलोपे, तद्धितान्तत्वेन प्रातिपदिकत्वात् सुब्लुकि 'कृष्ण करोति' इति जाते, प्रकृतसूत्रेण 'कृष्ण' इत्यस्य अकारस्य ईत्वे 'कृष्णी करोति' इति जाते 'कृष्णी' इत्यस्य "ऊर्यादिच्विडाचश्च १ । ४ । ६१" इति गतिसंज्ञायां "कुगतिप्रादयः" इति समासे 'कृष्णीकरोति' इति सिद्ध्यति । एवमेव भूधातोर्योगे 'कृष्णीभवति' इति । अब्रह्म ब्रह्म यथा सम्पद्यते तथा भवतीति विग्रहे भूधातुयोगात् प्रथमान्ताद् ब्रह्मशब्दात् च्विप्रत्यये सर्वापहारिलोपे, विभक्तेर्लुकि 'ब्रह्मन् भवति' इत्यवस्थायां प्रातिपदिकान्तस्य नकारस्य लोपे, प्रकृतसूत्रेण 'ब्रह्म' इत्यस्य अकारस्य ईत्वे 'ब्रह्मी भवति' इति जाते, च्व्यन्तत्वात् पूर्ववद् गतिसंज्ञायां समासे 'ब्रह्मीभवति' इति । तथैव 'अगङ्गा गङ्गा यथा सम्पद्यते तथा स्यात्' इति विग्रहे 'गङ्गा+सु' इत्यस्माद् अस्धातोर्योगे च्विप्रत्यये सर्वापहारिलोपे, सुब्लुकि 'गङ्गा स्यात्' इति जाते, आकारस्य ईत्वे, पूर्ववत् गतिसंज्ञायां समासे*

*'गङ्गीस्यात्' इति सिद्ध्यति । एवमेव - अशुक्लः शुक्लः सम्पद्यो भवतीति शुक्लीभवति । अमलिनो मलिनः सम्पद्यः स्यादिति मलिनीस्यात् । एवमेवाऽन्यत्राऽपि बोध्यम् ।*

विभाषया सातिप्रत्ययविधायकं विधिसूत्रम्-

**विभाषा साति कार्त्स्न्ये ५ । ४ । ५२ ।**

**च्विविषये सातिर्वा स्यात्साकल्ये ।**

(कृभ्वस्तियोगे, अभूततद्भावे, सम्पद्यकर्तरि, विभाषा, साति, कार्त्स्न्ये)

***सरलार्थः-*** *च्वेर्विषये विभाषया सातिप्रत्ययो भवति साकल्येऽर्थे ।*

सत्वस्य षत्वादेशनिषेधविधायकं सूत्रम्-

**सात्पदाद्योः ८ । ३ । १११ ।**

**सस्य षत्वं न स्यात् । कृत्स्नं शस्त्रमग्निः संपद्यतेऽग्निसाद्भवति । दधि सिञ्चति ।**

(सात्पदाद्योः, इण्कोः, सः, मूर्धन्यः, न)

***सरलार्थः-*** *सातिप्रत्ययावयवस्य पदादौ स्थितस्य च इण्कुभ्यां परस्य सकारस्य स्थाने षकारादेशो न भवति ।*

दीर्घादेशविधायकं विधिसूत्रम्-

**च्वौ च ७ । ४ । २६ ।**

**च्वौ परे पूर्वस्य दीर्घः स्यात् । अग्नीभवति ।**

(च्वौ च, पूर्वस्य, दीर्घः)

***सरलार्थः-*** *च्विप्रत्यये परे पूर्वस्याचः स्थाने दीर्घादेशो न भवति ।*

डाच्प्रत्ययविधायकं विधिसूत्रम्-

**अव्यक्तानुकरणाद्द्व्यजवरार्धादनितौ डाच् ५ । ४ । ५७ ।**

**द्व्यजेवावरं न्यूनं न तु ततो न्यूनमनेकाजिति यावत् । तादृशमर्धं यस्य तस्माड्डाच् स्यात् कृभ्वस्तिभिर्योगे ।**

(अव्यक्तानुकरणाद्, द्व्यजवरार्धाद्, अनितौ, डाच्)

***सरलार्थः-*** *अव्यक्तानुकरणाद् अनेकाचः प्रातिपदिकात् कृभ्वस्तिभिर्योगे डाच्प्रत्ययो भवति ।*

**डाचि विवक्षिते द्वे बहुलम् (वा.) इति डाचि विवक्षिते द्वित्वम् ।**

***सरलार्थः-*** *डाच्प्रत्ययस्य विवक्षायां अव्यक्तानुकरणस्य प्रातिपदिकस्य सर्वस्य द्वित्वं भवति ।*

**नित्यमाम्रेडिते डाचीति वक्तव्यम् (वा.) ।**

**डाच्परं यदाम्रेडितं तस्मिन्परे पूर्वपरयोर्वर्णयोः पररूपं स्यात् । इति तकारपकारयोः पकारः । पटपटाकरोति । अव्यक्तानुकरणात्किम् ? ईषत्करोति । द्व्यजवरार्धात्किम् ? श्रत्करोति । अवरेति किम् ? खरटखरटाकरोति । अनितौ किम् ? पटिति करोति ।**

। इति स्वार्थिकाः । १६ ।

। इति तद्धिताः ।

## प्रयोगसिद्धिप्रकारः

### धीमान्

'धीः अस्ति अस्येति विग्रहे प्रथमान्ताद् धीशब्दात् "तदस्यास्त्यस्मिन्निति मतुप्" इति सूत्रेण मतुप्प्रत्यये, उकारपकारयोरित्संज्ञायां लोपे 'धी+सु+मत्' इति जाते, तद्धितान्तत्वात् प्रातिपदिकसंज्ञायां विभक्तेर्लुकि 'धीमत्' इति जाते, तस्मात् प्रातिपदिकात् सौ, नुमादिकार्ये 'धीमान्' इति सिद्ध्यति ।

### कुतः

'कस्मात्' इति विग्रहे पञ्चम्यन्तात् किम्-शब्दात् "पञ्चम्यास्तसिल्" इति सूत्रेण विकल्पेन तसिल्-प्रत्ययेऽनुबन्धलोपे 'किम्+ङसि+तस्' इति जाते, तद्धितान्तत्वात् प्रातिपदिकसंज्ञायां विभक्तेर्लुकि 'किम् तस्' इति जाते "प्राग्दिशो विभक्तिः" इति सूत्रेण तसिलो विभक्तिसंज्ञायां "कु तिहोः" इति सूत्रेण किमः स्थाने 'कु' इत्यादेशे 'कुतस्' इति जाते, तस्य "तद्धितश्चासर्वविभक्तिः" इत्यव्ययसंज्ञायां ततः सौ, सुपो लुकि, सकारस्य रुत्वे विसर्गे 'कुतः' इति सिद्ध्यति । तसिलभावे तु 'किम् ङसि' इत्यवस्थायां किमः कादेशे, ङसेः स्मादादेशे 'कस्मात्' इति च सिद्ध्यति ।

### यथा

'येन प्रकारेण' इति विग्रहे तृतीयान्ताद् यद्-शब्दात् "प्रकारवचने थाल्" इति सूत्रेण थाल्प्रत्ययेऽनुबन्धलोपे 'यद्+टा+था' इति जाते, तद्धितान्तत्वेन प्रातिपदिकत्वाद् विभक्तेर्लुकि 'यद् था' इति जाते "प्राग्दिशो विभक्तिः" इति थालो विभक्तित्वात् तदो दकारस्य अत्वे पररूपे 'यथा' इति जाते, प्रातिपदिकत्वात् ततः सौ, अव्ययत्वात् सुब्लुकि 'यथा' इति रूपं सिद्धम् ।

## अभ्यासार्थाः प्रश्नाः

१. **अधो निर्दिष्टानां सूत्राणामर्थं लिखत**

(क) तदस्यास्त्यस्मिन्निति मतुप्
(ख) ब्रीह्यादिभ्यश्च
(ग) अत इनिठनौ
(घ) पञ्चम्यास्तसिल्
(ङ) तिङश्च
(च) कृभ्वस्तियोगे सम्पद्यकर्तरि च्विः

२. **प्रश्नानामुत्तराणि देयानि**

(क) कस्मिन्नर्थे मतुप्प्रत्ययो भवति ?
(ख) च्वौ परेऽवर्णस्य ईत्वविधायकं सूत्रं किम् ?
(ग) केन सूत्रेण कस्य घसंज्ञा भवति ?
(घ) अतिशयविशिष्टेऽर्थे वर्तमानात् सुबन्तात् स्वार्थे कौ प्रत्ययो भवतः ?
(ङ) कीदृशेभ्यः किमादिभ्यस्थाल्-प्रत्ययो भवति ?
(च) सप्तम्यन्तेभ्यः कालार्थेभ्यः स्वार्थे दाप्रत्ययविधायकं सूत्रं लिखत ।
(छ) "सप्तम्यास्त्रल्" इति सूत्रस्यार्थं सोदाहरणं लिखत ।
(ज) तादौ हादौ च विभक्तौ परतः केन सूत्रेण किमः स्थाने कुर्भवति ?
(झ) 'गरुत्मान्' इत्यत्र तकारस्य अनुनासिकादेशः कथं न भवति ?
(ञ) "द्विवचन०" इति सूत्रं पूरयत ।

३. **अधो लिखितानि पदानि प्रयुज्य वाक्यानि रचयत**

श्रीमान्, कुतः, तथा, इतः, परितः, अभितः, तत्र, बहुत्र, अमुतः, यतः, धनवान्, यथा, सदा, कदा, पचतितमाम्, पटुतरः, कृष्णीकरोति, शीघ्रतमः, मलिनीभवति ।

४. **प्रकृतिभ्यः प्रत्ययान् विच्छेदयत**

तथा, ततः, बुद्धिमान्, एकदा, यत्र, अभितः, ब्रीहिकः, दण्डी, आयुष्मान्, रूपवान्, शीघ्रतरः ।

५. **प्रत्ययान् संयोज्य निष्पन्नरूपाणि लिखत**

तद्+थाल्, गुरु+तरप्, विद्वस्+मतुप्, शुक्ल+मतुप्, दण्ड+इष्ठन्, ब्रीहि+इनि, किम्+तसिल्, इदम्+तसिल्, परि+तसिल्, किम्+त्रल्, तद्+दा, यद्+थाल्, लघु+इष्ठन्, धावति+तमप्, योग्य+तमप्, द्रुत+तरप्, लघु+ईयसुन्, खादति+तरप्, पुत्र+मतुप्, दण्ड+मतुप् ।

६. **अधस्तनप्रयोगाणां सिद्धिप्रक्रियां प्रदर्शयत**

गोमान्, गरुत्मान्, विदुष्मान्, शुक्लः, दण्डी, व्रीहिकः, इतः, अतः, परितः, कुत्र, सदा, कदा, तथा, आढ्यतमः, लघिष्ठः, किन्तमाम्, लघुतरः, पटीयांसः, कृष्णीकरोति, गाङ्गीस्यात् ।

७. **"सप्तम्यास्त्रल्" इति सूत्रस्यार्थं सोदाहरणं लिखत ।**

८. **कोष्ठात् समुचितपदं चित्वा रिक्तस्थानं पूरयत**

(क) तसिलादिप्राग्दिशीयप्रत्ययानां विभक्तिसंज्ञा ................. इति सूत्रेण भवति । (विभक्तिश्च, प्राग्दिशो विभक्तिः)

(ख) मत्वर्थे प्रत्यये परे तान्तसान्तयोर्भसंज्ञा ................. इति सूत्रेण भवति । (यचि भम्, तसौ मत्वर्थे)

(ग) ................. घसंज्ञौ भवतः । (तमबिष्ठनौ, तरप्तमपौ, तरबीयसुनौ)

(घ) ................. प्रत्ययौ गुणवाचकशब्दादेव भवतः । (इष्ठनीयसुनौ, तमबिष्ठनौ, तरबीयसुनौ)

(ङ) तरप्तमपौ प्रत्ययौ ................. भवतः । (सुबन्तात्, तिङन्तात्, सुबन्तात् तिङन्ताच्च)

९. **समीचीनेषु कथनेषु √ चिह्नमसमीचीनेषु च × चिह्नं दर्शयत**

(क) प्रकारवाचकात् सुबन्तकिमादेर्थाल्-प्रत्ययो भवति ।

(ख) सप्तम्यन्तेभ्यः कालार्थेभ्यः स्वार्थे त्रल्प्रत्ययो भवति ।

(ग) च्विप्रत्ययस्य सर्वापहारिलोपो भवति ।

(घ) देशवाचकात् शब्दात् इष्ठन्प्रत्ययो भवति ।

(ङ) 'रूपम् अस्ति अस्याः' इति विग्रहे रूपवतीति रूपं भवति ।

१०. **किमादिशब्दाः के ? तेषां तसिल्प्रत्ययान्तानि रूपाणि विलिख्य वाक्येषु योजयत ।**

## अनुप्रयोगः

१. **अधो लिखितानि वाक्यानि पठत**

(क) सम्प्रति विश्वस्मिन् **यत्र तत्र सर्वत्रैव** अशान्तिरनुभूयते ।

(ख) त्वत्तो मम अनुजो वयसा **लघीयान्** वर्तते ।

(ग) **गोमन्तो** जना गोरसं पिबन्ति ।

(घ) **रूपवती** भार्या शत्रुर्भवतीति कथ्यते ।

(ङ) त्वं **कदा** विद्यालयं गमिष्यसि ?

(च) **यदा** भगिन्यागमिष्यति **तदा** अहं गमिष्यामि ।

(छ) तवाऽवस्था **कुतः** ईदृग् जाता ?

(ज) **यथा** गुरुः कथयति **तथै**वाचरणं कुरु ।

(झ) अहं **सदैव** गुरोराज्ञां पालयामि ।

(ञ) **इतः** परं स्त्रीप्रत्ययप्रकरणमारभ्यते ।

(ट) शीतोऽप्यङ्गारः स्पृष्टः सन् करं **कृष्णीकरोति** ।

(ठ) पाश्चात्त्याः प्राच्येभ्यो **मोदन्तेतरां** सन्ति ।

(ड) कुवेरः सर्वेभ्य **आढ्यतमो** बभूव ।

(ढ) विद्यालयं **परितस्त**रवः सन्ति ।

(ण) **मामभितः** सखायौ तिष्ठन्तौ स्तः ।

(त) संस्कृतभाषा विश्वस्यैव **प्राचीनतमा** भाषाऽस्ति ।

(थ) रामायणो माहाभारता**ल्लघुतरो** ग्रन्थो वर्तते ।

२. **तरप्प्रत्ययान्तानि पदानि प्रयुज्य आत्मनः सखिभ्यः पृथग्दर्शयत ।**

३. **तमप्प्रत्ययान्तानि पदानि प्रयुज्य स्वराष्ट्रं वर्णयित्वा एकमनुच्छेदं विलिख्य कक्षायां श्रावयत ।**

तद्धितप्रकरणं समाप्तम् ।

चतुर्विंशः पाठः

# अथ स्त्रीप्रत्ययप्रकरणम्

अधिकारसूत्रम्-

**स्त्रियाम् ४ । १ । ३ ।**

**अधिकारोऽयम् । समर्थानामिति यावत् ।**

***सरलार्थः-*** *'अजाद्यतष्टाप्' इत्याद्युत्तरसूत्रेष्वनुवृत्यर्थमिदं सूत्रम्, न तु स्वतन्त्रविधिः । 'समर्थानां प्रथमाद् वा' इति सूत्रतः प्राक् 'स्त्रियाम्' इत्यस्याधिकारो बोध्यः ।*

टाप्प्रत्ययविधायकं विधिसूत्रम्-

**अजाद्यतष्टाप् ४ । १ । ४ ।**

**अजादीनामकारान्तस्य च वाच्यं यत् स्त्रीत्वं तत्र द्योत्ये टाप् स्यात् । अजा । एडका । अश्वा । चटका । मूषिका । बाला । वत्सा । होडा । मन्दा । विलाता । मेधा । गङ्गा । सर्वा ।**

(अजाद्यतः, प्रातिपदिकात्, टाप्, प्रत्ययः, परश्च, स्त्रियाम्)

***सरलार्थः-*** *अजादिगणपठितात्, अकारान्तप्रातिपदिकाच्च स्त्रियां टाप्प्रत्ययो भवति । 'टाप्' इत्यत्र पकारटकारौ इत्संज्ञकौ ।*

*'अज' इति प्रातिपदिकात् स्त्रीत्वविवक्षायां अनेन सूत्रेण टाप्प्रत्ययेऽनुबन्धलोपे 'अज + आ' इत्यवस्थायां सवर्णदीर्घे, अजा, "प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणम्" इति परिभाषया प्रातिपदिकसंज्ञायां ततः सौ, विभक्तिकार्ये, 'अजा' इति सिद्ध्यति । एवमेव एडकशब्दात् टापि एडका, अश्व-अश्वा, चटक-चटका, बाल-बाला, वत्स-वत्सा, होड-होडा, मन्द-मन्दा, विलात-विलाता, मेध-मेधा, गङ्ग-गङ्गा, सर्व-सर्वा इत्यादिकं ज्ञेयम् ।*

*(अजादिगणे अज, अश्वाद्यदन्तपाठो व्यर्थः, अदन्तत्वादेव टाप्प्रत्ययसिद्धेरिति जिज्ञासायामाह- अजाद्युक्तिरिति । अस्यायम्भावो यत् 'वयसि प्रथमे' 'जातेरस्त्रीविषयात्' इत्यादि वक्ष्यमाणस्य ङीपो ङीषश्च अदन्तटाबपवादस्य बाधनार्थमजादिग्रहणमिति । तथा च अदन्तटाबपवादौ ङीप्ङीषौ, ङीप्ङीषोरप्यजादिटाबपवाद इति फलति ।)*

ङीप्प्रत्ययविधायकं विधिसूत्रम्-

**उगितश्च ४ । १ । ६ ।**

**उगिदन्तात्प्रातिपदिकात्स्त्रियां ङीप्स्यात् । भवती । भवन्ती । पचन्ती । दीव्यन्ती ।**

(उगितः, च, प्रातिपदिकात्, ङीप्, प्रत्ययः, परश्च, स्त्रियाम्)

***सरलार्थः-*** *उक् इति प्रत्याहारः, उक् (उ,ऋ,लृ) इत् यस्य स उगित् । इत्संज्ञकोगन्तात् प्रातिपदिकात् स्त्रियां ङीप्प्रत्ययो भवति ।*

*भवतीति विग्रहे भूधातोः शतृप्रत्यये, शतृप्रत्ययस्य ऋकारस्य इत्वाद् भवत्-शब्द उगिदन्तः । तस्मात् उगिदन्ताद् 'भवत्' इति प्रातिपदिकात् स्त्रीत्वविवक्षायां ङीप्यनुबन्धलोपे 'भवत् + ई' इति जाते, नदीसंज्ञायां 'शप्श्यनोर्नित्यम्' इति नुमि, विभक्तिकार्ये 'भवन्ती' इति रूपम् । एवमेव पचन्ती दीव्यन्ती च । डवतुप्रत्ययान्ताद् भवत्-शब्दाद् ङीपि, नुमभावेन 'भवती' इति रूपम् ।*

ङीप्प्रत्ययविधायकं विधिसूत्रम्-

**टिड्ढाणञ्द्वयसज्दघ्नञ्मात्रच्तयप्ठक्ठञ्कञ्क्वरपः ४ । १ । १५ ।**

**अनुपसर्जनं यट्टिदादि तदन्तं यददन्तं प्रातिपदिकं ततः स्त्रियां ङीप्स्यात् । कुरुचरी । नदट् नदी । देवट् देवी । सौपेर्णेयी । ऐन्द्री । औत्सी । ऊरुद्वयसी । ऊरुदघ्नी । ऊरुमात्री । पञ्चतयी । आक्षिकी । लावणिकी । यादृशी । इत्वरी ।**

(अनुपसर्जनात्, टिड्ढाणञ्द्वयसज्दघ्नञ्मात्रच्तयप्ठक्ठञ्कञ्क्वरपः, अतः, प्रातिपदिकात्, ङीप्, प्रत्ययः, परश्च, स्त्रियाम्)

***सरलार्थः-*** *टिदन्ताद् ढाणादिप्रत्ययान्ताच्च अदन्तानुपसर्जनप्रातिपदिकात् स्त्रियां ङीप् भवति ।*

*(टित्, ढ, अण्, अञ्, द्वयसच्, दघ्नच्, मात्रच्, तयप्, ठक्, ठञ्, कञ्, क्वरप्, इत्येषां समाहारद्वन्द्वात् पञ्चम्येकवचनम् । ढादयः एकादशप्रत्ययाः । टित्तु प्रत्ययोऽप्रत्ययश्च) कुरुषु चरतीति विग्रहे 'चरेष्टः' इति टप्रत्यये कुरुचर, कुरुचरशब्दः टिदन्तः अदन्तः अनुपसर्जनप्रातिपदिकश्च । तस्मात् स्त्रीत्वविवक्षायां टापं बाधित्वा ङीपि, 'यस्येति चे'ति अलोपे, स्वादिकार्ये 'कुरुचरी' इति । पचादिगणपठितो नदट्-शब्दः टित् । नदशब्दात् स्त्रियां ङीपि, अलोपे, विभक्तिकार्ये 'नदी' । एवमेव देवट्-देवी । सुपर्णाया अपत्यं स्त्रीति विग्रहे 'स्त्रीभ्यो ढक्' इति ढक्प्रत्यये, सौपर्णेय, तस्मात् स्त्रियां ङीपि, अलोपे, सौ 'सौपर्णेयी' । इन्द्रो देवता अस्येति विग्रहे 'सास्य देवता' इति अण्, ऐन्द्रशब्दात् स्त्रीत्वविवक्षायां ङीपि, ऐन्द्री (ऐन्द्री ऋक्, ऐन्द्री दिक्) । उत्स + अञ् (उत्सादिभ्योऽञ्) = औत्स, औत्सी । ऊरु + द्वयसच् (प्रमाणे द्वयसजदघ्नञ्मात्रचः) = ऊरुद्वयस, ऊरुद्वयसी । एवमेव ऊरुदघ्नी, ऊरुमात्री, नितम्बद्वयसी, जानुद्वयसी, जानुदघ्नी, गुल्फदघ्नी । पञ्चन् + तयप् (सङ्ख्याया अवयवे०) = पञ्चतय, पञ्चतयी । अक्ष + ठक् (तेन दीव्यति०) = आक्षिक, आक्षिकी । प्रस्थ + ठञ् (तेन क्रीता) = प्रास्थिक, प्रास्थिकी । लवण +*

*ठञ् (तदस्य पण्यम्) = लावणिक, लावणिकी । यद् + दृश् + कञ् (त्यदादिषु दृशोऽनालोचने०) = यादृश, यादृशी । इण् + (तुक्) + क्वरप् (इण्नशिजिसर्तिभ्यः०) = इत्वर, इत्वरी । (सर्वत्र ङीप् अलोपश्च)*

**वा. (नञ्स्नञीकक्ख्युंस्तरुणतलुनानामुपसङ्ख्यानम्) । स्त्रैणी । पौंस्नी । शाक्तिकी । याष्टीकी । आढ्यङ्करणी । तरुणी । तलुनी ।**

***सरलार्थः-*** *नञ्, स्नञ्, ईयक्, ख्युन् इति प्रत्ययान्तेभ्यः शब्देभ्यः तरुण-तलुनशब्दाभ्यां च स्त्रियां ङीब्भवति ।*

*'स्त्रिया इयम्' इत्यर्थे 'स्त्रीपुंसाभ्यां नञ्०' इति सूत्रेण 'तस्येदम्' इत्यर्थे नञ्प्रत्यये 'स्त्रैण'शब्दात् स्त्रीत्वविवक्षायां ङीपि, अकारलोपे, स्वादिकार्ये 'स्त्रैणी' इति । पुंस् + स्नञ् (स्त्रीपुंसाभ्यां नञ्०) = पौंस्न, पौंस्नी । शक्ति + ईकक् (शक्तियष्ट्योरीकक्) = शाक्तीक, शाक्तीकी, एवमेव याष्टिकी । आढ्य + (मुम्) + ख्युन् (आढ्यसुभगस्थूल०) = आढ्यङ्करण, आढ्यङ्करणी । (आढ्यङ्करणी विद्या) 'तरुणवयोविशिष्टा स्त्री' इत्यर्थे तरुणशब्दान्ङीपि, अकारलोपे, सौ 'तरुणी' । एवमेव 'तलुनवयोविशिष्टा स्त्री' इत्यर्थे 'तलुनी' ।*

ङीप्-प्रत्ययविधायकं विधिसूत्रम्-

**यञश्च ४ । १ । १६ ।**

**यञन्तात् स्त्रियां ङीप्स्यात् । अकारलोपे कृते-**

(अनुपसर्जनात्, यञः, च, प्रातिपदिकात्, ङीप्, प्रत्ययः, परश्च, स्त्रियाम्)

***सरलार्थः-*** *अनुपसर्जनाद् यञन्ताच्च प्रातिपदिकात् परः ङीप्प्रत्ययो भवति, स्त्रियां गम्यमानायाम् ।*

यकारलोपविधायकं विधिसूत्रम्-

**हलस्तद्धितस्य ६ । ४ । १५० ।**

**हलः परस्य तद्धितयकारस्योपधाभूतस्य लोप ईति परे । गार्गी ।**

(हलः, तद्धितस्य, उपधायाः, यः, लोपः, ईति)

***सरलार्थः-*** *हल उत्तरस्य तद्धितस्य उपधाभूतस्य यकारस्य लोपो भवति ईकारे परे सति ।*

*गर्गस्य गोत्रापत्यं स्त्रीति विग्रहे 'गर्गादिभ्यो यञ्' इति यञ्प्रत्ययेऽनुबन्धलोपे, आदिवृद्धौ 'यस्येति चे'ति अलोपे, गार्ग्यशब्दात् स्त्रीत्वविवक्षायां ङीपि, अकारलोपे, 'गार्ग्य् + ई' इत्यवस्थायां 'हलस्तद्धितस्य' इत्युपधाया यलोपे, स्वादिकार्ये, 'गार्गी' इति ।*

ष्फप्रत्ययविधायकं विधिसूत्रम्-

**प्राचां ष्फः तद्धितः ४ । १ । १७ ।**

**यञन्तात् ष्फो वा स्यात्स च तद्धितः ।**

(यञः, प्रातिपदिकात्, प्राचाम्, तद्धितः, ष्फः, वा, स्त्रियाम्)

***सरलार्थः-*** *यञन्तात् प्रातिपदिकात् स्त्रीत्वविवक्षायां विभाषया ष्फप्रत्ययो भवति स च तद्धितः ।*

ङीष्प्रत्ययविधायकं विधिसूत्रम्-

**षिद्गौरादिभ्यश्च ४ । १ । ४१ ।**

**षिद्भ्यो गौरादिभ्यश्च स्त्रियां ङीष् स्यात् । गार्ग्यायणी । नर्तकी । गौरी । अनडुही । अनड्वाही । आकृतिगणोऽयम् ।**

(अनुपसर्जनात्, षिद्गौरादिभ्यः, च, प्रातिपदिकात्, ङीप्, प्रत्ययः, परश्च, स्त्रियाम्)

***सरलार्थः-*** *ष् इत् येषां ते षितः, गौर आदिर्येषां ते गौरादयः, षितश्च गौरादयश्च षिद्गौरादयः, तेभ्यः षिद्गौरादिभ्यः स्त्रियां ङीष् भवति । षकारङकारौ इतौ ।*

*गार्ग्यायणी- गर्गस्य गोत्रापत्यं स्त्री इत्यर्थे गर्गशब्दात् "गर्गादिभ्यो यञ्" इति सूत्रेण यञ्प्रत्यये गार्ग्य इत्यस्मात् "प्राचां ष्फः तद्धितः" इति सूत्रेण ष्फप्रत्ययेऽनुबन्धलोपे फस्य आयनादेशे गार्ग्यायणशब्दस्य षित्वाद् अनेन सूत्रेण ङीषि गार्ग्यायणी इति रूपम् ।*

*'नृत्यति क्रियाकुशला' इत्यर्थे नृधातोः 'शिल्पिनि ष्वुन्' इति ष्वुन्प्रत्ययेऽनुबन्धलोपे, वोरकादेशे, गुणे रपरत्वे च 'नर्तक' इति, तस्मात् स्त्रीत्वविवक्षायां षित्वाद् ङीषि, अकारलोपे, विभक्तिकार्ये 'नर्तकी' इति रूपम् । एवं गौरादिगणपठिताद् गौरशब्दाद् ङीषि 'गौरी' इत्यपि । गौरादिगणान्तर्गतादनडुह्शब्दात् अनेनैव सूत्रेण ङीषि "आमनडुहः स्त्रियां वा" इति विभाषया आम्प्रत्यये अनडुही, अनड्वांही इति रूपे भवतः ।*

ङीप्प्रत्ययविधायकं विधिसूत्रम्-

**वयसि प्रथमे ४ । १ । २० ।**

**प्रथमवयोवाचिनोऽदन्तात् स्त्रियां ङीप्स्यात् । कुमारी ।**

(अनुपसर्जनात्, वयसि, प्रथमे, अतः प्रातिपदिकात्, ङीप्, प्रत्ययः, परश्च, स्त्रियाम्)

***सरलार्थः-*** *अनुपसर्जनात् प्रथमवयोवाचिनो ह्रस्वाकारान्तात् प्रातिपदिकात् स्त्रियां ङीप्प्रत्ययो भवति ।*

*कुमारत्ववयोविशिष्टा स्त्रीति विग्रहे कुमारवयोवाचकाद् अदन्तकुमारशब्दात् स्त्रीत्वविवक्षायां प्रकृतसूत्रेण ङीपि, अकारलोपे, स्वादिकार्ये 'कुमारी' ।*

ङीप्प्रत्ययविधायकं विधिसूत्रम्-

**द्विगोः ४ । १ । २१ ।**

**अदन्ताद् द्विगोर्ङीप्स्यात् । त्रिलोकी । अजादित्वात्त्रिफला । त्र्यनीका सेना ।**

(अनुपसर्जनाद्, अदन्ताद्, द्विगोः, प्रातिपदिकात्, ङीप्, प्रत्ययः, परश्च, स्त्रियाम्)

***सरलार्थः***- *द्विगुसमासनिष्पन्नाददन्तशब्दात् स्त्रियां ङीब्भवति ।*

*'त्रयाणां लोकानां समाहारः' इति विग्रहे 'तद्धितार्थोत्तरपदसमाहारे च' इति समासे, द्विगुसंज्ञायाम्, 'अकारान्तोत्तरपदो द्विगुः स्त्रियामिष्टः' इति वार्तिकेन स्त्रीत्वे, त्रिलोकशब्दादनेन ङीपि, अकारलोपे, सौ 'त्रिलोकी' । 'त्रिफला' इत्यत्र तु अजादित्वान्ङीपं बाधित्वा टाब् भवति । 'त्रयाणां फलानां समाहारः' इति विग्रहे द्विगुसमासे, स्त्रीत्वे, 'द्विगोः' इति ङीपं बाधित्वा अजादित्वाद् 'अजाद्यतष्टाप्' इत्यनेन टापि, 'त्रिफला' इति । एवमेव त्र्यनीका (त्रयाणामनीकानां समाहारः) ।*

ङीप्प्रत्ययविधायकम्, नकारादेशविधायकञ्च विधिसूत्रम्-

**वर्णादनुदात्तात्तोपधात्तो नः ४ । १ । ३९ ।**

**वर्णवाची योऽनुदात्तान्तस्तोपधस्तदन्तादनुपसर्जनात्प्रातिपदिकाद्वा ङीप् तकारस्य नकारादेशश्च । एनी, एता । रोहिणी, रोहिता ।**

(वर्णाद्, अनुदात्तात्, तोपधाद्, अनुपसर्जनात्, प्रातिपदिकाद्, वा ङीप्, प्रत्ययः, परश्च, तः, नः, स्त्रियाम्)

***सरलार्थः***- *वर्णवाचकानुदात्तान्ततोपधो यः शब्दः तदन्तादनुपसर्जनात् प्रातिपदिकात् विभाषया ङीप्प्रत्ययः, तकारस्य नकारादेशश्च भवतः ।*

*एतशब्दः चित्रवर्णवाची तस्मात् स्त्रीत्वविवक्षायां अनेन सूत्रेण ङीपि तकारस्य नकारे च एनी इति रूपम् । एतदभावे टापि 'एता' इति । तथैव रोहितशब्दात् स्त्रीत्वविवक्षायां रोहिणी, रोहिता इति बोध्यम् ।*

ङीष्प्रत्ययविधायकं विधिसूत्रम्-

**वोतो गुणवचनात् ४ । १ । ४४ ।**

**उदन्ताद् गुणवाचिनो वा ङीष् स्यात् । मृद्वी, मृदुः ।**

(उतः, गुणवचनाद्, अनुपसर्जनात्, प्रातिपदिकाद्, वा, ङीष्)

***सरलार्थः-*** *उदन्ताद् गुणवाचिनः शब्दात् स्त्रियां विभाषया ङीष् प्रत्ययो भवति। मृदुशब्दाद् अनेन विभाषया ङीषि 'मृद्वी, मृदुः' इति।*

विभाषया ङीष्प्रत्ययविधायकं विधिसूत्रम्-

**बह्वादिभ्यश्च ४।१।४५।**

**एभ्यो वा ङीष् स्यात्। बह्वी, बहुः। (कृदिकारादक्तिनः।) रात्री, रात्रिः। (सर्वतोऽक्तिन्नर्थादित्येके।) शकटी। शकटिः।**

(बह्वादिभ्यः, अनुपसर्जनात्, प्रातिपदिकात्, वा, ङीष्, स्त्रियाम्)

***सरलार्थः*** *बह्वादिगणपठितेभ्यः प्रातिपदिकेभ्यः स्त्रियां विभाषया ङीष् भवति।*

ङीष्प्रत्ययविधायकं विधिसूत्रम्-

**पुंयोगादाख्यायाम् ४।१।४८।**

**या पुमाख्या पुंयोगात् स्त्रियां ततो ङीष्। गोपस्य स्त्री गोपी। (पालकान्तान्न)**

(पुंयोगाद्, स्त्रियाम्, आख्यायाम्, अनुपसर्जनात्, प्रातिपदिकाद्, ङीष्)

***सरलार्थः-*** *पुंसा योगः पुंयोगः। पुंयोगाद् हेतोर्यत् प्रातिपदिकं स्त्रियां वर्तते तस्मात् ङीष्प्रत्ययो भवति।*

*गोपस्य स्त्री इत्यर्थे गोपशब्दान्ङीषि, अकारलोपे, सौ 'गोपी' इति। एवमेव गणकस्य स्त्री, गणकी।*

इत्वविधायकं विधिसूत्रम्-

**प्रत्ययस्थात्कात्पूर्वस्यात इदाप्यसुपः ७।३।४४।**

**प्रत्ययस्थात्कात्पूर्वस्याकारस्येकारः स्यादापि स आप्सुपः परो न चेत्। गोपालिका। अश्वपालिका। सर्विका। कारिका। अतः किम्? नौका। प्रत्ययस्थात्किम्? शक्नोतीति शका। असुपः किम्? बहुपरिव्राजका नगरी। (सूयाद्देवतायां चाब्वाच्यः।) सूर्यस्य स्त्री देवता सूया। देवतायां किम्? (सूर्यागस्त्ययोश्छे च ङ्यां च।) यलोपः। सूरी- कुन्तीः मानुषीयम्।**

(अङ्गस्य, प्रत्ययस्थात्, कात्, पूर्वस्य, अतः, इद्, आपि, असुपः)

***सरलार्थः-*** *प्रत्ययस्थात् ककारात् पूर्वस्य अकारस्य इकारादेशो भवति आपि परतः, स चेद् आप् सुपः परो न भवति।*

आनुगागमविधायकम्, ङीष्विधायकञ्च सूत्रम्-

**इन्द्रवरुणभवशर्वरुद्रमृडहिमारण्ययवयवनमातुलाचार्याणामानुक् ४ । १ । ४९ ।**

**एषामानुगागमः स्यात् ङीष् च । इन्द्रस्य स्त्री इन्द्राणी । वरुणानी । भवानी । शर्वाणी । रुद्राणी । मृडानी ।**

(इन्द्र-वरुण-भव-शर्व-रुद्र-मृड-हिमारण्य-यव-यवन-मातुलाचार्याणाम्, आनुक्, पुंयोगाद्, अनुपसर्जनाद्, ङीष्)

***सरलार्थः-*** *अनुपसर्जनेभ्य इन्द्र-वरुण-भव-शर्व-रुद्र-मृड-हिम-अरण्य-यव-यवन-मातुल-आचार्येभ्यः प्रातिपदिकेभ्यः पुंयोगात् स्त्रियां ङीष्, ङीष्सन्नियोगशिष्टः आनुगागमश्च भवतः ।*

*इन्द्र-वरुण-भव-शर्व-रुद्र-मृडशब्दानां मातुलाचार्ययोश्च 'पुंयोगादाख्यायाम्' इत्यनेनैव ङीषि सिद्धे अनेन आनुगागममात्रं विधीयते, हिमारण्ययवयवनानान्तु आनुक्, ङीष् चेत्युभयं विधीयते, तत्र पुंयोगस्यासम्भवादिति बोध्यम् ।*

*इन्द्रस्य स्त्रीत्यर्थे ङीषि, आनुगागमेऽनुबन्धलोपे 'इन्द्र + आनी' इति जाते, सवर्णदीर्घे, णत्वे, सौ 'इन्द्राणी' । एवमेव वरुणस्य स्त्री वरुणानी, भवस्य स्त्री भवानी, शर्वस्य स्त्री शर्वाणी, रुद्रस्य स्त्री रुद्राणी, मृडस्य स्त्री मृडानी ।*

**वा. (हिमारण्ययोर्महत्त्वे) महद्धिमं हिमानी । महदरण्यमरण्यानी ।**

***सरलार्थः-*** *महत्त्वविशिष्टाभ्यां हिमारण्यशब्दाभ्यां आनुङ्ङीषौ भवतः ।*

*महद् हिममित्यर्थे हिमशब्दान्ङीषि, आनुगागमे च कृते 'हिम + आनी' इत्यवस्थायां सवर्णदीर्घे, ततः सौ 'हिमानी' इति । एवमेव महदरण्यमित्यर्थे अरण्यशब्दाद् 'अरण्यानी' इत्यपि ।*

**वा. (यवाद्दोषे) । दुष्टो यवो यवानी ।**

***सरलार्थः-*** *दुष्टयवे वृत्तौ आनुङ्ङीषौ भवतः ।*

*'दुष्टो यवः' इत्यर्थे यवशब्दान्ङीषि आनुगागमे च कृते 'यव + आनी' इत्यवस्थायां सवर्णदीर्घे, ततः सौ 'यवानी' ।*

**वा. (यवनाल्लिप्याम्) । यवनानां लिपिर्यवनानी ।**

**सरलार्थः-** लिप्याम् = अक्षरविन्यासे यवनशब्दाद् आनुङ्ङीषौ भवतः ।

*'यवनानां लिपिः' इत्यर्थे यवनशब्दान्ङीषि आनुगागमे च कृते, 'यवन + आनी' इत्यवस्थायां सवर्णदीर्घे, ततः सौ 'यवनानी' ।*

**वा. (मातुलोपाध्याययोरानुग्वा) । मातुलानी, मातुली । उपाध्यायानी, उपाध्यायी ।**

*सरलार्थः- मातुलोपाध्याययोरानुगागमो विकल्पेन भवति, ङीष् तु नित्यमेव । आनुगभावेऽपि पक्षे ङीष् तु भवत्येव । मातुलस्य स्त्रीत्यर्थे मातुलशब्दान्ङीषि, वैकल्पिके आनुगागमे, सवर्णदीर्घे, स्वादिकार्ये 'मातुलानी', आनुगभावे तु 'मातुल + ई' इत्यवस्थायां 'यस्येति च' इति अकारलोपो - मातुली । एवमेव उपाध्यायस्य स्त्रीत्यर्थे उपाध्यायशब्दाद् 'उपाध्यायानी, उपाध्यायी' इत्यपि ।*

**वा. (आचार्यादणत्वं च) । आचार्यस्य स्त्री आचार्यानी ।**

***सरलार्थः-*** *आचार्यात् पुंयोगे ङीषानुगौ भवतः, णत्वनिषेधश्च भवति ।*

*आचार्यस्य स्त्रीत्यर्थे आचार्यशब्दान्ङीषि, आनुगागमे 'अट्कुप्वाङ्०' इति प्राप्तस्य णत्वस्य निषेधे च कृते, सवर्णदीर्घे, सौ 'आचार्यानी' । (या स्वयं धर्मोपदेष्ट्री तत्र ङीषानुगौ न भवतः, आचार्या ।)*

**वा. (अर्यक्षत्रियाभ्यां वा स्वार्थे) । अर्याणी, अर्या । क्षत्रियाणी, क्षत्रिया ।**

***सरलार्थः-*** *अर्यक्षत्रियाभ्यां ङीषानुगौ भवतः स्वार्थे ।*

*अर्यजातीया स्त्रीत्यर्थे अर्यशब्दाद् विकल्पेन ङीषि, आनुगागमे च कृते 'अर्य + आनी' इति जाते, सवर्णदीर्घे, णत्वे, सौ 'अर्याणी', ङीषानुगभावे तु टापि, 'आर्या' इति । एवमेव क्षत्रियजातीया स्त्रीत्यर्थे क्षत्रिय-शब्दात् 'क्षत्रियाणी, क्षत्रिया' इत्यपि ।*

ङीष्प्रत्ययविधायकं विधिसूत्रम्-

**क्रीतात्करणपूर्वात् ४ । १ । ५० ।**

**क्रीतान्ताददन्तात् करणादेः स्त्रियां ङीष् स्यात् । वस्त्रक्रीती । क्वचिन्न । धनक्रीता ।**

(करणपूर्वात्, क्रीतात्, अतः, प्रातिपदिकात्, स्त्रियाम्, ङीष्)

***सरलार्थः-*** *करणपूर्वात् क्रीतान्ताद् अदन्ताद् प्रातिपदिकात् स्त्रियां ङीष्प्रत्ययो भवति ।*

*वस्त्रेण क्रीता इति विग्रहे अनेन वस्त्रक्रीतशब्दाद् ङीष् । कुत्रचिदयं ङीष् न भवति, धनक्रीता इत्यादौ ।*

विभाषया ङीष्प्रत्ययविधायकं विधिसूत्रम्-

**स्वाङ्गाच्चोपसर्जनादसंयोगोपधात् ४ । १ । ५४ ।**

**असंयोगोपधमुपसर्जनं यत् स्वाङ्गं तदन्ताददन्ताद् ङीष् वा स्यात् । केशानतिक्रान्ता - अतिकेशी, अतिकेशा । चन्द्रमुखी चन्द्रमुखा । असंयोगोपधात्किम् ? सुगुल्फा । उपसर्जनात्किम् ? शिखा ।**

(स्वाङ्गाद्, उपसर्जनाद्, असंयोगोपधात्, अतः, प्रातिपदिकात्, वा, ङीष्)

***सरलार्थः-*** *संयोगः उपधायां यस्य नास्ति तादृशो यः उपसर्जनस्वाङ्गवाचीशब्दः तदन्ताद् अदन्तात् प्रातिपदिकात् स्त्रियां विभाषया ङीष् भवति ।*

*केशान् अतिक्रान्ता स्त्री इत्यर्थे अतिकेशशब्दादनेन सूत्रेण ङीषि अतिकेशी इति, ङीषभावे टापि अतिकेशा । चन्द्र इव मुखं यस्याः सा इत्यर्थे निष्पन्नात् चन्द्रमुखशब्दादनेन विभाषया ङीष्प्रत्यये 'चन्द्रमुखी चन्द्रमुखा' इति रूपे ।*

ङीष्निषेधविधायकं विधिसूत्रम्-

**न क्रोडादिबह्वचः ४ । १ । ५६ ।**

**क्रोडादेर्बह्वचश्च स्वाङ्गान्न ङीष् । कल्याणक्रोडा । आकृतिगणोऽयम् । सुजघना ।**

(क्रोडादिबह्वचः, च, स्वाङ्गात्, न ङीष्)

***सरलार्थः-*** *क्रोडादेः, बह्वचश्च स्वाङ्गवाचिशब्देभ्यः परः ङीष्प्रत्ययो न भवति ।*

ङीष्निषेधविधायकं विधिसूत्रम्-

**नखमुखात् संज्ञायाम् ४ । १ । ५८ ।**

**न ङीष् ।**

(संज्ञायाम्, नखमुखात्, स्वाङ्गात्, स्त्रियाम्, न, ङीष्)

***सरलार्थः-*** *स्वाङ्गवाचिनौ यौ नख-मुखौ शब्दौ तदन्तात् प्रातिपदिकात् स्त्रियां ङीष् न भवति संज्ञायां गम्यमानायाम् ।*

णत्वविधायकं विधिसूत्रम्-

**पूर्वपदात् संज्ञायामगः ८ । ४ । ३ ।**

**पूर्वपदस्थान्निमित्तात्परस्य नस्य णः स्यात् संज्ञायां न तु गकारव्यवधाने । शूर्पणखा । गौरमुखा । संज्ञायां किम् ? ताम्रमुखी कन्या ।**

(पूर्वपदात् रषाभ्याम्, नः, णः, संज्ञायाम्, अगः)

***सरलार्थः-*** *पूर्वपदस्थाभ्यां रेफषकाराभ्यां परस्य नकारस्य स्थाने णकारादेशो भवति संज्ञायां गम्यमानायां न तु गकारव्यवधाने ।*

***शूर्पणखा*** *– शूर्पाणि इव नखानि यस्याः सा इत्यर्थे समासानन्तरं शूर्पनखशब्दात् "स्वाङ्गाच्चोपसर्जनादसंयोगोपधात्" इति सूत्रेण विभाषया ङीषि प्राप्ते "नखमुखात्संज्ञायाम्"*

*इति सूत्रेण तन्निषेधे टापि शूर्पनखा इति जाते प्रकृतसूत्रेण नस्य णत्वे शूर्पणखा इति सिद्धम् । एवमेव गौरमुखा ज्ञेया ।*

ङीष्प्रत्ययविधायकं विधिसूत्रम्-

**जातेरस्त्रीविषयादयोपधात् ४ । १ । ६३ ।**

**जातिवाचि यन्न च स्त्रियां नियतमयोपधं ततः स्त्रियां ङीष् स्यात् । तटी । वृषली । कठी । बह्वृची । जातेः किम् ? मुण्डा । अस्त्रीविषयात्किम् ? बलाका । अयोपधात्किम् ? क्षत्रिया । योपधप्रतिषेधे हयगवयमुकयमनुष्यमत्स्यानामप्रतिषेधः (वा.) । हयी । गवयी । मुकयी । हलस्तद्धितस्येति यलोपः । मनुषी । मत्स्यस्य ङ्याम् (वा.) । यलोपः । मत्सी ।**

(अस्त्रीविषयाद्, अयोपधाद्, जातेः, प्रातिपदिकात्, स्त्रियाम्, ङीष् )

***सरलार्थः-*** *अनियतस्त्रीलिङ्गविषयाद् अयोपधाद् जातिवाचकात् प्रातिपदिकात् स्त्रियां ङीष् भवति ।*

ङीष्प्रत्ययविधायकं विधिसूत्रम्-

**इतो मनुष्यजातेः ४ । १ । ६५ ।**

**ङीष् । दाक्षी ।**

(मनुष्यजातेः, इतः, प्रातिपदिकात्, स्त्रियाम्, ङीष्)

***सरलार्थः-*** *ह्रस्वेकारान्ताद् मनुष्यजातिवाचिनः प्रातिपदिकात् स्त्रियां ङीष् प्रत्ययो भवति ।*

ऊङ्प्रत्ययविधायकं विधिसूत्रम्-

**ऊङुतः ४ । १ । ६६ ।**

**उदन्तादयोपधान्मनुष्यजातिवाचिनः स्त्रियामूङ् स्यात् । कुरूः । अयोपधात्किम् ? अध्वर्युब्राह्मणी ।**

(उतः, अयोपधात्, मनुष्यजातेः, प्रातिपदिकात्, स्त्रियाम्, ऊङ्)

***सरलार्थः-*** *ह्रस्व-उकारान्ताद् अयोपधाद् मनुष्यजातिवाचिनः प्रातिपदिकात् स्त्रियां गम्यमानायाम् ऊङ् प्रत्ययो भवति ।*

*'कुरुजातेः स्त्री' इति विग्रहे कुरुशब्दादूङ्यनुबन्धलोपे, 'कुरु + ऊ' इत्यवस्थायां सवर्णदीर्घे, स्वादिकार्ये 'कुरूः' इति रूपम् ।*

ऊङ्प्रत्ययविधायकं विधिसूत्रम्-

**पङ्गोश्च ४ । १ । ६८ ।**

**पङ्गूः । (श्वशुरस्योकाराकारलोपश्च ।) श्वश्रूः ।**

(पङ्गोः, च, स्त्रियाम्, ऊङ्)

***सरलार्थः-*** *उकारान्तात् पङ्गुशब्दात् स्त्रियामूङ् भवति । पङ्गुत्ववती स्त्रीत्यर्थे पङ्गुशब्दात् स्त्रीत्वविवक्षायामूङि, सवर्णदीर्घे, स्वादिकार्ये 'पङ्गूः' इति ।*

ऊङ्प्रत्ययविधायकं विधिसूत्रम्-

**ऊरूत्तरपदादौपम्ये ४ । १ । ६९ ।**

**उपमानवाची पूर्वपदमूरूत्तरपदं यत्प्रातिपदिकं तस्मादूङ् स्यात् । करभोरूः ।**

(ऊरूत्तरपदाद्, औपम्ये, स्त्रियाम्, ऊङ्)

***सरलार्थः-*** *उपमानवाची पूर्वशब्दः यस्य, उरूत्तरपदञ्च यत्र तादृशात् प्रातिपदिकात् स्त्रियाम् ऊङ्प्रत्ययो भवति ।*

ऊङ्प्रत्ययविधायकं विधिसूत्रम्-

**संहितशफलक्षणवामादेश्च ४ । १ । ७० ।**

**अनौपम्यार्थं सूत्रम् । संहितोरूः । शफोरूः । लक्षणोरूः । वामोरूः ।**

(संहित-शफ-लक्षण-वामादेः, च, उरूत्तरपदात्, स्त्रियाम्, ऊङ्)

***सरलार्थः-*** *संहितशफलक्षणवामशब्दाः पूर्वपदे यस्य तादृशाद् उरूत्तरपदात् प्रातिपदिकात् स्त्रियाम् ऊङ्प्रत्ययो भवति ।*

ङीन्प्रत्ययविधायकं विधिसूत्रम्-

**शाङ्गर्रवाद्यञो ङीन् ४ । १ । ७३ ।**

**शाङ्गर्रवादेरञो योऽकारस्तदन्ताच्च जातिवाचिनो ङीन् स्यात् । शार्ङ्गरवी । बैदी । ब्राह्मणी । नृनरयोर्वृद्धिश्च (वा.) नारी ।**

(शाङ्गर्रवाद्यञः, जातेः, प्रातिपदिकात्, स्त्रियाम्, ङीन्)

***सरलार्थः-*** *शाङ्गर्रवादिभ्यः, अञन्तेभ्यश्च प्रातिपदिकेभ्यः स्त्रियां ङीन्-प्रत्ययो भवति । ङकारनकारौ इतौ ।*

तिप्रत्ययविधायकं विधिसूत्रम्-

**यूनस्तिः ४ । १ । ७७ ।**

**युवञ्छब्दात् स्त्रियां तिः प्रत्ययः स्यात् । युवतिः ।**

(यूनः, प्रातिपदिकात्, स्त्रियाम्, तिः)

***सरलार्थः-*** *युवन्-शब्दात् स्त्रियां तिप्रत्ययो भवति । 'ऋन्नेभ्यो ङीप्' इत्यस्यापवादः ।*

*'युवावस्था विशिष्टा स्त्री' इत्यर्थे युवन्-शब्दात् तिप्रत्यये, तद्धितसंज्ञायां 'स्वादिष्वसर्वनामस्थाने' इति पदत्वाद् 'नलोपः प्रातिपदिकान्तस्य' इति नलोपे, ततः सौ, रुत्वे विसर्गे 'युवतिः' इति रूपं सिद्धम् ।*

## प्रयोगसिद्धिप्रकारः

### कुमारी

कुमारत्ववयोविशिष्टा स्त्रीति विग्रहे कुमारवयवाचिनोऽदन्तकुमारशब्दात् स्त्रीत्वविवक्षायां 'वयसि प्रथमे' इति सूत्रेण ङीप्यनुबन्धलोपे 'कुमार + ई' इति जाते 'यस्येति चे'ति भसंज्ञकस्य अकारस्य लोपे, वर्णसम्मेलने 'कुमारी' इति जाते "प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणम्" इति परिभाषया प्रातिपदिकसंज्ञायां स्वादिकार्ये 'कुमारी' इति रूपं सिद्धम् ।

### भवन्ती

उगिदन्ताद् 'भवत्' इति प्रातिपदिकात् स्त्रीत्वविवक्षायाम् 'उगितश्च' इति सूत्रेण ङीप्यनुबन्धलोपे 'भवत् + ई' इति जाते, नदीसंज्ञायां 'शप्श्यनोर्नित्यम्' इति नुमागमेऽनुबन्धलोपे 'भव न् त् ई' इति जाते, वर्णसम्मेलने, विभक्तिकार्ये 'भवन्ती' इति रूपं सिद्धम् ।

### युवतिः

'युवावस्था विशिष्टा स्त्री' इत्यर्थे युवन्-शब्दात् स्त्रीत्वविवक्षायां 'यूनस्तिः' इत्यनेन तिप्रत्यये 'युवन् ति' इति जाते 'तद्धिताः' इति तद्धितसंज्ञायां 'स्वादिष्वसर्वनामस्थाने' इति पदत्वाद् 'नलोपः प्रातिपदिकान्तस्य' इति सूत्रेण नलोपे 'युवति' इति जाते, ततः सौ, रुत्वे विसर्गे, 'युवतिः' इति रूपं सिद्धम् ।

## अभ्यासार्थाः प्रश्नाः

१. **अधस्तनसूत्राणामर्थं लिखत**

(क) अजाद्यतष्टाप्  (ख) वयसि प्रथमे  (ग) षिद्गौरादिभ्यश्च

(घ) उगितश्च  (ङ) ऋन्नेभ्यो ङीप्  (च) द्विगोः

(छ) ऊङुतः  (ज) यूनस्तिः

२. **प्रश्नानामुत्तराणि देयानि**

(क) प्रथमवयोवाचिनोऽदन्तात् स्त्रियां केन सूत्रेण ङीप् ?

(ख) नकारान्तेभ्यः प्रातिपदिकेभ्यः स्त्रियां केन सूत्रेण ङीप्प्रत्ययो भवति ?

(ग) के उगितः ?

(घ) 'टिड्ढाणञ्०' इति सूत्रं पूरयत ।

(ङ) 'आचार्यादणत्वं च' इति वार्तिकं किं करोति ?

(च) 'इन्द्रवरुण०' इति सूत्रं पूरयत ।

(छ) 'गौरी' इत्यत्र केन सूत्रेण ङीष् ?

३. **अधो लिखितानि पदानि प्रयुज्य वाक्यानि रचयत**

यवानी, वत्सा, किशोरी, रुद्राणी, कुरूः, गौरी, आचार्यानी, दाक्षायणी, अर्या, क्षत्रियाणी, युवतिः, वरुणानी, भवन्ती, चटका, गङ्गा, दण्डिनी, इत्वरी, गोपी, नर्तकी ।

४. **अधो लिखितानां पुंलिङ्गपदानां स्त्रीलिङ्गपदेषु परिवर्तनं कुरुत**

अश्वः, पितामहः, बालः, मृडः, मातुलः, भवः, युवा, कर्ता ।

५. **प्रत्ययान् संयुज्य निष्पन्नरूपाणि लिखत**

एडक + टाप्, हर्तृ + ङीप्, युवन् + ति, नदट् + ङीष्, पङ्गु + ऊङ्, सौपर्णेय + ङीप्, इन्द्र + ङीष्, यादृश + ङीप्, रुद्र + ङीष्, सर्व + टाप्, छत्रिन् + ङीप्, गार्ग्य + ङीप्, त्रिलोक + ङीप्, गोप + ङीष्, कुमार + ङीप् ।

६. **अधस्तनप्रयोगाणां सिद्धिप्रक्रियां दर्शयत**

अजा, कुरुचरी, दीव्यन्ती, कुमारी, कुरूः, कर्त्री, युवतिः, इन्द्राणी, गौरी, पङ्गूः, हिमानी, यवानी, मातुलानी, आचार्यानी, नर्तकी, गोपी, त्रिलोकी, तरुणी, गार्गी ।

७. **रिक्तस्थानं पूरयत**

(क) 'आचार्यस्य स्त्री' इत्यर्थे .......................... भवति । (आचार्यानी, आचार्या)

(ख) 'पचन्ती' इत्यत्र .................... इति सूत्रेण ङीप् भवति । (ऋन्नेभ्यो ङीप्, उगितश्च)

(ग) ऋदन्तेभ्यः स्त्रियां .................... भवति । (ङीप्, ङीष्)

(घ) अजादिगणपठितेभ्यः स्त्रियां ................ भवति । (टाप्, ङीप्)

(ङ) गार्ग्यशब्दान्ङीपि .................... भवति । (गार्ग्यी, गार्गी)

८. **अधस्तनविग्रहेषु स्त्रियां निष्पन्नानि रूपाणि लिखत**

यथा - गोपस्य स्त्री = गोपी

| | | | |
|---|---|---|---|
| तलुनवयोविशिष्टा स्त्री | = ............ | आर्यजातीया स्त्री | = ............ |
| उपाध्यायस्य स्त्री | = ............ | कुरुजातेः स्त्री | = ............ |
| पुङ्गत्ववती स्त्री | = ............ | गार्ग्यस्य स्त्री | = ............ |
| क्षत्रियजातीया स्त्री | = ............ | मातुलस्य स्त्री | = ............ |

## अनुप्रयोगः

१. **अधो लिखितानि वाक्यानि पठत**

(क) **अजा** वने चरन्ति ।

(ख) **ऊरुमात्री** वाग्मती नदी सम्प्रति दुर्गन्धा जाता ।

(ग) **गोपी** गोपस्य सेवां करोति ।

(घ) **आचार्यानी** आचार्यस्य आज्ञां पालयति ।

(ङ) **कुमारी युवतिः** कुमारेण सह क्रीडति ।

२. **स्त्रीप्रत्ययान्तानि पदानि प्रयुज्य पञ्च वाक्येषु भगवत्या वाग्देव्या वर्णनं कुरुत ।**

स्त्रीप्रत्ययप्रकरणं समाप्तम् ।